श्रीमहेन्द्रसंस्कृतविश्वविद्यालयग्रन्थमालायाः सप्तत्रिंशं पुष्पम्

पं. छविलाल [illegible] प्रणीतम्

सुन्दरचरितनाटकम्

टीकाकारः

प्रो. नीलमणिढुङ्गानाः

प्रकाशकः

महेन्द्रसंस्कृतविश्वविद्यालयः

श्रीमहेन्द्रसंस्कृतविश्वविद्यालयग्रन्थमालायाः सप्तत्रिंशं पुष्पम्

पं. छविलालसूरिप्रणीतम्

सुन्दरचरितनाटकम्

{यशोदाभिधया संस्कृतटीकया समीक्षया चालङ्कृतं महेन्द्रसंस्कृत-
विश्वविद्यालयीयसाहित्योत्तरमध्यमद्वितीयवर्षस्य पाठ्यक्रमे निर्धारितम्}

टीकाकारः
प्रा. नीलमणिढुङ्गानाः

प्रकाशकः
महेन्द्रसंस्कृतविश्वविद्यालयः
बेलझुण्डी, दाङ

प्रकाशकः
महेन्द्रसंस्कृतविश्वविद्यालयः
बेलझुण्डी, दाङ

प्रकाशनम्
चैत्राष्टमी, वि.सं. २०५५

प्रकाशितपुस्तकानि - १००० प्रतिरूपाणि

मूल्यम् - रू. ९५/-

कम्प्यूटरटङ्कणम्
क्वालिटी लेजर प्रिन्ट, बागबजार,
दूरभाषसङ्ख्या (फोन नं.) २४२६५६

मुद्रकः
नेपाल प्रिन्टर्स एण्ड ट्रेडर्स सहकारी लिमिटेड
फोन : ४२७४५६,

सम्मतिः

संस्कृतजगति लब्धप्रतिष्ठेन नाट्यकलाकोविदेन परमरमणीयकाव्य-कलाकलनकुशलेन पण्डितच्छविलालसूरिणा विरचितमस्य विश्वविद्यालयस्य साहित्यविषयोत्तरमध्यमद्वितीयवर्षीयपाठ्यक्रमे निर्धारितं सुन्दरचरितनाटकं ससमीक्षं यशोदासंस्कृतटीकयाऽलङ्कृतं संप्रति प्रकाश्यत इति प्रमोदावहोऽयं विषयः ।

देशेऽस्माकं संस्कृतवाङ्मयसाधकानां काव्यप्रणयनप्रवीणानां प्रतिभा-वतां विदुषां सङ्ख्या नास्त्यविशाला । लिच्छवि-मल्ल-शाहकालेषु तैः प्रणीतानि कानिचित् ग्रन्थरत्नानि राष्ट्रियाभिलेखालये सुरक्षितानि, कानिचिच्च विद्वद्भिः स्वयमेव, सङ्घ-संस्थाभिश्च प्रकाशितानि सन्ति । तेषु परमरमणीयं सुन्दरचरितं नाम नाटकं रामायणस्य कथानकमुपजीव्य पं. छविलालसूरिणा १८१४ तमे शकाब्दे प्रणीतमिति 'अष्टादशशते शाके चतुर्दशसमन्विते । मार्गशीर्षे सिते पक्षे समाप्तिमिदमन्वगात् ।।' इति तल्लिखितेन पद्येन ज्ञायते।

पौरस्त्यनाट्यसिद्धान्तमनुसृत्य प्रणीतेऽस्मिन् नाटके काव्यकलाया नाट्यकलायाश्च सुन्दरः समन्वयो विलसति । तत्रत्यानि पद्यानि कोमलकान्त-पदावलिभिरनुप्रासयमकोपमोत्प्रेक्षाश्लेषाद्यलङ्कारैश्च मण्डितानि व्युत्पन्नधी-षणैरेव सरलतयावगम्यानि प्रतिभान्ति । ससमीक्षस्य टीकाग्रन्थस्याभावेन नाटकस्यास्य पठनपाठनयोः छात्राणां काठिन्यमविभाव्यत । अत एव शिक्षाध्यक्षपदभारवहनकालत एव मया तस्य नाटकस्य तथाविधान्येषाञ्च पाठ्यग्रन्थानां टीकानुवादादिकं विधातुं स्तरानुकुलानां सहायकग्रन्थानां सन्दर्भ-ग्रन्थानामपि नवीनपद्धत्या प्रणेतुञ्च संबद्धविषयविशेषज्ञा अभिप्रेरणीया इति सङ्कल्प्य तत्कार्याणि संपादयितुं विद्वांसः प्रवर्तिताः । तेषु कैश्चन विश्व-

विद्यालयस्य प्राज्ञिकोत्कर्षमेव निजोत्कर्षं मन्यमानैर्नवीनपद्धत्युद्भावन-कुशलान्तःकरणैः क्रियावद्भिः प्राध्यापकैः कानिचिद् ग्रन्थरत्नानि प्रणीय समुपस्थापितानि । पाठ्यक्रमे निर्धारितानां विषयाणां शिक्षणायानुकूलानि तानि निभाल्य सांप्रतं मामकीनं चेतो बिभर्ति परमानन्दसन्दोहम् ।

एतादृशैः कार्यजातैः छात्राणां सुशिक्षणाय, तेषु प्राज्ञिकोत्कर्षाधानाय च विशिष्टः सहयोगः संपत्स्यते, इत्यस्मिन् विषये नास्ति किमपि वक्तव्यम्। अनयैव रीत्या पाठ्यविषयसंबद्धानामन्येषामपि ग्रन्थानां प्रणयने विदुषां प्रवर्तना स्यादिति साभिनिवेशाऽभ्यर्थना मच्चेतसि सुतरां समुच्छलति ।

सन्दर्भेऽस्मिन् ग्रन्थलेखनाध्ययनाध्यापनानुसन्धानप्रशिक्षणप्रकाशनादि-कार्यजातैः प्रकाण्डपाण्डित्यपेशलानामखिलशास्त्रपारदृश्वानां मेधावतां विदुषाम्, संस्कृतवाङ्मयार्णवालोडनकुशलानां गवेषकाणाम्, भाषाम्भोनिधिमन्थन-मन्दरायमाणानां भाषावैज्ञानिकानाम्, नैकविधकाव्यप्रणयनचञ्चुराणां प्रतिभावतां कवीनाम्, विविधसंस्कृतिसाहित्यानुशीलनपराणां भावकानाञ्च समुत्पादनाय महेन्द्रसंस्कृतविश्वविद्यालयः सदैव प्राध्यापकवर्याणां विदुषामवदानमपेक्षत इति निवेदयितुञ्च मदन्तःकरणं मुखरयति माम् ।

पर्यन्ते चास्य विश्वविद्यालयस्य कार्यक्रमानुसारेण महता परिश्रमेण सुन्दरचरितनाटकस्य ससमीक्षां व्युत्पत्तिविलसितां छात्रहृदयरञ्जिनीं यशोदा-भिधां संस्कृतटीकां निर्माय नियमितपत्रमनुसृत्य स्वाङ्गीकृतकर्तव्यस्य सम्यगनुष्ठानं कुर्वते प्राध्यापकाय श्रीनीलमणिढुङ्गानामहोदयाय सहर्षं धन्यवादं प्रयच्छन्निहैव विरमाम्यहं शब्दैरेभिः ।

माधवराजगौतमः

उपकुलपतिः

महेन्द्रसंस्कृतविश्वविद्यालयः

चैत्राष्टमी, २०५५

प्रकाशकीयम्

महेन्द्रसंस्कृतविश्वविद्यालयस्य पाठ्यक्रमे निर्धारितान् विषयानवलम्ब्य नवीनपद्धत्या प्रणीतानां पाठ्यपुस्तकानां सहायकपुस्तकानां सन्दर्भपुस्तकानाञ्च प्रकाशनविधौ विश्वविद्यालयोऽयं संप्रत्यग्रेसरो विद्यत इति सामोदमावेदयामि पाठकानां पुरतः ।

नेदं प्राचीनयुगं यत्र छात्रा गुरुकुलवासेन गुरुकुलसम्मतैराचारैर्विचारैश्च व्यक्तित्वविकासपुरःसरं समग्राण्येव शास्त्राणि करामलकवदात्मसाच्चक्रुः, परं सांप्रतिकी शिक्षा नवीनयुगप्रदत्तप्रविधिविज्ञानजनितचमत्कारविलसिता सद्यःफल-प्रकाशनसमर्था च वर्तत इति शिक्षाविद्भिरनुभूत एव विषयः । अस्यां परिस्थितौ गुरुकुलपरम्पराप्राप्तायां संस्कृतशिक्षासरणावपि युगसम्मतानां विधीनां प्रविधीनां विज्ञानानाञ्च सन्निवेशविषये यदि कश्चन सङ्कोचः प्रदर्श्यते तदा स्यान्महती हानिरिति विचार्य महेन्द्रसंस्कृतविश्वविद्यालयोऽयं प्राचीनमर्यादां पूर्णतयाङ्गीकृत्यापि नवीन-शिक्षागतोपयोगिविषयाणां गुणानादाय समन्वयप्रधानां विशिष्टां शिक्षापद्धतिं कलयन् राष्ट्रस्य संस्कृतशिक्षायाश्चोज्ज्वलभविष्यन्निर्मितिविधावग्रेसरो वर्तते । तदनुसारेणैव पाठ्यक्रमान्निर्माय पाठ्यपुस्तकानां प्रणयनपरिष्कारादिकञ्च जायमानमस्ति ।

सन्दर्भेऽस्मिन् साहित्योत्तरमध्यमस्तरे द्वितीयखण्डे निर्धारितं प्रा. श्रीनील-मणिढुङ्गानामहोदयेन प्रणीतया वैदुष्यपूर्णया यशोदाभिधया छात्रहितकारिण्या संस्कृतटीकया विलसितं सुन्दरचरितनाटकं संप्रति प्रकाश्यमानं विलोक्य मदीयं मानसं मोदते नितराम् । सुन्दरचरितनाटकमल्पेन कालेन स्तोकेनायासेन च ज्ञातुमभि-लषतां छात्राणां सरलया पद्धत्या शिक्षयितुं टीकेयं नितरामुपयोगिनी भवेदित्यहं मन्ये ।

पर्यन्ते चाहर्निशं विश्वविद्यालयस्य प्राज्ञिकोत्कर्षं चिन्तयतां येषां सक्रियकार्य-प्रणाल्या सबलेन नेतृत्वेन सततप्रेरणया च कार्यमिदं सुसंपन्नं तेभ्य उपकुलपति-

पदमलङ्कुर्वद्भ्यः श्रीमाधवराजगौतममहाभागेभ्यो हार्दिकीं कृतज्ञतां समर्पयामि। यस्य च परिश्रमेण संस्कृतटीकेयं निर्मिता, तस्मै प्रा. श्रीनीलमणिढुङ्गानामहोदयाय धन्यवादं प्रयच्छामि ।

पुनश्च सुन्दरकम्प्यूटरटङ्कणकारिणे बागबजारस्थ-क्वालिटीलेजरप्रिन्ट-संस्थानाय, सुरुचिरमुद्रणविधायिने डिल्लीबजारस्य नेपालप्रिन्टर्सएण्डको-अपरेटिभलिमिटेडाख्य-संस्थानाय च धन्यवादं प्रदायान्येभ्यश्च संबद्धसहयोगिभ्यः साधुवादं वितराम्यहम् ।

प्रा.डा. वावुरामपोखेलः
शिक्षाध्यक्षः
महेन्द्रसंस्कृतविश्वविद्यालयः

चैत्राष्टमी, २०५५

विज्ञापनम्

(प्रथमसंस्करणे प्रकाशितम्)

श्रीमद्रामचन्द्रकीर्तिसुधासमुद्रकर्णधारस्य महर्षेर्वाल्मीकेरुक्तिं विचार्य तथा श्रीमदुमा-महेश्वरसंवादाध्यात्मरामायणान्तर्गतरामचरितसुधासलेशं नेत्राभ्यां निपीय, तत्र च सुन्दरकाण्ड-कथांशं समवलम्ब्य यथामति सुन्दरचरिताख्यं स्वल्पतरं नाटकं मया व्यरचि । अत्र प्रममेऽङ्के समुद्रमुत्तितीर्षोर्हनुमतः पराक्रमव्यञ्जनम्, द्वितीयेऽङ्के 'ततो देवाः सगन्धर्वाः सिद्धाश्च परमर्षयः। तं प्रयान्तं समुद्वीक्ष्य ह्याकशे मारुतात्मजम्' इति देवगन्धर्वादीनामपि तत्र गमनसम्भवदर्शना-द्गन्धर्वाप्सरसां सम्भाषणमिषेण रावणकृतलोकबाधां प्रकटीकुर्वता मया रामचरितमेव वर्णितम्, तृतीयाङ्के सुरसाहनुमतोः सम्भाषणकौतुकम्, चतुर्थाङ्के वासवविभूतिवर्णनपूर्वकसिंहिकावधो-त्सववर्णनम्, तथा पञ्चमाङ्के हनुमतो लङ्कापुरप्रवेशनम्, षष्ठे पवनात्मजस्य सीतादर्शनसंलापाः, सप्तमे मारुतिरावणसंभाषणपूर्वकतत्प्रत्यागमनं च वर्णितम्, यद्यपि शास्त्रावलोकनहीनस्याधीत-स्वल्पविद्यस्य राजसेवाकृतकुक्षिंभरिवृत्तेर्मम काव्यरचनं व्यसनमिव प्रतीयते तथापि श्रीरामचन्द्र-चरणारविन्दभक्तिरसप्रोत्साहितेन मया कथञ्चित् कृतमिति मन्ये- 'यत्कृपातः कपिः शीघ्रं पुप्लुवे लवणार्णवम्' इति प्रमाणमत्र ।

शब्दसाहित्यशास्त्रान्धो जन्मान्ध इव मन्यते ।
वर्णालङ्काररूपेषु प्रत्येकं रम्यमात्मनः ।।१।।
नही ममाग्रह एव सुविश्रुतिं समुपयात्विति नाटकमल्पकम् ।
पशुपतिः समताण्डववल्लभः कृतिममां परिपालयतु स्वयम् ।।२।।
विज्ञानकेशरिकृतीन्द्रमुखोद्गतानि
वागर्णवाच्छसलिलानि जयन्ति लोके ।
आपो यथा गिरिणदस्य मम प्रलापाः
संप्राप्य येषु समला विमला अभूवन् ।।३।।
पुनरवलोकितमेतत्कृपया हरिनाथशर्मणा विदुषा ।
पीतः साहित्यरसो मकरन्द इवालिना येन ।।४।।
दोषज्ञाः शोधयन्त्वेतद्यत्र यत्रास्त्यसङ्गतम् ।
प्राञ्जलिः प्रार्थये वोऽहं भवतः करुणादृशः ।।५।।
अष्टादशशते शाके (१८१४) चतुर्दशसमन्विते ।
मार्गशीर्षे सिते पक्षे समाप्तिमिदमन्वगात् ।।६।।

छविलालशर्मा
१९४९, मार्गशीर्षशुक्लपक्षः

Opinion of late Mr. T. Max Muller in his letter to the author.

7 Norham Gardns.
Oxford.
28th Spt. 1898.

Pandit Chhavilal
Dear Sir,

Accept my best thanks for your Nataks, Sundara Charitam and Kushalovodayam the Vrittalankars, and the Sanskrit verses addressed to me. As soon as I find time I hope to read your two plays, but I am getting so old (75) and have still so much to do, that I have but little leisure left to m e. I am surprised at your familiarity with Sanskrit. We, in EUROPE, shall never be able to rival you in that. We have to read but never to write Sanskrit. To you it seems as easy as English or Latin is to us. You see, we chiefly want to know what INDIA is and has been - we care for its literature, its philosophy etc. and that takes up so much time, that we never think of practising composition, that we can admire all the more, because we cannot rival, and I certainly was filled with admiration when I read but a few pages of your Sundara Charita.

And now a question Mr. Bahramji Malabari is publising at Bombay (India Spectator) translation of my Hibbeet Lectures in Mahrathi, Bengali, Guzrati, Tamil etc. He is very anxious to find a scholar to translate them into Sanskrit. One Translation was made, but it was too imperfect.

Would you undertake that work ? of course, you would be paid for your trouble ? Or could you recommend any friend of yours who is competent to undertake such a work ? And would you write direct to B. M. Malabari, India Spectator Office, Bombay, and inform him of what could be done in Nepali ?

Thanking you once more for your valuable presents I remain.

Yours faithfully
T. Max Muller

निवेदनं किञ्चित्

महेन्द्रसंस्कृतविश्वविद्यालयस्य पाठ्यग्रन्थलेखनसम्बद्धं नियमितपत्रमनुसृत्य साहित्योत्तरसुध्यमस्तरीयद्वितीयवर्षस्य पाठ्यक्रमे निर्धारितं यशोदाभिधया संस्कृतटीकया विलसितं पं. छविलालसूरिप्रणीतं सुन्दरचरितनाटकं प्रकाश्यमानमस्तीति संबद्धच्छात्राणां परमसन्तोषावहोऽयं विषयः ।

अद्यावधि सुन्दरचरितनाटकस्य संस्कृतटीकाया अभावेन पठनपाठनादिषु छात्रै-र्यत्काठिन्यमनुभूतं वैरस्यञ्चाधिगतं तन्निवारणाय विहितोऽयं स्वल्पोऽपि प्रयासो नूनमेव फलदो भविष्यतीत्यहं विभावये ।

सुन्दरचरितनाटकशिक्षणे छात्राणां काठिन्यं विचार्य भूयो भूयो ग्रन्थलेखने प्रेरयद्भ्य उपकुलपतिपदविभूषितेभ्यः श्रीमाधवराजगौतममहाभागेभ्यो हार्दिकीं कृतज्ञतां ज्ञापयामि । ग्रन्थलेखनकर्मणि सहयोगं कुर्वते शिक्षाध्यक्षपदालङ्कृताय प्रा.डा. वावुरामपोखेलमहाभागाय, कुलसचिवपदमलङ्कुर्वते डा. भोजराजपन्तमहाभागाय च निजां कृतज्ञतां व्यनज्मि । अस्य नाटकस्य संस्कृतटीकाप्रणयनस्यावश्यक-तामौचित्यञ्चानुभूय तट्टीकालेखनश्यावश्यकतां प्रदर्श्य विश्वविद्यालयसमक्षं विभागीय संस्तुतिं प्रस्तुवते वाल्मीकिविद्यापीठस्य साहित्यविभागाध्यक्षाय प्रा.डा. माधवभट्टराई-महाभागाय, नाटकस्यास्य टीकाप्रणयने, स्वरूपसम्पादने चात्मीयतया परामर्शप्रदानेन सहयोगं विदधते प्रा.डा.वेणीमाधवढकालमहोदयाय च कृतज्ञतां प्रकाशयामि सहर्षम्।

पुनश्च ग्रन्थस्यास्य टीकालेखनक्रमे परामर्शप्रदानेन साहाय्यं कुर्वतो मित्रजनान् बन्धुजनाँश्च साधुवादेन सभाजयित्वा सुन्दरकम्प्यूटरटङ्कणकारिणे क्वालिटीलेजरप्रिन्ट-संस्थानाय कलात्मकमुद्रणकारिणे नेपालप्रिन्टर्सएण्डकोअपरेटिभलिमिटेडनाम्ने मुद्रणालयाय च धन्यवादवचनानि वितरामि ।

अन्ते भ्रमप्रमादादिसमुद्भवानां त्रुटीनां कृते पाठकसन्निधौ क्षमां याचमानोऽत्रैव विरमाम्यहम् ।

चैत्राष्टमी, २०५५ प्रा. नीलमणिढुङ्गानाः

प्रस्तावना

पं. छविलालसूरिणः परिचयः

कुशलवोदयस्य भूमिकायां हरिनाथढुङ्गेलसंपादितायां ढुङ्गेलवंशावल्याञ्च नाटककारस्य पण्डितवर्यस्य छविलालसूरिणः परिचयः समुपलभ्यते। ग्रन्थद्वयानुसारेण छविलालसूरिरयं ढुङ्गेलकुलावतंसोऽत्रिगोत्रोद्भवश्चासीदिति ज्ञायते। १८९८ तमे वैक्रमाब्दे देवीप्रसादस्य धर्मपत्न्या गर्भादसौ जनुर्लेभे। त्रैवार्षिकेऽस्मिन् जाते सति, तत्पिता देवीप्रसादः काशीं विश्वनाथनगरीमुपेत्य पञ्चविंश एव हायने पाञ्चभौतिकं देहमत्याक्षीत्। ततश्चानाथोऽयं छविलालः पितामहेन दीननाथेन पितृव्येन नरनाथेन च पालितः काश्यामेव व्याकरणं कोशं साङ्गञ्च वेदमध्यैष्ट। कार्यवशान्नेपालमागते दीननाथे सहैवागतस्य छविलालस्य सुन्दराण्यक्षराणि विलोक्य जङ्गबहादुरेण दप्तखाना-धिकरणे नियुक्तः। तत्र कियद्वर्षं कार्यं विधाय पितामहे काशीवासाय प्रस्थितेऽसावपि वृत्तिं तृणाय मत्वा पुनरध्येतुकाम्यया सहैव प्रस्थितः। तत्र च तेन व्याकरण-न्याय-मीमांसा-साहित्य-ज्यौतिषादिशास्त्राणि सम्यगधीतानि। आङ्ली-बङ्गी-भूटान्याद्या द्वादशाभ्योऽप्यधिका भाषाश्छविलालेन शिक्षिताः। काश्यां स्थित्वाऽनेन बहवश्छात्राः साधु पाठिताः। १९२४ तमे वैक्रमाब्दे पितामहे दीननाथे दिवमुपगते पितृव्यस्य नरनाथस्य जङ्गबहादुरस्य राणाभूपतेश्चाग्रहेणासौ पुनर्नेपालमेत्य राजकार्ये नियुक्तः। तत्कार्यकौशलं विलोक्यामुं धीरशंसेरः बहुधा संमानितवान्। १९४२ तमे वैक्रमाब्दे वीरशंसेरेण सुब्बापदं प्रदाय संमानितोऽसौ छविलालः। तत्कार्यप्रणाल्या वैदुष्येन च प्रभावितेन चन्द्रशंसेरेणापि १९५८ तमे वैक्रमाब्दे सरदारपदेन समलङ्कृतः। अनेन विदुषा बहवो लेखा ग्रन्थाश्च लिखिताः, प्रकाशिताश्च। वार्धक्येऽसौ श्वासकासादिपीडितः काशीमुपेत्य १९६३ तमे वैक्रमाब्दे चैत्रशुक्लचतुर्दश्यां तत्रैव प्राणान् तत्याज।

अनेन प्रणीतानि ग्रन्थरत्नान्यधोलिखितानि सन्ति -

१. **सुन्दरचरितम्** - नाटकमिदं सप्तसु अङ्केषु विभक्तं विद्यते। वाल्मीकि-रामायणस्याध्यात्मरामायणस्य च सुन्दरकाण्डगतं कथानकमुपजीव्य

रचितं वीररसप्रधानं नाटकमिदं नाट्यकलायाः काव्यकलाया-श्चापूर्वेव सङ्गमस्थली विद्यते ।

२. **कुलशवोदयम्** - रामायणस्योत्तरकाण्डगतं कथानकमुपजीव्य रचिते-ऽस्मिन्नपि नाटके अष्टावङ्का विलसन्ति । रामचन्द्रतनययोः कुशलवयो-रुदयं प्रदर्श्य रचितेऽस्मिन्नाटके छविलालस्य नाट्यकलायाः काव्य-कलायाश्च सुन्दरः समन्वयो दृश्यते ।

३. **वृत्तालङ्कारः** - वृत्तालङ्कारयोर्लक्षणं शिक्षयितुं छविलालेन प्रसिद्धानां केषाञ्चिदलङ्काराणां वृत्तानाञ्चात्र लक्षणानि सोदाहरणं निरूपितानि । एकेनैव श्लोकेन वृत्तालङ्कारयोरुदाहरणं प्रदर्श्य कविनात्र नवीनतमं शिक्षणद्वारं समुद्घाटितम् ।

४. **विरक्तिशतकतरङ्गिणी** - अत्र छविलालेन वैराग्यजनकानि शतं पद्यानि निर्मितानि । वेदान्तरहस्योद्बोधकानि तानि पद्यानि नितरां मञ्जुलानि, काव्यकलालसितानि च सन्ति ।

५. **सेनाशिक्षणपद्धतिः** - जङ्गभूपतिसमये तदीयानुरोधेन छविलालेनानेन नेपालीभाषायां सेनाप्रशिक्षणाय सेनाशिक्षणपद्धतिः लिखिता ।

६. **मुकुन्दचरितम्** - वार्धक्ये च भगवतः श्रीकृष्णस्य चरितमनुसृत्य मुकुन्दचरितञ्चेति नाटकं प्रणीतम् ।

पञ्चमषष्ठसङ्ख्याङ्कितपुस्तकद्वयविषये ढुङ्गेलवंशावल्यां समुल्लेखो वर्तते, परं ग्रन्थद्वयमेतत् सांप्रतं नोपलभ्यते ।

सुन्दरचरितनाटकस्य वैशिष्ट्यम्

उपजीव्यग्रन्थः

वरीवर्ति सुन्दरचरितनाटकस्य कथावस्तुन आधारःश्रीमदादिकविवाल्मीकिना विरचितं रामायणम्, भगवता व्यासेन प्रणीतं श्रीमदध्यात्मरामायणञ्चेति काव्यद्वयम्। तस्य काव्ययुगलस्य किष्किन्धाकाण्डस्य चरमे भागे सुन्दरकाण्डे च हनुमल्लङ्कागमन-राक्षसभवनदहन-सीतासन्देशानयनसंबद्धा या घटनाः सन्ति वर्णिताः, ता एवादाय नाटककारो नाटकमिदं प्रणीनाय । परं नाटकीयां सुन्दरतां सञ्चारयितुं स तत्र यथेष्टं

परिवर्तनमपि चकार। गन्धर्वाप्सरःसंवाद-वासवप्रस्थान-प्रमुखा घटना रामायणेऽनिबद्धा अपि सन्त्यत्र नाटककारेण स्वप्रतिभया समुद्भाव्य विन्यस्ताः। ताः सर्वा अपि सन्ति मौलिक्य उद्भावनाः। किञ्च रामायणस्य कथानकं महाकाव्यानुकूलं वर्तते, कथानकस्य सङ्घटनं महाकाव्यानुसारि, वर्णनस्याधिक्यञ्च। परन्तु नाटकस्य कथावस्तु महाकाव्यस्य कथानकात् पृथगेव भवति। अभिनयप्रधानतया सङ्घटनेऽपि तत् स्वकीयं वैशिष्ट्यं धत्ते। तत्र वर्णनस्य विस्तारो न शोभते। अध्यात्मरामायणे रामकथाकथनव्याजेना-ध्यात्मविषयं शिक्षयता व्यासेन प्रौढधीभिरेव वेद्यो वेदान्तविषयोऽस्ति प्रतिपादितः, सोऽपि लोकानुरञ्जनप्रयोजनकेऽस्मिन् नाटके नास्ति वर्णितः। रामायणकथानक-मनुसरदपि नाटकमेतन्नैजमेव वैशिष्ट्यं संस्कृतनाट्यजगति स्थापयन्नेपालस्य गौरवं निखिलेष्वपि भुवनेषु विस्तारयति। अत एव च जर्मनीदेशवास्तव्यो मैक्समूलरनामा प्रतीच्यः प्रधीर्नाटकमिदं प्राशंसत्।

कथावस्तु

नाटकेऽस्मिन् सप्ताङ्काः सन्ति। तत्र प्रथमाङ्के प्रस्तावनानन्तरं सचिन्तस्याङ्गदस्य हनुमज्जाम्बवन्नलसुषेणशरभप्रमुखैः प्लवङ्गमैः सह प्रवेशो भवति। जाम्बवता प्रति-बोधितोऽङ्गदेन चादिष्टो हनुमान् पर्वतसन्निभाकारो विहायसा गन्तुमुत्प्लवते। पवनसुतस्य प्रभावोत्साहौ निरीक्ष्य जाम्बवदङ्गादयो हर्षमनुभवन्ति। द्वितीयाङ्केऽप्सरोभिः सहितो गन्धर्वराजः पवनात्मजस्य परीक्षां विलोकयितुं स्वर्गात्प्रस्थितस्य वासवस्य स्वागताय दिवौकसामध्वनि समुपतिष्ठते। तृतीयाङ्के सुरसा पवनसुतस्य वीर्यं कार्यसंपादननैपुण्यञ्च परीक्षितुं मार्गमवरुध्य तिष्ठति, भक्षणस्याभिलाषञ्च प्रकटयति। परन्तु कृत्यविद् वाक्पटुः पराक्रमी कुशाग्रबुद्धिः प्रभञ्जनसूनुः सुरसाया वदनं प्रविश्य द्रुतं बहिर्निर्गच्छति। प्रच्छन्नो वासवस्तद् दृष्ट्वा मोमुद्यते, प्रशंसते च पवनात्मजम्। चतुर्थाङ्के वासवस्य विभूतेर्वर्णनं कृतम्, सिंहिकायाः वधश्चास्ति चित्रितः। पञ्चमाङ्के हनुमतो लङ्कापुरप्रवेशः, लङ्काभिधाया निशाचर्या दिव्यरूपप्राप्तिः, रावणपालिताया लङ्कानगर्या वैभवसौन्दर्यादीनि च सन्ति वर्णितानि। पवनसूनुः प्रतिभवनं सीतामन्वेषयन्नशोकवाटिकामाप्नोति। तत्र सीतां विलोक्य हनुमतो हृदयं शतधा विदीर्यते। षष्ठाङ्के तत्र सराक्षसीगणेन रावणेन त्रासितायाः सीताया दयनीयामवस्थां निरीक्ष्य स चेखिद्यते। रावणे, तदनु राक्षसीजने च स्व-स्वभवनमुपगते मर्तुकामायाः सीतायाः पुरः पवननन्दन आदितः स्वलङ्काप्राप्तिं यावद् वाचा रामचरित्रमुपस्थापयति, रामनामाङ्कितां मुद्राञ्चार्पयति तस्यै। ततश्च सा विश्वस्ता प्रेषयति रामाय साभिज्ञानं सन्देशम्। सप्तमाङ्के हनुमान् बुभुक्षितः

सीताज्ञया फलान्यत्तुं दशवदनस्य वाटिकां प्रविशति । तत्रत्या रक्षकास्तन्निवारणायागता रावणभटाश्च भवन्ति पवनसुतेन विनिपातिताः । सभटे रावणकनिष्ठात्मजेऽक्षकुमारे हते मेघनादो हनुमन्तं ब्रह्मास्त्रेण बद्ध्वा रावणस्य पुरः स्थापयति । कनिष्ठानुज-बुद्धिमनुसरतो रावणस्यादेशेन राक्षसगणैः प्रज्वालितानललाङ्गूलोऽसौ विहाय विभीषण-भवनं सकलान्यपि लङ्कानगरनिकेतनानि भस्मीकरोति । ततश्च समुद्रजलावगाहनेन निर्वापितलाङ्गूलदहनज्वालो हनुमान्, अङ्गदादयश्च सुग्रीववाटिकामुपेत्य फलानि भक्षयन्ति, ताडयन्ति च रक्षकान् । तद्वृतान्तं रक्षको दधिमुखः सुग्रीवं निवेदयति, सुग्रीवश्च सहर्षं तानाह्वयति । हनुमान् तत्रागत्य सीतायाः सन्देशं रामं श्रावयति, अर्पयति च तस्मै सीताप्रहितमभिज्ञानम् । रामवाक्येन च नाटकस्य समाप्तिर्जायते ।

वस्तुविकाससाधनानि

अर्थप्रकृतयः कार्यावस्थाः सन्धयश्च सन्ति वस्तुविकासस्य साधनानि । छविलालोऽस्मिन् सुन्दरचरितनाटके तत्तत्साधनानि सम्यक् प्रयुञ्जानः प्राप्यते । सुन्दर-चरितस्य कथानकस्य प्रधानं साध्यमस्ति सीतान्वेषणद्वारा वानराणां भल्लूकानाञ्च जीवनरक्षणम् । नाटककारेण '**श्रुतं भवद्भिस्तत्र भवतः कुमारस्य मुखान्निसृतं वचः, विज्ञापयतास्य प्रतिवचनम् । न चेत्कुशविष्टरे वयं पूर्ववत्सर्वे स्वपिमः । न पुनरस्माकं प्राणवियोगमन्तरेण जीवनोपायः**' इत्येतयोक्त्या साध्यस्य बीजं निर्दिष्टमस्ति स्पष्टम् । एतेभ्य उपरितनेभ्यो वाक्येभ्यः –

कृत्वा पूर्वसमागमं रघुपते राजा त्वया घातितः
लब्धं राज्यकलत्रसौख्यममितः कोशः समासादितः ।
राज्यार्धं हरतीति दुष्टमनसा क्षिप्तस्त्वयाहं पुनः
कर्तुं दुष्करकर्म हा तव मयि क्रूरं मनो वर्तते ।।

इत्येतच्छ्लोकं यावद् बीजमेवोपस्थापयति छविलालः । अङ्गदस्योक्तिरेवारम्भावस्थां समुपन्यस्यति । बीजाभिधाया अर्थप्रकृतेरारम्भावस्थायाश्च समन्वयो मुखसन्धिना क्रियते । मुखसन्धावेव बीजोत्पत्तिः, उद्देश्यकथनम्, फलप्रोत्साहनादयश्च निरूप्यन्ते। सर्वेषामप्येषां सद्भावः प्रथमाङ्के, एव वर्तते । अतस्तत्र मुखसन्धिर्विलसति । तृतीयाङ्के-**सुत, पश्येह गन्धर्वाप्सरसां व्योमयानम्, तद्रश्मिः संयम्यताम् । तावद् वयमप्यत्रैव स्थित्वा सुसाहनुमतोर्विप्रलपितं निरूपयामः**, इति वासवस्योक्तावर्थकृतिबिन्दुमुपस्था-पयति नाटककारः । प्रथमाङ्कस्य चरमे भागे हनुमान् लङ्कां गन्तुमुत्प्लवते, तदासौ परिमाणशून्यविषये गर्जन्नुड्डीयते । लाङ्गूलाहतवीचिः सागरस्तस्मै स्वयमेव मार्गं ददाति।

एष एव हनुमत्कृतप्रयासः प्रयत्नाख्या कार्यावस्था वर्तते । विन्दुप्रयत्नयोः समन्वयः प्रतिमुखसन्धौ जायते । अत एव नाटकेऽस्मिन् प्रथमाङ्कस्य चरमभागात् तृतीयाङ्कस्य प्रारम्भं यावत् प्रतिमुखसन्धिः शोभते । तृतीये चतुर्थे चाङ्के मातलिवासवयोः संवादे पताकाभिधा, अर्थप्रकृतिरुपनिबद्धाऽस्ति । तृतीयाङ्कात् प्राप्त्याशाभिधायाः कार्यावस्थाया भवति प्रारम्भः । सा च षष्ठाङ्कं यावदवतिष्ठते । अत्रैकतो हनुमतः कार्यस्य विघातकाः सुरसालङ्कारावणप्रभृतयोऽनेकेऽवतिष्ठन्ते तदन्यतो हनुमान् स्ववीर्येणानुपमबुद्धिपाटवेन च तान् सर्वानपि विजयते । एष एवास्त्यंशो फलप्राप्तिफलाप्रप्त्योर्मध्यवर्ती नाटकस्य प्राणप्रदः । एतादृशमेव च भागं पाश्चात्यनाट्यशास्त्रप्रवीणाः 'द्वन्द्वमिति' व्याहरन्ति ।

नाटके पताकायाः प्राप्त्याशायाश्च संगतिर्भवति गर्भसन्धिना । सुन्दरचरिते तृतीये चतुर्थे पञ्चमे षष्ठे चाङ्के उक्तविधयोः पताकाप्राप्त्याशयोः समन्वयोऽस्त्युपनिबद्धः। अतोऽत्र विद्यते गर्भसन्धिः ।

अहो बत महामते ! कथमिहाद्य दूतं भवान्
निहन्ति रिपुणेरितं पृथुयशास्त्रिलोकीपतिः ।
निवेदयति शत्रवे तव पुनश्च को वाचिकं
हते सति वनेचरे परिचरेऽधुनास्मिन् बिभो ।।

इत्यादीनि वचनानि फलप्राप्तिं सङ्केतयन्ति । नाटककारेण नियताप्त्यावस्थां दर्शयितुमेव प्रक्रमोऽस्त्ययमारब्धः । सप्तमाङ्के यदा हनुमान् सराक्षसमवनां लङ्कां दग्ध्वा सीतायाः पुरः समुपतिष्ठते तदा सर्व एव तत्कार्यविघातकाः समाप्तप्राया भवन्ति, फलप्राप्तिर्निश्चित-प्राया जायते । अत एवात्र नियताप्तिः शोभते । यदा हनुमान् समुद्रमुल्लङ्घ्य प्रत्यागच्छति, वानरैर्भल्लूकैश्च सह फलान्यत्तुं सुग्रीववाटिकां प्रविशति तदा रक्षको दधिमुखस्तद्वृतान्तं सुग्रीवमुपसृत्य निवेदयति । सुग्रीवश्च तन्निशम्य हर्षमनुभवति । तत्रत्यः सुग्रीवदधिमुखयोः संवादो वर्तते प्रकरीनामार्थप्रकृत्याः प्रसङ्गः । एतयोः प्रकरीनियताप्त्योः समन्वयो विधीयतेऽवमर्शसन्धिना ।

अत एव सप्तमाङ्कस्य प्रथमार्धे निबद्धोऽवमर्शसन्धिः । सप्तमाङ्कस्योत्तरार्धे सुग्रीवेणाहूतो हनुमान् रामं सीतासन्देशं श्रावयति, समर्पयति च तस्मै सीताप्रहितम-भिज्ञानम् । प्रसङ्गेऽस्मिन् कार्याभिधार्थप्रकृतिः फलागमाख्या कार्यावस्था च दृक्षेथ-मवतरतः । तयोः समन्वयो भवत्यत्र निर्वहणसन्धिना ।

शास्त्रीयदृष्ट्या सुन्दरचरितस्य कथानकस्य विकासः सन्नपि युक्तरूपो नाटकीय-कलाविधानदृष्ट्या नास्ति निर्दोषः । द्वितीयाङ्के नाटककारेण प्रस्तुतो गन्धर्वाप्सरसां प्रणयप्रसङ्गो न प्रतिभाति समीचीनः । एषः प्रसङ्गः कथागतिं प्रति बाधकोऽस्ति सञ्जातः ।

चरित्रचित्रणम्

चरित्रचित्रणं नाटकेऽस्मिन् ललितमस्ति नितान्तम् । हनुमानस्ति प्रधाननायकोऽत्र। स च महासत्त्वो गम्भीरोऽविकत्थनः स्थिरो निगूढाहङ्कारो दृढव्रतश्चास्ति । अतः पवनसुतो धीरोदात्तत्वेन चित्रितोऽस्त्यत्र नाटककारेण । विरहव्याकुलाया राक्षसनगरनिवास-परितप्तायाः सीतायाश्चरित्रमप्यस्त्यत्र नितरामादर्शमञ्जुलम् । सुरसाया भीषणाकृतेश्चित्रणं यदस्ति नाटककारेण विहितम्, तत्तु वर्तते नितान्तमेव रुचिरम् । तस्या भीषणस्वरूपं प्रस्तुवद् दृश्यतां निदर्शनभूतं पद्यम् –

रोषातिरिक्तनयना विकरालवक्त्रा दीर्घोदरी विपुलगात्रभयङ्करी च ।
क्रोधातिविस्फुरितलोलतराधरेयं रात्रिञ्चरीव सुरसा प्रतिभाति सत्यम् ।।

लङ्कायामवस्थितानां राक्षसीनां चित्रं कियत्या मनोज्ञया पद्धत्या प्रस्तौति नाटक-कारः, क्षणमीक्ष्यताम् –

प्रतिक्षणं यौवनतुङ्गचूचुकाः पतिं समालिङ्ग्य सुरारुणेक्षणा ।
अशङ्कमङ्कं रमणस्य निस्त्रपा मत्ताधिशेते निशि मत्तकाशिनी ।।

एवमेव रावणमेघनाद-प्रहस्तप्रमुखाणां पुरुषपात्राणां सुरसात्रिजटामन्दोदरी-लङ्काद्यानां स्त्रीपात्राणाञ्च चरित्रं यथायथं चित्रयता नाटककारेण चरित्रचित्रणे विस्मयावहैव निपुणताधिगताऽस्त्यत्र । वस्तुतश्छविलालस्य सुन्दरचरितगतानि स्त्रीपात्राणि पुरुषपात्राणि च सन्त्यसुमन्ति ।

रसपरिपाकः

रसपरिपाकदृष्ट्या सुन्दरचरितं सफलं नाटकम् । अत्र प्रधानो रसोऽस्ति वीरः। स चाङ्गभूतानां शृङ्गारहास्यकरुणभयानकादीनां रसान्तराणां स्रोतांस्यात्मनि सन्निदधानो नाटकभूमिमाप्लावयन्नन्त आनन्दे पर्यवस्यति । वीरभावभावितस्य हनुमतः –

यावन्मन्मुष्टिवज्रः प्रपतति न मुखे मेघनादो निनद्याद्
भिन्नौ कर्णौ न यावन्मम करनखरैः कुम्भकर्णो निदध्यात् ।

यावन्नो मे प्रहस्तः प्रथयतु हननं तावदास्तां प्रहस्तो
लङ्काऽलङ्कारयुक्ता भवतु च न मया यावदेषा विनष्टा ।।

इत्याद्या वीरोक्तयः प्रारम्भत एव श्रुतिगता जायन्ते । तृतीयाङ्के हनुमन्मुखनिर्गतानि पुष्कलानि वाक्यानि सामाजिकानां हृदये वीरभावं नितरां सञ्चारयन्ति । सप्तमाङ्के रसोऽयं चरमोत्कर्षमाप्नोति । दृश्यतां तावद् रावणवाटिकां विनाशयितुं प्रवृत्तस्य प्रभञ्जनसूनोर्वाक्येषु तस्य रसस्यातिमनोज्ञं निदर्शनम् –

एकां वञ्जुलकाननान्तरगतां सीतालयां शिंशपां
हित्वा ते क्षणतः करोमि नगरीं लङ्कामवृक्षामहम् ।
ये वा यान्ति ममाग्रतो युधि तदा सर्वान् हनिष्यामि तां
स्तम्भो मे पुरतोऽयसोऽस्ति विधिना क्षिप्तो वधायेव वः ।।

नाटकेऽस्मिन् वीरस्त्वास्वाद्योऽस्त्येव सर्वत्र, परमन्येऽपि रसास्तत्र तत्रास्वाद्यन्ते सहृदयैः । वीक्ष्यतां संभोगशृङ्गारस्य निदर्शनमेकम् –

स्मयन्ते पश्यन्त्यो मुखमभिमुखं नो जहति नो
गिरं श्रुत्वास्माकं प्रतिवचनमेता न ददति ।
कटाक्षक्षेपेण प्रतिपदमिह घ्नन्ति न इमा
यदासां कामोऽयं व्यथयति मनः काममधुना ।।

सुरसाया राक्षसीनाञ्च चित्रणे कविना भयानकोऽस्ति रसो निबद्धः । करुणरसस्याप्यस्ति प्रवाहोऽत्र सान्द्रः । राक्षसनगरवासपरिखिन्नायाः करुणभावविभावितानि सीताया वचनानि सन्त्यत्र निदर्शनानि । नाटकेऽस्मिन् सत्यपि प्रधाने वीररसे रसान्तराणामभिव्यञ्जनाप्यस्ति सफला ।

प्रकृतिचित्रणम्

छविलालो वर्तते प्रकृत्यनुरागी नाटककारः । अत एव च तेन स्वनाटके यथावसरमस्ति प्रकृतेश्चित्रमुपस्थापितम् । नाटकेऽस्मिन्, आलम्बनमुखेनोद्दीपनमार्गेणालङ्कारविधानरूपेण च प्रकृत्याः स्वरूपं विद्यते चित्रितम् । आलम्बनमुखेन चित्रितायाः प्रकृतेः सुकुमारं रूपं वीक्ष्यतां क्षणम् ।

कादम्बिनी त्यजति विष्णुपदं निशान्ते
स्रोतस्वती वहति निर्मलतोयवीचिम् ।

सप्तच्छदस्य कुसुमानि तथा च काशाः
कामं चकासति वनश्रियमुद्वहन्ति ।।

उद्दीपनरूपेण चित्रितायाः प्रकृतेः स्वरूपं प्रस्तौति श्लोकोऽयम् –

अकूपारो वीचीर्वहति नितरां निर्मलतरा
मरालास्तिरेऽस्मिन् विदधति तथा सुन्दररुतम् ।
क्वचित्पोताधानं खग इव समुड्डीय पतति
क्वचिद्वेगान्मीनः क्षिपति जलमूर्ध्वं शिखरिणि ।।

संप्रत्यलङ्कारमुखेन चित्रितायाः प्रकृत्याः स्वरूपं निभाल्यताम् –

स्वभावसुकुमारिणी कृतिविदेहसंवर्धिता
विशङ्कटरसोद्धृता निहितरामरूपा पुरा ।
विभीतकखरादिभिर्जटिलया वृता क्षुद्रया-
ऽधुना बकुलकानने वसति हन्त सीतालता ।।

समासोक्त्यलङ्कारमार्गेण चित्रिताया मानवीकृतप्रकृतेर्दृश्यतां तावदेकं निदर्शनम्–

सुधांशोश्चण्डांशोरपि पतति शीर्षे शिखरिणः
समं रश्मौ शोभा लुठति करयोः शीतखरयोः ।
असाध्वी सन्ध्येयं परिहसति वीक्ष्येव रजनीं
कटाक्षं सासूयं नयति पतिरक्तामिव निशा ।।

भाषाशैली

सुन्दरचरितस्य संवादेषु रङ्गमञ्चोपयुक्तता प्राप्यते । अल्पैरेव वाक्यैः परिलसन्तो विद्यन्तेऽत्र पात्राणामन्योन्यमालापाः । नाटकस्यास्य गद्यभाषा, अप्रतिहतप्रभावा सुललिता च वर्तते । न तत्र क्लिष्टार्थानि सन्ति पदानि, न च समासबहुलानि । वाक्यानि न सन्ति तत्र दीर्घतराणि । कानिचन पद्यानि विहाय बहूनि पद्यानि सन्ति वैदर्भीरीतिलसितानि। यद्यपि वीररसप्रधाने काव्ये समासबहुलाया भाषायाः प्रयोगोऽभिमतः परं नाटके तदीयो निवेशो न समुचितः । अत एव चास्मिन् नाटके वीरभावलसितेष्वपि पद्येष्व-समस्तानि, अल्पसमासवन्त्येव वा पदानि सन्ति प्रयुक्तानि । दृश्यतां तावदेकमुदाहरणम्–

बद्ध्वा रज्जुभिरेव रावणमहं नेष्यामि लङ्केश्वरं
किंवोत्पाट्य करेण तस्य नगरीं लङ्कां सरात्रिञ्चराम् ।

मुष्टीमुष्टि नखानखि प्रहरतः को वा समक्षं विशेत्
सर्वे यान्ति पराभवं सुमनसः कीटायते रावणः ।।

प्राकृतभाषायामप्यस्ति छविलालस्य पूर्णोऽधिकारः । तस्यां भाषायां निबद्धान्यपि पद्यानि सन्ति मञ्जुलानि । रामविरहपरितप्तायाः सीतायाः करुणभावभावितमीक्ष्यतां तावदेकं सुन्दरं प्राकृतपद्यम् –

वअण तुह देअर ! स्सुदं न मए स्वण्णमिआहिलासए ।
हद तस्स फलं दुतं मए अणुभूदं गदबुद्धिए तदो ।।

परन्तु कानिचन पद्यानि सन्ति नाटकाननुकूलानि । समासजालग्रथितानि तानि तु भवन्ति महाकाव्येष्वेव प्रयोज्यानि । तथापि तानि प्रकाशयन्ति कवेः कलाकलन-कौशलम् । वीक्ष्यतामेकं निदर्शनम् –

सुरसुरारिरसासुरसंस्तुता स्तुतिरता सरसातितरां तता ।
सुतरसा सुरसा सरतस्तिरोऽतति सुतस्य सृतेः सततातततः ।।

अलङ्कारप्रयोगः

नाटकेऽस्मिन् कानिचित् पद्यानि विहायान्यत्र प्रयुक्ता अलङ्कारा अपृथग्यत्न-निर्वृत्ताः सन्ति । तत्रोपमारूपकोत्प्रेक्षाश्लेषस्वभावोक्तिसमासोक्तियमकानुप्रासादी-नामलङ्काराणां श्रीर्भृशं सहृदयानां चेत आवर्जयति । तेषु यमकालङ्कारस्य श्रीः क्षण-मीक्ष्यताम् –

अयि नितम्बिनि ! तं विनिकेतनं वनचरं स्मर मा स्मर मा वरम् ।
निवस मानिनि ! मानिनि मे गृहे विलसता लस तालवने मया ।।
लसति कामिनि ! कामिनि पूरुषे मयि रतिर्न तपस्विनि तादृशे ।
हरति ते रतितेजितमन्मथो विरहतापहतापसदं मनः ।।

छन्दोविधानम्

छन्दोविधाने नाटककारः सर्वथाऽस्ति कुशलः । छन्दांसि तन्मुखकमलस्य वश्यानीव राजन्ते । नाटकेऽस्मिन् शार्दूलविक्रीडितवसन्ततिलकास्रग्धराशिखरिणी-मालिनीपृथ्वीप्रहर्षिणीद्रुतविलम्बितपुष्पिताग्राऽऽर्यानुष्टुब्वंशस्थमन्दाक्रान्तारथोद्धताहरि-ण्युपेन्द्रवज्रासुन्दरीहरिणप्लुतासुवदनागीतिरुचिरास्वागतेन्द्रवज्राभिधानानि त्रयोविंशति-संख्याकानि सन्ति छन्दांसि प्रयुक्तानि । तानि सर्वाणि वर्तन्ते कवेर्भावानुकूलानि

श्लेषमुखेन च सङ्केतितानि ।

प्रयुक्तवृत्तानां प्रत्यङ्कमवस्थितिः

छन्दसां नामानि	प्रथमाङ्के	द्वितीयाङ्के	तृतीयाङ्के	चतुर्थाङ्के	पञ्चमाङ्के	षष्ठाङ्के	सप्तमाङ्के	योगः
शार्दूलविक्रीडितम्	१२	३	३	७	३	२	१०	४०
वसन्ततिलका	४	१	३	१	३	५	१	१८
स्रग्धरा	२	१	३	३	३	२	२	१६
शिखरिणी	३	३	२	५	१	०	१	१५
मालिनी	२	×	×	१	९	१	१	१४
पृथ्वी	१	२	×	२	२	१	४	१२
प्रहर्षिणी	×	१	×	×	×	९	१	११
द्रुतविलम्बितम्	४	×	१	×	१	४	×	१०
पुष्पिताग्रा	×	२	२	१	१	१	१	८
अनुष्टुभ्	१	×	×	×	×	×	६	७
आर्या	×	×	१	१	१	४	×	७
वंशस्थविलम्	१	×	×	×	२	१	×	४
मन्दाक्रान्ता	३	×	×	×	×	×	१	४
हरिणी	×	×	२	×	×	×	१	३
उपेन्द्रवज्रा	×	×	×	२	१	×	×	३
रथोद्धता	×	×	×	×	१	२	×	३
सुन्दरी	×	×	×	×	३	×	×	३
स्वागता	×	×	×	×	२	×	×	२
गीतिः	×	१	×	×	×	×	×	१
हरिणप्लुता	×	×	१	×	×	×	×	१
इन्द्रवज्रा	×	×	×	×	१	×	×	१
रुचिरा	×	×	×	×	१	×	×	१
सुवदना	×	×	×	१	×	×	×	१
पूर्णयोगः	३३	१४	१८	२४	३५	३२	२९	१८५

नाटकेऽस्मिन् भास-कालिदास-भारवि-श्रीहर्षप्रमुखाणां महाकवीनां प्रभावः स्फुटं परिलक्ष्यते । अत्र भासस्य कथासङ्घटनमनोज्ञता सरलता च, कालिदासस्य भावतरलता, भारवेर्यमकालङ्काररुचिरता, श्रीहर्षस्य पदललिततेत्येताः सर्वा अपि विशिष्टताः समवेताः सन्ति । भावपात्रचरित्रचित्रणालङ्कारविधानादीनि तत्त्वानि वर्तन्तेऽत्र सफलतां गाहमानानि । छन्दोविधाने, रसबन्धे चानुपममेव नाटककारस्य नैपुण्यं प्रस्तौति नाटकमेतत् ।

सूक्तिप्रयोगः

	सूक्तयः	स्थलनिर्देशः
१.	चित्रं विधेश्चेष्टितम्	१/१०
२.	प्रकृत्या चापल्यात् परिभवपदं यान्ति कुलटाः	१/२९
३.	भवति हि दृढस्नेहः सत्यं सुते पितुरौरसे	३/४
४.	महतां भूतिः परार्थाशया	४/३
५.	उद्योगसिद्धफलमेति महानुभावो विघ्नान् विजित्य सहसा प्रयतः स्वकृत्ये	४/१०
६.	भवन्ति खलु योषितः पतिसुखापदा लक्षिताः	५/३
७.	हरति भृशमसत्याः सङ्ग ओजः सतां हि	५/६
८.	भवति हि कुलटाया अस्थिरं प्रेम पुंसि	५/७
९.	कृषति खलु मनांसि स्त्रीत्वमेकं हि पुंसाम्	५/१३
१०.	नूनं नो महतां मुखाम्बुजगता वाणीव्यतिक्राम्यति	५/२३
११.	नूनं परस्य मुखदर्शतोहि पुंसः संमीलनं नयनयोर्वरमेव सत्याः	६/९
१२.	कः संशयः खलु मृतौ विरहातुरायाः	६/१५
१३.	प्रोक्तं वाऽनुक्तमर्थं य इह न कुरुते विद्धि तं स्वं कलत्रम्	६/२९

सुन्दरचरितनाटकम्

प्रथमोऽङ्कः

प्रथमाङ्ककथासारः

आशीर्वादात्मिकाया हनुमच्चरित्रमुपश्लोकयन्त्या अष्टापदनान्द्याः समाप्तौ नेपथ्याभिमुखः सूत्रधारः शरत्कालिकीं सुषमामुपलक्ष्य छविलालप्रणीतेन नाटकेन नेपालपालेश्वरस्य महाराजस्य परिषदं परितोषयितुं नटीं निर्दिशति। सा च शारदीं लक्ष्मीं भट्टिनीञ्च श्लोकेनैकेन वर्णयति । सूत्रधारोऽपि नटीकृतस्य वर्णनस्यौचित्यं निरूपयन् विगलित-पयोदाभिरामनभसोऽमलसलिल-सरिद्विलसितायाः सप्तच्छदकाशादि-कुसुमनिकरैर्वनश्रियं समेधमानायाः समीरणोद्भूतफलप्रभावतो हृष्टैर्वनौकोभिः समलङ्कृताया हिमांशुहृत-सकलसन्तापायाः शान्तनिशान्तायाः परमानन्दसन्दोहप्रदायाः शरदो वैशिष्ट्यं प्रकाशयति, श्लेषमुखेन नाटकीयकथानकस्य सूत्रञ्चोपस्थापयति । ततो नेपथ्यवचो निशम्य सूत्रधारो भयं नाटयति । नटी च वानरकृतं किलकिलारावमा-कर्ण्य तत्करिष्यमाणनासिकाच्छेदनादिकर्मणः संभावनया नितरां त्रस्यति। उभौ पलायनं नाटयन्तौ निर्गच्छतः ।

प्रस्तावनानन्तरं युवराजोऽङ्गदो हनुमज्जाम्बवन्नलसुषेणशरभमैन्द-द्विविदैः सह प्रविशति । ततश्चातिशयगभीरमम्भोनिधिमुल्लङ्घ्य रामकार्यं साधयितुं कोऽस्ति समर्थ इति पृच्छति । सर्वेषु प्लवगेषु मौनमाकलयत्सु सचिन्तस्याङ्गदस्य समक्षे जाम्बवान् पवनसुतस्य हनुमतो बुद्धिवैभवं कार्यकौशलञ्चाभिनन्दन् तं लङ्कामुपेत्य रामकार्यं संपादयितुं प्रेरयति । सोऽपि रामपादयुगलं मनसि निधाय पर्वतसन्निभो लङ्कामभियातुं सोत्साहः प्रतिष्ठते। वेगात्सुकुञ्चितपदस्याम्बरदत्तबाहोरुत्क्षिप्तकर्णशिखरस्य दृढबालधेः समुद्रमुपरि गच्छतो हनुमतः प्रभावोत्साहौ निरीक्ष्य जाम्बवदादयः सर्वे तत्रोपस्थिता वनौकसो नितरामेव हर्षमनुभवन्ति ।

श्री

प्रथमोऽङ्कः

१ उल्लङ्घ्य प्रथमं जलं जलनिधेर्लब्ध्वा ततो जानकीं
दग्ध्वा लूमकृशानुनाऽऽशरपुरीं जग्ध्वा यथेष्टं फलम् ।
हत्वा रावणकिङ्करांश्च शतशो दृष्ट्वा पुनर्वानरान्
पायाद्वोऽमितगर्जितं हनुमतः शार्दूलविक्रीडितम् ।।१।।

(नान्द्यन्ते)

---

१ नाटककारश्छविलालो रामायणस्य सुन्दरकाण्डगतं कथानकमुपजीव्य सुन्दरचरितं नाम नाटकं प्रणेतुमाशीर्वादात्मकं मङ्गलं प्रस्तौति- **उल्लङ्घ्येति** ।

अन्वयः - प्रथमम् जलनिधेः जलम् उल्लङ्घ्य ततः जानकीम् लब्ध्वा लूमकृशानुना आशरपुरीम् दग्ध्वा यथेष्टम् फलम् जग्ध्वा शतशः रावणकिङ्करान् च हत्वा पुनः वानरान् दृष्ट्वा *(कृतम्)* शार्दूलविक्रीडितम् हनुमतः अमितगर्जितम् वः पायात् ।

व्याख्या - **प्रथमम्** = आदौ, **जलानां निधिः जलनिधिः, जलानि निधीयन्तेऽत्र वा जलनिधिः तस्य जलनिधेः** = समुद्रस्य, **रत्नाकरो जलनिधिर्यादःपतिरपां पतिः**, इत्यमरः । **जलम्**= सलिलम्, **उल्लङ्घ्य** = लङ्घयित्वा, *उत्-लघि + क्त्वा > ल्यप् ।* **ततः** = समुद्रलङ्घनानन्तरम्, **जनकस्य अपत्यं स्त्री जानकी, ताम् जानकीम्** = जनकनन्दिनीम्, सीतामित्यर्थः। **लब्ध्वा**= प्राप्य, लभ्+क्त्वा । **लूमस्य** = पुच्छस्य, **पुच्छोऽस्त्री लूमलाङ्गूले**, इत्यमरः । **कृशानुना** = वह्निना, **आशृणन्तीति आशराः** = राक्षसाः, **शृ हिंसायामित्यस्माद् धातोः पचाद्यच्। आशराणां पुरी, आशरपुरी, ताम्, आशरपुरीम्** = राक्षसनगरीम्, लङ्कामित्यर्थः । **क्रव्यादोऽस्त्रप आशरः**, इत्यमरः । **दग्ध्वा** = भस्मीकृत्य, दह + क्त्वा । **इष्टम् अनतिक्रम्य इति, यथेष्टम्** = इच्छानुसारेण, **फलम्** = आम्रपनसादि **जग्ध्वा** = भक्षयित्वा, अद्+क्त्वा, अदो घस्लृ । **शतशः** = शताधिकान्, **रावयति** = रोदयतीति, **रावणः** = लङ्केशः, **तस्य किङ्कराः** = भृत्याः, **तान्**, च, अत्र चपदेन रावणकनिष्ठ-सुतस्याक्षयकुमारस्यापि ग्रहणम् । रावणसैन्यानित्यर्थः । **हत्वा** = व्यापाद्य, **पुनः** = भूयः, **वानरान्** = अङ्गदादीन्, **मर्कटो वानरः कीशः**, इत्यमरः । **दृष्ट्वा** = विलोक्य, दृश् + क्त्वा । कृतम्, **शार्दूलस्य विक्रीडितमिव विक्रीडितं यस्मिन् तत्**

२ **सूत्रधारः** अलमतिविस्तरेण (नेपथ्याभिमुखमवलोक्य) आर्ये, किमिति जोषमास्यते। अचिरात्प्रवृत्तेयं शारदी लक्ष्मीः । तामुद्दिश्य छविलालसूरिविरचितेन

शार्दूलविक्रीडितम् = व्याघ्रक्रीडोपमक्रीडायुतम्, **हनुः, अस्य अस्तीति हनुमान् तस्य हनुमतः** = पवनसूनोः, **मातुम् अशक्यम् अमितम्, अमितम् च तत् गर्जितम् अमितगर्जितम्** = अतुलनीयगर्जनम् **वः** = युष्मान्, दर्शकानित्यर्थः । **पायात्** = रक्ष्यात् ।

सरलार्थः - पवनसूनुर्हनुमान् समुद्रमुल्लङ्घ्य लङ्कामुपेतो जानकीमपश्यत्। ततः स तस्यै स्ववृत्तान्तं निवेद्य बुभुक्षितस्तदनुज्ञयाऽशोकवाटिकां प्रविश्य यथेष्टं फलान्यभक्षयत् । तन्निवारणाय समागतानि रावणसैन्यानि च तेन घातितानि । रावणज्येष्ठसुतेन मेघनादेन ब्रह्मास्त्रं प्रहृत्य बद्धोऽसौ रावणभवनमुपेतः स्वपरिचयं प्रस्तुतवान्। विभीषणवचनमनुसरद्भी राक्षसैः घृतसिक्तैर्वसनैरावेष्ट्य पुच्छे वह्निना प्रज्वालिते पवनसुतो गृहाद् गृहमुत्प्लवमानो विहाय विभीषणभवनं सकलान्यपि लङ्कानगरनिकेतनानि भस्मीचकार। ततः स सीतामुपसृत्य साभिज्ञानं तत्प्रेषितं रामसन्देशं गृहीत्वा प्रत्यावृत्तो वानरान् वीक्ष्य व्याघ्रक्रीडोपमक्रीडायुक्तं यदनुपमं गर्जनमकरोत् तद् भवतां नाटकप्रेक्षकाणां कल्याणं विदधातु, इति ।

अत्र शार्दूलस्य विक्रीडितमिव विक्रीडितमिति स्थले **उपमालङ्कारः** । वर्णानामसकृदावृत्तेः, **अनुप्रासश्च**। **वृत्तञ्चात्र शार्दूलविक्रीडितम्** । तल्लक्षणं यथा-

सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ।

अष्टपदा चेयं नान्दी । तस्या लक्षणं यथा-

आशीर्वचनसंयुक्ता स्तुतिर्यस्मात्प्रयुज्यते ।
देवद्विजनृपादीनां तस्मान्नान्दीति संज्ञिता ।।
मङ्गल्यशङ्खचक्राब्जकोककैरवशंसिनी ।
पदैर्युक्ता द्वादशभिरष्टाभिर्वा पदैर्युता ।।
श्लोकपादं पदं केचित् सुप्तिङन्तमथापरे ।
परेऽवान्तरवाक्यैकस्वरूपं पदमूचिरे ।।

नान्द्याः = पूर्वोक्तायाः **अन्ते** = समाप्तौ इति भावः ।

२ **सूत्रधारः** - **सूत्रं** = कथासूत्रम्, **धारयतीति सूत्रधारः** = प्रधाननटः, स चागत्य वदतीति शेषः, सूत्रोपपदात् णिजन्तात् धृञ् धारणे, इत्यस्माद् धातोः **कर्मण्यण्** इत्यण् ।

अत्यन्तं विस्तरः, अतिविस्तरस्तेन, अतिविस्तरेण अलम् = अतिविस्तारेण प्रयोजनं नास्तीति भावः । **गम्यमानापि क्रिया कारकविभक्तौ प्रयोजिका**, इत्युक्तेः साधनक्रियां प्रति अतिविस्तरेणेति करणम् ।

सुन्दरचरिताख्येन नूतनतरनाटकेन नेपालपालेश्वरस्य महाराजस्येयं परिषत् परितोषयितव्या ।

३ **नटी** - जं अज्जो आण्णवेदि । [*यदार्य आज्ञापयति ।*] (इति पठति ।)

४ **जअदि पिअवअस्सा भट्टिणी सारदी मे**
विलसदि गदमेहा चन्दमोचन्दिआहिम् ।
विकसदि णवपत्ता मालदी जे वहूणं
हरइ हिअअमाणं एत्थ दाणिं अवस्सम् ।।२।।
[जयति प्रियवयस्या भट्टिनी शारदी मे
विलसति गतमेघा चन्द्रमश्चन्द्रिकाभिः ।

(**नेपथ्यम्** = यवनान्तरितं नटवर्गभूमिकाग्रहणयोग्यस्थानम्, तस्य **अभिमुखम्** = संमुखम्, **अवलोक्य** = निरीक्ष्येत्यर्थः ।) **आर्ये** = हे नटि ! **वाच्यौ नटीसूत्रधारावार्यनाम्ना परस्परमित्युक्तेः**। **किम्** = किमर्थम्, **जोषम्** = तूष्णीम्, **आस्यते** = स्थीयते ? **इयम्** = एषा, **शरदि भवा शारदी** = शरत्कालोत्पन्ना, **लक्ष्मीः** = शोभा, **अचिरात्** = अधुनैव, **प्रवृत्ता** = प्रादुर्भूता । **ताम्** = लक्ष्मीम्, **उद्दिश्य** = उपलक्ष्य, **छविलालश्चासौ सूरिस्तेन, छविलालसूरिणा** = छविलालविदुषा, **विरचितेन** = प्रणीतेन, **सुन्दरं** = रमणीयम्, **चरितं यस्मिन् तत् सुन्दरचरितम्, सुन्दरचरितम् आख्या यस्य तेन, सुन्दरचरिताख्येन** = सुन्दरचरितनामकेन, **नूतनतरेण** = नवीनतरेण, प्रचलितनाटकेभ्यो भिन्नेनेत्यर्थः, **नाटकेन** = दृश्यकाव्यभेदेन, **नेपालं पालयन्तीति नेपालपालाः** = नेपालस्य सामन्तभूपतयः, **तेषाम् ईश्वरः** = अधिराजः, श्री ५ पृथ्वीवीरविक्रमः, **तस्य, इयम्** = एषा, **परिषत्** = सभा, **परितोषयितव्या** = प्रमोदयितव्या । शरदि समुद्भवां श्रियमुद्दिश्य सुन्दरचरितनाटकं प्रदर्श्यास्याः परिषदो मनो विनोद्यत इति भावः ।

३ **नटी - यत् आर्यः** = भवान्, **आज्ञापयति** = आदिशति तत्करोमीत्यर्थः ।

४ अत्र नाटककारो नटीमुखेन शरच्छ्रियं शारदीञ्च वर्णयति- **जयतीति** ।

अन्वयः - मे प्रियवयस्या शारदी भट्टिनी जयति । गतमेघा प्रियवयस्या शारदी चन्द्रमश्चन्द्रिकाभिः विलसति । इदानीम् अत्र नवपत्रा मालती विकसति या वधूनाम् हृदयमानम् अवश्यम् हरति ।

व्याख्या - मे = मम (नट्याः) **प्रिया चासौ वयस्या च प्रियवयस्या** = प्रियसखी, **शारदी** = तदाख्या, शरत्कालोद्भवा वा, **भट्टिनी** = अनभिषिक्ता राजमहिषी, **देवी कृताभिषेकायामितरासु तु भट्टिनी**, इत्यमरः । **जयति** = विजयते । **गतः**

विकसति नवपत्रा मालती या वधूनां
हरति हृदयमानमत्रेदानीमवश्यम् ।।१।।]

५ सूत्रधारः - अहो शरद्वर्णनं यथोचितं ते पश्यामि । तथा हि -

६ कादम्बिनी त्यजति विष्णुपदं निशान्ते
स्रोतस्वती वहति निर्मलतोयवीचिम् ।

मेघः यस्याः सा गतमेघा = अभ्रशून्या, शरदि भवा शारदी = शरत्संबन्धिनी शोभा, चन्द्रमसः = इन्दोः, हिमांशुश्चन्द्रमाश्चन्द्रः, इत्यमरः । चन्द्रिकाभिः = ज्योत्स्नाभिः, चन्द्रिका कौमुदी ज्योत्स्ना, इत्यमरः । विलसति = शोभते । इदानीम्= अधुना, दानीञ्चेति दानींप्रत्ययः, शरदीत्यर्थः। अत्र = अस्मिन् स्थाने, सप्तम्यास्त्रल्, इति त्रल् । नवानि = नूतनानि, पत्राणि = पर्णानि, यस्याः सा, नवपत्रा = सद्योजातपल्लवा, मालती= जातिः, सुमना मालती जातिः, इत्यमरः । विकसति= फुल्लति । या = मालती, वधूनाम् = स्त्रीणाम्, स्त्री योषिदबला योषा नारी सीमन्तिनी वधूः, इत्यमरः । हृदयस्य = चेतसः, चित्तन्तु चेतो हृदयम्, इत्यमरः। मानम् = दर्पम्, अवश्यम् = नूनम्, हरति = दूरीकरोति ।

सरलार्थः - शरत्समये गगनं चन्द्रकिरणैः सुन्दरं दृश्यते । विकसिता मालती मानिनीनां स्त्रीणां मानं हरति । अस्यामवस्थायां मम प्रियवयस्या शारदी च नितरां शोभते, इति

मालिनीवृत्तम्, तल्लक्षणं यथा-

''ननमयययुतेयं मालिनी भोगिलोकैः'' इति ।

५ सूत्रधारः - अहो = आश्चर्यस्य विषयः, अहो ही च विस्मये इत्यमरः । ते = तव, त्वत्कृतमिति भावः । शरदः = शरदृतोः, वर्णनम् = व्याख्यानम्, यथोचितम् = स्वाभाविकम्, समयोचितमित्यर्थः । पश्यामि = विलोकयामि । तथा हि = यथेति भावः ।

६ अत्र नाटककारः सूत्रधारमुखेन शरदो वैशिष्ट्यं प्रकाशयति- कादम्बिनीति ।

अन्वयः - निशान्ते कादम्बिनी विष्णुपदं त्यजति । स्रोतस्वती निर्मलतोयवीचिम् वहति । वनश्रियमुद्वहन्ति सप्तच्छदस्य कुसुमानि तथा काशाः च कामं चकासति ।

व्याख्या - निशायाः अन्तः निशान्तः, तस्मिन् निशान्ते = रात्र्यवसाने, कादम्बिनी = मेघमाला, कादम्बिनी मेघमाला, इत्यमरः । विष्णोः पदम्, तत् विष्णुपदम् = आकाशम्, वियद् विष्णुपदम्, इत्यमरः । त्यजति = जहाति । स्रोतांसि सन्ति यस्याः सा स्रोतस्वती = नदी, निर्मलानि = पङ्करहितानि, यानि तोयानि = जलानि, तेषां वीचिम् = तरङ्गम्, वहति = धारयति । वनस्य श्रीः

सप्तच्छदस्य कुसुमानि तथा च काशाः
कामं चकासति वनश्रियमुद्वहन्ति ।।३।।

७ निशान्तः शान्तोऽसौ जहति न सरः श्वेतगरुतः
सरोनीरं स्वच्छं विदधति सदा शीतमरुतः ।

वनश्रीः, ताम् **वनश्रियम्** = विपिनशोभाम्, **उद्वहन्ति** = धारयन्ति, **सप्त** = सप्तसङ्ख्याकाः, **छदाः** = पर्णानि, **यस्य सः**, **सप्तच्छदः**, **तस्य सप्तच्छदस्य** = सप्तपर्णस्य, **कुसुमानि** = पुष्पाणि, **प्रसूनं कुसुमं सुमम्**, इत्यमरः । **तथा** = वनश्रियमुद्वहन्तः, **काशाश्च** = तृणविशेषा अपि, **कामम्** = अत्यन्तम्, **चकासति** = शोभन्ते । **चकासृ दीप्तौ**, इत्यस्य लटि प्रथमपुरुषस्य बहुवचने रूपम् ।

सरलार्थः - शरदि मेघमाला निशावसाने व्योम त्यजति । नदी निर्मला दृश्यते। काशपुष्पाणि सप्तपर्णकुसुमानि च विपिनसौन्दर्यं समेधयन्ति, इति ।

अत्र सप्तच्छदकुसुमानां काशानाञ्च प्रस्तुतानां चकासनरूपैकधर्माभिसंबन्धात्तुल्ययोगितालङ्कारः स्वभावोक्तिश्च। वसन्ततिलकञ्चात्र वृत्तम् । तल्लक्षणं यथा-

ज्ञेयं वसन्ततिलकं तभजा जगौ ग इति ।

७ अत्रापि छविलालः शरद्वैशिष्ट्यमेव सूत्रधारमुखेन वर्णयति- **निशान्तेति**

अन्वयः - असौ निशान्तः शान्तः । श्वेतगरुतः सरः न जहति । शीतमरुतः सरोनीरं सदा स्वच्छं विदधति । हिमांशुः च लोकानां विविधं तापं परिहरति । तथा इयम् शरत् जनानाम् अपूर्वम् तोषम् जनयति ।

व्याख्या - **असौ** = एष वर्तमानः, **निशायाः अन्तः निशान्तः** = रात्र्यवसानसमयः, **शान्तः** = कोलाहलशून्यः, शरदि पक्षिणोऽपि नीडेषु शान्ता निवसन्तीति भावः । **श्वेताः** = धवलाः, **गरुतः** = पक्षाः, **येषान्ते श्वेतगरुतः** = हंसाः, **गरुत्पक्षच्छदाः पत्रं पतत्रञ्च तनुरुहम्**, इत्यमरः । **सरः** = तडागम्, **कासारः सरसि सरः**, इत्यमरः। **न जहति** = न त्यजन्ति । **शीताश्च ते मरुतः शीतमरुतः** = शीतलवायवः, **सरसाम्** = तडागानाम्, **नीरम्** = जलम्, **सदा** = सर्वदा, **स्वच्छम्** = निर्मलम्, **विदधति** = कुर्वन्ति । **हिमाः** = शीतलाः, **अंशवः** = किरणाः, **यस्य सः**, **हिमांशुः**= चन्द्रश्च, **हिमांशुश्चन्द्रमाश्चन्द्रः**, इत्यमरः । **लोकानाम्** = जनानाम्, **विविधम्** = नानाप्रकारकम्, **तापम्**= उष्णत्वम् **अथ च** आधिदैविकम्, आध्यात्मिकम्, आधिभौतिकञ्चेति तापत्रयम्, **परिहरति** = दूरीकरोति । **तथा** = तेनैव प्रकारेण, **प्रकारवचने थाल्**, इति थाल्प्रत्ययः। **इयम्** = एषा, वर्तमाना, **शरत्** = आश्विनकार्तिकमासौ, **जनानाम्** = लोकानाम्, **न विद्यते पूर्वो यस्मात् सः**, **अपूर्वस्तम्**, **अपूर्वम्** = अनुपमम्, **तोषम्** = आनन्दम्, **जनयति** = उत्पादयति ।

हिमांशुर्लोकानां परिहरति तापञ्च विविधं
तथाऽपूर्वं तोषं जनयति जनानां शरदियम् ।।४।।

अपि च -

८ निदाघकाले हरिणेरिता इमे वनौकसो जीवनसंशया अपि ।
भवन्ति हृष्टाः शरदीष्टविष्टराः समीरणोद्भूतफलप्रभावतः ।।५।।

सरलार्थः - शरदि निशावसानसमयः शान्तो दृश्यते । अधुना हंसास्तडागान् न त्यजन्ति । शीतला वायवः सरसां नीरं निर्मलत्वं प्रापयन्ति । चन्द्रो जनानां विविधं तापं हरति । इत्थमियं शरत् लोकानामनुपममानन्दं जनयति ।

अत्र शान्तपदस्यावृत्तेर्यमकालङ्कारः स्वभावोक्तिश्च । शिखरिणीवृत्तम्, तल्लक्षणं यथा-

रसैरुद्रैश्छिन्ना यमनसभला गः शिखरिणी ।

८ अत्र नाटककारः श्लेषमुखेन शरद्वैशिष्ट्यं कथावस्तुनः प्रसङ्गञ्चोपस्थापयति- निदाघ इति ।

अन्वयः - हरिणा ईरिता इमे वनौकसः निदाघकाले जीवनसंशया अपि समीरणोद्भूतफलप्रभावतः शरदि इष्टविष्टराः हृष्टाः भवन्ति ।

व्याख्या- वनौकःपक्षे- हरिणा = अग्निना, हरिश्चन्द्रार्कवाताश्वशुकभेक-यमाग्निषु, इत्यमरः । ईरिताः = कम्पिताः, ईर गतौ कम्पने चेत्यस्माद् धातोर्निष्ठायां क्तः । वनाग्नित्रस्ता इति भावः । इमे = एते, पुरोवर्तिन इति भावः । वनम् ओकः येषान्ते वनौकसः = वनोद्भवाः प्राणिनः, नितरां दह्यते इति निदाघः, स चासौ कालः, तस्मिन् निदाघकाले = ग्रीष्मर्तौ, निदाघ उष्णोपगम उष्ण उष्णागमस्तपः, इत्यमरः । जीवनस्य = जीवितस्य, संशयः = सन्देहः, येषान्ते, जीवनसंशयाः= प्राणसङ्कटाः, वनाग्निप्रभावादित्यर्थः । अपि = च, समीरणः = वायुः, तस्मात् उद्भूतम् = उत्पन्नम्, यत् फलम् = वर्षाः, तस्य प्रभावतः = सामर्थ्यात्, शरदि = शरत्काले, इष्टाः = अभीष्टाः, विष्टराः = वृक्षाः, येषाम् ते तथाभूताः सन्तः, दाहजनकत्वाभावात्, फलवत्त्वाच्च, हृष्टाः = सानन्दाः, भवन्ति = सन्ति ।

सरलार्थः - ग्रीष्मर्तौ वनाग्नित्रस्ता अत एव जीवनसंशया वनोद्भवाः प्राणिनो वर्षर्तुप्रभावात् शरदि फलत्त्वात् दाहजनकत्वाभावाच्च, अभीष्टवृक्षा इष्टासना वा सानन्दं तिष्ठन्तीति भावः ।

वृक्षपक्षे - हरिणा = वायुना, वानरेण वा, ईरिताः = कम्पिताः, वनम् = अरण्यम्, ओकः = आश्रयः, येषान्ते तथाभूताः, वनौकसः = विपिनस्थाः, इष्टाः = प्रियाः, विष्टराः = वृक्षाः, निदाघकाले = ग्रीष्मर्तौ, जीवनसंशयाः =

९ आः कोऽयं वध्यो रावणपक्षावलम्बितोऽस्मानधिक्षिपति । हनुमतो बलमाश्रिता

जलाभावेन वनाग्निप्रभावाद् वा प्राणसङ्कटा अपि, **समीरणः** = वायुः, **तस्मात्**, **उद्भूतम्** = उत्पन्नम्, **यत् फलम्** = वर्षाः, **तस्य प्रभावतः** = सामर्थ्यात्, **शरदि** = शरत्काले, **हृष्टाः** = लक्षणया पुष्टाः, भवन्ति ।

सरलार्थः - ग्रीष्मर्तौ वायुना वानरैर्वा दोलिता वनोद्भवाः वृक्षा जलाभावेन वनाग्निप्रभावाद् वा ग्रीष्मर्तौ शुष्का अपि वर्षाकालिकवृष्टेः प्रभावेण शरदि हरितः समृद्धाश्च दृश्यन्त इति ।

तडागपक्षे - हरिणा = सूर्येण, **ईरिताः** = शोषिताः, **वनानाम्** = जलानाम्, **ओकसः** = आश्रयभूताः, तडागाः, **ओकः सद्माश्रयः**, इत्यमरः । **निदाघकाले** = ग्रीष्मर्तौ, **जीवनस्य** = जलस्य, **संशयः** = सन्देहः, **येषु ते तथाभूताः**, **अपि समीरणोद्भूतफलप्रभावतः**= वर्षासामर्थ्यात्, **शरदि** = शरत्काले, **हृष्टाः** = लक्षणया पूर्णजलाः, **इष्टाः** = छायया रवितापनिवारकतया प्रियाः, **विष्टराः** = वृक्षाः, **येषान्ते तथाभूताः सन्ति** ।

सरलार्थः - ग्रीष्मर्तौ सूर्यकिरणैः शुष्कजलाः तडागा वर्षासामार्थ्यात् शरदि पूर्णजला दृश्यन्ते, इति ।

कथावस्तुपक्षे- निदाघकाले = ग्रीष्मर्तौ, **हरिणा** = सुग्रीवेण, **ईरिताः** = सीतान्वेषणाय प्रेरिताः, **वनौकसः** = वानरभल्लूकाद्याः प्राणिनः, **जीवनसंशयाः**= प्राणसङ्कटाः, यावत् सीतां न लभन्ते तावत् तेषां जीवनं सङ्कटमयमेवासीत् । **तथापि शरदि** = शरत्समये, **समीरणः** = वायुः, **तस्मात् उद्भूतः** = जातः, हनुमान्, **तस्य यत् फलम्** = लङ्कागमनादि, **तस्य प्रभावतः** = समार्थ्यात्, **इष्टाः**- अभीष्टाः, **विष्टराः** = आसनानि, दधिमुखरक्षितोद्यानवृक्षा वा **येषान्ते तथाभूताः सन्तः**, **हृष्टाः**= सानन्दा भवन्ति ।

सरलार्थः - ग्रीष्मर्तौ सीतान्वेषणाय सुग्रीवेण प्रेषिता वानरभल्लुकादयः प्राणिनः सीतामलब्ध्वा प्राणसङ्कटा अपि शरत्समये हनुमतो लङ्कागमनप्रभावेण तद्वृतान्तावबोधाद् दधिमुखरक्षितोद्याने फलं खादन्तः सानन्दाः सन्तीति

अत्र हरिवनौकोजीवनविष्टरशब्दानामनेकार्थकतया **श्लेषालङ्कारः**, वस्तु-स्वभाववर्णनात् **स्वभावोक्त्यलङ्कारश्च** । **वृत्तञ्चात्र वंशस्थविलम्बितम्**, तल्लक्षणं यथा-

वदन्ति वंशस्थविलम्बितं जरौ, इति ।

९ **आः** = आश्चर्यबोधकोऽयं शब्दः । **अयम्** = एषः, **रावणस्य** = लङ्केशस्य

वयमिति । तिष्ठ क्षणं कुणपाशन ! नेदानीं त्वं भविष्यसि । (श्रुत्वा सूत्रधारो भयं नाटयति)

१० **नटी** – अब्बह्मण्णम् ! अब्बह्मण्णम् ! णिरासाह्मि जीविदे संवुत्ता । परित्ताअस्स मम् । [*अब्रह्मण्यम् ! अब्रह्मण्यम् ! निराशास्मि जीविते संवृत्ता । परित्रायस्व माम् ।*]

११ **सूत्रधारः** – न स्थातव्यमिहावाभ्याम् । पलायावहै ।

१२ **नटी** – अध इम् । वाणलाणं किलइलाराओ सुणीअदि । जे पकिदिचवला इदो आगच्छिअ अह्माणं णासिआकण्णछेदणं करिस्सन्ति, तादुतं गच्छावो । [*अथ किम् । वानराणां किलकिलारावः श्रूयते । प्रकृतिचपलास्ते इत आगत्यावयोर्नासिकाकर्णच्छेदनं करिष्यन्ति, तद्रुतं गच्छाव ।*]

(इति निष्क्रान्तौ)

इति प्रस्तावना

पक्षमवलम्बितः = पक्षधरः, **अत एव वध्यः** = मारणार्हः, **अस्मान्** = अङ्गदादीन्, **अधिक्षिपति** = आक्षिपति, **यद् वयम्** = प्लवगाः, **हनुमतः** = पवनसूनोः, **बलम्**= शक्तिम्, **आश्रिताः** = श्रिताः, इति, न केवलं वयं हनुमच्छक्त्या जीवामोऽस्माकप्यस्ति बलमिति भावः । **भो कुणपाशन** = हे राक्षस! त्वम्, **इदानीं** = सांप्रतम्, **न भविष्यसि** = तव जीवनमधुना न स्थास्यतीति भावः ।

१० **नटी – अब्रह्मण्यम् अब्रह्मण्यम्** = अब्रह्मण्यमवध्योक्तौ, **जीविते**= जीवने **निराशा**= आशाशून्या, **संवृत्ता** = सञ्जाता, अस्मि । **माम्** = नटीम्, **परित्रायस्व** = रक्ष ।

११ **सूत्रधारः – इह** = अस्मिन् स्थाने, **आवाभ्याम्** = नटीसूत्रधाराभ्याम्, **न स्थातव्यम्**= नैव स्थेयम्, **पलायावहै** = स्थानादस्मात् शीघ्रम् गच्छाव ।

१२ **नटी – वानराणाम्** = मर्कटानाम्, **किलकिल इति आरावः** = शब्दः, **श्रूयते** = आकर्ण्यते, **प्रकृत्या** = स्वभावेनैव, **चपलाः** = चञ्चलाः, **ते** = वानराः, **इतः** = अस्मिन् स्थाने, **आगत्य** = समेत्य, **आवयोः** = नटीसूत्रधारयोः, **नासिकायाः** = नसः, **कर्णयोः**= श्रवणयोश्च, **छेदनम्** = कर्तनम्, **करिष्यन्ति** = विधास्यन्ति । **तत्**= तस्मात्, **द्रुतम्**= शीघ्रम्, **गच्छाव** = याव । **गम्धातोर्लोटि** उत्तमपुरुषबहुवचने रूपम्, ङिद्वद्भावेन सलोपः ।

(इति निष्क्रान्तौ)

इति प्रस्तावना

(ततः प्रविशति हनुमज्जाम्बवन्नलसुषेणशरभमैन्दद्विविदैः सह युवराजोऽङ्गदः)

१३ **अङ्गदः** - भो भो वानरर्षभाः! कथमयं तिरस्करिणीमायापिहितकलेवरः कोऽपि दशमुखानुचरो हनुमतोऽस्मान् विरोधयितुमिच्छति छलात्। बुद्धिमतां वरिष्ठः पवनात्मजो हि मदीयाज्ञानिरोधं मनसापि न करिष्यति।

१४ **जाम्बवान्** - युवराज! किमनेनाधिक्षेपेणास्य दुष्टस्यास्माकं भविष्यति, पश्यतु कुमार! एते सर्वे बलविक्रमशालिनो वलीमुखा रामसुग्रीवपरीक्षितवीर्या वयमिहागताः स्मः। तावत्प्रष्टव्याः - क एतेष्वस्मिन्कार्यसाधने कुशल इति।

---

१३ **अङ्गदः - वानरेषु** = कपिषु, **ऋषभाः** = श्रेष्ठाः, **तत्संबुद्धौ भो वानरर्षभाः** = हे प्लवगोत्तमाः! **तिरस्करिणी** = जवनिका, **एव माया** = शाम्बरी, **माया स्याच्छाम्बरी बुद्ध्योर्मायः पीताम्वरेऽसुरे**, इत्यमरः। **तया पिहितम्** = छादितम्, **कलेवरम्** = शरीरम्, **यस्य सः, कोऽपि** = अपरिचितः, **दश मुखानि यस्य सः, दशमुखः** = रावणः, **तस्य अनुचरः** = भृत्यः, **अस्मान्** = प्लवगान्, **छलात्** = व्याजात्, **विरोधयितुम्** = विग्रहयितुम्, **इच्छति** = वाञ्छति। **बुद्धिरस्ति येषान्ते, बुद्धिमन्तः, तेषाम्, बुद्धिमताम्** = धीमताम्, **श्रेष्ठः** = उत्तमः, **पवनस्य** = वायोः, **आत्मजः**= पुत्रः, **मम इयम् मदीया, सा चासौ आज्ञा, मदीयाज्ञा** = ममादेशः, **तस्या निरोधः** = निषेधस्तम्, **मनसा अपि** = चेतसा, अपि **न विधास्यति** = न करिष्यति। किं कर्मणेति भावः।

१४ **जाम्बवान् - युवा चासौ राजा युवराजः, तत्संबुद्धौ, हे युवराज** = हे अङ्गद! **अस्य** = एतस्य, **दुष्टस्य** = दुर्जनस्य, **अनेन** = एतेन, **अधिक्षेपेण** = आक्षेपेण, **अस्माकम्** = प्लवगानाम्, **किं भविष्यति ?** न किमपीत्यर्थः। **भो कुमार** = हे अङ्गद! **पश्यतु** = विलोकयतु- **एते** = इमे, **सर्वे** = निखिलाः (न केवलं हनुमानेव) **बलञ्च विक्रमश्च ताभ्यां शालन्त इति ते, बलविक्रमशालिनः** = शक्तिपराक्रम-शोभिनः, **रामश्च सुग्रीवश्च रामसुग्रीवौ, ताभ्यां परीक्षितं वीर्यं येषान्ते, रामसुग्रीव-परीक्षितवीर्याः** = दाशरथिसुग्रीवसमीक्षितपराक्रमाः, **वयम्** = अत्रोपस्थिताः, **वलीमुखाः** = वानराः, प्राधान्येन वलीमुखशब्दस्य प्रयोगः, बहुवचनान्ततया भल्लूका-नामपि ग्रहणम्। **तावत्** = आदौ, **प्रष्टव्याः** = पृच्छ्यन्ते भवन्त इति शेषः। **एतेषु**= अत्र समुपस्थितेषु प्लवगेषु, **कः** = किंनामधेयः, **अस्मिन्** = एतस्मिन्, सीतान्वेषण-कर्मणि लङ्कागमनकार्ये वा, **कुशलः** = प्रवीणः, अस्तीति शेषः।

१५ **अङ्गदः** - अथ किम् । एवं पृच्छामि । भो भोः प्लवगोत्तमाः ! कः खलु भवत्स्वीदृशं लवणाब्धिं समुत्प्लुत्य राजशासनं साधितुमुत्सहते । तथा हि-

१६ **लोलोल्लोलोल्लुठितशकुलः कूर्मपाठीनवृन्द-**
व्याप्तावर्तभ्रमचलजलोच्छ्वासजम्बालजालः ।
दुर्धर्षोर्मिच्युतचिलिचिमः शंबरग्राहवाहः
पारावारे ग्रसति किमुत क्ष्मां समग्रां समुद्रः ।।६।।

---

१५ **अङ्गदः - अथ किम्** = अथवा, **एवम्** = अनया रीत्या, **पृच्छामि** = प्रश्नं करोमि, **भो भो प्लवगेषु उत्तमाः, प्लवगोत्तमाः** = वानरर्षभाः ! **भवत्सु** = युष्मासु, **कः** = कतमः, **खलु** = निश्चयेन, **ईदृशम्** = भीषणम्, **लवणाब्धिम्** = क्षारसमुद्रम् . **समुत्प्लुत्य** = उल्लङ्घ्य, **राज्ञः** = सुग्रीवस्य, **शासनम्** = आज्ञाम्, **साधितुम्** = संपादयितुम्, **उत्सहते** = उत्साहं प्रदर्शयति ?

१६ अत्र नाटककारोऽङ्गदमुखेन समुद्रस्य वैशिष्ट्यं प्रकाशयति - **लोलेति** ।

अन्वयः - लोलोल्लोलोल्लुठितशकुलः, कूर्मपाठीनवृन्दव्याप्तावर्तभ्रमचलजलोच्छ्वासजम्बालजालः दुर्धर्षोर्मिच्युतचिलिचिमः शम्बरग्राहवाहः समुद्रः पारावारे समग्राम् क्ष्माम् ग्रसति किमुत ।

व्याख्या - लोलाः = चञ्चलाः, **ये उल्लोलाः** = महोर्मयः, **महत्सूल्लोल-कल्लोलौ**, इत्यमरः । **तत्र तैर्वा, लुठिताः** = उपावृत्ताः, **शकुलाः** = मत्स्यभेदाः **यत्र सः, कूर्माः** = कच्छपाः, **कूर्मे कमठकच्छपौ**, इत्यमरः । **पाठीम्** = पृष्ठं **नाययन्तीति पाठीनाः** = सहस्रदंष्टाः, **सहस्रदंष्ट्रः पाठीनः**, इत्यमरः । **तेषां वृन्दैः**= समूहैः, **व्याप्ताः** = आच्छादिताः, **ये आवर्ताः** = अम्भसां भ्रमाः, **आवर्तोऽम्भसां भ्रमः**, इत्यमरः । **तेषाम् भ्रमेण** = भ्रान्त्या, **चलन्ति** = सञ्चलन्ति, **जलोच्छ्वासेषु**= जलनिर्गमनमार्गेषु, **जम्बालानाम्** = शैवलानाम्, **जालानि** = समूहा **यत्र सः, दुर्धर्षाः** = दुरवगाहाः, **या ऊर्मयः** = तरङ्गाः, **तासु च्युताः** = पतिताः, **चिलिचिमाः**= नलमीनाः, **यत्र सः, नलमीनश्चिलिचिमः**, इत्यमरः । **शम्बराः** = मत्स्याः, **ग्राहाः**= अवहाराश्च, **तान् वहतीति सः, समुद्रः** = सागरः, **पारञ्च, अवारञ्च पारावारम्, तस्मिन् पारावारे** = तटद्वये स्थितः, पारावारः पयोराशौ पारावारं तटद्वये, इति हैमः । **समग्राम्** = निखिलाम्, **क्ष्माम्** = पृथ्वीम्, **क्ष्मावनिर्मेदिनी मही**, इत्यमरः। **ग्रसति** = भक्षयति, **किमुत** = किम्, **विकल्पे किं किमुत च**, इत्यमरः ।

सरलार्थः यस्मिन् समुद्रे चञ्चलेषु महोर्मिषु शकुला लुठन्ति, कूर्माणां पाठीनानाञ्च समूहैर्व्याप्तस्यावर्तस्य भ्रमणेन जलनिर्गमनमार्गे स्थितानि जम्बालजालानि

अपि च-

१७ अस्तं यातः किमुदयमितौ पुष्पवन्तौ प्रतीच्यां
पूर्वस्यां वा कथमिह दिशां संस्थितिः क्वाथ गोत्रा ।
नीता सीता विरहगलिता केन मार्गेण लङ्कां
मन्दाक्रान्ता किमिव जलधेरम्भसा मेदिनीयम् ।।७।।

चलन्ति सन्ति, यत्र चिलिचिमा दुर्धर्षोर्मिषु पतन्ति, यः शम्बरान्, ग्राहान् च धारयति स समुद्रो द्वयोस्तटयोः सकलामपि पृथ्वीं खादतीव दृश्यते, इति ।

अत्र, **उत्प्रेक्षानुप्रासावलङ्कारौ, मन्दाक्रान्तावृत्तञ्चात्र** । तल्लक्षणं यथा-

मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम्, इति ।

१७ पुनरपि समुद्रस्यैव वैशिष्ट्यं प्रकाशयति नाटककारोऽङ्गदमुखेन- **अस्तमिति** ।

अन्वयः पुष्पवन्तौ पूर्वस्याम् उदयम् इतौ वा प्रतीच्याम् अस्तम् यातः । इह दिशाम् संस्थितिः, कथम् ? अथ गोत्रा क्व ? विरहगलिता सीता केन मार्गेण लङ्कां नीता ? किम्, इयम् मेदिनी जलधेः अम्भसा मन्दाक्रान्ता इव ?

व्याख्या - पुष्पः = विकाशः प्रकाशश्च, **तद्वन्तौ पुष्पवन्तौ** = दिवाकरनिशाकरौ, **पुष्प विकसने** इत्स्माद् धातोर्घञि ततो मतुप्, तस्य वतुबादेशः। **एकयोक्त्या पुष्पवन्तौ दिवाकरनिशाकरौ**, इत्यमरः । **पूर्वस्याम्**= प्राच्याम्, **उदयम् इतौ** = उद्गतौ, **वा** = अथवा, **प्रतीच्याम्** = पश्चिमायां दिशि, **अस्तं यातः** = अस्तं गतौ, **इह** = समुद्रे, **दिशाम्** = हरिताम्, **दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः**, इत्यमरः । **संस्थितिः** = अवस्थानम्, **कथम्** = कीदृशी वर्तते ? पूर्वाद्या दिशः कथं स्थिताः सन्तीति सर्वत्र जलमयतया निर्धारयितुं न शक्यत इति भावः । **अथ** = पुनः, वाक्यालङ्कारे प्रश्ने वाथशब्दस्य प्रयोगः । **गोत्राः** = पर्वताः, **सन्ति अस्यां सा गोत्रा** = पृथ्वी, **गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही**, इत्यमरः । अर्शाद्यच् । **क्व** = कुत्रास्तीति शेषः । समुद्रस्य गभीरतया विशालतया च पृथ्वी न दृश्यते, इति भावः। **विरहेण गलिता विरहगलिता** = रामवियोगेन शिथिला, **सीता**= जानकी, **केन** = कतमेन, जलेनेति व्यज्यते, **मार्गेण** = पथा, **अयनं वर्त्म मार्गाध्व-पन्थानः पदवी सृतिः**, इत्यमरः । **लङ्काम्** = रावणनगरीम्, **नीता** = प्रापिता ? **किम्** = अथवा, **विकल्पे किं किमुत चेत्यमरः** । **इयम्** = पुरो वर्तमाना, **मेदिनी**= पृथ्वी, **जलानि निधीयन्तेऽत्रेति जलनिधिः** = समुद्रः, **उपसर्गे घोः किः**, इति किप्रत्ययः। **तस्य अम्भसा** = जलेन, **अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बु-शम्बरम्**, इत्यमरः। **मन्दम्** = शनैः, **आक्रान्ता** = व्याप्तेव दृश्यते ।

अपि च -

१८ आरूढोऽसौ तरिगुणतरुं वानरो वा नरो वा
नीरादूर्ध्वं ज्वलति वडवाख्यानलो वा नलो वा ।
मन्दं मन्दं तरति सलिलं किंनरः किं नरः किं
दूरादेवं जलनिधिजलं पश्यतो मे विभाति ।।८।।

सरलार्थः - समुद्रे सूर्यचन्द्रयोरुदयास्तदिशोर्ज्ञानं न भवति । विशालतया-ऽतिगभीरतया च धराऽपि न दृश्यते । सीता केन मार्गेण लङ्कां नीतेत्यपि वक्तुं न शक्यते । पृथ्वी समुद्रेण मन्दमाक्रान्तेव विभाव्यते, इति ।

अत्र जलनिधेर्विस्तारस्य तज्जलकर्तृकधराक्रमणतया संभावनाद्, **उत्प्रेक्षा-लङ्कारः** । वर्णानामावृत्तेः, **अनुप्रासश्च** । **वृत्तञ्चात्र मन्दाक्रान्ता** ।

१८ अत्रापि कविः समुद्रसलिलमेव प्रकारान्तरेण वर्णयति- **आरूढ** इति ।

अन्वयः - असौ वानरः वा नरः तरिगुणतरुम् आरूढः । वा वडावाख्यानलः वा नलः नीरात् ऊर्ध्वम् ज्वलति । किम् किन्नरः किं नरः सलिलं मन्दं मन्दं तरति । दूरात् जलनिधिजलं पश्यतः मे एवं विभाति ।

व्याख्या- असौ =एषः, पुरो दृश्यमान इत्यर्थः । **वानरः** = मर्कटः, **मर्कटो वानरः कीशः**, इत्यमरः । **वा** = अथवा **नरः** = मनुष्यः, **मनुष्या मानुषा मर्त्या मनुजा मानवा नराः**, इत्यमरः । **तरिः** = नौः, **स्त्रियां नौस्तरणिस्तरिः**, इत्यमरः। **तस्याः, गुणतरुः** = कुपकस्तम्, **कुपको गुणवृक्षकः**, इत्यमरः । **आरूढः** = आरुह्यावस्थितः, आङ्पूर्वकाद् रुहधातोर्निष्ठायां क्तः । अस्तीति शेषः । **वा** = अथवा, **वा स्याद् विकल्पोपमयोर्वितर्के पादपूरणे**, इति मेदिनी । **वडवा इति आख्या यस्य सः, वडवाख्यः, स चासौ अनलः, वडवानलः** = और्वः, **और्वस्तु वाडवो वडवानलः**, इत्यमरः । **वा** = अथवा, **नलः** = जुनेलीति भाषायां प्रसिद्धः काष्ठविशेषः, **नीरात्** = सलिलात्, **ऊर्ध्वम्** = उपरि, **ज्वलति** = द्योतते । **किम्** = अथवा, **किन्नरः** = देवयोनिविशेषः, **किम्** = अथवा, **नरः** = मनुष्यः, **सलिलम्**= जलम्, **मन्दम् मन्दम्**= शनैः शनैः, **तरति** = जले गच्छतीत्यर्थः। **दूरात्** = विप्रकृष्टात्, **जलनिधेः** = समुद्रस्य, **जलम्** = सलिलम्, **पश्यतीति पश्यन्, तस्य पश्यतः** = विलोकयतः (दृश् + शतृ) **मे**= मम, **एवम्** = पूर्वोक्तप्रकारेण, **विभाति** = प्रतीयते।

सरलार्थः - दूरात् समुद्रं विलोकयतो मम तत्र वानरो मनुष्यो वा गुणवृक्षमारूढ इव प्रतीयते । यद्वा तत्र किन्नरो वा नरः सलिलं तरतीव प्रेक्ष्यते ।

अत्र सन्देहभ्रान्तिमतोरङ्गाङ्गिभावेन **सङ्करालङ्कारः** । **मन्दाक्रान्तावृत्तम्** ।

अपि च -

१९ कल्लोलैः शिशुमारचक्रमुदधेर्ध्वस्तं किमाप्यं जग-
द्यादोभिर्लुलिता किमद्य तरणिः किं चर्विता नाविकाः ।
इत्थं मे मनसि प्रतीयत इतः संपश्यतः सागरं
को वा लङ्घयितुं क्षमो वदत मे युष्मासु भो वानराः ।।९।।

(श्रुत्वा सर्वे परस्परं विलोकयन्ति ।)

---

१९ अत्रापि नाटककारः समुद्रमेव वर्णयति- **कल्लोलैरिति** ।

अन्वयः - इतः सागरम् पश्यतः मे मनसि उदधेः कल्लोलैः शिशुमारचक्रम् ध्वस्तम् किम् ? जगत् आप्यम् (किम्) अद्य यादोभिः तरणिः लुलिता किम् ? वा नाविकाः चर्विताः किम् ? इत्थं प्रतीयते । भो वानराः ! युष्मासु कः लङ्घयितुं क्षमः? वदत ।

व्याख्या - **इतः** = अस्मात् स्थानात्, **सागरम्** = समुद्रम्, **सम्यक् पश्यतीति संपश्यन्, तस्य संपश्यतः** = सम्यग् विलोकयतः, सं-दृश् + शतृ । **मे** = मम, अङ्गदस्येत्यर्थः । **मनसि** = चित्ते, **चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः**, इत्यमरः । **उदधेः** = समुद्रस्य, **कल्लोलैः** = उल्लोलैः, **महत्सूल्लोलकल्लोलौ**, इत्यमरः । महोर्मिभिरित्यर्थः । **शिशून् मारयन्तीति शिशुमाराः** = मत्स्याः, **तेषाम् चक्रम्** = समूहः, **ध्वस्तम्** = विनष्टम्, किम् ? **अद्य** = अस्मिन् दिने, **यादोभिः**= जलजन्तुभिः, **यादांसि जलजन्तवः**, इत्यमरः । **तरणिः** = नौः, **स्त्रियां नौस्तरणिस्तरिः**, इत्यमरः । **लुलिता** = सञ्चालिता किम् ? **वा** = अथवा, वितर्के पादपूरणे वाऽत्र वाशब्दस्य प्रयोगः, **वा स्याद् विकल्पोपमयोर्वितर्के पादपूरणे**, इत्यमरः । **नाविकाः** = कर्णधाराः, **कर्णधारस्तु नाविकः**, इत्यमरः । नौकासञ्चालका इत्यर्थः । **चर्विताः** = भक्षिताः किम् ? **चर्व भक्षणे** इत्यस्माद्धातोर्निष्ठायां क्तः । यादोभिरित शेषः । **इत्थम्** = एतादृशम्, **प्रतीयते** = विभाव्यते । **भो वानराः** = हे प्लवङ्गमाः ! **युष्मासु** = भवत्सु, अत्र समुपस्थितेषु वानरेषु, इत्यर्थः । **कः** = कतमः, **तादृशं सागरं लङ्घयितुम्** = उल्लङ्घ्य लङ्कां यातुम्, **क्षमः** = समर्थः, अस्तीति शेषः । **वदत** = कथयत ।

सरलार्थः - दूरात्समुद्रं पश्यन्नहं 'कल्लोलैर्मत्स्याः घातिताः किम्, यद् वा जगत् सलिलैर्व्याप्यं वर्तते किम् ? अथवा जलजन्तुभिर्नौका सञ्चालिता, नाविका एव चर्विताः किमिति विभावये । भो वानरा ! एतादृशं समुद्रमुल्लङ्घ्य लङ्कां गन्तुं

२० **जाम्बवान्** - श्रुतं भवद्भिस्तत्र भवतः कुमारस्य मुखान्निःसृतं वचः, विज्ञापयतास्य प्रतिवचनम्। नो चेत्कुशविष्टरे वयं पूर्ववत्सर्वे स्वपिमः। न पुनरस्माकं प्राणवियोगमन्तरेण जीवनोपायः। (श्रुत्वापि सर्वे तूष्णीमवलम्बन्ते)

२१ **अङ्गदः** - (आकाशे) कष्टं भो हतविधे ! किं मया तवानुचितमनुष्ठितम्। येन त्वयाद्य तात इवाऽकारणमारणावस्थां नीतोऽस्मि। कुतः -

२२ **तातं शक्रपराक्रमं स्वपुरतो लङ्केश्वरं लङ्कया**
सार्धं प्रापयितुं क्षमं द्रुपिहितो रामोऽवधीत्सच्छलम्।
सुग्रीवोऽपि विधाय यद्रघुपतेः स्वं वैरनिर्यातनं
लेभे स्वां महिलाञ्च राज्यमखिलं चित्रं विधेश्चेष्टितम्।।१०।।

कोऽस्ति समर्थः ? कथयत, इति।

अत्रोत्प्रेक्षाणां संसृष्टिरलङ्कारः। मन्दाक्रान्तावृत्तञ्चात्र। तल्लक्षणं यथा-
मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् इति।

२० **जाम्बवान्** - **भवद्भिः** = युष्माभिः, प्लवगैरित्यर्थः। **तत्र भवतः** = मान्यस्य, **कुमारस्य** = अङ्गदस्य, **मुखात्** = वदनात्, **निर्गतम्** = निःसृतम्, **वचः** = वचनम्, **श्रुतम्**= आकर्णितम्? **अस्य**= अङ्गदवचनस्य, **प्रतिवचनम्** = प्रत्युत्तरम्, **विज्ञापयत**= निवेदयत। **नोचेत्** = अन्यथा, **सर्वे** = सकलाः, **वयम्** = प्लवगाः, **पूर्ववत्** = प्रागिव, **कुशानाम्** = दर्भाणाम्, **विष्टरे** = आसने, **स्वपिमः** = शयामहे। **पुनः** = भूयः, **प्राणानाम्** = असूनाम्, **वियोगम्** = विरहम्, **अन्तरेण** = विना, **अन्तरान्तरेण युक्ते**, इति द्वितीया। **जीवनस्य** = जीवितस्य, **उपायः** = साधनम्, **न** = नास्तीति शेषः (**श्रुत्वा** = आकर्ण्य अपि, **सर्वे** = सकलाः प्लवगाः, **तूष्णीम्** = मौनम्, **अवलम्बन्ते** = आश्रयन्ति।)

२१ **अङ्गदः** - (**आकाशे** = गगनं विलोक्येत्यर्थः) **कष्टं भोः, कष्टं भोः** = अतीव कष्टं सञ्जातम्। **हत** = प्रतिहत, **हे विधे** = हे दैव! **मया** = अङ्गदेन, **तव** = भवतः, दैवस्येत्यर्थः। **न कृत्यम् अकृत्यम्** = अकर्तव्यम्, **किम् अनुष्ठितम्** = किं विहितम्, **येन** = अकृत्येन, **त्वया** = दैवेन, **तात इव** = जनक इव, वालीत्यर्थः। **अकारणमेव**= हेतुं विनैव, **मारणस्य** = मृत्योः, **अवस्थाम्** = दशाम्, **नीतः** = प्रापितः, अस्म्यहमिति शेषः।

तत्र कारणं दर्शयति- **ततमिति**।

२२ **अन्वयः** - रामः द्रुपिहितः (सन्) लङ्कया सार्धम् लङ्केश्वरम् स्वपुरतः प्रापयितुम्

२३ हाहावुक ! हा विक्रमशालिन् ! विहाय मां क्व गतोऽसि । सुग्रीवप्रीतये भ्रातृभार्याहरणदोषमारोप्य सच्छलं परोक्षरामेण बाणेन निहतोऽसि । हा वीरशिरोमणे ! न भवत्सदृशं पितरं पुत्रो लभेत ।

क्षमम् शक्रपराक्रमम् तातम् सच्छलम् अवधीत् । सुग्रीवः अपि रघुपतेः स्वम् वैरनिर्यातम् विधाय स्वाम् महिलाम् अखिलम् राज्यम् च लेभे (तत्) विधेः चित्रम् चेष्टितम् ।

व्याख्या- रामः = दाशरथिः, **द्रुः** = वृक्षः, **तेन पिहितः** = आच्छादितः सन्, **लङ्कया** = लङ्कानगरश्रिया, **सार्धम्** = सहैव, **लङ्काया ईश्वरः, तम् लङ्केश्वरम्**= रावणम्, **स्वपुरतः** = लङ्कातः, **प्रापयितुम्** =आनेतुम्, **क्षमम्** = समर्थम्, **शक्रस्य पराक्रम इव पराक्रमो यस्य सः, तम्, शक्रपराक्रमम्**= इन्द्रतुल्यविक्रमम्, **तातम्**= जनकम्, वालिनमित्यर्थः । **छलेन सहितं यथा स्यात्तथा सच्छलम्** = सकपटम्, **अवधीत्** = हतवान्, **सुग्रीवः** = तन्नामकवानरोऽपि, **रघुपतेः** = रामात्, तद्द्वारेत्यर्थः। **स्वम्** = स्वकीयम्, **वैरस्य** = शत्रुतायाः, **निर्यातनम्** = प्रतिशोधम्, **विधाय** = कृत्वा (वि- धा + क्त्वा > ल्यप्) **यत् स्वाम्** = निजाम्, **महिलाम्** = पत्नीम्, तारामित्यर्थः । **अखिलम्** = समग्रम्, **राज्यम्** = आधिपत्यञ्च, **लेभे** = प्राप्तवान्, **तद् विधेः** = नियतेः, **चित्रम्** = विचित्रम्, विस्मयोत्पादकमित्यर्थः, **चेष्टितम्** = कार्यम्, विद्यत इति शेषः ।

सरलार्थः - वृक्षपिहितो रामो लङ्कया सहितं रावणं पुरः स्थापयितुं क्षममिन्द्र-तुल्यपराक्रमं वालिनमवधीत्, सुग्रीवोऽपि रामस्य साहाय्यं गृहीत्वा शत्रुतायाः प्रतिशोधं विधाय वालिनापहृतां तारां सकलमाधिपत्यञ्चालभत? तत्सर्वमपि दैवस्य विचित्रं चेष्टितं विद्यते, इति ।

अत्र '**चित्रं विधेश्चेष्टितम्**' इति वाक्यार्थेन पूर्ववाक्यार्थस्य समर्थनात्, **अर्थान्तरन्यासालङ्कारः । वर्णानामावृत्तेरनुप्रासश्च । शार्दूलविक्रीडितं चात्र वृत्तम्**। तल्लक्षणं यथा -

सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्, इति ।

२३ **हा हा**, इति विलापे, **अवति** = रक्षतीति **आवुकः**, **तत्संबुद्धौ हे आवुक** = हे जनक ! **विक्रमेण** = पराक्रमेण, **शालते** = शोभते, इति **तत्संबुद्धौ हा विक्रमशालिन्**= पराक्रमिन्, **माम्** = पुत्रम्, अङ्गदमित्यर्थः। **विहाय** = त्यक्त्वा, **क्व**= कुत्र, **गतः**= यातः, असि । **सुग्रीवस्य** = तन्नाम्नः, **कपेः** = वानरस्य, **प्रीतये** = प्रसादनाय, **भ्रातुः** = सुग्रीवस्य, **भार्या** = पत्नी, तारेत्यर्थः । **तस्याः हरणस्य** = अपहारस्य,

२४ द्रुतविलम्बितरामशिलीमुखस्तव वलीमुख! संमुखमागतः ।
नवसमागम एव परेततामतनुताऽतनुतापकरीं मम ।।१।।

२५ सरसि पद्मरसं भ्रमरो यथा पिबति झङ्कृतशब्दसमन्वितः ।
वपुषि ते रघुनायकसायकः स च तथा किल हृद्रुधिरं पपौ ।।१२।।

दोषम् आरोप्य = दोषं प्रदाय, छलेन सहितं यथा स्यात्तथा सच्छलम् = सकपटम्, परोक्षश्चासौ रामः परोक्षरामः तेन, परोक्षरामेण = वृक्षपिहितेन दाशरथिना, वाणेन= शरेण (करणपदम्) निहतः = घातितः, असि त्वमिति शेषः । वीराणां शिरोमणिः वीरशिरोमणिः, तत्संबुद्धौ हा वीरशिरोमणे = शूराग्रगण्य! पितः, पुत्रः = सुतः, भवत्सदृशम् = त्वत्तुल्यम्, पितरम् = जनकम्, न लभेत = न प्राप्नुयात् ।

२४ अत्राङ्गदो वालिनो मरणप्रक्रियां प्रदर्शयति- द्रुतविलम्बितमिति ।

अन्वयः - हे वलीमुख! तव संमुखम् आगतः द्रुतविलम्बितरामशिलीमुखः मम नवसमागमे एव अतनुतापकरीम् परेतताम् अतनुत ।

व्याख्या- वली अस्ति मुखे यस्य सः, वलीमुखः तत्संबुद्धौ हे वलीमुख= भो वानर! कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः, इत्यमरः । तव = भवतः, संमुखम् = समक्षम्, आगतः = प्राप्तः, आ - गम् + क्तः । द्रुतश्चासौ विलम्बितश्च, द्रुतविलम्बितः = शीघ्रगः, विशेषेण दीर्घाकारश्च, रामस्य = दाशरथेः, शिली = शल्यम्, मुखे = अग्रे यस्य सः, शिलीमुखः = सायकः, अलिवाणौ शिलीमुखौ इत्यमरः । मम = अङ्गदस्य, नवश्चासौ समागमः, तस्मिन् नवसमागमे = बाल्यावस्थायामेव, न विद्यते तनुर्यः सः, अतनुः, स चासौ तापः, अतनुतापः, तं करोतीति ताम्, परेतताम् = मृत्युभावम्, अतनुत = विस्तारितवान् ।

सरलार्थः - भो जनक; तव संम्मुखमागतो रामस्य द्रुतो लम्बश्च सायकः मम बाल्यकाल एव त्वामवधीदिति ।

तनुतातनुतेति पदावृत्तेर्यमकालङ्कारः । मुखादीनामावृत्तौ तु, अनुप्रासः । द्रुतविलम्बितञ्चात्र वृत्तम् । तल्लक्षणं यथा-

द्रुतविलम्बितमाह नभौ भरौ, इति ।

२५ पुनरपि रामकृतां वालिहत्यामेव प्रकारान्तरेणाङ्गदो वर्णयति- सरसीति ।

अन्वयः - यथा सरसि भ्रमरः झङ्कृतशब्दसमन्वितः (सन्) पद्मरसम् पिबति तथा च ते वपुषि रघुनायकसायकः हृद्रुधिरम् किल पपौ ।

व्याख्या- यथा = येन प्रकारेण, प्रकारवचने थाल् । सरसि = तडागे, कासारः सरसी सरः, इत्यमरः । भ्रमतीति भ्रमरः= भृङ्गः, भ्रमरः कामुके भृङ्गे,

२६ साधु सुग्रीव! साधु वानरगुरो! इदानीं तवैव नीतिः फलति। धन्योऽसि महामते!

कुतः -

२७ **कृत्वा पूर्वसमागमं रघुपते राजा त्वया घातितो**
लब्धं राज्यकलत्रसौख्यममितः कोशः समासादितः।
राज्यार्धं हरतीति दुष्टमनसा क्षिप्तस्त्वयाऽहं पुनः
कर्तुं दुष्करकर्म हा तव मयि क्रूरं मनो वर्तते ।।१३।।

(पुनराकाशे)

इति कोशः। **झङ्कृतः** = झङ्कारयुतः, **यः शब्दः** = ध्वनिः, **तेन समन्वितः** = युक्तः सन्, **पद्मानाम्** = कमलानाम्, तत्पुष्पाणामित्यर्थः। **रस्यते** = आस्वाद्यते इति **रसस्तम् रसम्** = जलम्, **रसः स्वादे जले वीर्ये शृङ्गारादौ विषे द्रवे**, इति हैमः। **पिबति** = शोषयति, **तथा च** = तेनैव प्रकारेण, **रघूणाम्** = रघुवंशीयभूपानाम्, **नायकः** = प्रधानः, **तस्य सायकः** = वाणः, **ते** = तव, वालिन इत्यर्थः। **वपुषि**= शरीरे, **गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः**, इत्यमरः। **हृदः** = हृदयस्य, **चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः**, इत्यमरः। **रुधिरम्** = रक्तम्, **किल**= निश्चयेन, **पपौ** = पीतवान्।

सरलार्थः - यथा भ्रमरः झङ्कारशब्दं कुर्वन् कमलकुसुमानां रसं पिबति तथैव रामसायकः झङ्कारयुतं शब्दं विदधानो वालिनो रुधिरमपिबत्, इति।

अत्र, **उपमालङ्कारः**। **द्रुतविलम्बितं** चात्र वृत्तम्।

२६ **वानराणां गुरुः, वानरगुरुः, तत्संबुद्धौ भो वानरगुरो** = हे कपिश्रेष्ठ! **सुग्रीव** = राममित्र! **त्वया** = भवता, **साधु** = सम्यक्, **विहितम्** = कृतम्। स्वार्थपूर्णः, विपरीतलक्षणया अनुचितं कृतमित्यर्थः। **इदानीम्** = अधुना, **तव** = सुग्रीवस्यैव, **नीतिः** = नयः, **फलति** = चरितार्था भवति। **हे महामते** = विशालबुद्धे, स्वार्थसाधन-प्रवीणमते, इत्यर्थः। **धन्यः** = साधुवादार्हः, असि।

२७ तत्र कारणं प्रदर्शयति- **कृत्वा पूर्वसमागममिति**।

अन्वयः - त्वया रघुपतेः पूर्वसमागमम् कृत्वा राजा घातितः, राज्यकलत्र-सौख्यम् लब्धम्, अमितः कोशः समासादितः, पुनः राज्यार्धम् हरति इति दुष्टमनसा त्वया अहम् क्षिप्तः, हा तव मनः मयि दुष्करकर्म कर्तुम् क्रूरम् वर्तते।

व्याख्या- त्वया = भवता, सुग्रीवेणेत्यर्थः। **रघूणां पतिः रघुपतिः तस्य रघुपतेः** = रामस्य, **पूर्वम्** = प्राक्, **समागमम्** = संमेलनम्, **विधाय** = कृत्वा,

२८ सुग्रीव, किं भणसि । न मया त्वमस्मिन्कर्मणि प्रेषितः, किन्तु सीतापतेरनुज्ञया कृतवीर्यपरीक्षः सीतान्वेषणे नियुक्तः ।

(चिरं विचार्य)

अहो मम कथं प्राकृतमर्कटस्येव भ्रान्तं मनः । यतस्त्रिलोकीसाक्षिणो धर्मात्मनो भगवतो रामचन्द्रस्य समक्षं कथमधर्मावसरः । परमेश्वरः साक्षात्फलं न ददाति । किञ्च, जन्मजन्मान्तरसमासादितफलमिह सर्वेऽनुभवन्ति । राम ! तव भक्तस्य मे कथमीदृशी मिथ्यामतिः ।

मित्रतां विधायेत्यर्थः । **राजा** = वाली, **घातितः** = व्यापादितः । तथैव **राज्यञ्च कलत्रञ्च राज्यकलत्रे, तयोः सौख्यम्** = शासनसुन्दरीजनितं सुखम्, **लब्धम्** = प्राप्तम्, **न शक्यते मातुं यः, सः, अमितः** = असङ्ख्यः, **कोशः** = धनराशिः, **समासादितः** = लब्धः । **पुनः** = भूयः, **राज्यस्यार्धम्, राज्यार्धम्** = राष्ट्रस्यार्धभागम्, **हरति** = गृह्णाति, इति **दुष्टम् मनो यस्य तेन, दुष्टमनसा** = दुष्टचेतसा, **त्वया** = भवता, **अहम्** = अङ्गदः, **क्षिप्तः** = प्रक्षिप्तः । **हा** = खेदस्य विषयः, **तव** = भवतः, सुग्रीवस्येत्यर्थः । **मनः** = चित्तम्, **मयि** = अङ्गदविषये, **दुष्करञ्च तत् कर्म, दुष्करकर्म** = दुष्कृत्यम्, **कर्तुम्** = विधातुम्, **क्रूरम्** = निष्ठुरम्, **वर्तते** = विद्यते ।

सरलार्थः - सुग्रीवेण पूर्वमेव रामेण सह मैत्रीं विधाय वालिनं घातयित्वा राज्यममितं धनञ्च लब्धम्, राज्यार्धं हरतीति दुष्टमनसा तेन साधयितुमशक्ये सीतान्वेषणकर्मणि नियुक्तोऽहम् । अतः स मयि निष्ठुरं कर्म कर्तुं यतते । अयं खेदस्य विषयः, इति ।

अत्र, **अनुप्रासालङ्कारः, वृत्तञ्चात्र दुतविलम्बितम्** ।

२८ (**पुनः** = भूयः, **आकाशे** = नभसि, **निरीक्ष्य**) **भो सुग्रीव** = हे वानरराज! **किं भणसि** = किं कथयसि । **मया** = सुग्रीवेण, **त्वम्** = भवान् अङ्गदः, **अस्मिन् कर्मणि** = मारणक्रियायाम्, **न प्रेषितः** = न प्रहितः, **किन्तु** = परन्तु, **सीतापतेः** = रामचन्द्रस्य, **अनुज्ञया** =आज्ञया, **कृता** = विहिता, **वीर्यस्य** = पराक्रमस्य, **परीक्षा यस्य सः, सीतायाः** = जानक्याः, **अन्वेषणे** = गवेषणे, **नियुक्तः**, इति । (**चिरम्**= बहुकालम्, **विचार्य** = चिन्तयित्वा) **अहो** = आश्चर्यम्, **मम** = अङ्गदस्य, **मनः** = चित्तम्, **प्राकृतश्चासौ मर्कटः, प्राकृतमर्कटः** = साधारणवानरः, **तस्य मन इव भ्रान्तम्** = भ्रान्तिमत् सञ्जातम् । **यतः** = यस्मात्, **त्रयाणां लोकानां समाहारः,**

२९ रामेति यस्य वदतो मरणे निरीयुः
प्राणाः स गच्छति परं पदमीश्वरस्य ।
तत्कार्यसाधनकृते यदि मेऽसवोऽपि
निर्यान्तु तद्वरमितीह भवेन्मनीषा ।।१४।।

(प्रकाशम्)

त्रिलोकी, तस्याः साक्षिणः = द्रष्टुः, धर्म आत्मा यस्य तस्य धर्मात्मनः = पुण्यात्मनः, भगवतः = षडैश्वर्यशालिनः, रामचन्द्रस्य = दाशरथेः, समक्षम् = अग्रे, अधर्मस्य = अपराधस्य, अवसरः = स्थानम्, कथम् ? परमेश्वरः = भगवान्, साक्षात् = प्रत्यक्षम्, फलम् न ददाति = परिणामं न दर्शयति । किञ्च = परन्तु, इह = अस्मिन् लोके, सर्वे = प्राणिनः, जन्मजन्मान्तरेषु = प्रतिजन्म, समासादितम्= लब्धम्, कृतमित्यर्थः । फलम् = शुभाशुभम्, अनुभवन्ति = अनुभवं कुर्वन्ति । राम, राम, = भो राम, तव = भवतः, भक्तस्य = सेवकस्य, मे = मम, ईदृशी = पूर्वोक्ता, मिथ्यामतिः = असत्यबुद्धिः कथं जातेति भावः ।

२९ अत्राङ्गदो मिथ्याबुद्धिं परित्यज्य रामकार्याय स्वजीवनसमर्पणस्य दृढतां विचारयति- रामेति ।

अन्वयः - यस्य मरणे राम इति वदतः प्राणाः निरीयुः सः ईश्वरस्य परम् पदम् गच्छति । यदि तत्साधनकृते असवः अपि इह निर्यान्तु तद् वरम् भवेत् इति मे मनीषा ।

व्याख्या - यस्य = प्राणिनः, मरणे = मृत्युकाले, रमन्ते योगिनोऽस्मिन्, इति रामः = द्व्यक्षरात्मकशब्दः, इति = एतच्छब्दं वदतीति वदन्, तस्य वदतः = कथयतः, रामेति शब्दमुच्चारयत इत्यर्थः । प्राणाः = असवः, निरीयुः = निर्गच्छेयुः, सः = प्राणी, ईश्वरस्य= भगवतः, परम् = उत्तमम्, पदम् = स्थानम्, गच्छति = प्राप्नोति। यदि = चेत्, तस्य = भगवतः, यत् कार्यम् = सीतान्वेषणम्, तस्य यत् साधनम्= सिद्धिस्तस्य कृते, सीतान्वेषणकर्मणीत्यर्थः । असवः = प्राणा अपि, इह = अस्मिन् स्थाने निर्यान्तु = निर्गच्छन्तु, तद् = रामकार्यस्य कृते प्राणत्यागकार्यम्, वरम् = श्रेष्ठम्, भवेत् = स्यात्, इति = एषा, मे= मम, अङ्गदस्येत्यर्थः । मनीषा= बुद्धिरस्तीति शेषः ।

सरलार्थः - मरणसमये यस्य मुखाद् रामेति पदं निःसरति स भगवतः परं धाम प्राप्नोति, तस्य भगवतः कार्यसाधने यदि प्राणत्यागस्तदा तत्कार्यं रामेति नामग्रहणादपि वरमिति ।

३० जाम्बवन् ! किमतःपरमनुष्ठेयम् । (सर्वेऽपि तूष्णीमाश्रयन्ति) धिगेतान्वनौकसः। (इति विषादं नाटयति)

३१ **जाम्बवान्** - कुमार! नेदानीं शोकावसरः । अलं शोकेन । (जनान्तिकम्) युवराज! सोऽयं गभीराकृतिः पवनात्मजोऽधुना किमपि वक्तुकामो युवराजप्रतापवशाद्धृष्टतां नावलम्बत इव । तथा हि -

३२ **सुग्रीवस्य समक्षतो भगवता रामेण मुद्रार्पिता**
सीताप्रत्ययकारिणीति हरिणा कण्ठे धृताद्यावधि ।

अत्र **वसन्ततिलकं छन्दः** । तल्लक्षणं यथा-

ज्ञेयं वसन्ततिलकं तभजा जगौ गः, इति ।

३० (**प्रकाशम्** = सर्वश्राव्यं यथा स्यात्तथा) **भो जाम्बवन् ! अतः**= अस्मात् परम्, **किम् अनुष्ठेयम्** = कं कर्तुमुचितम्? **सर्वे**= निखिलाः वानराः, भल्लूकाश्च, **तूष्णीम्**= मौनम्, **आश्रयन्ति** = अवलम्बन्ते (**इति विषादम्** = खेदम्, **नाटयति** = अभिनयति)

३१ **जाम्बवान् - इदानीम्** = अधुना, **शोकस्य** = शुचः, **अवसरः** = समयः, **न** = नास्तीति भावः । **शोकेन** = शुचा, **अलम्** = पर्याप्तम् । शोकेन न किमपि भवतीत्यर्थः । (**जनान्तिकम्** = अन्योन्यामन्त्रणं कृत्वा) **भो युवराज** = हे अङ्गद! **सः** = प्रसिद्धः, **अयम्** = एषः, **गभीरा** = गम्भीरा, **आकृतिः** = आकारः, **यस्य सः**, **पवनस्य** = वायोः, **आत्मजः** = सुतः, हनुमान्, **अधुना** = इदानीम्, **किमपि**, **वक्तुम्** = कथयितुम्, **कामः** = अभिलाषा, **यस्य सः**, **तथाभूतः**, **युवराजस्य** = भवतः, **प्रतापवशात्** = सामर्थ्यात्, **धृष्टस्य भावः**, **धृष्टता**, **ताम् धृष्टताम्** = वाचालताम्, **न अवलम्बत इव** = नाश्रयतीव । यतः-

३२ तत्र कार्यसाधनं निश्चितमिति प्रतिपादयति- **सुग्रीवस्येति** ।

अन्वयः - सुग्रीवस्य समक्षतः भगवता रामेण अर्पिता मुद्रा हरिणा सीताप्रत्ययकारिणी इति अद्यावधि कण्ठे धृता । स अयम् वीरः एषः समीरात्मजः अस्माकम् पुरतः तिष्ठति । इह शोकेन अलम् । अधुना ते कार्यस्य सिद्धिः द्रुतम् भवति ।

व्याख्या - **सु** = शोभना, **ग्रीवा** = कण्ठः, **यस्य सः**, **सुग्रीवः**, **तस्य सुग्रीवस्य** = वानरगुरोः, **समक्षतः** = अग्रे, **भगः**, **अस्यास्तीति भगवान्**, **तेन भगवता** = षडैश्वर्यशालिना, **रमन्ते योगिनोऽस्मिन्**, **इति रामस्तेन**, **रामेण** = दशरथसुतेन, **अर्पिता** = समर्पिता, **मुद्रा** = ऊर्मिका, **हरिणा** = कपिना, हनुमतेति भावः । **सीतायै** = जानक्यै, **प्रत्ययः** = विश्वासः, **तं कारयतीति भावनया**,

सोऽयं तिष्ठति वीर एष पुरतोऽस्माकं समीरात्मजः
शोकेनालमिहाधुना भवति ते कार्यस्य सिद्धिर्द्रुतम् ।।१५।।

३३ **अङ्गदः** - जाम्बवन्! ज्ञातस्ते गूढार्थः । एवं चेत्प्रष्टव्यः पवनात्मजो भवता ।

३४ **जाम्बवान्** - यथाज्ञां करोमि । (प्रकाशम्) भाव पवनात्मज! वीरशिरोमणे! बलविक्रमविदा तत्र भवता भट्टारकेण सुग्रीवेण महत्यस्मिन्कर्मणि नियुक्तो भवान् । वयमन्ये सर्वे भवत्सहायका अनुयायिनो भवद्वीर्यामृताशालम्बितजीविता जिजीविषामः, खलु भवानेव मतिविक्रमोभयगुणालङ्कृत एतेषु ।

सीतायै अयं रामदूतो न तु राक्षसः, इति विश्वासमुत्पादयितुं समर्थेति धियेत्यर्थः । **अद्य अवधि यस्मिन् कर्मणि तद्यथा स्यात्तथा, अद्यावधि** = अद्यपर्यन्तम्, **कण्ठे** = ग्रीवायाम्, **धृता** = स्थापिता । **सोऽयम्** = तादृशः, **वीरः** = शूरः, **एषः**= अयम्, **समीरस्य** = वायोः, **समीरमारुतमरुज्जगत्प्राणसमीरणाः**, इत्यमरः । **आत्मजः** = सुतः, हनुमानित्यर्थः । **अस्माकम्** = प्लवगानाम्, **पुरतः** = अग्रे, **तिष्ठति** = वर्तते । **इह** = अस्मिन् स्थाने, **शोकेन** = शुचा, **अलम्** = पर्याप्तम् । अतः शोको न विधेय इति भावः । **अधुना** = सांप्रतम्, **ते** = तव, **कार्यस्य** = सीतान्वेषणकर्मणः, **सिद्धिः**, **द्रुतम्** = शीघ्रम्, **भवति** = जायते ।

सरलार्थः - वायुपुत्रो हनुमान् सीताप्रत्ययार्थं रामेण दत्ता मुद्रा सांप्रतमपि कण्ठे धृत्वा ऽस्माकं पुरस्तिष्ठति । अतः सोऽयं वीरोऽस्माकं कार्यं द्रुतं संपादयिष्यति, शोको नैव विधेय इति । **शार्दूलविक्रीडितं छन्दः** ।

३३ **अङ्गदः** - **ते** = तव जाम्बवतः, **गूढार्थः** = गुप्ताशयः, **ज्ञातः** = विदितः, **एवञ्चेत्**= यदीत्थम्, **भवता** = त्वया, जाम्बवतेत्यर्थः, **पवनात्मजः** = हनुमान्, **प्रष्टव्यः** = स लङ्कां गन्तुमुत्सहते न वेति ज्ञातव्यमित्याशयः ।

३४ **जाम्बवान्** - **यथाज्ञाम्** = भवत्कथनानुसारेण करोमि, (प्रकाशम्) **भाव** = विद्वन्! **पवनात्मज** = हनुमन्! **भो वीरशिरोमणे** = हे शूराग्रगण्य! **बलञ्च, विक्रमश्च वेत्तीति, तेन, बलविक्रमविदा**= शक्तिपराक्रमज्ञेन, **तत्र भवता**=मान्येन, **भट्टारकेण**= राज्ञा, **सुग्रीवेण** = तदाख्यकपिपुङ्गवेन, **भवान्** = त्वम्, हनुमानिति शेषः । **अस्मिन्**= प्रसङ्गप्राप्ते, **महति** = दुःखेनैव साधयितुं शक्ये, **कर्मणि** = कार्ये, **नियुक्तः** = प्रयुक्तः, अस्ति । **भवान् सहायो येषान्ते, भवत्सहायकाः** = त्वत्साहाय्यं कुर्वन्तः, **अनुयायिनः** = अनुगामिनः, तवेति शेषः । **अन्ये** = त्वदितरे, **सर्वे** = निखिलाः, **वयम्** = प्लवगाः, **भवतः** = तव, **वीर्यम्** = पराक्रम एव, **अमृतम्** = सुधा, **तस्य**

३५ वीरसूरञ्जना तेऽम्बा बली वायुस्तवावुकः ।
सुषुवाते सुतं वीरं धन्यौ तौ पितरावुभौ ।।१६।।

अपि च -

३६ प्रासूत त्वां यदाऽम्बा कपिवर! गगने पश्यतः सूर्यबिम्बं
सा ते जाता जिघृक्षा फलमिति नितरां बालबुद्धेस्तदानीम् ।

आशया = प्राप्तीच्छया, आलम्बितम् जीवितम् येषान्ते, तथोक्ताः, आलम्बित-जीविताः = धृतजीवनाः, जिजीविषामः = प्राणान् धारयितुमिच्छामः। खलु = निश्चयेन, भवान् = त्वमेव, एतेषु = प्लवगेषु, मतिश्च विक्रमश्च, मतिविक्रमौ= बुद्धिपराक्रमौ, तौ च तौ उभयगुणौ, ताभ्याम्, अलङ्कृतः मतिविक्रमोभयगुणा-लङ्कृतः = बुद्धिपराक्रमद्वयगुणभूषितः, असीति भावः ।

३५ अत्र जाम्बवान् हनुमतो वैशिष्ट्यं प्रकारान्तरेण प्रकाशयति- **वीरसूरिति** ।

अन्वयः - वीरसूः ते अम्बा अञ्जना बली वायुः तव आवुकः च वीरम् सुतम् सुषुवाते, तौ उभौ पितरौ धन्यौ ।

व्याख्या- वीरम् = शूरं सूते, इति वीरसूः = शूरप्रसवा, सुनोतेः क्विप् । त्वत्सदृशसुतस्य जनयित्रीति भावः । ते = तव, हनुमतः, अम्बा = माता, अम्बा मातेत्यमरः । अञ्जनवद् वर्णो यस्याः सा अञ्जना = अञ्जनेत्याख्या, वायुपत्नी, अञ्ज् + ल्युट्, टाप् । बलम् अस्यास्तीति बली = शक्तियुतः, अत इनिठनाविति, इन् । तव = भवतः, अवतीति आवुकः = पिता अव रक्षणे इत्यस्माद् धातोर्बाहुलकादुकण्, णित्वादुपधावृद्धिः । अथावुकः । जनकः, इत्यमरः । वातीति वायुः= पवनः, श्वसनस्पर्शनो वायुरित्यमरः। सुतम् = पुत्रम्, सुषुवाते = अजनयताम्, तौ = तादृशौ, तव जनयितारौ, इत्यर्थः । उभौ = द्वावेव, पितरौ = जनीनजनकौ, धन्यौ = पुण्यवन्तौ, सुकृतिः पुण्यवान् धन्यः, इत्यमरः । स्त इति शेषः ।

सरलार्थः - त्वां पुत्रमासाद्य तव माताऽञ्जना पिता बली वायुश्च धन्यौ जाताविति । अनुष्टुब्वृत्तम् ।

३६ अत्रापि जाम्बवान् हनुमतो वैशिष्ट्यमेव प्रकाशयति- **प्रासूतेति** ।

अन्वयः - कपिवर! यदा सा अम्बा त्वाम् प्रासूत तदानीम् गगने सूर्यबिम्बं पश्यतः नितराम् बालबुद्धेः ते फलम् इति जिघृक्षा जाता । त्वम् क्रोशानाम् सहस्रद्वयम् उपरि नभः हेलया आक्रम्य पश्चात् चण्डांशूत्तप्तगात्रः (सन्) उदधिस्रग्धरायाम् धरायाम् समपतः ।

व्याख्या - कपीनाम् कपिषु वा वरः, कपिवरः, तत्संबुद्धौ, हे कपिवर=

क्रोशानां त्वं सहस्त्रद्वयमुपरि नभो हेलयाक्रम्य पश्चा-
च्चण्डांशूत्तप्तगात्रः समपत उदधिस्त्रग्धरायां धरायाम् ।।१७।।

अपि च -

३७ हनुस्तव नभस्तलात्पतत एव पृथ्वीतले
विपोथित इहार्थतो हनुमतो यतः प्राप्तवान् ।

भो वानरश्रेष्ठ! **यतश्च** निर्धारणमिति षष्ठी, सप्तमी वा । **यदा** = यस्मिन् समये, **सा**= वीरसूः, **अम्बा** = तव माता अञ्जना, **त्वाम्** = हनुमन्तम्, **प्रासूत** = प्रसूतवती, **तदानीम्** = तस्मिन् समये, **तदो दा चेति** दानीम् प्रत्ययः । **गगने** = आकाशे, **नभोऽन्तरिक्षं गगनमित्यमरः** । **सूर्यस्य** = रवेः, **बिम्बम्** = मण्डलम्, **पश्यतीति पश्यन् तस्य पश्यतः** = विलोकयतः, **दृशेः शतृ** । **नितराम्** = अत्यन्तमेव, **बाला बुद्धिर्यस्य तस्य बालबुद्धेः** = बालमतेः, **ते** = तव **फलम्** = सस्यम् इति **ग्रहीतुमिच्छा जिघृक्षा** = ग्रहणाभिलाषः, **ग्रह उपादाने** इत्यस्माद् धातोः सन् । **जाता** = समुद्भूता । **ततः त्वम्** = भवान्, **क्रोशानाम्** = धनुसहस्राणाम्, **धन्वन्तरसहस्रं तु क्रोशः**, इति वाचस्पतिः । धनुस्त्वत्र हस्तचतुष्टयम् । **सहस्त्रद्वयम्**= दशशतयुगलम्, **उपरि** = उपरिष्टात्, **धिगुपर्यादिषु त्रिषु** इति कारिकानुसारेणोपरियोगे द्वितीया । **स्थितम्, नभः** = आकाशम्, **नभोऽन्तरिक्षं गगनमित्यमरः** । **हेलया** = अवज्ञया, काठिन्यं विनैवेत्यर्थः । **आक्रम्य** = आक्रमणं विधाय, **पश्चात्** = तदनु, **चण्डा अंशवो यस्य सः, चण्डांशुः** = सूर्यः, **तेन यद्वा चण्डैः** = प्रचण्डैः **अंशुभिः** = सूर्यकिरणैः, **उत्तप्तम्** = अत्युष्णम्, **गात्रम्** = शरीरम्, **यस्य सः, तथाभूतः सन्, उदधिरेव** = समुद्र एव **स्त्रक्** = माल्यम्, **तस्या धरा, तस्याम्, उदधिस्त्रग्धरायाम्** = समुद्ररूपमाल्यधारिण्याम्, **धरायाम्** = पृथिव्याम्, **समपतः**= पतितवान् ।

सरलार्थः - हे कपिश्रेष्ठ! त्वं बालबुद्धिः, जात एव गगने सूर्यं वीक्ष्य फलमिति मत्वा ग्रहीतुकामः क्रोशानां स्त्रहसद्वयमुपरि विद्यमानं नभ आक्रम्य प्रचण्डैः सूर्यकिरणैरतिशयेन तप्तः सन् समुद्रस्त्रग्धारिण्यां भूमौ पतितवान्, इति ।

अत्र उदधिरेव स्त्रगिति रूपकालङ्कारः । धरायाम् इति पदावृत्तेर्यमकञ्च । स्त्रग्धरावृत्तम्, तल्लक्षणं यथा-

म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्त्रग्धरा कीर्तितेयम्।

३७ अत्र जाम्बवान् हनुमतो वीरतातिशयं पुनरपि वर्णयति- **हनुस्तवेति** ।

अन्वयः - यतः नभस्तलात् पतत एव तव हनुमतः हनुः इह पृथ्वीतले

अहोऽमितपराक्रमः सपदि जातमात्रस्य ते
शिशोः किमधिकं ब्रुवे विजयतेतरां ते बलम् ।।१८।।

३८ **अङ्गदः** - हनुमन्! सुष्ठु भणति जाम्बवानेषः । क इदानीं त्वामन्तरेण शतयोजन-विस्तीर्णं मकरालयमब्धिं समुल्लङ्घेत । किमिति त्वमात्मनो वीर्यमहिमान-मजानन्निव जोषमूरीकरोषि । (सर्वे श्रुत्वा किलकिलकिलेत्युदीर्य हनुमतो लाङ्गूलं चुम्बन्ति)

विपोथितः अर्थतोऽपि प्राप्तवान् । सपदि जातमात्रस्य शिशोः ते अमितपराक्रमः अहो, अधिकं किं ब्रुवे, ते बलं विजयतेतराम् ।

व्याख्या - **यतः** = यस्माद्, **नभस्तलात्** = आकाशात्, **निपतितः** = भूतले स्खलित एव, **तव** = हनुमतः, **हनुः** = कपोलाधोभागः, **इह** = अस्मिन्, **पृथ्वीतले** = भूतले, **विपोथितः** = विशेषेण नष्टः, अतो न केवलं शब्दतोऽपि तु, **अर्थतः** = वाच्यतः, हन्यतेऽसावित्यर्थतोऽपीत्यर्थः । (हनुः) **प्राप्तवान्** = लब्धवान्, हनुमानिति संज्ञा सार्थवत्यभूदित्याशयः । **सपदि** = तत्क्षणे, **जात एव जातमात्रस्तस्य जातमात्रस्य** = उत्पन्नमात्रस्य, **शिशोः** = बालकस्य, **पृथुकः शावकः शिशुरित्यमरः**। **ते** = तव, **मातुमशक्यः अमितः**, **स चासौ पराक्रमः**, **अमितपराक्रमः** = अतुलनीयविक्रमः, **अहो** = अवर्णनीयोऽस्तीति भावः । **अधिकम्** = विशेषम्, **किं ब्रुवे** = किं कथयामि, **ते** = तव, **बलम्** = सामर्थ्यम्, **विजयतेतराम्** = सर्वोत्कर्षेण वर्तते ।

सरलार्थः - आकाशात्पतत एव तव हनुर्विपोथितः । अतो हनुमानिति संज्ञा शब्दतोऽर्थतश्च समुचिता विभाति । जातमात्रस्य तव पराक्रमोऽस्त्यवर्णनीयः, इति ।

अनुप्रासालङ्कारः । **पृथ्वीवृत्तम्** । तल्लक्षणं यथा-

जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः ।

३८ **अङ्गदः** - **एषः** = अयम्, पुरोवर्तीत्यर्थः, **जाम्बवान्** = ऋक्षकः, **सुष्ठु** = शोभनम्, उचितमित्यर्थः । **भणति** = कथयति । **इदानीम्** = अधुना, **त्वाम्** = हनुमन्तम्, **अन्तरेण** = विना, **अन्तरान्तरेण युक्ते**, इति द्वितीया । **शतञ्च तद् योजनम्**, **शत-योजनम्** = दशभिर्गुणितं दशयोजनं यावत्, **विस्तीर्णम्** = प्रसृतम्, **मकराणाम्** = ग्राहाणाम्, **आलयम्** = भवनम्, **कः** = कित्रामा पुरुषः, **समुल्लङ्घेत** = पारं गच्छेत् । **किमिति** = किमर्थम्, **त्वम्** = भवान्, **आत्मनः** = स्वस्य, **वीर्यस्य** = पराक्रमस्य, **महिमानम्** = महत्त्वम्, **जानातीति जानन्**, **न जानन्**, **अजानन्** =

३९ **नलः** - भो भो भाव ! भो भो वीरशिरोमणे ! भूतार्थं ते निगदितं तत्र भवता कुमारेण । यतोऽद्यभवानेवाऽज्ञाताऽतलस्पर्शस्य लवणोदधेः पारं गन्तुं शक्नोति। तथा हि -

४० **गतिजवस्तव वीर! नभस्वतो जयति विष्णुरथस्य रयं च वा ।**
क इह वेगवतश्चलतो गतिं तव रुणद्धि समीपपरासनः ।।१९।।

अज्ञ इव, **जोषम्** = मौनम्, **ऊरीकरोषि** = स्वीकरोषि । अवलम्बसे इत्यर्थः ।

३९ **नलः** - **भो भाव** = हे विद्वन्! **भावो विद्वानित्यमरः** । **वीराणां शिरोमणिः**, **तत्संबुद्धौ**, **भो वीरशिरोमणे** = हे वीराग्रगण्य! **तत्र भवता** = मान्येन, **कुमारेण**= अङ्गदेन, **भूतार्थम्** = सत्यम्, **निगदितम्** = कथितम् । **यतः** = यस्मात्, **भवान्** = त्वम् एव, **न ज्ञातः अतलस्पर्शो यस्य तस्य, अज्ञातातलस्पर्शस्य** = अतिशयगभीरस्य, **लवणोदधेः** = क्षारसमुद्रस्य, **पारं गन्तुम्** = पारे यातुम्, **शक्नोति**= शक्तोऽस्ति ।

४० अत्रापि नलो नाम कपिर्हनुमतः पराक्रमातिशयं व्यनक्ति- **गतिजवेति** ।

अन्वयः - भो वीर! तव गतिजवः नभस्वतः वा विष्णुरथस्य रयम् च जयति। कः समीपपरासनः इह चलतः वेगवतः तव गतिं रुणद्धि ?

व्याख्या - **भो वीर** = हे शूर! **वीर विक्रान्तौ**, इत्यस्माद् धातोरच् । **तव**= भवतः, हनुमत इत्यर्थः । **गतेर्जवः**, **गतिजवः** = यानरयः (कर्तृपदम्) **नभोऽस्याश्रयत्वेनास्तीति नभस्वान्**, **तस्य नभस्वतः** = वायोः, नभस् + मतुप्, भत्वाद् रुत्वाभावः, **वायुर्मरुत्वाञ्श्वसनः पवनो मरुतोऽनिलः**, इति साहसाङ्कः । **वा** = अथवा, **विष्णोः रथ इव विष्णुरथः**, **तस्य विष्णुरथस्य** = गरुडस्य, **नागान्तको विष्णुरथः सुपर्णः पन्नगासनः**, इत्यमरः। चेति वाक्यालङ्कारे, समुच्चये वा । **रयम्**= वेगम् **तरसी तु रयः स्यदः**, इत्यमरः । **जयति** = अतिशेते । **कः** = किंनामधेयः, **समीपपरासनः** = निकटस्थनिषूदनः, राक्षस इत्यर्थः । **इह** = समुद्रे, **चलतीति चलन्**, **तस्य चलतः** = गच्छतः, चल् + शतृ । **वेगोऽस्यास्तीति वेगवान्**, **तस्य वेगवतः** = जवयुतस्य, **तव** = भवतः, हनुमत इत्यर्थः । **गतिम्** = प्रयाणम्, गम् + क्तिन् । **रुणद्धि** = रोद्धुं शक्नोति ? न कोपीत्यर्थः ।

सरलार्थः - भो हनुमन्, तव गतेर्जवः वायोर्गरुडस्य च रयमतिक्राम्यति । समुद्रे गच्छतस्तव गतिं कोऽपि रोद्धुं न शक्नोतीति ।

अनुप्रासालङ्कारः । **द्रुतविलम्बितं वृत्तम्**, तल्लक्षणं यथा-

द्रुतविलम्बितमाह नभौ भरौ, इति ।

अपि च -

४१ जितरसास्तरसा तरसाशिनो दशमुखप्रमुखा अभियान्ति चेत् ।
तव चपेटपविप्रहताश्चिरं दधतु ते विरहं सह लङ्कया ।।२०।।

४२ अङ्गदः - अये विक्रमशालिन्! वीरचक्रचूडामणे! साधु भणति नलः । किमर्थं तत्र भवता विलम्बोऽवलम्ब्यते । इदानीं हि गमनकालोचितं शकुनं पश्यतु । तथा हि -

---

४१ अत्र नलो हनुमतो वीर्यातिशयं वर्णयति- जितरसेति

अन्वयः - चेत् जितरसाः दशमुखप्रमुखाः तरसाशिनः तरसा अभियान्ति, तव चपेटपविप्रहताः ते लङ्कया सह विरहम् चिरं दधतु ।

व्याख्या - चेद् = यदि, जितः = विजितः, रसः = पारदो यैस्ते जितरसाः= विजितपारदाः, रसो गन्धरसे स्वादे तिक्तादौ विषरागयोः । शृङ्गारादौ द्रवे वीर्ये देहधात्वम्बुपारदे, इति विश्वः । दशमुखः प्रमुखो येषान्ते, दशमुखप्रमुखाः = दशमुखप्रभृतयः, तरसम् = मांसम्, पिशितं तरसं मांसं पललं क्रव्यमामिष-मित्यमरः । अश्नन्ति, इति तरसाशिनः = मांसभोजिनो राक्षसाः, तरसा = जवेन, तरो बले जवे, इति हैमः। अभियान्ति= संमुखमागच्छन्ति, तव= हनुमतः, चपेट एव = प्रहस्त एव, पाणौ चपेटप्रतलप्रहस्ता विस्तृताङ्गुलौ, इत्यमरः । पविः = वज्रम्, ह्रादिनी वज्रमस्त्री स्यात् कुलिशं विदुरं पविरित्यमरः । तेन हताः = ताडिताः, ते = राक्षसाः, लङ्कया = राक्षसनगर्या, सह = साकमेव, वियोगम् = विरहम्, चिरम् = बहुकालम्, दधतु = धारयन्तु । तव वज्रतुल्यचपेटैस्ताडिता रावणप्रमुखा राक्षसा लङ्कया सहैव नश्यन्तीति भावः ।

हनुमच्चपेटे पवित्वारोपाद् रूपकालङ्कारः, तरसापदस्यावृत्तेर्यमकालङ्कारश्च। द्रुतविलम्बितं नाम वृत्तम् ।

४२ अङ्गदः - अये (संबोधनबोधकपदम्) विक्रमेण शालत इति, तत्संबुद्धौ, विक्रमशालिन् = पराक्रमिन्! वीराणाम् = शूराणाम्, चक्रम् = मण्डलम्, तस्य चूडामणिरिव, तत्संबुद्धौ हे वीरचक्रचूडामणे = हे शूरसमूहाग्रगण्य! नलः = तदाख्यः कपिः, साधु = उचितम्, भणति = कथयति। किमर्थम् = कुतः, त्वया= भवता, विलम्बोऽवलम्ब्यते = कालातिपातो विधीयते । इदानीं = अधुना, हि = एव, गमनकालस्य = प्रस्थानसमयस्य, उचितम् = योग्यम्, शकुनम् = शुभलक्षणम्, पश्यतु = विलोकयतु ।

४३ अकूपारो वीचीर्वहति नितरां निर्मलतरा
मरालास्तीरेऽस्मिन्विदधति तथा सुन्दररुतम् ।
क्वचित्पोताधानं खग इव समुड्डीय पतति ।
क्वचिद्वेगान्मीनः क्षिपति जलमूर्ध्वं शिखरिणि ।।२१।।

अपि च -

४४ कुर्वन्ति केलिकलहं कलहंससंघा
नीरे नदन्ति सकलं विकलङ्कशङ्खाः ।

---

४३ अत्राङ्गदः लङ्काप्रस्थानोचितशकुनानि निर्दिशति- **अकूपार** इति ।

अन्वयः - अकूपारः वीचीः वहति । तथा नितराम् निर्मलतराः मरालाः अस्मिन् तीरे सुन्दररुतम् विदधति । क्वचित् पोताधानम् खग इव समुड्डीय पतति । क्वचित् मीनः शिखरिणि ऊर्ध्वं वेगात् क्षिपति ।

व्याख्या - **अकूपारः** = समुद्रः, **समुद्रोऽब्धिरकूपार** इत्यमरः । **वीचीः**= तरङ्गान्, **वहति** = धारयति । **तथा** = अपि च, **नितराम्** = अत्यन्तम्, **अतिशयेन निर्मलाः**, **निर्मलतराः** = स्वच्छतराः, शुभ्रा इत्यर्थः । **मरालाः** = हंसाः, **अस्मिन्**= एतस्मिन्, **तीरे** = तटे, समुद्रस्येत्यर्थः । **सुन्दरञ्च तद् रुतम्, सुन्दररुतम्** = मनोरमशब्दम्, **तिरश्चां वासितं रुतमित्यमरः** । **विदधति** = कुर्वन्ति, **क्वचित्** = कुत्रचित्, **पोताधानम्** = क्षुद्राण्डमत्स्यसङ्घातः, **क्षुद्राण्डमत्स्यसङ्घातः पोताधान**-मित्यमरः । **खे गच्छतीति खगः** = पक्षीव, **समुड्डीय** = आकाशे गत्वा, **पतति** = भूमौ निपतति । **क्वचित्** = कुत्रचित् । **मीनः** = मत्स्यः, **शिखराणि सन्त्यस्येति शिखरी, तस्मिन् शिखरिणि** = पर्वते, **ऊर्ध्वम्** = उपरि, पर्वतस्योपरीत्यर्थः । **जलम्** = सलिलम्, **वेगात्** = जवात्, **क्षिपति** = प्रक्षिपति । मत्स्योत्पतनदर्शनादीनि सन्ति शकुनानि प्रस्थानकालस्य, अतो नास्ति विलम्बावसर इति भावः ।

अत्राकाशगमनरूपसाधर्म्येण खगपोताधानयोः सादृश्यवर्णनात्**पूर्णोपमालङ्कारः**, समुद्रमीनादीनां स्वभाववर्णनात् **स्वभावोक्तिश्च** । **शिखरिणीवृत्तम्** ।

४४ अत्रापि अङ्गदः प्रयाणकालिकशकुनान्येव निर्दिशति- **कुर्वन्तीति** ।

अन्वयः - कलहंससंघाः केलिकलहं कुर्वन्ति । विकलङ्कशङ्खाः नीरे सकलं नदन्ति । मरुतोयदानं कृत्वा आगता इव शीतमरुतः खे वान्ति । भवतः पन्थाः शिवः अस्तु ।

व्याख्या - **कलाः** = मधुराश्च ते हंसाः, **कलहंसाः** = कादम्बाः, **कलहंससस्तु**

खे वान्ति शीतमरुतो मरुतोयदानं
कृत्वाऽऽगता इव शिवो भवतोऽस्तु पन्थाः ।।२२।

४५ **हनुमान्** - (आत्मगतम्) श्रुतं मयात्र भवतो युवराजस्य वाऽन्येषां प्रियवयस्यानां वानरसिंहानां वचः । प्रस्थानसमये तत्र भवान्भट्टारकः सुग्रीवोऽप्येवमाह । श्रीमद्भगवतो रामचन्द्रस्य वचनञ्च स्मरामि । तेन च सीताप्रत्ययार्थं स्वकरार-

---

कादम्बे राजहंसे नृपोत्तमे, इति मेदिनी । **केल्यां कलहः**, **केलिकलहस्तम् केलिकलहम्** = परिहासविग्रहम्, **कुर्वन्ति** = विदधति । **विगतः कलङ्को येभ्यस्ते विकलङ्काः** = विगतमलिमसाः, **ते च ते शङ्खाः** = कम्बवः, **शङ्खः स्यात् कम्बुरस्त्रियौ**, इत्यमरः । **नीरे** = जले, **कलेन सहितं यथा स्यात्तथा**, **सकलम्**= समधुरवाचम्, **नदन्ति** = शब्दायन्ते । **मरौ** = मरुस्थल्याम्, **तोयानाम्** = जलानाम्, **दानम्** = समर्पणम्, **कृत्वा** = विधाय, **आगता इव** = समागता इव, **शीताश्च ते मरुतः**, **शीतमरुतः** = शीतलवायवः, **खे** = आकाशे, **नभोऽन्तरीक्षं गगनमनन्तं सुरवर्त्म खमित्यमरः** । **वान्ति** = उद्गच्छन्ति । **अत एव भवतः** = तव, हनुमत इत्यर्थः । **पन्थाः** = मार्गः, **अयनं वर्त्ममार्गाध्वपन्थानः पदवी सृतिरित्यमरः**। **शिवः** = कल्याणप्रदः, **अस्तु** = भवतु ।

सरलार्थः - केलिकलहं कुर्वन्तो हंसाः, जले नदन्तः शङ्खा नभसि सञ्चरन्तो वायवश्च प्रयाणकालस्य शकुनानि विद्यन्ते । ते तव लङ्काप्रस्थाने कल्याणं विदधतु, इति ।

अत्र कदम्बशङ्खमरुतां स्वभाववर्णनात् **स्वभावोक्तिः**, मरुतां मरुतोयदानं विधायागमनत्वेनोत्प्रेक्षणात्, **उत्प्रेक्षालङ्कारः**, ककारादीनां वर्णानामावृत्तेः, **अनुप्रासः**, "**मरुतो**" इति पदस्यावृत्तेर्यमकञ्चेति चत्वारोऽलङ्काराः । उत्प्रेक्षास्वभावोक्त्योस्तु नीरक्षीरन्यायेन संमिश्रणात् **सङ्करालङ्कारः** । **वसन्ततिलकावृत्तम्**, तल्लक्षणन्तु-

ज्ञेयं वसन्ततिलकं तभजा जगौ गः इति ।

४५ **हनुमान्** - (आत्मगतम्) **मया** = हनुमता, **अत्र भवतः** = मान्यस्य, **युवा चासौ राजा**, **युवराजस्तस्य**, **युवराजस्य** = अङ्गदस्य, **वा** = अथवा, **अन्येषाम्** = अपरेषाम्, **प्रियाश्च ते वयस्याः**, **प्रियवयस्यास्तेषाम्**, **प्रियवयस्यानाम्** = प्रियसखानाम्, **वचः** = वचनम्, **श्रुतम्** = आकर्णितम् । **प्रस्थानस्य** = प्रयाणस्य, **समये** = काले **सुग्रीवः** = वानरराजोऽपि, **एवम्** = तथैव, **आह** = कथयति स्म। **श्रीरस्ति, अस्येति श्रीमान्, स चासौ भगवान्, तस्य श्रीमद्भगवतः** =

विन्दादवतार्य नामाङ्कितोर्मिका मे समर्पिता । प्रस्थानकाले तत्र भवती भट्टिनी तारा प्रेमार्द्रगिरा मम पराक्रमं प्रशंसन्ती नवमालां स्वकरतलाभ्यामादायेदमाह-

४६ **कपिवर! तरसा त्वं गच्छ सीतासमीपं**
कृतरघुवरकार्यः शीघ्रमागच्छ पश्चात् ।
इति निगदितवत्या तारया मे पिनद्धा
सकरुणमुपकण्ठं मालतीपुष्पमाला ।।२३।।

षडैश्वर्यशालिनः, **रामचन्द्रस्य** = दाशरथेः, **वचनम्** = वाक्यञ्च, **स्मरामि** = स्मरणं करोमि । **तेन** = रामेण च, **सीतायाः** = जानक्याः, **प्रत्ययार्थम्** = विश्वासोत्पादनाय, **स्वकरारविन्दात्** = निजहस्तकमलात्, **अवतार्य** = निष्काश्य, अव - तृ + क्त्वा> ल्यप् । **नाम्ना** = रामेति संज्ञया, **अङ्किता** = चिह्निता, **ऊर्मिका** = अङ्गुलीयकम्, **मे**= मह्यम्, **समर्पिता** = दत्ता । **प्रस्थानकाले** = प्रयाणसमये, **तत्र भवती** = मान्या, **भट्टिनी** = सुग्रीवपत्नी तारा च, **प्रेम्णा आर्द्रा चासौ गीस्तया, प्रेमार्द्रगिरा**= प्रेमविह्वलवचसा, **मम** = हनुमतः, **पराक्रमम्** = वीरताम्, **प्रशंसन्ती** = श्लाघमाना, **नवा चासौ माला, ताम् नवमालाम्** = नूतनस्रजम्, **आदाय** = गृहीत्वा, **इदम्** = उच्यमानम्, **वाक्यम्** = वचनम्, **आह** = कथितवती ।

४६ अत्र हनुमान् स्वप्रयाणकाले तारया विहितं व्यवहारं स्मरति- **कपिवर** इति ।

अन्वयः - हे कपिवर ! त्वम् तरसा सीतासमीपं गच्छ । पश्चात् कृतरघुवरकार्यः शीघ्रम् आगच्छ इति निगदितवत्या तारया मालतीपुष्पामाला मे उपकण्ठम् सकरुणम् पिनद्धा ।

व्याख्या- कपीनां वरः, कपिवरः, तत्संबुद्धौ, हे कपिवर = भो वानरश्रेष्ठ! **त्वम्**= भवान्, **तरसा**= वेगेन, **सीतायाः** = जानक्याः, **समीपम्** = निकटे, **गच्छ**= याहि । **पश्चात्** = तदनु, **कृतम् रघुवीरस्य कार्यं येन सः, कृतरघुवीरकार्यः** = विहितरामकार्यः, **शीघ्रम्** = द्रुतम्, **आगच्छ** = एहि । **इति** = एतत्, **निगदितवत्या**= उक्तवत्या, **तारया** = सुग्रीवपत्न्या, **मे** = मम, **कण्ठस्य समीपे, उपकण्ठम्** = उपग्रीवम्, **मालत्याः पुष्पाणि, मालतीपुष्पाणि, तेषां माला, मालतीपुष्पमाला**= जातिकुसुमस्रक्, **सुमनाः मालती जातिरित्यमरः** । **करुणया सहितं यथा स्यात्तथा सकरुणम्** = सानुकम्पम्, **पिनद्धा** = स्थापिता ।

सरलार्थः - हनुमन्! त्वं शीघ्रं सीतानिकटं प्राप्य रामकार्यं विधाय समागच्छ, इति कथयित्वा तारया मम कण्ठे मालतीपुष्पनिर्मिता माला स्थापिता, इति । **मालिनीवृत्तम्** ।

४७ (प्रकाशम्) भो भो वानरर्षभाः! अत्रभवता कुमारेण वा भवद्भिरुदिता वाणी मया सम्यगवहिता। प्रपश्यत मे वीर्यमहिमानम्। तथा हि -

४८ सुत्राम्णः शतकोटिरस्य पुरतो मुष्टेः प्रसूनायते
पाशः पाशभृतोऽपि मेऽग्रत इतो लूमस्य काशायते।
दण्डो वा समवर्तिनो मम नखादेरण्डदण्डायते
वाचा किं परशुश्च खण्डपरशोः खण्डायते मुद्गरात्।।२४।।

---

४७. (प्रकाशम्) भो भो **वानरषर्भाः** = कपिश्रेष्ठाः! अत्र **भवता** = मान्येन, **कुमारेण** = अङ्गदेन, **वा** = अथवा, **भवद्भिः** = युष्माभिः, **उदिता** = कथिता, **वाणी** = वाक्, **सम्यक्** = साधु, **अवहिता** =ध्यानेन श्रुता। **मे** = मम, **वीर्यस्य** = पराक्रमस्य, **महिमानम्** = महत्त्वम्, **प्रपश्यत** = सम्यग् विलोकयत।

४८ अत्र लङ्कां गन्तुकामो हनुमान् वीरोचितामुत्साहसंपन्नां वाचमुच्चारयति- **सुत्राम्णेति**।

अन्वयः - अस्य मुष्टेः पुरतः सुत्राम्णः शतकोटिः प्रसूनायते। इतः मे लूमस्य अग्रतः पाशभृतः पाशः अपि काशायते। वा मम नखात् समवर्तिनः दण्डः एरण्डदण्डायते। वाचा किम्, मुद्गरात् खण्डपरशोः परशुः च खण्डायते।

व्याख्या- अस्य = मम, हनुमत इत्यर्थः। **मुष्टेः पुरतः** = मुष्ट्यग्रे, **स्यात्पुरः पुरतोऽग्रतः**, इत्यमरः। **सुष्ठु त्रायत इति सुत्रामा, तस्य सुत्राम्णः** = शक्रस्य, **सूपसर्गकात् त्रैङ् पालने**, इत्यस्माद् धातोः, **आतो मनिन्** - इति मनिन्प्रत्ययः, **सुत्रामा गोत्रभिद् वज्रीत्यमरः**। **शतं कोटयः** = धारा, **यस्य सः, शतकोटिः** = वज्रम्, **प्रसूनमिवाचरतीति प्रसूनायते** = पुष्पायते। **कर्तुः क्यङ् सलोपश्चेति क्यङ्**। **इतः** = अस्य, **इतराभ्योऽपि दृश्यते** इति तसिल्। **लूमस्य** = पुच्छस्य, **पुच्छोऽस्त्री लूमलाङ्गूले**, इत्यमरः। **अग्रतः** = पुरः, **पाशम् बिभर्तीति पाशभृत्, तस्य पाशभृतः** = वरुणस्य, **पाशः** = बन्धनास्त्रम्, **अपि** = च, **काश इव आचरतीति काशायते** = काशतुल्यो भवति। **वा** = अथवा, **मम** = हनुमतः, **नखात्** = कररुहात्, **पुनर्भवः कररुहो नखोऽस्त्री नखरोऽस्त्री नखरोऽस्त्रिया-मित्यमरः**। **समं वर्तितुं शीलमस्येति समवर्ति, तस्य समवर्तिनः** = यमस्य, **सुप्यजाताविति णिनि**। **दण्डः**= अस्त्रविशेषः, **एरण्डस्य** = चित्रकस्य, **दण्ड इवाचरतीति दण्डायते**= यष्टीयते। **वाचा** = वाण्या, **किम्** भवति। कथनेन, किमपि न जायते इत्यर्थः। **मुद्गरात्** = घनात्, **द्वघणे मुद्गरघनौ**, इत्यमरः। **खण्डः परशुर्यस्य तस्य, खण्डपरशोः** = परशुरामस्य, **परशुः** = कुठारश्च, **खण्डायते** = शकलायते। अत्र, **उपमालङ्कारः**। **शार्दूलविक्रीडितं छन्दः**।

अपि च -

४९ लाङ्गूलं मम लाङ्गलात्तव दृढं मत्त्वा विधिर्न्यस्तवान्
दीर्घोत्वं पदमध्यमाक्षरतले मुख्यार्थबोधस्वरम् ।
कालिन्दीं सरितं पुरा कृषसि भो संकर्षण! त्वं ततो
येनाहं सरितां पतिं प्रतिभयं संप्लावये दृश्यताम् ।।२५।।

---

४९ अत्र हनुमान् सङ्कर्षणादपि स्वस्य शक्तिमत्त्वं व्यनक्ति- लाङ्गूलमिति ।

अन्वयः - (भोः) सङ्कर्षण ! विधिः मम लङ्गूलं तव लाङ्गलात् दृढं मत्वा पदमध्यमाक्षरतले दीर्घोत्वं मुख्यार्थबोधस्वरम् न्यस्तवान् । त्वम् ततः पुरा कालिन्दीं सरितम् कृषसि । अहम् (च) येन सरितां पतिं प्रतिभयं संप्लावये, दृश्यताम् ।

व्याख्या - **सङ्कर्षतीति सङ्कषणः, तत्संबुद्धौ भो सङ्कर्षण** = हे बलदेव!, सं- कृष्+ल्युट् । **विधिः** = ब्रह्मा, **मम** = हनुमतः, **लाङ्गूलम्** = पुच्छम्, **पुच्छोऽस्त्री लूमलाङ्गूले**, इत्यमरः। **तव**= सङ्कर्षणस्य, **लाङ्गलात्** = हलात् **लाङ्गलं हलमित्यमरः**। **दृढम्** = बलीयांसम्, **मत्वा** = विज्ञाय, मन् + क्त्वा । **पदस्य** = 'लाङ्गल' इत्यस्य, **मध्यमश्चासौ अक्षरः**= मध्यस्थितः 'ग' इति वर्णः, **तस्य तले**= अधोभागे, **दीर्घं**= दीर्घाकारम्, **ऊत्त्वम्** = ऊकारभावो **यस्य तत् दीर्घोकारम्, मुख्यार्थबोधस्वरम्**= प्रमुखार्थबोधकाज्वर्णम्, **न्यस्तवान्**= स्थापितवान्। **त्वम्**= सङ्कर्षणः, **ततः**= लाङ्गलात्, **पुरा**= द्वापरे युगे, **कलिन्दस्यापत्यं स्त्री, कालिन्दी, ताम्, कालिन्दीम्**= यमुनाभिधाम्, **कालिन्दी सूर्यतनया यमुना शमनस्वसेत्यमरः**। **सरितम्** = नदीम्, **कृषसि**= कर्षणं विधास्यसि। **अहम्** = हनुमान् च, **येन** = लाङ्गूलेन, **सरिताम्** = नदीनाम्, **पतिम्**= स्वामिनम्, **प्रतिभयम्**= भयानकरसम्, **भयङ्करं प्रतिभयमित्यमरः** । न केवलं सामान्यभयमपि तु विभावादिभिः परिपुष्टं भयानकरसमेवेत्यर्थः । **संप्लावये**= सञ्चारये।

सरलार्थः - भो सङ्कर्षण! तव लाङ्गलात् मम लाङ्गूलं दृढं मत्वा 'लाङ्गल' इति पदस्य मध्ये वर्तमानस्य 'ग' इति पदस्य तले, ऊकारबोधकं स्वरं विधिः स्थापितवान् । त्वया लाङ्गलेन द्वापरे कालिन्दी कृष्यते, मया च लाङ्गूलेन सरितां पतिरधुनैव भीष्यते इति ।

अत्र बलरामापेक्षया हनुमतो विशेषेणाधिक्यप्रतिपादनाद् **व्यतिरेकालङ्कारः**।

अपि च -

५० बध्वा रज्जुभिरेव रावणमहं नेष्यामि लङ्केश्वरं
किं वोत्पाट्य करेण तस्य नगरीं लङ्कां सरात्रिञ्चराम् ।
मुष्टीमुष्टि नखानखि प्रहरतः को मे समक्षं विशेत्
सर्वे यान्ति पराभवं सुमनसः कीटायते रावणः ।।२६।।

किञ्च -

५१ रे रे रावण ! किं विहाय चपलं लङ्कां न हि प्लायसे
तिर्यञ्चोऽपि सहायतां तव पशोर्नैष्यन्त्यसत्कर्मणः ।

---

५० अत्र हनुमान् स्वसामर्थ्यं व्यनक्ति - बध्वेति ।

अन्वयः - अहम्, लङ्केश्वरम्, रावणम् रज्जुभिः एव बद्ध्वा नेष्यामि । किं वा सरात्रिञ्चराम् तस्य नगरीम् लङ्काम् उत्पाट्य नेष्यामि । मुष्टीमुष्टि नखानखि प्रहरतः मे समक्षम् कः विशेत् ? सर्वे सुमनसः पराभवं यान्ति, रावणः कीटायते ।

व्याख्या- अहम् = हनुमान्, लङ्काया ईश्वरः, लङ्केश्वरः, तम्, लङ्केश्वरम्= लङ्काधिपतिम्, रावयतीति रावणः, तम्, रावणम् = दशवदनम्, रज्जुभिः = गुणैः, शुल्वं वराटकः स्त्री तु रज्जुः स्त्रिषु वटी गुण इत्यमरः । एव बध्वा = निबध्य, नेष्यामि = प्रापयिष्यामि, किं वा = अथवा, रात्रिषु चरन्तीति रात्रिञ्चराः= निशाचराः, तैः सहिता, ताम्, सरात्रीञ्चराम् = सराक्षसाम्, लङ्काम् = रावणपुरम्, उत्पाट्य = उत्पाटनं विधाय, नेष्यामि= प्रापयिष्यामि । मुष्टिभिः मुष्टिभिः प्रहृत्य इदं युद्धं प्रवृत्तमिति मुष्टीमुष्टि = मुष्टियुद्धे, नखैर्नखैश्च प्रहृत्य प्रवृत्तं युद्धमिति नखानखि = नखयुद्धे, प्रहरतीति प्रहरन्, तस्य, प्रहरतः = प्रहारं कुर्वतः, मे = मम, हनुमत इत्यर्थः । अक्ष्णः समम्, समक्षम् = अग्रे, कः = कित्रामकः, जनः, विशेत्= प्रविशेत् । न कोऽपि स्थातुं शक्नोतीत्याशयः । सर्वे = निखिलाः, सुमनसः= देवाः, सुपर्वाणः सुमनसः, इत्यमरः । पराभवम् = पराजयम्, यान्ति = प्राप्नुवन्ति। रावणः = लङ्केशः, कीट इवाचरतीति कीटायते = कृमितुल्यो भवति ।

सरलार्थः - अहं रज्जुभी रावणं बद्ध्वा किं वा हस्तेन सराक्षसाम् लङ्कामेव समुत्पाट्य अत्रानेष्यामि । मुष्टियुद्धे च सर्वे देवाः पराजयं प्राप्नुवन्ति, रावणस्तु कीटायते इति ।

अत्र विकल्पोपमयोः संसृष्टिरलङ्कारः । शार्दूलविक्रीडितं छन्दः ।

५१ अत्र हनुमान् रावणस्य असाहाय्यं निरूपयति- रे रे इति ।

शीघ्रं त्वां परिमोक्ष्यति स्वकुलजो रक्षोऽपि सन् सोदरः
का वार्ता महतामुतामृतभुजां देवद्विषां वा तथा ।।२७।।

अपि च -

५२ यावन्मन्मुष्टिवज्रः प्रपतति न मुखे मेघनादो निनद्यात्
भिन्नौ कर्णौ न यावन्मम करनखरैः कुम्भकर्णो निदध्यात् ।

अन्वयः - रे रे रावण! लङ्कां विहाय किम् चपलं नहि प्लायसे । तिर्यञ्चोऽपि असत्कर्मणः तव पशोः सहायतां नैष्यन्ति । रक्षोऽपि स्वकुलजः सोदरः त्वां शीघ्रं परिमोक्ष्यति । महताम् अमृतभुजां देवद्विषाम् वा का वार्ता ?

व्याख्या - रे रे रावण = भो लङ्केश! लङ्काम् = स्वपुरम्, विहाय = त्यक्त्वा, वि - हा + क्त्वा > ल्यप् । किम् = किमर्थम्, चपलम् = द्रुतम्, यथा स्यात्तथा, चपलं द्रुतमित्यमरः । नहि प्लायते = नैव पलायनं करोषि । तिरः अञ्चन्तीति तिर्यञ्चोऽपि = पक्षिजातयश्च, स तिर्यङ् यस्तिरोऽञ्चतीत्यमरः । न सत् असत्, असत् कर्म यस्य तस्य असत्कर्मणः = पापक्रियारतस्य, पशोः = ज्ञानविवेकादिशून्यस्य, तव = रावणस्य, सहायस्य भावः = सहायता, ताम्, सहायताम् = सहयोगम्, तस्य भावस्त्वतलौ, इति तल् । न एष्यन्ति = न कुर्वन्ति । सहयोगं कर्तुं न यान्तीत्यर्थः । रक्षः = राक्षसः, यातुधानः पुण्यजनो नैऋतो यातुरक्षसीत्यमरः । सन् = विद्यमानोऽपि, स्वस्य कुलम्, स्वकुलम्, स्वकुले जातः, स्वकुलजः = रावणवंशोद्भवः, सप्तम्यां जनेर्डः, इति डः। सह= तुल्यम्, उदरम् यस्य सः सोदरः = सगर्भ्यः, विभीषणोऽपीत्यर्थः । त्वाम् = रावणम्, शीघ्रम् = द्रूतम्, परिमोक्ष्यति = त्यक्ष्यति । महताम् = उत्कृष्टाशयानाम्, अमृतं भुञ्जते इति अमृतभुजः = देवाः, तेषाम्, वा = अथवा, तथा = महताम्, देवान् द्विषन्ति इति द्वेवद्विषस्तेषाम्, देवद्विषाम् = राक्षसानाम्, का वार्ता = का कथा ? ते तु सहयोगं कुर्वन्त्येव नहीत्यर्थः ।

सरलार्थः - भो रावण! त्वं किमर्थं लङ्कां परित्यज्य न पलायसे ? विवेकशून्यस्य तव पक्षिजातयोऽपि साहाय्यं न कुर्वन्ति । तव सोदरः स्वकुलोद्भवः विभीषणोऽपि त्वां त्यक्ष्यति, अन्येषां देवानां राक्षसानां वा सहयोगस्तु दूरे आस्तामिति।

अर्थापत्तिरलङ्कारः । शार्दूलविक्रीडितं छन्दः ।

५२ अत्र हनुमान् प्रकारान्तरेण स्ववीर्यमभिव्यनक्ति- यावदिति ।

अन्वयः - यावत् मन्मुष्टिवज्रः मुखे न पतति तावत् मेघनादः निनद्यात् । यावत् मम करनखरैः कर्णौ न भिन्नौ तावत् कुम्भकर्णः निदध्यात् । यावत् मे

यावन्नो मे प्रहस्तः प्रथयति हननं तावदास्तां प्रहस्तो
लङ्काऽलङ्कारयुक्ता भवतु च न मया यावदेषा विनष्टा ।।२८।।

किञ्च -

५३ जगत्यां किं नष्टाः सुरदनुजमर्त्या अतिबलाः
पतिं लङ्के! पापं दशमुखमतस्त्वं कृतवती ।

प्रहस्तः हननम् न प्रथयति तावत् प्रहस्तः आस्ताम् । यावत् मया अलङ्कारयुक्ता लङ्का न विनष्टा तावत् च एषा भवतु ।

व्याख्या - **यावत्** = यावत्कालपर्यन्तम्, **यावत् तावच्च साकल्येऽवधौ मानेऽवधारणे**, इत्यमरः । **मम मुष्टिः**, **मन्मुष्टिः**, **मन्मुष्टिरेव वज्रः मन्मुष्टिवज्रः** = मम मुष्टिरूपः कुलिशः, **मुखे** = वदने, **न पतति** = नाभियाति, **तावत्** = तत्कालपर्यन्तं **मेघस्य नाद इव नादो यस्य सः**, **मेघनादः** = इन्द्रजित्, **निनद्यात्** = अतिशयेन गर्जनं कुर्यात् । **यावत्** = यत्कालपर्यन्तम्, **मम** = हनुमतः, **करयोः** = हस्तयोः, **नखैरः** = नखैः, **नखोऽस्त्री नखरोऽस्त्रियामित्यमरः** । **कर्णौ** = श्रवणे, **कर्णशब्दग्रहौ श्रोत्रं श्रुतिः स्त्री श्रवणं श्रवः**, इत्यमरः । **न भिन्नौ** = न विदीर्णौ, भिद् + क्तः । **तावत्** = तत्कालपर्यन्तम्, **कुम्भौ**, **इव कर्णौ यस्य सः**, **कुम्भकर्णः** = रावणस्य मध्यमभ्राता, **निदध्यात्** = कर्णौ स्थापयेत् । **यावत्** = यत्कालपर्यन्तम्, **मम** = हनुमतः, **प्रहस्तः** = चपेटः, **पाणौ चपेटप्रतलप्रहस्ता विस्तृताङ्गुलौ**, इत्यमरः। **हननम्** = ताडनम्, हन् + ल्युट् > अन । **न प्रथयति** = न विस्तारयति, **तावत्** = तत्कालपर्यन्तम्, **प्रहस्तः** = तदाख्यो राक्षसः, **आस्ताम्** = तिष्ठतु । **यावत्** = यत्कालपर्यन्तम्, **मया** = हनुमता, **अलङ्कारैः** = रत्नैः, **युक्ता** = सहिता, **लङ्का** = रावणपुरी च, **न विनष्टा**= न नष्टा, **तावत्** = तत्कालपर्यन्तम्, **एषा**= लङ्का, **भवतु**= तिष्ठतु ।

सरलार्थः - यावन्मया मुष्ट्या न हन्यते तावन्मेघनादो नदतु, यावन्मया कराग्रैः कर्णौ न भिद्येते तावत् कुम्भकर्णस्तौ स्थापयेत्, यावन्मम चपेटैर्न ताड्यते तावत् प्रहस्तो निवसतु, यावच्च रत्नभूषिता लङ्का न नश्यते तावत् सापि तिष्ठतु, इति।

मुष्टिरेव वज्रमिति **रूपकम्**, अन्यत्र, **अनुप्रासालङ्कारः** । **स्त्रग्धरावृत्तम्**, तलक्षणं यथा-

म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्त्रग्धरा कीर्तितेयम् । इति ।

५३ अत्र हनुमान् प्रकारान्तरेण रावणमेव निन्दति - **जगत्यामिति** -

यतस्त्वां पत्युस्ते पुरत इह धक्ष्येऽहमसतीं
प्रकृत्या चापल्यात्परिभवपदं याति कुलटा ।।२९।।

(अनन्तरमेव हनुमान् विहितपर्वतसन्निभाकारः प्रविश्य विहायसा गन्तुमुत्प्लवनं नाटयति)

५४ पश्यन्तु नाम त्रिलोकीनिवासिनः सर्वेऽपि रामकार्ये मम पराक्रमोदारचरितम्।

(इति निष्क्रान्तः)

अन्वयः - जगत्याम् अतिबलाः सुरदनुजमर्त्याः नष्टाः किम्? अतः हे लङ्के! त्वम् पापम् दशमुखम् पतिम् कृतवती । यतः इह अहम् असतीम् त्वाम् ते पत्युः पुरतः धक्ष्ये । कुलटा प्रकृत्या चापल्यात् परिभवपदं याति ।

व्याख्या - **गच्छतीति जगती, तस्याम् जगत्याम्** = लोके, **अतिशयेन बलं येषान्तेऽतिबलाः** = भृशं शक्त्यान्विताः, **सुराश्च दनुजाश्च मर्त्याश्च सुरदनुजमर्त्याः** = देवदानवमानुषाः, **नष्टाः** = विलयं याताः, **किम्** इति प्रश्ने । **अतः** = अस्य हेतोः, **हे लङ्के** = भो लङ्कानगरि! **त्वम्** = भवती, **पापम्** = कल्मषयुतम्, **दश मुखानि यस्य सः, तम् दशमुखम्** = रावणम्, **पातीति पतिः, तम् पतिम्** = स्वामिनम्, **कृतवती** = विहितवती। **यतः** = यस्मात् कारणात्, **इह**= अत्रैव, **न सती असती ताम् असतीम्** = कुलटाम्, रावणकृतासदाचारवतीमित्यर्थः। **त्वाम्** = लङ्काम्, **ते** = तव (लङ्कायाः, स्त्रीत्वारोपः) **पत्युः** = राज्ञः, **अथ च** धवस्य, **पुरतः** = अग्रे, **धक्ष्ये** = भस्मसात् करोमि । (**हि** = यतः) **कुलटा** = व्यभिचारवती स्त्री, **प्रकृत्या** = स्वभावेन, **चपलस्य भावश्चापल्यम्, तस्मात् चापल्यात्** = चाञ्चल्यात्, **परिभवस्य पदम् परिभवपदम्** = तिरस्कारस्थानम्, **याति** = प्राप्नोति ।

सरलार्थः - दुराचारवतो रावणस्य शासनतया लङ्काऽपि कुलटेव सकलङ्का सञ्जाता । अतः रावणस्य पुरः दुराचारसंपर्कजन्यं कलङ्कं शोधयितुं लङ्कां धक्ष्य इति।

अत्र रावणस्य **दुराचारातिशयो** व्यज्यते । अचेतनलङ्कायाः कुलटाव्यवहारारोपात् **समासोक्त्यलङ्कारः** । चतुर्थपादस्थवाक्यार्थेन प्रथम-द्वितीय-तृतीय-चरणस्थवाक्यार्थस्य समर्थनात्, **अर्थान्तरन्यासालङ्कारः** । तयोरत्र **संसृष्टिः** । **शिखरिणी** वृत्तम् ।

५४ **त्रयाणां लोकानां समाहारस्त्रिलोकी, तस्यां निवसन्तीति त्रिलोकीनिवासिनः**= लोकत्रयवासिनः, **सर्वे** = निखिलाः, सुरदनुजमर्त्याः, **अपि रामस्य कार्यम्, तस्मिन्**

५५ हनुमान् -

ध्यात्वाऽहं हृदि रामपादयुगलं तन्मुक्तबाणत्वर-
स्तीर्त्वा गोखुरकल्पमल्पजलधिं पश्यामि तां जानकीम् ।
दूतोऽहं रघुनायकस्य सहसा रोद्धुं ममेमं रयं
कः शक्नोति विहायसा विचरतः शाखामृगाः! पश्यत ।।३०।।

रामकार्ये = सीतान्वेषणक्रियायाम्, मम = मे, हनुमत इत्यर्थः । पराक्रमस्य = विक्रमस्य, उदारम् = विस्तृतम्, चरितम् = कृत्यम्, पश्यन्तु = विलोकयन्तु ।

५५ अत्र हनुमान् लङ्काप्रयाणकाले स्ववीर्यस्यातिशयमभिव्यनक्ति- ध्वात्वेति ।

अन्वयः - अहंम् हृदि रामपादयुगलं ध्यात्वा तन्मुक्तवाणत्वरः गोखुरकल्पम् अल्पजलधिम् तीर्त्वा ताम् जानकीम् पश्यामि । अहं रघुनायकस्य दूतः (अस्मि) भो शाखामृगाः ! विहायसा विचरतः मम इमं रयं सहसा रोदधुं कः शक्नोति ? पश्यत।

व्याख्या- अहम् = हनुमान्, हृदि = चित्ते, चित्तन्तु चेतो हृदयं स्वान्तं हृन्मानसं मनः, इत्यमरः । रामस्य = दाशरथेः, पादयोः = चरणयोः, युगलम् = द्वयम्, ध्यात्वा = चिन्तयित्वा, ध्यै + क्त्वा । तेन = रामेण, मुक्ताः = त्यक्ताः, ये वाणाः = शरास्तेषां, त्वरेव त्वरा = शैघ्रं यस्य सः, तथाभूतः सन् गोः खुरः, गोखुरः, ईषदूनः गोखुरः गोखुरकल्पस्तम्, गोखुरकल्पम् = धेनुशफपरिमितम् ईषदसमाप्तौ कल्पब्देश्यदेशीयरः, इति कल्पप्प्रत्ययः, अल्पजलधिम् = स्वल्पसमुद्रम्, तीर्त्वा = पारं गत्वा, तृ + क्त्वा । ताम् = रावणापहृताम्, जनकस्यापत्यं स्त्री जानकी, ताम् जानकीम् = सीताम्, पश्यामि = विलोकयामि । अहम् = हनुमान्, रघूणाम् नायकः, रघुनायकः, तस्य रघुनायकस्य = रामस्य, दूतः = सन्देशहरः, स्यात्सन्देशहरो दूत इत्यमरः। अस्मि । शाखाचारिणो मृगाः, शाखामृगाः, = हे वानराः ! कपिप्लवङ्गप्लवग-शाखामृगवलीमुखाः, इत्यमरः। विहायसा = आकाशेन, विचरतीति विचरन् तस्य विचरतः = गच्छतः, मम = हनुमतः, इमम् = एनम्, रयतेऽनेनेति रयस्तम् रयम् = जवम्, पुसि संज्ञायां घः प्रायेणेति घः । रोद्धुम् = निवारयितुम्, रुध् + तुमुन् । कः शक्नोति ? = कः समर्थोऽस्ति ? न कोऽपीत्यर्थः । पश्यत = विलोकयत ।

सरलार्थः - रामस्य चरणद्वयं ध्यात्वा गोखुरकल्पमल्पजलधिं जवेन तीर्त्वा जानकीं पश्यामि । रामदूतस्य गगने गच्छतो मम जवं सहसा न कोऽपि रोद्धुं शक्नोतीति।

अत्र, उपमाद्वयमर्थापत्तिश्चेति त्रयोऽलङ्काराः, शार्दूलविक्रीडितं वृत्तम् ।

५६ भो भो वानराः ! एषोऽस्मि विहायसा समुद्रमुल्लङ्घ्य लङ्कामभियातुं प्रस्थितः।

(इति निष्क्रान्तः)

५७ अङ्गदः - कथमस्य बहुविक्रमशालिनः पवनात्मजस्य महोत्साहः। तथा हि-

५८ व्योम्न्यस्मिन्परिमाणशून्यविषये गर्जन्निहोड्डीयते
हस्तोत्कृष्टमपांपतेर्जलमसौ धत्ते मुखाभ्यन्तरे ।
वाता वान्ति च चण्डवेगसहिता यद्गात्रवेगोत्थिता
अभ्रं वाऽभ्रमुवल्लभोऽयमथवा किंवाऽतिवेगः कपिः ।।३१।।

---

५६ भो वानराः = हे शाखामृगाः ! एषः = अयम्, अहम् = हनुमान्, विहायसा = आकाशेन समुद्रम् = सागरम्, उल्लङ्घ्य = लङ्घयित्वा, लङ्काम् = रावणपुरम्, अभियातुम् = अभिगन्तुम्, प्रस्थितः = प्रचलितः, अस्मि ।

५७ अङ्गदः - बहवश्च ते विक्रमाः, बहुविक्रमास्तैः शालते इति बहुविक्रमशाली तस्य बहुविक्रमशालिनः = अतिशयपराक्रमशोभिनः, आत्मनो जायत इति आत्मजः पवनस्यात्मजः पवनात्मजस्तस्य पवनात्मजस्य = हनुमतः, जनेर्डः, महान् चासौ, उत्साहः महोत्साहः = महोद्यमः । कथम् = कीदृशोऽस्तीति भावः ।

५८ अत्राङ्गद आकाशे समुत्पतन्तं हनुमन्तं वर्णयति - व्योम्नीति ।

अन्वयः - अस्मिन् परिमाणशून्यविषये व्योम्नि असौ गर्जन् उड्डीयते, इह हस्तोत्कृष्टम् अपां पतेः जलम् मुखाभ्यन्तरे धत्ते, च चण्डवेगसहिताः यद्गात्रवेगोत्थिताः वाताः वान्ति वा अयम् अभ्रम् अथवा अभ्रमुवल्लभः, किं वा अतिवेगः कपिः (अस्ति)

व्याख्या- अस्मिन् = एतस्मिन्, परिमाणस्य शून्यो विषयो यस्य तस्मिन् परिमाणशून्यविषये = मातुमशक्ये, इयत्तारहिते, इत्यर्थः । व्योम्नि = आकाशे, द्योदिवौ द्वे स्त्रियामभ्रं व्योम पुष्करमम्बरमित्यमरः । असौ = हनुमान्, गर्जतीति गर्जन् = शब्दं कुर्वन्, गर्ज + शतृ । उड्डीयते = उद्गच्छति इह = समुद्रस्याकाशे, हस्ताभ्याम् = कराभ्याम्, उत्कृष्टम् = गृहीतम्, अपां पतेः = समुद्रस्य, रत्नाकरो जलनिधिर्यादःपरिपां पतिः, इत्यमरः । जलम् = सलिलम्, आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलमित्यमरः । मुखस्य = वदनस्य, अभ्यन्तरे = अन्तः, धत्ते = धारयति । च = पुनः, चण्डः = प्रचण्डो यो वेगः = रयस्तेन सहिताः = युक्ताः, यस्य = हनुमतः, गात्रस्य = शरीरस्य, या गतिः = गमनम्, तस्याः उत्थिताः = उद्गताः, वाताः = वायवः, वान्ति = सञ्चरन्ति । वेति वाक्यालङ्कारे।

अपि च -

५९ कीलालं तरसोरसा जलनिधेः स्पृष्ट्वा गलस्यार्जवं
कृत्वाऽऽकुञ्च्य पदौ लिलङ्घिषति तं कल्लोलमालाकुलम् ।
लाङ्गूलाहतवीचिरेष सहसा मार्गं ददाति स्वयं
तस्मै पश्यत वानरा द्रुततरं तेजस्विने सागरः ।।३२।।

अयम् = एषः, पुरो दृश्यमानः, अभ्रम् = मेघो वर्तते, अथवा अभ्रमोर्वल्लभः, अभ्रमुवल्लभः = ऐरावतोऽस्ति, किं वा = यद्वा, अति = अतिशयः, वेगः = जवो यस्य सः, तथाभूतः, कपिः = वानरो विद्यते ।

सरलार्थः - असौ हनुमान् परिमाणशून्ये गगने गर्जनं विधाय उड्डीयमानः समुद्रस्य जलं हस्ताभ्यां गृहीत्वा पिबति । गच्छतो यस्य शरीरादुद्गताः सवेगा वायवो वान्तः सन्ति। अयं पुरो दृश्यमानो मेघः, ऐरावतः किंवाऽतिवेगः कपिरिति सन्देहोऽस्तीति।

अत्र स्वभावोक्तिसन्देहयोः संसृष्टिः । शार्दूलविक्रीडितं छन्दः ।

५९ अत्राङ्गदो नभोमार्गेण यान्तं हनुमन्तं वर्णयति- कीलालमिति -

अन्वयः - एषः जलनिधेः कीलालम् उरसा तरसा स्पृष्ट्वा गलस्य आर्जवं कृत्वा पदौ आकुञ्च्य कल्लोलमालाकुलं तं लिलङ्घिषति । लाङ्गूलाहतवीचिः सागरः स्वयमेव तेजस्विने तस्मै सहसा मार्गं ददाति । वानराः ! द्रुततरं पश्यत ।

व्याख्या -एषः = अयम्, पुरोवर्ती हनुमान्, जलानां निधिः, जलानि निधीयन्तेऽत्र वा जलनिधिः, तस्य जलनिधेः = समुद्रस्य, रत्नाकरो जलनिधिर्यादः पतिरपां पतिरित्यमरः । कीलालम् = सलिलम्, पयः कीलालममृतमित्यमरः । उरसा = वक्षसा, तरसा = वेगेन, स्पृष्ट्वा = स्पर्शं विधाय, गलस्य = कण्ठस्य, ऋजोर्भावः आर्जवम् = सरलताम्, कृत्वा = विधाय, पदौ = चरणौ, आकुञ्च्य= कुञ्चितौ विधाय, कल्लोलानाम् = महोर्मीणाम्, मालाभिः = पङ्क्तिभिः, आकुलम्= व्याप्तम्, तम् = समुद्रम्, लङ्घयितुमिच्छतीति लिलङ्घिषति = पारे गन्तुमीहते। लाङ्गूलेन आहता वीचिर्यस्य सः, लाङ्गूलाहतवीचिः = लूमताडिततरङ्गः, सागरः= समुद्रः, पुच्छोऽस्त्री लूमलाङ्गूले, इत्यमरः । स्वयम् = आत्मनैव, तेजोऽस्यास्तीति तेजस्वी, तस्मै तेजस्विने = ओजस्विने, तस्मै = हनुमते, सहसा = झटिति, मार्गम् = पन्थानम्, ददाति = प्रयच्छति । वानराः = हे प्लवङ्गमाः ! अतिशयेन द्रुतम्, द्रुततरम् = शीघ्रम्, पश्यत = विलोकयत ।

सरलार्थः - असौ हनुमान् समुद्रस्य जलं वेगवता वक्षसा स्पृष्ट्वा गलस्यार्जवं

अपि च -

६० उत्तुङ्गशैलसदृशोऽम्बरदत्तबाहु-
वेंगात्सुकुञ्चितपदो दृढबालधिश्च ।
उत्क्षिप्तकर्णशिखरस्तरतीव नीरे
व्योम्न्युत्पतन्नभिनदन्पवनात्मजोऽयम् ।।३३।।

विधाय पादौ कुञ्चयित्वा कल्लोलमालावृतं समुद्रं लङ्घयितुमिच्छति । लाङ्गूलाहतवीचिः समुद्रः स्वयमेव तस्मै हनुमते सहसा मार्गं ददाति । भो वानराः ! शीघ्रं विलोकयत, इति ।

हनुमत्स्वभाववर्णनात् **स्वभावोक्तिः**, अचेतने समुद्रे मार्गप्रदानरूपचेतन-धर्मारोपात् **समासोक्तिश्च** । तयोर्निरपेक्षतया संमिश्रणात् **संसृष्टिः** । **शार्दूलविक्रीडितं छन्दः** ।

६० अत्राङ्गदो लङ्कामभियातुं सागरमुपरि प्रस्थितवतो हनुमतः स्वभावं निरूपयति- **उत्तुङ्गेति**।

अन्वयः - उत्तुङ्गशैलसदृशः वेगात् अम्बरदत्तबाहुः सुकुञ्चितपदः दृढबालधिः च उत्क्षिप्तकर्णशिखरः व्योम्नि उत्पतन् अभिनदन् अयम् पवनात्मजः नीरे तरतीव ।

व्याख्या- उद्गताः = उन्नताः, **तुङ्गा** = उच्छ्रिताश्च ते **शैलाः** = पर्वताः, **तैः सदृशः** = तुल्यः, **उत्तुङ्गशैलसदृशः** = उन्नतपर्वततुल्यः, **वेगात्** = जवात्, **अम्बरे**= आकाशे, **दत्तौ बाहूयेन सः**, **अम्बरदत्तबाहुः** = गगनस्थापितकरः, **सुकुञ्चितौ पदौ येन सः**, **सुकुञ्चितपदः** = आकुञ्चितचरणः, **बालाः धीयन्तेऽत्रेति बालधिः**= पुच्छम्, **दृढो बालधिर्यस्य सः**, **दृढबालधिः** = दृढपुच्छः, **उत्क्षिप्ते** = उन्नते, **कर्णयोः** = श्रवणयोः, **शिखरे** = अग्रभागौ **येन सः**, **उत्क्षिप्तकर्णशिखरः** = उत्थापितश्रवणाग्रभागः, **व्योम्नि** = आकाशे, **उत्पततीति उत्पतन्** = उद्गच्छन्, **अभिनदतीति अभिनदन्** = शब्दायमानः, अभि - नद् + लट् > शतृ । **अयम्** = एषः, **पवनस्य** = वायोः, **आत्मजः** = सूनुः, हनुमानित्यर्थः । **आत्मजस्तनयः सुनुरित्यमरः** । **नीरे** = जले, समुद्रस्येति शेषः । **तरति** = प्लवत इव ।

सरलार्थः - उन्नतपर्वताकारोऽम्बरदत्तबाहुः दृढपुच्छः कुञ्चितचरणः उत्क्षिप्तकर्णाग्रो व्योम्न्युत्पतन् असौ हनुमान् समुद्रसलिले तरतीव दृश्यत इति ।

अत्र स्वभावोक्तिक्रियोप्रेक्षयोः **संसृष्टिः** । **वसन्ततिलकं वृत्तम्**, तल्लक्षणं

६१ **जाम्बवदादयः सर्वे** (सहर्षम्) अहो हनुमतः प्रभावोत्साहौ !

(इति निष्क्रान्ताः सर्वे)

इति प्रथमोऽङ्कः ।

यथा–

'ज्ञेयं वसन्ततिलकं तभजा जगौ गः' इति ।

६१ **जाम्बवदादयः सर्वे** - (सहर्षम्) **हनुमतः** = पवनसूनोः, **प्रभावश्च उत्साहश्च तौ प्रभावोत्साहौ** = सामर्थ्योद्यमौ, **अहो** = आश्चर्यजनकाविति भावः ।

(इति निर्गताः)

इति श्रीनीलमणिढुङ्गानाविरचितायां यशोदाभिधायां

संस्कृतटीकायां सुन्दरचरितनाटकस्य

प्रथमोऽङ्कः समाप्तः

सुन्दरचरितनाटकम्

द्वितीयोऽङ्कः

द्वितीयाङ्ककथासारः

अङ्कारम्भे विदूषको गन्धर्वाप्सरसां स्वरसन्धानैर्निशायामप्यलब्धनिद्रो दण्डकाष्ठमवलम्ब्यावस्थितश्चिन्तामग्नोऽवलोक्यते । तस्मिन्नेव काले प्रविष्टो गन्धर्वराजस्तं वानरक्रीडाविलोकनाय सहैव प्रस्थातुं प्रेरयति , साप्सरसो गन्धर्वानाहूय शक्रसन्देशं श्रावयति, तौर्यत्रिकार्हवस्तूनि शीघ्रं संपादयितुञ्च निर्दिशति ।

तथानुष्ठितेऽप्सरोभिर्गन्धर्वैश्च सहितो गन्धर्वराजो हाहा विमानमारुह्य विहायसा प्रतिष्ठते । मार्गे पाकशासनस्य प्रतीक्षायै वृक्षच्छायेन पिहिते पर्वतशिखरे व्योमयानमवतारयति । अप्सरसां गीतवाद्यसंलापादीनां श्रवणेन ललितविभ्रमाणां दर्शनेन चात्मानं विनोदयति । दशमुखादपि धृष्टत्वेन संभावितस्य वानरस्य क्रीडां विलोकयितुं रुचिर्नास्तीति अप्सरसामालापं निशम्य गन्धर्वराजो ब्रह्मचारिणो हनुमतः सकाशात्तथाविधदुर्व्यवहारस्य सर्वथाऽसंभवत्वं प्रकाश्य ताः समाश्वसति । सलज्जा अप्सरसश्च तत्र सुललिताश्चेष्टा भावाँश्च प्रकाश्य गन्धर्वराजस्य मनो विनोदयन्ति । अमात्यश्च गन्धर्वराजनिर्देशमनुसृत्य रावणापहृतायाः सीताया अन्वेषणाय प्रस्थितस्य हनुमतस्तद्वीर्यपरीक्षायै देवैः प्रेषितायाः सुरसायाश्च जायमानं समागमं विलोकयितुं शक्रस्य विजयप्रस्थानं भवतीति तुम्बुरुं बोधयति । अप्सरसो रावणकृतदुर्व्यवहारपीडानुभूतिं प्रकाशयन्ति। पातिव्रत्येनैव सीताऽद्यावधि जीविता भवेदिति अमात्यस्तर्कयति। उर्वशी च गन्धर्वराजं विनोदयितुं मध्यमस्वरवाहिनीमेकां गीतिकां श्रावयति । तच्छ्रुत्वा सर्वेऽश्रूणि मुञ्चन्ति । अस्मिन्नेवावसरे नेपथ्ये कोऽपि रथस्थस्येन्द्रस्याग्रे प्रस्थानं सूचयति । ततोऽप्सरोभिर्गन्धर्वैश्च सहितो गन्धर्वराजः, वासवस्याभिनन्दनाय वन्यप्रसूनैश्चितामुपदाम्, मृदङ्गपटहादिनृत्यगीतवाद्यसाधनानि च गृहीत्वा विमानमारुह्य प्रतिष्ठते ।

अथ द्वितीयोऽङ्कः

(ततः प्रविशति विदूषकः)

१ **विदूषकः** – (आत्मगतम्) भो हद्धि भो हद्धि । एदस्स गाअणसीलस्य गंहव्वाणं रण्णो वअस्सभावेण हग्गे णिव्विण्णो ह्मि । इअं ढक्का अअं मिदङ्गो त्ति। अणुदिअसं णूदणाणं वादित्ताणं अवरिचआदो दासीपुत्ताओ अस्स गंहव्वस्स अणुजाइणो वा गणिआओ अच्छराओ मं उवालंहन्ति । रत्तिं पि गणिआणं सोरसाहणेहिं मे सइदव्वं ण होदि । एत्तिकेणवि मे पआसो ण गच्छेदि । का गदी । [*भो हा धिक्, भो हा धिक् ! एतस्य गायनशीलस्य गन्धर्वाणां राज्ञो वयस्यभावेन अहं निर्विण्णोऽस्मि । इयं ढक्काऽयं मृदङ्ग इति, अनुदिवसं नूतनानां वादित्राणाम-परिचयाद् दासीपुत्रा अस्य गन्धर्वस्यानुयायिनो वा गणिका अप्सरसो मामुपा-लम्भन्ते। रात्रावपि गणिकानां स्वरसाधनैर्मे शयितव्यं न भवति । एतावतापि मे प्रयासो न गच्छति । का गतिः ।*] (इति दण्डकाष्ठमवलम्ब्य तिष्ठति)

(ततः प्रविशति गन्धर्वराजो हाहाः)

---

१ **विदूषकः** – (**आत्मगतम्** = सर्वैरश्राव्यं यथा स्यात्तथा) भोः, हा धिक् हा धिक् इति वीप्सार्थे द्विरुक्तिः, **एतस्य** = अस्य, **गायने** = गाने, **शीलम् यस्य तस्य गायनशीलस्य** = गानपरायणस्य, **गन्धर्वाणाम्** = देवयोनिविशेषाणाम्, **राज्ञः** = नृपतेः, **वयस्यभावेन** = सख्यभावेन, **अहम्** = विदूषकः, **निर्विण्णः** = दुःखितः, अस्मीति शेषः । **इयम्** = एषा, **ढक्का** = यशःपटहः, **स्याद्यशःपटहो ढक्केत्यमरः**। **अयम्**= असौ, **मृदङ्गः** = मुरजः, **इति अनुदिवसम्** = प्रतिदिनम्, **नूतनानाम्** = नवीनानाम्, **वादित्राणाम्**= वाद्यविशेषाणाम्, **अपरिचयात्**= अनवबोधात्, **दासीपुत्राः** = दासीसुताः (गर्हायाम्), **अस्य** = एतस्य, **गन्धर्वस्य** = देवयोनि-विशेषस्य, **अनु** = पश्चात्, **यान्तीति अनुयायिनः**= अनुसरन्तः पुरुषाः, **वा** = अथवा, **गणिकाः** = स्वर्वेश्याः, **अप्सरसः** = मेनकाद्याः, **माम्** = विदूषकम्, **उपालम्भन्ते**= उपहसन्ति । **रात्रौ अपि** = निशायाञ्च, **गणिकानाम्** = स्वर्वेश्यानाम्, **स्वराणाम्** = निषादर्षभादीनाम्, **साधनैः** = अभ्यासैः, **मे** = मम, **शयितव्यम्** = शयनीयमपि, **न भवति**, स्वपितुमपि न प्राप्यते, इति भावः । **एतावतापि** = अस्यां

२ **गन्धर्वराजः** – सखे विदूषक! किमित्येवमभुक्तोन्निद्रो लम्बितविटपिशाखः शाखामृग इव यष्टिमवलम्ब्य नेत्रे समुन्नयसि । किमद्य तवोन्निद्रस्य क्षपा व्यतीता ?

३ **विदूषकः** – अध इम् । सअंजेब्व छुरिअए हत्थं आछिदिअ रत्तकारणं पुच्छेसि। [*अथ किम् । स्वयमेव क्षुरिकया हस्तमाच्छिद्य रक्तकारणं पृच्छसि ?*]

४ **गन्धर्वराजः** – गच्छ तावच्छयितुम् ।

५ **विदूषकः** – सोत्थि भवदे । [*स्वस्ति भवते*] (इति परिक्रामति ।)

६ **गन्धर्वराजः** – सखे माढव्य! तिष्ठ तावत् । वानरस्य चपलत्वं जहि, न त्वं वानरः । वानरोऽपीदानीं समुद्रं तितीर्षुर्लङ्कोन्मुखो जिगमिषति । तत्कौतुकं

स्थितावपि, **मे** = मम, **प्रयासः** = प्रयत्नः, **न गच्छति** = न याति, **का गतिः** = किं विधेयमित्यर्थः ।

२ **गन्धर्वराजः** - **सखे** = मित्र, **विदूषक ! इत्येवम्** = अनया रीत्या, **न भुक्तः, अभुक्तः, उद्गता निद्रा यस्य सः, उन्निद्रः, अभुक्तश्चासावुन्निद्रश्च अभुक्तोन्निद्रः**= त्यक्तभोजनशयनः, **लम्बिता** = आश्रिता, **विटपिनः** = वृक्षस्य, **शाखा** = द्रुमांशो **येन तथाभूतः, शाखाचारी मृगः शाखामृगः, शाखामृग इव** = वानर इव, **शाकपार्थिवादीनामिति समासः । यष्टिम्** = दण्डम् **अवलम्ब्य** = आश्रित्य **नेत्रे**= नयने **किम्** = किमर्थम् **समुन्नयसि** = ऊर्ध्वं क्षिपसि । **अद्य** = वर्तमाने दिने, **उद्गता निद्रा यस्य तस्य उन्निद्रस्य** = त्यक्तनिद्रस्य, **तव** = भवतः, **क्षपा** = रात्रिः, **व्यतीता** = गता **किम् ?** त्वं नैव सुप्तोऽसि किम् इत्यर्थः ।

३ **विदूषकः** - **अथ किम्** = अस्मिन् विषये किमस्ति वक्तव्यम् ?, **स्वयमेव** = आत्मनैव, **क्षुरिकया** = अस्त्रविशेषेण, **हस्तम्** = करम्, **आच्छिद्य** = छेदयित्वा, **तस्य** = छेदस्य, **कारणम्** = हेतुम्, **पृच्छसि** = तस्मिन् विषये ज्ञातुं वाञ्छसि ?

४ **गन्धर्वराजः** - **तावत्**, इति वाक्यालङ्कारे । **शयितुम्** = स्वपितुम्, **गच्छ** = याहि।

५ **विदूषकः** - **भवते** = तुभ्यम्, **स्वस्ति** = कल्याणम्, **अस्तु** = भवतु ।

६ **गन्धर्वराजः** - **सखे** = मित्र ! **माढव्य** = विदूषक! **तावत्** इति वाक्यालङ्कारे । **तिष्ठ** = तत्रैव निवस । **वानरस्य** = कपेः **चपलत्वम्** = चाञ्चल्यम् **जहि** = त्यज। **त्वम्** = भवान्, **कपिः** = वानरः, **न** = नहि, अपि तु **विदूषकः**, असि । **वानरः**= कपिरपि, **इदानीम्** = अधुना, **समुद्रम्** = सागरम्, **तितीर्षतीति तितीर्षुः** = तर्तुमिच्छुः, **लङ्कोन्मुखः** = लङ्काप्राप्तिकृतकौतुकः, **जिगमिषति** = यातुमिच्छति । **तत्** =

द्रष्टुं वयं गच्छामः, तद्भवता तत्र गन्तव्यम् ।

७ **विदूषकः** – तुए ण कदावि मक्कडाणं चवेडप्पहारो अणुभूदो ता तुअं वाणलाणं खेलिदं दिट्ठुं उच्छुओसि । [*त्वया न कदापि मर्कटानां चपेटप्रहारोऽनुभूतस्ततस्त्वं वानराणां खेलितं द्रष्टुमुत्सुकोऽसि ।*]

८ **गन्धर्वराजः** – भो महाब्राह्मण, दृष्टं ते ब्रह्मवर्चसम्। न बलं क्षत्रियबलं ब्रह्म-तेजोबलं बलमिति यदुच्यते तदसत्यमनुष्ठितम्। त्वया न भेतव्यम् । यतो न त्वमेकाकी गमिष्यसि । वयं सर्वे गमिष्यामः, भीरवोऽप्सरसोऽपि तत्र गमिष्यन्ति। किं ताभ्यस्त्वं भीरुः । तर्हि तासां वस्त्राभरणकज्जलादिकं परिधाय त्वमज्जुकेव गच्छ ।

९ **विदूषकः** – (आत्मगतम्) कधं अअं वेस्साणाअओ गन्दुं जेव्व अहिलसेदि,

---

तस्मात् **कौतुकम्** = कुतूहलम्, **द्रष्टुम्** = विलोकयितुम्, **वयम्** = अत्रोपस्थिताः सर्वे, **गच्छामः** = यामः । **तत्** = तस्माद्, **भवता** = त्वया, **तत्र** = समुद्रमार्गे, कुतूहलस्य प्रदर्शनायेति शेषः । **गन्तव्यम्** = यातव्यम् ।

७ **विदूषकः** - **त्वया** = भवता, **कदापि** = कस्मिंश्चिदपि काले, **मर्कटानाम्** = कपीनाम्, **चपेटस्य** = प्रहस्तस्य, **प्रहारः** = आघातः, **नानुभूतः** = न विदितः । **ततः**= तस्मात् कारणात्, **वानराणाम्** = कपीनाम्, **खेलितम्** = क्रीडितम्, **द्रष्टुम्**= विलोकयितुम्, **उत्सुकोऽसि** = उद्यतोऽसि ।

८ **गन्धर्वराजः** - **भो महाब्राह्मण** = हे महाविप्र ! **ते** = तव, **ब्रह्मणो वर्चः**, **तत् ब्रह्मवर्चसम्** = ब्रह्मतेजः, **दृष्टम्** = अवलोकितम् । **न वलं क्षत्रियबलं ब्रह्मतेजोबलं बलमिति यत् उच्यते** = कथ्यते **तत् असत्यम्** = मिथ्या, **अनुष्ठितम्** = कृतम् । **तथापि** = तदपि, **त्वया** = भवता, **न भेतव्यम्** = न भीषणीयम् । **यतः** = यस्मात्, **त्वम्** = भवान्, **एकाकी** = एकलः, **न गमिष्यसि** = न यास्यसि । **वयं सर्वे** = निखिलाः, साप्सरसो गन्धर्वा इत्यर्थः । **गमिष्यामः** = यास्यामः । **भीरवः**= भयशीलाः, **अप्सरसोऽपि** = रम्भाद्याः स्त्रियोऽपि, **तत्र** = तस्मिन् समुद्रमार्गे, **गमिष्यन्ति** = यास्यन्ति । **त्वम्** = भवान्, **ताभ्यः** = अप्सरोभ्योऽपि, **भीरुः** = त्रस्नुः, त्रस्नौ भीरुभीरुकभीलुका इत्यमरः । **किम्** ? **तर्हि** = तथा सति, **तासाम्**= स्त्रीणाम्, **वस्त्रम्** = शाट्यादि, **आभरणम्** = कङ्कणादिभूषणम्, **कज्जलम्** = नेत्ररञ्जनद्रव्यम्, तदादिकम् स्त्रीणां परिधानाय समुचितं वस्तु, **परिधाय** = धारयित्वा, **त्वम्** = भवान्, **अज्जुका इव** = गणिका इव, **गच्छ** = याहि ।

९ **विदूषकः** - (**आत्मगतम्** = सर्वश्राव्यं यथा न भवति तथा), **अयम्** = एषः,

पदेदु दावदाणिं मक्कडमुहे । (प्रकाशम्) मा एवं मं वाणलभीरुअं अवगच्छ। सज्जो ह्मि गन्दुम् [*कथमयं वेश्यानायको गन्तुमेवाभिलषति । पततु तावदिदानीं मर्कटमुखे । (प्रकाशम्) मैवं मां वानरभीरुकमवगच्छ, सज्जोऽस्मि गन्तुम्।*]

१० **गन्धर्वराजः** – एवं चेद्दौवारिकं ब्रूहि–ममामात्यो हूहूराहूयानीयतामिति ।

११ **विदूषकः** – तह । [*तथा*]

(इति निष्क्रम्य दौवारिकामात्याभ्यां सह प्रविश्य ।)

इदो इदो भवन्तौ । भट्टारओ एसो वट्टइ । अज्ज, एसो दौआरिओ अमच्चोवि । [*इत इतो भवन्तौ । भट्टारक एष वर्तते । आर्य, एष दौवारिक अमात्योऽपि ।*]

(अमात्यो दौवारिकश्च प्रणाममभिनयतः । एषोऽस्मि देव ! आज्ञापयतु, इति समुपस्थितः)

१२ **गन्धर्वराजः** – स्वागतं ते सचिव !

१३ **हूहूः** – भट्टारकप्रभावात्सर्वदा शिवं मेऽस्ति । आज्ञापयतु देवः । किं

वेश्यानायकः = गणिकानायकः (गर्हायाम्), **गन्तुम्** = यातुमेव, **अभिलषति** = वाञ्छति । **इदानीम्** = अधुना, **मर्कटस्य** = वानरस्य, **मुखे** = वदने, तदग्रे, **वा पततु** = निपततु, (**प्रकाशम्** = सर्वश्राव्यं यथा स्यात्तथा), **माम्** = विदूषकम्, **वानरात्** = मर्कटादपि, **भीरुकम्**= भीलुकम्, **मा अवगच्छ** = न विद्धि । **गन्तुम्**= यातुम्, **सज्जोऽस्मि** = उद्यतोऽस्मि ।

१० **गन्धर्वराजः** – **एवञ्चेत्** = यदि गन्तुमुद्यतोऽसि, **दौवारिकम्** = द्वारपालम्, **ब्रूहि**= कथय, **मे** = मम, **अमात्यः** = सचिवः, **आहूय** = आकार्य, **आनीयताम्** = आनेय इति ।

११ **विदूषकः** – **भवन्तौ** = युवाम्, **इत इतः** = अनेन मार्गेण, गच्छतम् । **एषः** = अयम्, **भट्टारकः** = स्वामी वर्तते । **भो आर्य ! एषः** = अयम्, **दौवारिकः** = द्वारपालः, **अमात्य** = मन्त्री च, अत्र वर्तते ।

१२ **गन्धर्वराजः** – **भो सचिव** = हे अमात्य ! **ते** = तव, **स्वागतम्** = शुभागमनम्, अस्तु इति शेषः ।

१३ **हूहूः** – **भट्टारकस्य** = राज्ञो भवतः, **प्रभावात्** = सामर्थ्यात्, **सर्वदा** = सदा, **मे**= मम, **शिवम्** = कल्याणम्, **अस्ति** = विद्यते । **देवः** = गन्धर्वराजः, **कथयतु** = वदतु- **इदानीम्** = अधुना, **मया** = हूहूा, **किमनुष्ठेयम्** = किमस्ति कर्तव्यम् ?

मयानुष्ठेयमिदानीम् ।

१४ **गन्धर्वराजः** – भो अमात्य, अधुना संदिष्टोऽस्मि भगवता मघोना सुरसावानरयोः कुतूहलं दिदृक्षोर्मम तत्र गन्तव्यम् । इदानीमेव गन्धर्वाप्सरोभिः साकमागच्छेति। यतो भवता शीघ्रं तौर्यत्रिकार्हवस्तूनि संपादयितव्यानि । तथा हि –

१५ **गन्धर्वाः सकलाः पृथक् पृथगिमे सप्तस्वरेषु क्रमा-**
दानद्धं शुषिरं ततं घनमरं संयोजयन्तु स्वयम् ।
सन्धानं वितरन्तु तेऽद्य विविधं मन्द्रस्य तारस्य वा
स्वभ्यस्यन्तु तथाऽप्सरोवरगणास्तौर्यत्रिकं सत्वरम् ।।१।।

---

१४ **गन्धर्वराजः** – **भो अमात्य** = हे सचिव ! **अधुना** = इदानीम्, **भगवता** = ऐश्वर्यवता, **मघोना** = इन्द्रेण, **सन्दिष्टः** = प्राप्तसन्देशः अस्मि यत् **सुरसा च वानरश्च तयोः सुरसावानरयोः** = नागजननीहनुमतोः, **कुतूहलम्** = कौतुकम्, **दिदृक्षोः** = द्रष्टुमिच्छोः, **मम** = वासवस्य, **तत्र** = सुरसाहनुमतोः संगमस्थले,, **गन्तव्यम्** = यातव्यम् । **इदानीम्** = अधुनैव, **गन्धर्वाः, अप्सरसश्च, ताभिः गन्धर्वाप्सोभिः सह** = साकम्, **आगच्छ** = एहि, इति । **यतः** = यस्मात् कारणात्, **भगवता** = त्वया, **शीघ्रम्** = द्रुतम्, **तौर्यत्रिकम्** = नृत्यगीतवाद्यम्, **तदर्हाणि** = तदुपयोगीनि, **वस्तूनि** = सामग्र्यः, **संपादयितव्यानि** = रचयितव्यानि ।

१५ अत्र गन्धर्वराजः, मघोनो विनोदायावश्यकानि तौर्यत्रिकसाधनानि संपादयितुं गन्धर्वान् निर्दिशति– **गन्धर्वेति** ।

अन्वयः – इमे सकलाः गन्धर्वाः पृथक् पृथक् सप्तस्वरेषु क्रमात् आनद्धम् ततम् घनम् च स्वयम् अरम् संयोजयन्तु । ते अद्य मन्द्रस्य वा तारस्य विविधम् सन्धानं वितरन्तु । तथा अप्सरोवरगणाः सत्वरं तौर्यत्रिकं स्वभ्यस्यन्तु ।

व्याख्या – **इमे** = एते, पुरो दृश्यमानाः, इत्यर्थः । **सकलाः** = समग्राः, **गन्धर्वाः** = देवयोनिविशेषाः, **पृथक् पृथक्** = प्रत्येकम्, **सप्त च ते स्वराः सप्तस्वराः** = निषादर्षभादयः, **तेषु क्रमात्** = क्रमेण, **आनह्यते** = मुखे चर्मणा बध्यते, **इति आनद्धम्** = मुरजादिकम्, **आनद्धं मुरजादिकमित्यमरः** । **शुषिः** = छिद्रम्, **अस्यास्तीति शुषिरम्** = वंशादिकम्, **ततम्** = ततादिचतुर्विधम्, **घनम्**= कास्यतालादिकञ्च, **स्वयम्** = आत्मनैव, **अरम्** = शीघ्रम्, **संयोजयन्तु** = संयोजनं कुर्वन्तु । **ते** = गन्धर्वाः, **अद्य** = अस्मिन् दिने, **मन्द्रस्य** = गम्भीरस्य, **तारस्य** = उच्चस्य च, स्वरस्य **सन्धानम्** = अभ्यासम्, **वितरन्तु** = कुर्वन्तु । **तथा** = तेनैव प्रकारेण, **अप्सरसाम्** = स्वर्गणिकानाम्, **गणाः** = समूहाः, **सत्वरम्** = शीघ्रम्,

अपि च -

१६ वीणां प्रवालसहितां च नयन्तु यक्तां
कोलम्बकेन ककुभेन निबन्धनेन ।
ढक्का मृदङ्गशुषिरौ परिवादिनी च
तौर्यत्रिकार्थमुपयान्तु समं विमानैः ।।२।।

१७ अमात्यः - यदाज्ञापयति देवः।(इति निष्क्रम्य गन्धर्वाप्रोभिः सहितः पुनः प्रविशति)

१८ हूहूः- भट्टारक! यथोदितं ते मयानुष्ठितम् । तदाज्ञापयतु माम् । किं मयातः

तौर्यत्रिकम् = नृत्यगीतवाद्यम्, स्वभ्यस्यन्तु = सम्यगभ्यासं कुर्वन्तु। अनुप्रासालङ्कारः। शार्दूलविक्रीडतं छन्दः ।

१६ अत्रापि गन्धर्वराजः गन्धर्वानेव तौयत्रिकसाधनानि सम्पादयितुं निर्दिशति- वीणामिति।

अन्वयः - कोलम्बकेन ककुभेन निबन्धनेन च युक्ताम् प्रवालसहिताम् वीणाम् नयन्तु । ढक्का मृदङ्गशुषिरौ परिवादिनी च तौर्यत्रिकार्थम् विमानैः समम् उपयातु

व्याख्या- कोलम्बकेन = तन्त्रीहीनवीणया, कोलम्बकस्तु कायोऽस्याः, इत्यमरः । ककुभेन = वीणादण्डाधःस्थितेन शब्दगाम्भीयार्थं चर्मावनद्धदारुमयभाण्डेन, वीणाप्रान्तस्थवक्रकाष्ठविशेषेण वा, ककुभस्तु प्रसेवकः इत्यमरः, निबन्धनेन च = यत्र तन्त्र्यो निबध्यन्ते तस्योर्ध्वभागेन च, उपनाहो निबन्धनमित्यमरः । युक्ताम् = सहिताम्, प्रवालेन = वीणादण्डेन, वीणादण्डः प्रवालः स्यादित्यमरः। सहिताम् = युक्ताम्, वीणाम् = वल्लकीम्, वीणा तु वल्लकी, विपञ्चीत्यमरः। नयन्तु = नीत्वा गच्छन्तु । ढक्का = यशःपटहः, मृदङ्गश्च शुषिरश्च मृदङ्गशुषिरौ= मुरजवेणुविशेषौ, परिवदति स्वरानिति, परिवादिनी = सप्तभिः तन्त्रीभिः समन्विता वीणा च, त्रयोंऽशा यस्येति त्रिकम् तौर्योपलक्षितं त्रिकम् तौर्यत्रिकम् = नृत्यगीतवाद्यम्, तदर्थम् = तत्प्रयोजनाय, विमानैः = व्योमयानैः, सह = साकम्, उपयान्तु = गच्छन्तु ।

सरलार्थः - भो गन्धर्वाः यूयं कोलम्भक-ककुभ-निबन्धन-प्रवालैः सहितां वीणाम्, ढक्काम्, मृदङ्गम् शुषिरम्, परिवादिनीञ्च गृहीत्वा विमानमारुह्य तौर्यत्रिकार्थं गच्छन्तु, इति ।

अत्र, अनुप्रासालङ्कारः । वसन्ततिलकावृत्तम् ।

१७ अमात्यः - देवः = भवान्, यद् आज्ञापयति = आदिशति, तत्करोमीत्यर्थः ।

१८ हूहूः - भो भट्टारकः = हे राजन्, ते = त्वया, यथा = येन प्रकारेण, उदितम् =

कर्तव्यम् ।

१९ **गन्धर्वराजः** – तौर्यत्रिकविधानमवसितं चेद्वयं व्योमयानमारुह्य विहायसा गच्छाम ।

२० **अमात्यः** – यदाज्ञापयति भवान् । (इति व्योमयानोत्थापनं नाटयति)

२१ **गन्धर्वराजः** – न यावद्भगवान् पाकशासनः समायाति वयं तावदिहैव वृक्षच्छायापिहिते पर्वतशिखरे विमानं पातयित्वाऽप्सरसां गीतवाद्यसंलापादिश्रवणेन वा तासां ललितविभ्रमदर्शनेनात्मानं विनोदयाम ।

अमात्यः – यदाज्ञापयति देवः (इति विमानं पातयति ।)

२२ **अप्सरसः** – अह्मो ! कधं रमणीअदा अस्स पव्वदसिहरस्य । [*अहो कथं रमणीयताऽस्य पर्वतशिखरस्य ।*] (इति सर्वा उपविशन्ति)

२३ **उर्वशी** – हला पिअसहिओ, अत्थि वो वाणलकुदूहलं पेक्खिदुं अहिलासो ।

कथितम्, **मया** = हूह्वा, **अनुष्ठितम्** = विहितम् । **तत्** = तस्मात्, **माम्** = हूहूम्, **आज्ञापयतु** = आदिशतु । **अतः** = अस्मात्परम्, **मया** = हूह्वा, **कर्तव्यम्** = विधेयम्, **किमस्ति** = किं वर्तते ?

१९ **गन्धर्वराजः** – **तौर्यत्रिकस्य** = नृत्यगीतवाद्यस्य, **विधानम्** = विधिः, **अवसितम्**= समाप्तश्चेत्, **वयम्** = साप्सरसो गन्धर्वाः, **विमानम्** = व्योमयानम्, **आरुह्य** = आरोहणं विधाय, **विहायसा** = आकाशमार्गेण, **गच्छाम** = याम ।

२० **अमात्यः** – **भवान्** = त्वम्, **यद् आज्ञापयति** = निर्दिशति, तत्करोमीत्यर्थः ।

२१ **गन्धर्वराजः** – **यावत्** = यत्कालावधि, **भगवान्** = ऐश्वर्यशाली, **पाकशासनः** = इन्द्रः, **न समायाति** = नागच्छति, **तावत्** = तत्समयावधि, **इहैव** = अस्मिन्नेव स्थाने, **वृक्षाणाम्** = तरूणाम्, **छायया** = अनातपेन, **छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातप** इत्यमरः । **पिहिते** = छादिते, **पर्वतशिखरे** = शैलोच्चये, **विमानम्** = व्योमयानम्, **पातयित्वा** = अवतार्य, **अप्सरसाम्** = मेनकोर्वश्यादीनाम्, **गीतञ्च वाद्यञ्च संलापश्च तेषाम्, गीतवाद्यसंलापानाम्** = गायन-वादन-संवादादीनाम्, अत्रादिपदेन नृत्यस्यापि ग्रहणम् । **श्रवणेन** = आकर्णनेन, **वा** = अथवा, **तासाम्** = अप्सरसाम्, **ललितः** = हृदयावर्जकः, **यो विलासः** = विव्रोकः, **तस्य दर्शनेन** = विलोकनेन, **आत्मानम्** = स्वम्, **विनोदयाम** = विनोदं करवाम।

२२ **अप्सरसः** – **अस्य** = एतस्य, **पर्वतस्य शिखरन्तस्य पर्वतशिखरस्य** = अद्रिशृङ्गस्य, **रमणीयस्य भावः रमणीयता** = सौन्दर्यम्, **अहो कथम्** = आश्चर्यजनकम् ।

२३ **उर्वशी** – **हला** = भोः, **हण्डे हञ्जे हलाह्वाने**, इत्यमरः । **प्रियाश्चेमाः सख्यः**

[*हला प्रियसख्यः ! अस्ति वो वानरकुतूहलं प्रेक्षितुमभिलाषः ?*]

२४ **रम्भा** - णत्थि मे दुव्विणीदेण मक्कडेण खेलिदुं अहिलासो । [*नास्ति मे दुर्विनीतेन मर्कटेन खेलितुमभिलाषः ।*]

२५ **मेनका** - हंजे किं त्ति एव्वं भणेसि । [*हंजे किमित्येवं भणसि ।*]

२६ **रम्भा** - सुणुहि पिअसहि मेणए ! अअं मक्कडो दसमुहादोवि दुव्विणीदो भवे। [*शृणु प्रियसखि मेनके ! अयं मर्कटो दशमुखादपि दुर्विनीतो भवेत्।*]

२७ **उर्वशी** - सहि मेणए ! सच्चं भणेदि मे पिअवअस्सा रंहा । कुदो त्ति पूव्वं तस्स रावणस्स हत्थाभ्भासं उवगदाओ अह्मे कधं पज्जाउलाह्म । ता किं विह्मरिदात्थ। [*सखि मेनके ! सत्यं भणति मे प्रियवयस्या रम्भा। कुत इति पूर्वं तस्य रावणस्य हस्ताभ्यासमुपगता वयं कथं पर्याकुलाः स्म ? तत्किं विस्मृताः स्थ ।*]

२८ **गन्धर्वराजः** (जनान्तिकम्) भो अमात्य! श्रुता भवता रावणकरशिथिली-

---

प्रियसख्यः = स्नेहभाज आल्यः! **वानराणाम्** = कपीनाम्, **कुतूहलम्** = कौतुकोत्पादकक्रीडनकम्, **प्रेक्षितुम्** = विलोकयितुम्, **वः** = युष्माकम् रम्भादीनामित्यर्थः । **अभिलाषः** = इच्छाऽस्ति किमित्याशयः ।

२४ **रम्भा - दुर्विनीतेन** = दुष्टेन, **मर्कटेन** = वानरेण, **खेलितुम्** = क्रीडितुम्, **मे** = मम, **अभिलाषः** = इच्छा, **नास्ति** = न विद्यते ।

२५ **मेनका - हञ्जे** = भोः, **किम्** = किमर्थम्, **एवम्** = इत्थम्, **भणसि** = कथयसि?

२६ **रम्भा - भो प्रियसखि** = प्रियालि मेनके! **शृणु** = आकर्णय, **अयम्** = एषः, **मर्कटः** = वानरः, **दशमुखात्** = रावणात् अपि, **दुर्विनीतः** = दुष्टः, **भवेत्** = स्यात्।

२७ **उर्वशी - सखि मेनके ! प्रियवयस्या** = प्रियाली रम्भा, **मे** = मह्यम्, **सत्यम्** = तथ्यम्, **वदति**= कथयति । **कुतः** = कस्मादिति, **पूर्वम्** = प्राक्, **तस्य** = दुर्विनीतस्य, **रावणस्य** = दशवदनस्य, **हस्ताभ्यासम्** = कुचमर्दनादिकम्, **उपगताः** = प्राप्ताः, **वयम्**= अप्सरसः, **कथम्**= केन प्रकारेण, **पर्याकुलाः** = व्याकुलाः स्मः । **तत्**= तादृशम्, **कृत्यम्** = कार्यम्, **किम्** = कथम्, **विस्मृताः स्थ** = विस्मरथ इत्याशयः।

२८ **गन्धर्वराजः** - (**जनान्तिकम्** = सर्वश्राव्यं यथा स्यात्तथा) **भो अमात्य** = हे सचिव! **भवता** = त्वया, **रावणस्य** = दशवदनस्य, **करैः** = हस्तैः, **शिथिलीकृताः**= शैथिल्यमापादिताः, **अवयवाः** = अङ्गानि, **यासां तासाम्, आसाम्** = अप्सरसाम्, **दुःखस्य** = पीडायाः, **स्मरणम्** = स्मृतिः, **यत्र तथाभूता आलापाः** = संवादाः,

कृतगात्रावयवानामासां दुःखस्मरणालापाः । तस्माद्यथैता रावणभियेव हनुमतो न बिभेयुस्तथेमाः सान्त्वयाव ।

२९ **अमात्यः** - यथोचितमुक्तं भट्टारकेण ।

३० **गन्धर्वराजः** - (प्रकाशम्) अयि भीरवोऽप्सरसः ! समाश्वसित, समाश्वसित। मैवं वानरं रावणसदृशं दुर्विनीतं वा काममोहितं यूयमवगच्छत । जात्या वानरोऽपि ब्रह्मचर्यधर्मनिष्ठोऽयं लाङ्गूलेनापि स्त्रीजातिं न कदापि स्पृशति । जितेन्द्रियं वानरं जानीत न दशमुखवत्कामातुरम् । तस्य दुर्विनीतस्येव मुखकराद्यवयवैः प्रसभं युष्माकं शरीरावयवलावण्यरसोपादानमस्य ब्रह्मचारिणः कुतः संभाव्यते। (श्रुत्वा सर्वाः परस्परं विलोकयन्त्यो लज्जां नाटयन्ति)

श्रुताः = आकर्णिताः ? **तस्मात्** = तस्य हेतोः, **यथा** = येन प्रकारेण, **रावणात् इव** = दशवदनात् इव, **हनुमतः** = आञ्जनेयात्, **न बिभेयुः** = भीतिं न लभेरन्, **तथा** = तेन प्रकारेण, **इमाः** = अप्सरसः, **सान्त्वयाव** = आश्वस्ताः करवाव ।

२९ **अमात्यः - भट्टारकेण** = अत्र भवता राज्ञा, **यथोचितम्** = समुचितमेव, **उक्तम्** = कथितम् ।

३० **गन्धर्वराजः - (प्रकाशम्**= सर्वश्राव्यं यथा स्यात्तथा) **अये भीरवः** = भो भीलुकाः, **अप्सरसः** = स्वर्गाङ्गनाः ! **समाश्वसित** = आश्वस्ता भवत, **समाश्वसित** = आश्वस्ता भवत । **यूयम्** = भवत्यः, **एवम्** = पूर्वोक्तम्, **वानरम्** = कपिम्, **रावणेन** = दशमुखेन, **सदृशम्** = तुल्यम्, **दुर्विनीतम्** = दुष्टम्, **वा** = अथवा, **कामेन** = मदनावस्थया, **मोहितम्** = मोहमापन्नम्, **मा अवगच्छत** = न जानीध्वम्, **जात्या**= जन्मना, **वानरः** = कपिः, अपि, **ब्रह्मचर्यधर्मे** = ब्रह्मचर्यव्रतपालने, **निष्ठा** = स्थितिर्यस्य सः, **अयम्** = एषः कपिः, **स्त्रीजातिम्** = नारीवर्गम्, **कदापि** = कस्मिन्नपि समये, **लाङ्गूलेन** = पुच्छेनापि, **न स्पृशति** = स्पर्शं न करोति, **का कथा** कुचमर्दनादेरित्याशयः । **जितानि इन्द्रियाणि येन सः, तम्, जितेन्द्रियम्**= इन्द्रियविजयिनम्, **वानरम्** = कपिम्, **दशमुखवत्** = रावणवत्, **कामेन** = मदनावस्थया, **आतुरम्** = व्याकुलम्, **न जानीध्वम्** = न वित्त । **दुर्विनीतस्य** = दुष्टस्य, **तस्येव** = रावणस्येव, **ब्रह्मचारिणः** = धृतब्रह्मचर्यस्य, **अस्य** = हनुमतः, **मुखञ्च करौ च मुखकरम्**, प्राण्यङ्गत्वात्समाहार एकवद्भावः । **मुखकरम् आदि च ते अवयवास्तैः मुखकराद्यवयवैः** = वदनाद्यङ्गैः, **प्रसभम्** = हठात्, **युष्माकम्**= अप्सरसाम्, **शरीराणाम्**= देहानाम्, **ये अवयवाः** = अङ्गानि, **तेषाम् यद् लावण्यम्**= सौन्दर्यम्, **तस्य यो रसः** = आस्वादः, **तस्य उपादानम्**= ग्रहणम्, **कुतः**= कथम्, **संभाव्यते** = सञ्जायते ?

३१ **उर्वशी** – (स्मितं कृत्वा, कटाक्षपातेन गन्धर्वराजं निरीक्ष्य) अये अज्जउत्त। [*अये आर्यपुत्र*] (इति पुनरधोमुखं तिष्ठति)

३२ **गन्धर्वराजः** – अयि चञ्चलाक्षि! किं वक्तुकामाऽसि। कथय कथय।

३३ **उर्वशी** – हिरिआमि दाणिं अज्जउत्तेण सह संलवितुम्। [*जिह्रेमीदानीमार्यपुत्रेण सह संलपितुम्।*]

३४ **गन्धर्वराजः** – ज्ञातः स्वर्वेश्यायास्तव चेष्टयाऽभिप्रायो मया। नातःपरं किमपि वक्ष्ये।

(श्रुत्वा)

३५ **सर्वाः** – अह्यो! अह्यो! अह्यो! कधं अज्जेण अणज्जं भणिदम्। [*अहो! अहो! अहो! कथमार्येणानार्यं भणितम्।*] (इति मुखं परिवर्तयन्त्यो विभ्रमन्ति)

३६ **गन्धर्वराजः** – (जनान्तिकम्) अमात्य! दृश्यन्तामिदानीमासां स्वर्वेश्यानां सुललिता हावाः। तथा हि –

---

३१ **उर्वशी** – (**स्मितम्** = मन्दहास्यम्, **कृत्वा** = विधाय। **कटाक्षपातेन** = अपाङ्ग-प्रदर्शनेन, **गन्धर्वराजम्** = गन्धर्वनृपतिम्, **निरीक्ष्य** = विलोक्य) **अये** = भो आर्यपुत्रः! (**इति अधोमुखम्** = निम्नाननम्, **यथा स्यात् तथा तिष्ठति**)

३२ **गन्धर्वराजः** – **अयि चञ्चलाक्षि** = चपलनयने! **किं वक्तुं कामः** = अभिलाषो **यस्याः सा, तथाविधा असि ? कथय कथय** = वद (वीप्सायां द्वित्वम्)।

३३ **उर्वशी** – **इदानीम्** = अधुना, **आर्यपुत्रेण** = श्रीमता, गन्धर्वराजेन, **सह** = साकम्, **संलपितुम्** = संवदितुम्, **जिह्रेमि** = त्रपे।

३४ **गन्धर्वराजः** – **मया** = गन्धर्वराजेन, **चेष्टया** = त्वत्क्रियाकलापेन, **स्वर्वेश्यायाः**= स्वर्गणिकायाः, **तव** = उर्वश्याः, **अभिप्रायः** = आशयः, **ज्ञातः** = विदितः। **अतः परम्** = अनन्तरम्, **किमपि** = किञ्चिदपि, **न वक्ष्ये** = न कथयिष्यामि।

३५ **सर्वाः** – **अहो, अहो, अहो** = आश्चर्यबोधकानीमानि पदानि। **आर्येण** = गन्धर्वराजेन, **अनार्यम्** = आर्यविपरीतम्, अनुचितमित्यर्थः। **कथम्** = कस्मात्, **भणितम्** = निगदितम्। (**इति** = इत्थम्, **मुखम्** = वदनम्, **परिवर्तयन्त्यः विभ्रमन्ति** = विलासं प्रकटयन्ति)।

३६ **गन्धर्वराजः** – **अमात्य** = भो सचिव! **इदानीम्** = अधुना, **आसाम्** = एतासाम्, **स्वर्वेश्यानाम्** = अप्सरसाम्, **सुललिताः** = मनोहराः, **हावाः** = शृङ्गारभावजाः क्रियाः, **दृश्यन्ताम्** = विलोक्यन्ताम्। **तथा हि** = यतः।

३७ हसति सममियं चिरं सखीभ्यामियमुरसश्छदनं ददाति चैलम् ।
इयमतितरसा सखीदुकूलं कृषति तथा पततीव लीलयेयम् ।।३।।

(प्रकाशम्)

३८ अयि लोलायताक्ष्यौ रम्भामेनके ! शृणुतं मम वचनं युवाम् ।

३९ उभे - अज्ज, अवहिदा अह्मो । अण्णेवदु अज्जो । [*आर्य, अवहिता वयम्। आज्ञापयत्वार्यः ।*]

४० गन्धर्वराजः - युवयोः सखीयमुर्वशी किमद्य चिरादलब्धसुरा ?

४१ रम्भा - अज्ज ! पीदा एदए सुरा । [*आर्य ! पीतैतया सुरा ।*]

---

३७ अत्र गन्धर्वराजोऽमात्यं संबोध्याप्सरसां हावान् वर्णयति - **हसतीति**

अन्वयः - इयम् समम् चिरम् हसति । इयम् उरसः छदनम् चैलम् ददाति। इयम् अतितरसा सखीदुकूलम् कृषति । तथा इयम् लीलया पतति इव ।

व्याख्या- इयम्= एषा, **समम्** = भूयोभूयः, **चिरम्** = बहुकालम्, **हसति**= हास्यं विदधाति । **इयम्** = एषा, **उरसः** = वक्षस्थलस्य, **छदनम्** = आच्छादकम्, छद् + ल्युट् । **चैलम्** = वस्त्रम्, **वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकमित्यमरः।** **सखीभ्याम्**= सहचरीभ्याम्, **ददाति**= प्रयच्छति। **इयम्** = एषा, **सख्याः** = सहचर्याः, **दुकूलम्** = क्षौमवस्त्रम्, **अतितरसा** = द्रुतम्, **कृषति**= कर्षणं विदधाति । **तथा** = तेनैव प्रकारेण, **इयम्** = एषा, **लीलया** = प्रियतमानुकृत्या **पतति** = स्खलति इव।

सरलार्थः - भो अमात्य ! इयमुर्वशी, बहुकालं हसति । इयं मेनका स्तनयोराच्छादकं वस्त्रं सखीभ्याम् प्रयच्छति । इयं रम्भा सख्या दुकूलं जवेन कृषति । इयम् तिलोत्तमा च लीलया स्खलतीव दृश्यते, इति ।

अत्र स्वभावोक्ति-क्रियोत्प्रेक्षयोः **संसृष्टिरलङ्कारः** । **गीतिवृत्तम्** ।

३८ (**प्रकाशम्** = सर्वश्राव्यम्) **लोले** = चञ्चले, **आयते** = विस्तृते च, **अक्षिणी** = नयने **ययोस्ते, तत्संबुद्धौ, रम्भा च मेनका च ते रम्भामेनके! युवाम्, मम** = गन्धर्वराजस्य, **वचनं** = वाक्यम्, **शृणुतम्** = आकर्णयतम् ।

३९ **उभे - आर्य! वयम्** = अप्सरसः, **अवहिताः** = दत्तावधानाः, **स्मः** । **आर्य! आज्ञापयतु** = आदिशतु

४० **गन्धर्वराजः - युवयोः** = रम्भामेनकयोः, **सखी** = सहचरी, **इयम्** = एषा उर्वशी, **किम्** = किमर्थम्, **अद्य** = अस्मिन् दिने, **चिरात्** = बहुकालात्, **न लब्धा सुरा ययया सा अलब्धसुरा** = अपीतमदिरा वर्तते ?

४१ **रम्भा - भो आर्य! एतया** = उर्वश्या, **सुरा** = मदिरा, **पीता** = पानं कृतवती ।

४२ **मेनका** - (सत्वरमुपसृत्य) हला सहि रंहे ! उजुबुद्धिए तुए णावगदो अज्जस्स भाओ। अवेहि दाव । हग्गे तुमं पउढचरिदं सिक्खिस्सम् । [*हला सखि रम्भे! ऋजुबुद्ध्या त्वया नावगत आर्यस्य भावः । अपेहि तावत् । अहं त्वां प्रौढचरितं शिक्षयामि ।*] (इति गन्धर्वराजमुखं निरीक्ष्य पटान्तेन स्वमुखमावृणोति)

४३ **तुम्बुरुः** - अमात्य! किमर्थं भगवतो मघोनो विजयप्रस्थानमत्र ।

४४ **अमात्यः** - सखे तुम्बुरो! न त्वयाऽस्माकं भट्टारकेणोदितं वचः श्रुतम् ।

४५ **गन्धर्वराजः** - अयं नासीत्तदानीम् । सर्वं कथयैनम् ।

४६ **अमात्यः** - यदाज्ञापयति देवः । शृणु हे तुम्बुरो ! अस्ति रामो नाम धर्मात्मा राज्ञो दशरथस्य तनयः ।

४७ **तुम्बुरुः** - श्रूयते तस्योदारकीर्तिः ।

४८ **अमात्यः** - स च पितुर्वचनात्स्वराज्यमपि भ्रात्रे भरताय दत्वा सौमित्रिणा

---

४२ **मेनका** - (**सत्वरम्** = शीघ्रम्, **उपसृत्य** = समीपं गत्वा) **हला** = भोः, **सखि** = सहचरि रम्भे! **ऋजुबुद्ध्या** = सरलमत्या, **त्वया** = उर्वश्या, **आर्यस्य** = गन्धर्वराजस्य, **भावः** = आशयः, **न अवगतः** = न ज्ञातः । **तावत् अपेहि** = अपगच्छ। **अहम्** = मेनका, **त्वाम्** = भवतीम्, **प्रौढचरितम्** = वयस्कचरित्रम्, **शिक्षयामि**= उपदिशामि (**इति** = इत्थं, **गन्धर्वराजस्य मुखं** = वदनम्, **निरीक्ष्य** = विलोक्य, **पटान्तेन** = वस्त्रप्रान्तेन, **स्वमुखम्** = निजवदनम्, **आवृणोति** = छादयति ।)

४३ **तुम्वुरुः** - **भो अमात्य** = हे सचिव! **किमर्थम्** = कस्मै प्रयोजनाय, **मघोनः** = इन्द्रस्य, **अत्र** = अस्मिन् स्थाने, **प्रस्थानम्** = प्रयाणम् अस्तीति शेषः ।

४४ **अमात्यः** - **सखे तुम्बुरो** = भो मित्र! **त्वया** = तुम्बुरुणा, **अस्माकं भट्टारकेण** = गन्धर्वराजेन, **उदितम्** = कथितम्, **वचः** = वचनम्, **न श्रुतम्** = नाकर्णितम् ?

४५ **गन्धर्वराजः** - **अयम्** = तुम्बुरुः, **तदानीम्** = तस्मिन् समये, **नासीत्** = उपस्थितो नाभवत्, अतः **एनम्** = तुम्बुरुम्, **सर्वम्** = निखिलवृतान्तम्, **कथय** = वद ।

४६ **अमात्यः** - **देवः** = भवान्, **यत् आज्ञापयति** = निर्दिशति । तत्करोमीत्यर्थः । **हे तुम्बुरो! शृणु** = आकर्णय, **धर्म एव आत्मा यस्य सः**, **धर्मात्मा** = धर्मप्राणः **'राम' इति नामा राज्ञः** = नृपतेः, **दशरथस्य तनयः** = सुतः, अस्ति ।

४७ **तुम्बुरुः** - **तस्य** = नृपतेः, **उदारा चासौ कीर्तिः उदारकीर्तिः** = विस्तृतयशः, **श्रूयते** = आकर्ण्यते ।

४८ **अमात्यः** - **स च** = रामश्च, **पितुः** = जनकस्य, **वचनात्** = आदेशात्, **स्वम्** = स्वकीयम्, **राज्यम्** = आधिपत्यम्, **भ्रात्रे** = स्वानुजाय भरताय, कैकेयीनन्दनाय.

सीतया च साकं दण्डकारण्यमागतः ।

४९ **तुम्बुरुः** - ततस्ततः ।

५० **अमात्यः** - तत्र दुरात्मना रावणेन रक्षसा रामलक्ष्मणयोः परोक्षे सच्छलं सीता हृत्वा लङ्कां नीता ।

५१ **तुम्बुरुः** - आः कथमयं क्रूरो राक्षसः । अनुभूता तस्य दुरात्मनो बाधास्माभिः। ततस्ततः ।

५२ **अमात्यः** - सुग्रीवसाहाय्येन रामेण सीतान्वेषणार्थं कतिचिद् वानराः प्रेषिताः। तेषामेको वानरः सीतामन्वेष्टुं लङ्कां गच्छति । तस्य वीर्यपरीक्षायै देवताभिः सुरसा नाम नागमाता प्रेषिता । तयोः समागमोऽत्र भवति ।

५३ **चित्ररथः** - अमात्य ! रावणो नूनं दुर्विनीतो राक्षसः । एतस्य बाधा सुरासुरैः

दत्वा = समर्प्य, **सुमित्राया अपत्यं पुमान्, सौमित्रिस्तेन सौमित्रिणा** = लक्ष्मणेन, **सीतया** = जानक्या च, **साकम्** = सहैव, **दण्डकारण्यम्** = दण्डकवनम्, **आगतः**= प्राप्तः।

४९ **तुम्बुरुः - ततस्ततः** = तत्पश्चात् किमभूदित्यर्थः ।

५० **अमात्यः - तत्र** = तस्मिन् विषये, **वर्तते यत् - दुष्टः आत्मा यस्य तेन दुरात्मना**= दुष्टेन, **रक्षसा**= क्रव्यादेन, **रावणेन** = दशमुखेन, **अक्ष्णः परम् परोक्षम्** = अप्रत्यक्षम्, **छलेन** = कपटेन **सहितम् यथा स्यात्तथा सच्छलम्** = सव्याजम्, **सीताम्** = जानकीम्, **हृत्वा** = अपहृत्य (सा), **लङ्काम्** = दशमुखनगरीम्, **नीता** = प्रापिता ।

५१ **तुम्बुरुः- आः**= आश्चर्यबोधकोऽयं शब्दः। **अयम्** = एषः, **क्रूरः** = क्रोधनः, **कथं राक्षसः**= कीदृशः क्रव्यादः ? **अस्माभिः** = देवयोनिविशेषैः, **दुरात्मनः** = दुष्टस्य, **तस्य रावणस्य बाधा**= पीडा, **अनुभूता**= ज्ञाता। **ततस्ततः**= तदनु किमजायत?

५२ **अमात्यः - सुग्रीवः सहायो यस्य तेन सुग्रीवसहायेन** = सुग्रीवसहचरेण, **रामेण**= दाशरथिना, **सीतायाः** = जानक्याः, **अन्वेषणार्थम्** = गवेषणाय, **कतिचित्** = केचन, **वानराः** = प्लवङ्गमाः, **प्रेषिताः** = प्रहिताः । **तेषाम्** = प्लवगानाम्, मध्ये **एकः** = अद्वितीयः, **वानरः** = कपिः, **सीताम्** = जानकीम्, **अन्वेष्टुम्** = गवेषयितुम्, **लङ्काम्** = दशवदनपुरम्, **गच्छति** = याति । **तस्य** = वानरस्य, **वीर्यस्य** = पराक्रमस्य, **परीक्षायै** = परीक्षणाय, **देवताभिः** = अमरैः **'सुरसा' इति नाम यस्याः सा, नागमाता** = सर्पजननी, **प्रेषिता** = प्रहिता । **अत्र** = अस्मिन् स्थाने, **तयोः** = सुरसावानरयोः, **समागमः** = मेलनम्, **भवति** = जायते ।

५३ **चित्ररथः - भो अमात्य** = हे सचिव! **रावणः** = दशमुखः, **नूनम्** = निश्चयमेव,

सगन्धर्वाप्सरोभिरनुभूता । तेन रावणेन लङ्कां नीता सीताऽधुना जीवति वा न वा ।

५४ **अमात्यः** - अस्ति ममापि सन्देहः । तथापि -

५५ **पातिव्रत्यं तपोऽस्या जयति सुरगणान्का कथा राक्षसानां**
स्त्रीणां धर्मो न तस्माद्भवति परतरो वाङ्मनःकायवृत्तिः ।
सैषा शप्तेन तेन प्रसभमभिभवे दूरतो वीक्ष्यमाणा
मन्ये रामं स्मरन्ती श्वसिति धृतवपुस्तेन सत्येन सीता ।।४।।

दुर्विनीतः = दुष्टः, **राक्षसः** = निशाचरः, अस्तीति शेषः । **एतस्य** = अस्य रावणस्य, **बाधा** = पीडा, **गन्धर्वाश्च अप्सरसश्च, गन्धर्वाप्सरसः, ताभिः सहितास्तैः सगन्धर्वाप्सोभिः** = सदेवयोनिविशेषैः, **सुराश्च असुराश्च तैः सुरासुरैः** = देवदैत्यैः, **अनुभूता** = विदिता । **तेन** = तथाविधेन, **रावणेन** = दशमुखेन, **लङ्काम्** = रावणपुरीम्, **नीता** = प्रापिता, **सीता** = जानकी, **अधुना** = अस्मिन् समये, **जीवति** = प्रणान् धारयति, **वा** = अथवा, **न** = न जीवति, इति सन्देहः ।

५४ **अमात्यः - मम** = मे, **अपि सन्देहः** = संशयः, **अस्ति** = वर्तते । **तथापि** = तदपि ।

५५ अत्रामात्यः पातिव्रत्येन रावणनीताऽपि सीता जीवतीति प्रतिपादयति- **पातिव्रत्यमिति।**

अन्वयः - अस्याः पातिव्रत्यं तपः सुरगणान् जयति राक्षसानाम् कथा का? तस्मात् परतरः स्त्रीणाम् वाङ्मनःकायवृत्तिः धर्मः न भवति । प्रसभम् अभिभवे शप्तेन तेन दूरतः वीक्ष्यमाणा सा एषा सीता तेन सत्येन धृतवपुः रामम् स्मरन्ती श्वसिति (इति) मन्ये ।

व्याख्या - अस्याः = सीतायाः, **पतिव्रताया इदम् पातिव्रत्यम्** = पतिव्रतासंबन्धि, **तपः** = तपश्चर्या, **सुराणाम् गणास्तान् सुरगणान्** = देवसङ्घान्, **जयति** = अतिशेते । **राक्षसानाम्** = क्रव्यादानाम्, **कथा** = वृतान्तस्तु **का** = मूल्यहीनेत्यर्थः । **तस्मात्** = पातिव्रत्यात्, **परतरः** = अन्यः, **स्त्रीणाम्** = नारीणाम्, **वाक् च मनश्च कायश्च वाङ्मनकायम्, तत्र वर्तते इति वाङ्मनकाय-वृत्तिः**= वचनचित्तशरीरनिष्ठः, **धर्मः** = सुकृतम्, **स्याद् धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृष** इत्यमरः । **न भवति** = नास्ति । **प्रसभम्** अत्यन्तम्, **अभिभवे** = रावणद्वारा सीतायाः तिरस्कारे जाते सति, **शप्तेन** = प्राप्तशापेन, **तेन** = रावणेन, **दूरतः** = विप्रकृष्टाद्, **वीक्ष्यमाणाः** = विलोक्यमाना, **सा** = रावणनीता, **रामम्** = दाशरथिम्, **स्मरन्ती** = चिन्तयन्ती, **एषा** = इयम्, **सीता** = जानकी, **तेन** = पूर्वोक्तेन, **सत्येन** = पतिव्रताधर्मेण, **धृतम्** = रक्षितम्, **वपुः** = शरीरम्, **यया सा तथाभूता,**

५६ **रम्भा** – (गन्धर्वराजं निरीक्ष्य) अज्जस्स अणुग्गहो किं वि विण्णवेदुं मुहरअदि विअ मम् । [*आर्यस्यानुग्रहः किमपि विज्ञापयितुं मुखरयतीव माम्।*]

५७ **गन्धर्वराजः** – अयि रम्भोरु रम्भे ! किं वक्तुकामासि, कथय ।

५८ **रम्भा** – (अधःपश्यन्ती) अह्माणं अत्त भवं भट्टा । अज्झप्पभिदि दे पज्जुवासणं अणुचिट्ठामो । [*अस्माकमत्र भवान् भर्ता । अद्यप्रभृति ते पर्युपासनमनुतिष्ठामः ।*]।

५९ **गन्धर्वराजः** – अपेहि रे गणिके ! आजन्म त्वयाऽसतीवृत्त्या जीवितं क्षपितम्। अतः परं साध्वी भवितुमर्हसि ।

६० **रम्भा** – अह्मो अणज्ज। [*अहो अनार्यः*] (इति सासूयमिव कुटिलभ्रूकटाक्षपातेन तस्य मुखमुद्वीक्षते)

६१ **मेनका** – (सखीगतम्) हला पिअसहि उव्वसि ! मम आवुत्तस्स तुम्बुरुगंहव्वस्स

श्वसिति = प्रणान् धारयति (इति), **मन्ये** = जाने ।

सरलार्थः – यस्याः पातिव्रत्यं देवान् राक्षसाँश्च जयति, प्रसभमभिभवे शप्तेन रावणेन दूरत एव विलोक्यमाना सीता तेन पतिव्रताधर्मेण शरीरं धारयित्वा रामं स्मरन्ती जीविता भवेदिति भन्ये' इति ।

अत्र **क्रियोत्प्रेक्षालङ्कारः** । **स्त्रधरावृत्तम्** ।

५६ **रम्भा** – (गन्धर्वराजं निरीक्ष्य) **आर्यस्य** = श्रीमतः, **अनुग्रहः** = अभ्युपपत्तिः, **अभ्युपपत्तिरनुग्रह** इत्यमरः । **किमपि विज्ञापयितुम्** = निवेदयितुम्, **माम्** = रम्भाम्, **मुखरयति इव** = प्रेरयति इव ।

५७ **गन्धर्वराजः** – **अयि रम्भोरु** = कदलीजघने, हे **रम्भे! किम् वक्तुकामाऽसि** = किं कथयितुमिच्छसि ? **कथय** = वद ।

५८ **रम्भा** – (अधः पश्यन्ती) **अत्र भवान्** = मान्यस्त्वम्, **अस्माकम्** = अप्सरसाम्, **भर्ता** = पतिः, **अद्य प्रभृति** = अस्माद् दिनात्, **वयम्** = अप्सरसः, **ते** = तव, **पर्युपासनम्** = शुश्रूषाम्, **अनुतिष्ठामः** = आचरामः ।

५९ **गन्धर्वराजः** – **भो गणिके** = हे रम्भे! **अपेहि** = दूरं गच्छ । **आजन्म** = जन्मत आरभ्य, **त्वया** = भवत्या, **असत्याः** = कुलटायाः, **वृत्या** = व्यवहारेण, **जीवितम्**= जीवनम्, **क्षपितम्** = यापितम्, **अतः परम्** = अनन्तरम्, **साध्वी** = सती, **भवितुम् अर्हसि** = वाञ्छसि ?

६० **रम्भा** – **अहो अनार्यः** = आर्यचरितशून्यस्त्वमिति भावः। (**इति** = इत्थम्, **असूयया सहितम् सासूयम्** = सेर्ष्यमिव, **कुटिलभ्रूकटाक्षपातेन** = वक्रभ्रुकुट्यपाङ्गपातेन, **तस्य** = गन्धर्वराजस्य, **मुखम्** = वदनम्, **उद्वीक्षते** = विलोकयति ।)

६१ **मेनका** – हला प्रियसखि. उर्वशि! **मम** = मे, **आवुत्तस्य** = भगिनीपतेः,

अणिदं सुणीअ हिअअं मे पूव्वाणुभूदकट्ठस्स ह्मरणादो वेपइ ।
सुउमाराकिदीणवजोव्वणविसिट्ठा सीदा रावणहदकेण णीदा कधं अत्तणो धम्मं
रख्खे त्ति । [*हला प्रियसखि उर्वशि! ममावुत्तस्य तुम्बुरुगन्धर्वस्य भणितं
श्रुत्वा हृदयं मे पूर्वानुभूतकष्टस्य स्मरणाद्वेपते । सुकुमा (रशरी)
राकृतिनवयौवनशिष्टा सीता रावणहतकेन नीता कथामात्मनो धर्मं रक्षेदिति ।*]

६२ **उर्वशी** – सहि मेणए! मम वि ईदिसी मणोबाधा । [*सखि मेनके ! ममापीदृश
मनोबाधा ।*]

६३ **गन्धर्वराजः** – (सत्वरमुपसृत्य) अयि कुरङ्गनयने ! किं मन्त्रयथो युवां रहसि
तन्मां वदतम् ।

६४ **उभे** – अह्मो ! कधं भवं पुरिसो अवत्तपं विहाअ अह्माणं इत्थिआणं एक्कन्त
संलवणं सुणिदुं इच्छदि । ण दे जुत्तम् । ता अवेदु भवम् । [*अहो कथम
भवान् पुरुषोऽपत्रपां विहायास्माकं स्त्रीणामेकान्तसंलपनं श्रोतुमिच्छति ।
तद् युक्तम् । तदपेतु भवान् ।*]

भगिनीपतिरावुत्त इत्यमरः । **तुम्बुरुगन्धर्वस्य** = तुम्बुरुनामकदेवयोनिविशेषस्
भणितम् = कथितम्, **श्रुत्वा** = आकर्ण्य, **मे** = मम, **हृदयम्** = चित्तम्, **पूर्वम्**
प्राक्, **अनुभूतम्** = ज्ञातम्, **यत् कष्टम्** = दुःखम्, **तस्य स्मरणात्** = स्मृते
वेपते = कम्पते । **सुकुमारम्** = सुकोमलम्, **यत् शरीरम्** = देहः, **तस्य आकृतिः**
आकारो, **यस्याः सा, नवं** = नूतनम्, **यद् यौवनम्** = युवावस्था, **तेन विशिष्टा**
युता, **सीता** = जानकी, **रावणहतकेन** = लङ्केशेन दुर्विनीतेन, **नीता** = ल
प्रापिता, **कथम्** = कुतः, **आत्मानम्** = स्वम्, **रक्षेत्** = पायात् ?

६२ **उर्वशी – सखि मेनके! मम** = उर्वश्या अपि, **ईदृशी** = एतादृशी, **एव मनोवाधा**
कष्टानुभूतिः, अस्तीति शेषः ।

६३ **गन्धर्वराजः** – (**सत्वरम्** = शीघ्रम्, **उपसृत्य** = समीपं गत्वा) **अयि कुरङ्गनयने**
मृगनयने! **युवाम्** = मेनकोर्वश्यौ, **रहसि** = एकान्ते, **किम् मन्त्रयथः** = विचारयथ
तत् = विचारम्, **माम्** = गन्धर्वराजम्, **वदतम्** = कथयतम् ।

६४ **उभे – अहो** = आश्चर्यम्, **कथम्**= केन प्रकारेण, **अत्र भवान्** = मान्यः, **पुरुषः**
पुमान् अपि, **त्रपाम्** = लज्जाम्, **विहाय** = त्यक्त्वा, **अस्माकम्** = मेनकोर्वश्यादीना
स्त्रीणाम् = नारीणाम्, **एकान्ते**= रहसि, **जातम्** = सम्पन्नम्, **संलपनम्** = संवाद
श्रोतुम्= आकर्णयितुम्, **इच्छति**= वाञ्छति। **तत्**= एकान्तवार्ताश्रवणम्, **न युक्तम्**
नोचितम् । **तत्** = तस्मात्कारणात्, **भवान्** = त्वम्, **अपेतु** = दूरम् गच्छतु ।

६५ **गन्धर्वराजः** - नाहं युवयो रहस्यसंभाषणमज्ञात्वैव गच्छेयम्,

६६ **उर्वशी** - सहि मेणए, आगच्छ अण्णदो गमिस्साओ [*सखि मेनके ! आगच्छ अन्यतो गमिष्यावः ।*]

(इति उभे किञ्चिद् दूरमपसरतः)

६७ **रम्भा** - हला पिअसहिओ ! चिट्ठध क्खणमत्तम् । अहं अज्जउत्तं कहेमि वो रहस्सभणिदम् । [*हला प्रियसख्यौ ! तिष्ठतं क्षणमात्रम् । अहमार्यपुत्रं कथयामि युवयो रहस्यभणितम् ।*]

६८ **उभे** - (सकोपे इव) आः किं कहेसि णिल्लज्जे, जइ अह्माणां किं पि दुम्मन्तिदं भवे कहेहि णाअअम् । [*आः किं कथयसि निर्लज्जे ! यदि आवयोः किमपि दुर्मन्त्रितमस्ति कथय नायकम् ।*]

६९. **अमात्यः** - देव! मया श्रुतमनयो रावणदुर्विलसितं स्मरन्त्योः संलपनम् । इयं रम्भा साक्षिणी रहस्यश्रवणस्य ।

७०. **रम्भा** - रावणणीदए सीदए कधं पदिव्वदाधम्मो रक्खीअदित्ति इमाहिं कहिदम्।

---

६५ **गन्धर्वराजः** - **अहम्** = गन्धर्वराजः, **युवयोः** = मेनकोर्वश्योः, **रहस्यसंभाषणम्** = गोपनीयसंलपनम्, **अज्ञात्वा** = असंवेद्य, **नैव गच्छेयम्** = नैव व्रजेयम् ।

६६ **उर्वशी** - **सखि मेनके! आगच्छ** = आयाहि, **अन्यतः** = अन्यस्मिन् स्थाने, **गमिष्यावः** = यास्यावः । (**इति** = इत्थमभिधाय, **उभे** = द्वे, **किञ्चिद्** = ईषद्, **दूरम्** = विप्रकृष्टम्, **अपसरतः** = गच्छतः ।)

६७ **रम्भा** - **हला प्रिसख्यौ** = प्रियसहचर्यौ! **क्षणमात्रम्** = किञ्चित्कालम्, **तिष्ठतम्**= निवसतम् । **अहम्** = रम्भा, **आर्यपुत्रम्** = गन्धर्वराजम्, **युवयोः** = मेनकोर्वश्योः, **रहस्यभणितम्** = एकान्तसंलपनम्, **कथयामि** = निवेदयामि ।

६८ उभे - (**सकोपे** = सक्रोधे इव) **आः** = भोः, **निर्गता लज्जा यस्यास्तत्संबद्धौ निर्लज्जे** = निस्त्रपे! **किं कथयसि** = किं वदसि ? **यदि** = चेत्, **आवयोः** = मेनकोर्वश्योः, **किमपि दुर्मन्त्रितम्** = दुष्टं संलपनम्, **अस्ति** = विद्यते, **नायकम्**= गन्धर्वराजम्, **कथय** = वद ।

६९ **देव** = गन्धर्वराज! **रावणस्य**= दशमुखस्य, **दुर्विलसितम्**= दुर्व्यवहारम्, **स्मरन्त्योः**= चिन्तयन्त्योः, **अनयोः**= मेनकोर्वश्योः, **संलपनम्** = संवादः, **श्रुतम्** = आकर्णितम्। **इयम्** = एषा रम्भा, **रहस्यश्रवणस्य** = एकान्ताकर्णनस्य, **साक्षिणी** = प्रमाणभूता।

७० **रम्भा** - रावणेन = लङ्केशेन, **नीतया** = लङ्कां प्रापितया, **सीतया** = जानक्या, **पतिव्रताधर्मः** = सतीत्वम्, **कथम्** = कया रीत्या, **रक्ष्यते** = पाल्यते, **इति** =

[रावणनीतया सीतया कथं पतिव्रताधर्मो रक्ष्यत इतीमाभिः कथितम्]

७१. **गन्धर्वराजः** - अरे रे निर्लज्जे! सा खलु राजकुलोद्भवा पतिव्रता वीरपत्नी न युष्मत्सदृशी परविभवलोलुपा कुलटा। अपि च नलकूबरपन्त्याः शापानन्त हि सा नीता। पूर्वमेव यूयं दशमुखभुक्तयौवनरसाः षट्पदालीढमकरन्द मालतीलता इव प्रतीयध्वे। कुतः

७२ **उर्वश्याः कुचयोर्नखव्रणततिः संदृश्यतेऽद्यावधि**
रम्भाया अपि किञ्चिदोष्ठपुटयोर्दन्तक्षतं वर्तते।
पश्याम्यद्य कपोलयोर्व्रणमहो यन्मेनकायाः स्फुटं
क्रव्यादाः प्रसभं कृतेति किल वो मन्येऽहमाक्षारणा ।।६।

एतत्, **इमाभिः** = आभिः, **कथितम्** = निगदितम्।

७१ **गन्धर्वराजः - अरे रे निर्लज्जे** = निस्त्रपे, रम्भे! **सा** = सीता, **खलु** = निश्चये राजकुले = नृपवंशे, **उद्भवा** = समुत्पन्ना, **पतिव्रता** = साध्वी, **वीरस्य** = शूरस्य **पत्नी**= भार्या, अस्तीति शेषः। **युष्माकम्**= रम्भादीनाम्, **सदृशी**= तुल्या, **परेषाम्** अन्येषाम्, **विभवे** = संपत्तौ, **लोलुपा** = लुब्धा, **कुलटा** = असती, **न**= नास्तीत्यर्थ **अपि च** = अथ च, **नलकूवरस्य** = यक्षपुत्रस्य, **या पत्नी** = भार्या, **तस्य शापानन्तरम्** = अभिशापात् पश्चात्, **हि** = निश्चयेन, **सा** = सीता, **नीता**= लङ् प्रापिता। **पूर्वम्**= प्राक्, **एव दशमुखेन** = रावणेन, **भुक्तः** = उपभुक्तः, **यौवनस्य** युवावस्थायाः, **रसः** = आस्वादः, **यासान्ताः यूयम्** = अप्सरसः, **षट्पदैः** भ्रमरैः, **आलीढः** = आस्वादितः, **मकरन्दः** = पुष्परसो **यासान्तास्तथाभूता मालतीलता इव** = जातिवल्लर्य इव, **सुमना मालती जातिरित्यमरः**। **प्रतीयध्वे** प्रतीतिविषया भवथ। (वाल्मीकिरामायणस्योत्तर-काण्डगता कथात्रानुसन्धेयाः

७२ अत्र गन्धर्वराजोऽप्सरसः प्रति रावणकृतदुर्व्यवहारं वर्णयन् तासां कुलटात्वं निरूपयति **उर्वश्या** इति।

अन्वयः - अद्यावधि उर्वश्याः कुचयोः नखव्रणततिः संदृश्यते। रम्भाया अपि ओष्ठपुटयोः किञ्चिद् दन्तक्षतं वर्तते। अहो अद्य मेनकायाः कपोलयोः यत् व्रण स्फुटं पश्यामि (तत्) क्रव्यादाः वः आक्षारणा प्रसभं कृता इति अहम् मन्ये किल।

व्याख्या - **अद्य अवधिर्यस्मिन् कर्मणि तत्, अद्यावधि** = एतद्दिनपर्यन्त **उर्वश्याः** = तन्नाम्न्याः स्वर्वेश्यायाः, **कुचयोः** = स्तनयोः, **नखक्षतजन्या व्रण नखव्रणास्तेषां ततिः नखव्रणततिः** = नखरक्षतसमूहः, **संदृश्यते** = विलोक्यते **रम्भायाः** = तन्नाम्न्याः स्वर्गणिकायाः, **ओष्ठयोः पुटे, तयोः ओष्ठपुटयोः** रदनच्छदाग्रभागयोः, **किञ्चित्** = ईषत्, **दन्तानाम्** = दशनानाम्, **क्षतम्** = व्रण

अपि च -

७३. दशमुखविजयार्जिताः कुमार्यो
मनुजसुरासुरकिन्नरोरगाणाम् ।
अभिनववयसो रसं भयार्ताः
घृतमिव तेजसि तस्य ता अहौसुः ।।७।।

वर्तते = विद्यते । अहो= आश्चर्यम्, अद्य= अस्मिन् दिवसे, मेनकायाः = तन्नाम्न्याः स्वर्गणिकायाः, कपोलयोः = गण्डस्थलयोः, यद् व्रणम् = ईर्मम्, व्रणोऽस्त्रियामीर्ममरुः क्लीबमित्यमरः । स्फुटम् = प्रकटम्, पश्यामि = विलोकयामि, तद् = व्रणम्, क्रव्यान् = आममांसान्, अदन्ति = खादयन्तीति, क्रव्यादाः = राक्षसाः, वः = युष्माकम्, आक्षारणा = मैथुनं प्रति आक्रोशः, तत्र त्वाक्षारणा यः स्यादाक्रोशो मैथुनं प्रतीत्यमरः। प्रसभम्= हठात्, कृता = विहिता भवेत्, इति= इत्थम्, अहम् = गन्धर्वराजः, मन्ये = विचारयामि । अत्र, उत्प्रेक्षालङ्कारः ।

७३ अत्र गन्धर्वराजो रावणस्य दुश्चरित्रं प्रकारान्तरेण प्रकाशयति - दशमुखेति ।

अन्वयः - दशमुखविजयार्जिताः अभिनववयसः भयार्ताः मनुजसुरासुरकिन्नरोरगाणाम् ताः कुमार्यः रसम्, तस्य तेजसि घृतम् इव अहौसुः ।

व्याख्या - दश मुखानि यस्य सः, दशमुखः = रावणः, तस्य यः विजयः= जयः, तस्मात्, अर्जिताः = प्राप्ताः, नृपतीन् विजित्य समानीताः प्रसभं हृता वेत्यर्थः । अभिनवं वयो यासान्ताः, अभिनववयसः = तरुण्यः, भयेन = अपहरणजन्यभीत्या, आर्ताः= पीडिताः, न तु स्वेच्छयेति भावः । मनुजाश्च सुराश्च, असुराश्च, किन्नराश्च, उरगाश्च, (इततेरयोगे द्वन्द्वः) तेषाम्, मनुजसुरासुरकिन्नरोरगाणाम् = मानवदेवदनुजकिन्नरसर्पाणाम्, ताः = विजित्य लब्धाः, कुमारयन्ति = क्रीडन्तीति, कुमार्यः = स्वल्पवयस्का नार्यः, कुमार क्रीडायामित्यस्मात् पचाद्यच्, स्त्रीत्वविवक्षायां ङीष् । रसम् = यौवनास्वादम्, तस्य = रावणस्य, तेजसि = वीर्ये, घृतम् = आज्यम् इव, घृतमाज्यं हविः सर्पिरित्यमरः । अग्नाविवेति शेषः । अहौसुः = हुतवत्यः, जुहोतेर्लुङि प्रथमपुरुषस्य बहुवचने रूपम् ।

सरलार्थः - रावणेन नृपतीन् विजित्य अपहृता अत एव भयार्ता मनुजानां देवानां दनुजानां किन्नराणां सर्पाणाञ्च कुमार्यो वह्नौ घृतमिव रावणस्य वीर्ये स्वाहूतवत्य इति ।

अत्र, उपमालङ्कारः । पुष्पिताग्रावृत्तम् । तल्लक्षणं यथा-

अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा, इति ।

किञ्च -

७४ दशास्यमुखचुम्बिता दशनदष्टबिम्बाधरा
रतिश्रमभयातुराः शिथिलकेशवेशाङ्किताः ।
बभूवुरमराङ्गनाः स्मरत यूयमेवाधुना
कथं लपथ निस्त्रपा हृतमहो वयस्तेन वः ।।८।।

(श्रुत्वा)

७५ **सर्वाः** - अह्मो ! कधं अत्तभवन्तो अज्जमिस्साओ दासीए उत्ती विअ रीढ
वाणीए णो णिरवत्तवं अहिक्खिवन्ति । [*अहो कथमत्र भवन्त आर्यमिश्रा दास्याः पुत्रा इव रीढया वाण्या नो निरपत्रपमधिक्षिपन्ति ।*]

---

७४ अत्र गन्धर्वराजोऽप्सरसां रावणकृतसतीत्वहरणं वर्णयति- **दशास्येति** ।

अन्वयः - दशास्यमुखचुम्बिताः दशनदष्टबिम्बाधराः, रतिश्रमभयातु शिथिलकेशवेशाङ्किताः यूयम् अमराङ्गनाः अधुना निस्त्रपाः लपथ । अहो तेन व वयः कथम् हृतम् ? स्मरत ।

व्याख्या - **दश आस्यानि यस्य सः दशास्यः** = रावणः, **तस्य मुखैः** = वदनैः, **दष्टौ** = क्षतौ, **बिम्बाधरौ** = बिम्बोष्ठौ, **यासान्ताः, दशनदष्टबिम्बाधराः** = दन्तक्षतोष्टपुटाः, **रतेः यः श्रमः, भयञ्च ताभ्याम्, आतुराः रतिश्रमभयातुराः** = सुरतपरिश्रमभीतिपरिपीडिताः, **शिथिलाश्च ते केशवेशाः, तैः अङ्किताः शिथिल केशवेशाङ्किताः** = शिथिलकचविन्यासलसिताः, **यूयम्** = मत्पुरोवर्तिन्यः, **अमरा णाम्** = देवानाम्, **अङ्गनाः** = स्त्रियः, अप्सरस इत्यर्थः । **अधुना** = साम्प्रत **निष्क्रान्ता त्रपा याभ्यस्ताः निस्त्रपाः** = निर्लज्जाः सत्यः, **लपथ** = संवदथ **अहो** = आश्चर्यम्, **तेन** = रावणेन, **वः** = युष्माकम्, **वयः** = यौवनम्, **कथम्** = केन प्रकारेण, **हृतम्** = अपनीतम्, **स्मरत** = चिन्तयत ।

सरलार्थः - रावणेन मुखैश्चुम्बिता दन्तैः क्षताधराश्च रतिश्रमभयेनातुर शिथिलकेशविन्यासा यूयं, देवाङ्गना निर्लज्जाः कथं संलपथ। रावणेन युष्मा वयः कथम् हृतम् ? स्मरत इति ।

बिम्बाविवाधरौ, **इत्यत्रोपमालङ्कारः** । **पृथ्वीवृत्तम्** । तल्लक्षणं यथा-

जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः इति ।

७५ **सर्वाः** - **अहो** = आश्चर्यम्, **अत्र भवन्तः** = मान्याः, **आर्यमिश्राः** = आर्यश्रे अपि, **दास्याः**= सेविकायाः, **पुत्राः** = सुता इव, **रीढया** = तिरस्कारयुतया, **रीढा वमाननावज्ञावहेलनमसूर्क्षणम्**, इत्यमरः । **वाण्या** = वाचा, **नः** = अस्मा

७६ **तुम्बुरुः** – किं यूयं स्वधर्मनिरता लोपामुद्रासदृश्यो ब्राह्मण्यः । यदि तथा युष्माभिः सह वयं न संलपामः ।

७७ **उर्वशी** – हला पिअसहिओ ! एदेहिं किदवेहिं अम्याणं अवमाणणा किदा । तुह्मे आगच्छध अण्णदो गमिस्सामो, [*हला प्रियसख्यः ! एतैः कितवैरस्माकमवमानना कृता । यूयमागच्छतान्यतो गमिष्यामः ।*]

(इति परिक्रामन्ति)

७८ **गन्धर्वः** – अयि मानिन्यः ! क्व गच्छथ ? (इति हस्तावलम्बनेन सर्वा उपवेशयति)

७९ **गन्धर्वराजः** – (सर्वा अवलोक्य, जनान्तिकम्) भो तुम्बुरो ! पश्येमा मदनविकारङ्गता इव प्रतीयन्ते । कुतः–

८० **स्मयन्ते पश्यन्त्यो मुखमभिमुखं नो जहति नो**
गिरं श्रुत्वाऽस्माकं प्रतिवचनमेता न ददति ।

निर्गता अपत्रपा = लज्जा, **यस्मिन् कर्मणि तद् यथा स्यात्तथा, निर्लज्जापत्रपा व्रीडा**, इति रत्नकोषः। **अधिक्षिपन्ति**= प्रतिक्षिपन्ति, **अधिक्षिप्तः प्रतिक्षिप्त** इत्यमरः।

७६ **तुम्बुरुः** – **यूयम्** = अप्सरसः, **स्वधर्मे** = पातिव्रत्ये, **निरताः** = अवस्थिताः, **लोपामुद्रासदृश्यः**= लोपामुद्रोपमाः, **ब्राह्मण्यः** = द्विजपत्न्यः, किम् ? **तथा सति युष्माभिः** = अप्सरोभिः, **सह** = साकम्, **वयम्** = गन्धर्वाः, **न संलपामः**= न संवदामः ।

७७ **उर्वशी** – **हला प्रियसख्यः** = भो प्रियवयस्याः ! **एतैः** = एभिः, **कितवैः** = धूर्तैः, **अस्माकम्** = अप्सरसाम्, **अवमानना** = अनादरः, **कृताः** = विहिता । **यूयम्** = मत्सख्यः, **आगच्छत** = आयात, **अन्यतः** = अपरस्मिन् स्थाने, **गमिष्यामः** = यास्यामः । (इति परिक्रामन्ति)

७८ **गन्धर्वः** – **अयि मानिन्यः** = भो मानवत्यः ! **यूयम्** = उर्वश्याद्याः, **क्व** = कुत्र, **गच्छथ** = याथ, (**इति** = इत्थम्, **हस्तयोः** = करयोः, **अवलम्बनेन** = ग्रहणेन, **सर्वाः** = अप्सरसः, **उपवेशयति** = निवासयति)

७९ **गन्धर्वराजः** – (**सर्वाः** = अप्सरसः, **अवलोक्य** = विलोक्य । **जनान्तिकम्** = सर्वश्राव्यम्) **भो तुम्बुरो** = भो गन्धर्व ! **पश्य** = विलोकय, **इमाः** = एताः, **अप्सरसः मदनस्य विकारः**, **मदनविकारः** = कामविकृतिस्तम्, **गताः** = प्राप्ताः, **इव प्रतीयन्ते** = ज्ञायन्ते । **कुतः** = कस्मात् ?

८० अत्र गन्धर्वराजः, अप्सरसां मदनविकृतिं निरूपयति– **स्मयन्ते** इति ।

कटाक्षक्षेपेण प्रतिपदमिह घ्नन्ति न इमा
यदासां कामोऽयं व्यथयति मनः काममधुना ।।९।।

८१ तुम्बुरुः - सत्यमत्र भवतोदितम् । अहो सुललिताश्चेष्टाः स्वर्वेश्यानाम् पश्यतु देवः-

८२ नितम्बगुरुतैकया प्रकटिताऽधुना छद्मना
मरालगतयालिभिर्यदि निवारिता तद्गतिः ।
उरोवसनमन्यया स्खलितपादया व्याजतो
निपातितमथैकया पतितया कृतोर्वोः प्रथा ।।१०।।

अन्वयः - एताः पश्यन्त्यः स्मयन्ते । नः अभिमुखम् मुखम् न जहति अस्माकम् गिरम् श्रुत्वा प्रतिवचनम् न ददति । इह इमाः प्रतिपदम् कटाक्षक्षेपेण घ्नन्ति । यत् अधुना अयम् कामः आसाम् मनः कामम् व्यथयति ।

व्याख्या - एताः = अप्सरसः, **पश्यन्त्यः** = विलोकयन्त्यः, **स्मयन्ते** मन्दहास्यं कुर्वन्ति । **नः** = अस्माकम्, गन्धर्वाणामित्यर्थः । **अभिमुखम्** = संमुख **मुखम्** = वदनम्, **न जहति** = त्यजन्ति। **अस्माकम्** = गन्धर्वाणाम्, **गिरम्** वाचम्, **गीर्वाग्वाणी सरस्वतीत्यमरः** । **श्रुत्वा**= आकर्ण्य, श्रु+क्त्वा । **प्रतिवचनम्** प्रत्युत्तरम्, **न ददति** = न प्रयच्छन्ति । **इह** = अस्मिन् स्थाने, **इमाः** = अप्सरस **पदे पदे इति प्रतिपदम्** = प्रतिचरणम्, प्रतिक्षणमित्यर्थः । **कटाक्षस्य** = अपाङ्ग **क्षेपेण** = पातेन, **नः** = अस्मान्, **घ्नति** = पीडयन्ति । **यत्** = यस्मात्, **अधुना** अस्मिन् समये, **अयम्** = एषः, **कामः** = मदनः, **आसाम्** = अप्सरसाम्, **मनः** चित्तम्, **कामम्** = नितराम्, **व्यथयति** = पीडयति । **स्वभावोक्त्यलङ्कारः शिखरिणीवृत्तम्** ।

८१ **तुम्बुरुः** - **अत्र** = अस्मिन् विषये, **भवता** = त्वया, **सत्यम्** = यथार्थमे **उदितम्** = निगदितम् । **अहो** = आश्चर्यम्, **स्वर्वेश्यानाम्** = स्वर्गणिकाना **सुललिताः** = मनोहारिण्यः, **चेष्टाः**= क्रियाः, सन्तीति भावः, आकर्षका इत्यर्थः **देवः** = भवान्, **पश्यतु** = विलोकयतु ।

८२ अत्र तुम्बुरुः गन्धर्वराजस्यैव वचनं समर्थयन्, अप्सरसां मदनविकारजाश्चेष्टा वर्णयति **नितम्बगुरुतेति** ।

अन्वयः - अधुना यदि मरालगतया एकया छद्मना नितम्बगुरुता प्रकटित तद्गतिः आलिभिः निवारिता । स्खलितपादया अन्यया व्याजतः उरोवसनम् निपातित अथ पतितया एकया उर्वोः प्रथा कृता ।

अपि च -

८३ सुकेशी धम्मिल्लं विपुलकबरीभाररुचिरं
दधानापाङ्गैर्नः स्मरविशिखबाधां जनयते ।
विशालाक्षी रम्भा प्रकटयति दम्भादिव कुचौ
कटिप्रोथौ तस्या मनसिजविकारं रचयतः ।।११।।

व्याख्या - अधुना = अस्मिन् समये, यदि = चेत्, मरालस्य गतमिव गतं यस्यास्तया मरालगतया = हंसगामिन्या, एकया = मेनकया, छद्मना = व्याजेन, नितम्बस्य = कटिपश्चाद्भागस्य, गुरुता = स्थूलता, प्रकटिता = प्रकाशिता। तस्याः = स्वर्वेश्यायाः, गतिः = तादृशं गमनम् सा अवस्था वा, आलिभिः = वयस्याभिः, निवारिता = अपसारिता। स्खलितौ पादौ यस्यास्तया स्खलितपादया= स्खलितचरणया, अन्यया = गणिकया, व्याजतः = छलेन, उरसः = वक्षस्थलस्य, उरो वत्सञ्च वक्षश्चेत्यमरः। वसनम्= वस्त्रम्, स्तनाच्छादकमिति भावः। निपातितम्= विशारितम्, च्यवते पतति पतयति भ्रश्यति च भ्रंशते । तथा क्षरति विस्त्रंसते च विगलति विशीर्यते चेति पतनार्थाः ।। अथ = अनन्तरम्, पतितया = भूमौ निपतितया, एकया = स्वर्गणिकया, ऊर्वोः = सक्थ्योः, सक्थिः क्लीबे पुमानूरु-रित्यमरः । प्रथा = प्रदर्शनम्, कृता = विहिता । ऊरुप्रदर्शनं विहितमित्यर्थः।

सरलार्थः - स्वर्वेश्यासु हंसगामिन्या, एकया नितम्बभारः प्रदर्शितः, तस्याः स गमनप्रकारः सखीभिः निवारितः । अन्यया स्खलनव्याजेन वक्षस्थलस्य वसनं भूमौ पातितम्। तथैव पतितया चान्यया ऊरुप्रदर्शनं विहितम्, इति ।

स्वभावोक्तेरुपमायाश्च तिलतण्डुलन्यायेन संमिश्रणात्संसृष्ट्यलङ्कारः ।

पृथ्वीवृत्तम् ।

८३ अत्रापि कविः, अप्सरसां मदनजन्यावस्थां तुम्बुरुमुखेन वर्णयति- सुकेशीति ।

अन्वयः - सुकेशी विपुलकबरीभाररुचिरं धम्मिलं दधाना अपाङ्गैः नः स्मरविशिखबाधां जनयते । विशालाक्षी रम्भा दम्भात् इव कुचौ प्रकटयति । तस्याः कटिप्रोथौ मनसिजविकारं रचयतः ।

व्याख्या - सु = शोभना, केशाः = कचाः, सन्ति यस्याः सा, सुकेशी= शोभनकचा, विपुलैः = विशालैः, कबरीणाम् = केशवेशानाम्, भारैः = भरैः, रुचिरम् = मनोरमम्, स्मरस्य = कामस्य, कामः पञ्चशरः स्मर इत्यमरः । ये विशिखाः = वाणाः, तेषां बाधा = पीडा, ताम् जनयते = उत्पादयति । विशाले= विस्तृते, अक्षिणी = नयने, यस्याः सा, विशालाक्षी = विस्तृतनयना, रम्भा =

८४ **गन्धर्वराजः** - श्रोतव्यमिदानीमासामविरलविटपिच्छायेऽस्मिन्महीधरनितम्बे नितम्बिनीनां तौर्यत्रिकं सकौतुकमस्माभिः । तत्केनचिदपि मिषेण नियोजयेमाः स्वरसंयोजनकर्मणि ।

८५ **चित्ररथः** - यदाज्ञापयत्यत्र भवान् । (उर्वशीं प्रति) अयि उर्वशि ! त्वमेव सर्वाप्सरसां नायिकाऽसि । तद्ददातु त्वदभिसारिकावचनसंकेतम् ।

८६ **उर्वशी** - (कटाक्षपातेन चित्ररथं पश्यन्ती) अह्मो ! ण अहं कुट्टिणी गणिआणम्।

तन्नाम्नी स्वर्वेश्या, **दम्भात् इव** = कैतवात् इव, **कपटोऽस्त्री व्याजदम्भोपधयश्छद्मकैतवे**, इत्यमरः। **कुचौ** = स्तनौ, **प्रकटयति** = प्रकाशयति । **तस्याः** = स्वर्गणिकायाः, **कटिप्रोथौ** = स्फिचौ, **स्त्रियां स्फिचौ कटिप्रोथौ**, इत्यमरः । **मनसि जायते इति मनसिजः** = कामः, **सप्तम्यां जनेर्डः** । **तस्य विकारम्** = विकृतिम्, **रचयतः** = उत्पादयतः।

सरलार्थः - सुकेशी विशालैः कबरीभारैर्लसितं धमिल्लं धारयन्ती कामपीडां जनयति । दम्भात् इव स्तनौ प्रकटयन्त्याः, रम्भायाः कटिप्रोथौ कामविकारं जनयतः, इति ।

अत्रोत्प्रेक्षास्वभावोक्त्योरङ्गाङ्गिभावात्सङ्करः । **शिखरिणीवृत्तम्** ।

८४ **गन्धर्वराजः** - **इदानीम्** = अधुना, **अविरला** = सान्द्रा, **विटपिनाम्** = वृक्षाणाम्, **छाया** = अनातपरेखा, **यस्मिन् तस्मिन्, अस्मिन्** = एतस्मिन्, **महीधराणाम्** = पर्वतानाम्, **नितम्बे** = अधित्यकाभागे, **अस्माभिः** = गन्धर्वैः, **नितम्बः, अस्ति यासान्ताः, नितम्बिन्यस्तासाम् नितम्बिनीनाम्** = स्वर्वेश्यानाम्, **तौर्यत्रिकम्**= गीतवाद्यनृत्यम्, **कौतुकेन सहितं यथा स्यात्तथा, श्रोतव्यम्** = आकर्णयितव्यम्। **तत्** = तस्मात्, **केनचिदपि मिषेण**= छद्मना, **स्वराणाम्** = निषादर्षभादीनां स्वराणाम्, **संयोजनस्य** = संगमनस्य, **कर्मणि** = कार्ये, **इमाः** = अप्सरसः, **नियोजय** = प्रवर्तय ।

८५ **चित्ररथः** - **अत्र भवान्** = गन्धर्वराजः, **यत् आज्ञापयति** = आदिशति तथा करोमीत्यर्थः । (उर्वशीं प्रति लक्ष्यीकृत्य) **अयि** = भोः, उर्वशि! **त्वम्** = भवती, **सर्वाश्च ता अप्सरसस्तासाम् सर्वाप्सरसाम्** = निखिलस्वर्गणिकानाम्, **नायिका**= नेत्री, **असि** । **तत्** = तस्मात्, **तव** = भवत्याः, **या अभिसारिकाः** = अभिसर्तुम्, **समागतास्ताभ्यो वचनेन सङ्केतम्** = इङ्गितम्, **ददातु** प्रयच्छतु । (इति मुखं परिवर्तयति)

८६ **उर्वशी** - (**कटाक्षपातेन** = अपाङ्गवीक्षणेन, **चित्ररथम्** = तदाख्यं गन्धर्वम्,

किं भवं मं एव्वं अवजाणादि । [*अहो ! नाहं कुट्टिनी गणिकानाम् । किं भवान्मामेवमवजानाति ।*] (इति मुखं परिवर्तयति)

८७ **चित्ररथः** - अयि उर्वशि! नाहं त्वां शंभलीं वदामि । किंत्विदानीं युष्माकं गीतरागश्रवणेन मदनबाधामपनेतुमिच्छति नायकः । तद्दीयतामन्याभ्यो गीतराग-सङ्केतमिति मयोक्तम् । किमेवं भवती नायकाभिप्रायमबुद्ध्वैव सासूयं मन्दाक्ष-कटाक्षं मयि क्षिपति । न ते युक्तमीदृशमसौहार्दम् ।

८८ **उर्वशी** - (स्मितं कृत्वा गन्धर्वराजं निरीक्ष्य) हला पिअसहि रंहे ! अहं दाव एक्कां गीदिआं मज्झमसोराणुपरिवाहिणीं गाइस्सम् । इमाए परिवादिणीए मम गीदिआणुसारं सोरसंजोजणां करेहि तुअम् । इअं मेणआ मिदंगतालेण कालमावणं करेदु । अण्णाओ पिअवअसाओ से गीदिआए लअं आलंविअ

पश्यन्ति = विलोकयन्ति) **अहो** = आश्चर्यम्, **अहम्** = उर्वशी, **गणिकानाम्** = स्वैश्यानाम्, कुट्टिनी नास्मीत्यर्थः ।

८७ **चित्ररथः - अयि** = भो उर्वशि! **अहम्** = चित्ररथः, **त्वाम्** = भवतीम्, **शंभलीम्**= कुट्टिनीम्, **न वदामि** = न कथयामि । **किन्तु** = परन्तु, **इदानीम्** = अधुना, **नायकः** = गन्धर्वराजः, **युष्माकम्** = अप्सरसाम्, **गीतस्य** = गानस्य, **ये रागाः**= भैरवादयः, **भैरवः कौशिकश्चैव हिन्दोलो दीपकस्तथा । श्रीरागो मेघरागश्च रागाः षडिति कीर्तिताः**, इति भरतः । **तेषाम् श्रवणेन** = आकर्णनेन, **मदनस्य** = कामस्य, **बाधाम्** = पीडाम्, **अपनेतुम्** = दूरीकर्तुम्, **इच्छति** = वाञ्छति । **तद्**= तस्मात्, **अन्याभ्यः** = अप्सरोभ्यः, **गीतस्य** = गानस्य, **रागाय** = आलापाय, **सङ्केतम्** = इङ्गितम्, **दीयताम्** = क्रियताम्, **इति** = एतत्, **मया** = चित्ररथेन, **उक्तम्** = कथितम् । **किम्** = कथम्, **भवती** = त्वम्, **नायकस्य** = नेतुः, **अभिप्रायम्** = आशयम्, **अबुद्ध्वा** = अज्ञात्वा, **एव असूयया** = ईर्ष्यया **सहितं यथा स्यात्तथा, मन्दाक्षेण** = त्रपया सहितम्, **कटाक्षम्** = अपाङ्गदर्शनम्, **मयि**= चित्ररथे, **क्षिपति** = त्यजति । **ते** = तव, **ईदृशम्** = एतादृशम्, **सुहृदो भावः सौहार्दम्, न सौहार्दम् असौहार्दम्** = दौर्हार्दम्, **न युक्तम्** = नोचितम् ।

८८ **उर्वशी** - (**स्मितम्** = मन्दहास्यम्, **कृत्वा** = विधाय, **गन्धर्वराजं निरीक्ष्य** = विलोक्य) **हला प्रियसखि** = प्रियालि रम्भे, **अहम्** = उर्वशी, **तावदिति** वाक्यालङ्कारे **मध्यमाश्च ते स्वरास्तान् वहतीति ताम्, मध्यमस्वरवाहिनीम्, एकाम्, स्वल्पा गीतिः, गीतिका ताम् गीतिकाम्** = स्वल्पगानम्, **गास्यामि** = आलपिष्यामि । **त्वम्** = भवती **अनया** = एतया **परिवादिन्या** = वीणया, **मम** = मे **गीतिकानुसारम्**=

णच्चणं अणुचिट्ठन्दु । पिअसहिओ ! दाव अहं इमं गीदिआं कण्णटअराएण एक्कतालीअताले गाइस्सम् । ता तुह्मे साअहाणं चिट्ठध । [*हला प्रियसखि रम्भे ! अहं तावदेकां गीतिकां मध्यमस्वरवाहिनीं गास्यामि । अनया परिवादिन्या मम गीतिकानुसारं स्वरसंयोजनां कुरुष्व त्वम् । इयं मेनका मृदङ्गतालेन कालमापनं करोतु । अन्याः प्रियवयस्या अस्या गीतिकाया लयमालम्ब्य नर्तनमनुतिष्ठन्तु । प्रियसख्यस्तावदहमिमां गीतिकां कर्णाटकरागेणैकतालीयताले गास्यामि । तद्यूयं सावधानं तिष्ठत ।*]

(गीतिः)

८९ **तुज्झ वहूविरहेण विगलिदमुहा रहुणाह, पतन्ती**
कवुरजुअदिअणेणसह पडिवसदि पडिवसदि -
णिसि बहु विलवन्ती ।
हा विरहे तुह सीदा
राहव दसवअणभणिदए अवला तदिए परिभीदा ध्रु. ।।१२।।

गानानुरूपम्, **स्वराणाम्** = निषादादीनाम्, **संयोजनम्** = सन्धानम्, **कुरुष्व** = विधेहि । **इयम्** = एषा, **मेनका** = स्वर्गणिका, **मृदङ्गस्य** = मुरजस्य, **तालेन** = कालक्रियामानेन, **तालः करतलेऽङ्गुष्ठमध्यमाभ्याञ्च संमिते । गीताकालक्रियामाने करास्फाले द्रुमान्तरे'** इति विश्वः । **कालस्य** = समयस्य, **मीयते इति मानम्** = मापनम्, **करोतु** = विदधातु । **अन्याः** = अपराः, **प्रियवयस्याः** = सख्यः, **अस्याः** = गीयमानायाः, **गीतिकायाः** = गानस्य, **लयम् आलम्ब्य** = आश्रित्य, **नर्तनम्** = नृत्यम्, **अनुतिष्ठन्तु** = कुर्वन्तु । **भो प्रियसख्यः** = प्रियवयस्या अप्सरसः ! **अहम्** = उर्वशी, **तावत्** = आदौ, **इमाम्** = एनाम्, **गीतिकाम्** = गानम्, **कर्णाटकरागेण** = **कपोलपाणिर्गजदन्तपत्रमेकं वहन्, दक्षिणकर्णपूरैः । संस्तूयमानः सुरचारणौघैः कर्णाटरागः सितनीलकण्ठः,** इति लक्षितेन विरहोत्कण्ठाया वर्णनस्यानुकूलेन, **एकस्मात् तालाद् भवः एकतालीयः, स चासौ तालस्तस्मिन्, एकतालीयताले, गास्यामि** = आलपिष्यामि । **तत्** = तस्मात्, **यूयम्** = भवत्यः, **सावधानाः** = एकचित्ताः, **तिष्ठत** ।

८९ **अन्वयः** - रघुनाथ ! विरहेण विगलितमुखा तव वधूः पतन्ती कर्वुरयुवतिजनेन सह प्रतिवसति । हा राघव ! तव विरहे दशवदनभणितया अबलातत्या परिभीता सीता निशि बहु विलपन्ती प्रतिवसति ।

व्याख्या - रघूणां नाथः, रघुनाथः, तत्संबुद्धौ हे रघुनाथ = भो राम !

[तव वधूविरहेण विगलितमुखा रघुनाथ ! पतन्ती
कर्बुरयुवतिजनेन सह प्रतिवसति प्रतिवसति निशि बहु विलपन्ती।
हा विरहे तव सीता
राघव ! दशवदनभणितयाऽवलातत्या परिभीता ।।१२।। ध्रु.]

(श्रुत्वा सर्वेऽश्रूणि विमुञ्चन्ति)

९० **गन्धर्वराजः** - (सबाष्पकण्ठम्)

चित्ररथ ! गीतरागश्रवणेन मदनबाधामपनेतुमिच्छति नायक इति यत्त्वया तस्यै कथितं तथैवाचरितं तया । अहो करुणरसरागपरिवाहिन्या गीतिकया हृतचित्तवृत्तयः श्रोतारश्चित्रलिखिता इव प्रतिभान्ति । तथा हि-

९१ **यदुक्त्या नोऽगाधा मनसिजभवबाधा समुदिता**
तया दूरं नीता करुणरसगीताकथनतः ।

विरहेण = वियोगेन, तवेति शेषः । **विगलितम्** = म्लानम्, **मुखम्** = वदनम्, **यस्याः सा, तव** = भवतः, रामस्येत्यर्थः । **वधूः** = पत्नी, **पतन्ती** = भूमौ लुठन्ती, **कर्बुराणाम्** = राक्षसानाम्, **रात्रिञ्चरो रात्रिचरः कर्बुरो निकषात्मज** इत्यमरः । **युवतिजनेन** = स्त्रीजनेन सह, **प्रतिवसति** = दुःखेन तिष्ठति । **हा राघव** = भो राम! रघु + अण् । **तव** = भवतः, **विरहे** = वियोगे, **दश वदनानि यस्य सः दशवदनः** = रावणः, **तेन, भणितया** = निर्दिष्टया, **अबलानाम्** = स्त्रीणाम्, **तत्या** = समूहेन, **परिभीता** = भृशं त्रस्ता, **सीता** = वैदेही, **निशि** = रात्रौ, **बहु**= अधिकम्, **विलपन्ती** = विलापं कुर्वती, **प्रतिवसति** = कष्टेन तिष्ठति।

सरलार्थः - भो राघव! त्वद्वियोगेन म्लानवदना रावणनिर्दिष्टेन राक्षसीजनेन भृशं त्रासिता भूमौ लुठन्ती वैदेही निशि वहु विलपन्ती लङ्कायां तिष्ठतीति । अत्र, **अनुप्रासालङ्कारः** ।

९० **गन्धर्वराजः - (वाष्पकण्ठेन सहितं यथा स्यात्तथा) भो चित्ररथ! नायकः** = गन्धर्वराजः, **गीतस्य** = गानस्य, **ये रागाः** = कर्णाटकाद्याः, **तेषां श्रवणेन** = आकर्णनेन, **मदनस्य** = कामस्य, **बाधाम्** = पीडाम्, **अपनेतुम्** = दूरीकर्तुम्, **इच्छति** = वाञ्छति, **इति** = एतत्, **त्वया** = चित्ररथेन, **तस्यै** = उर्वश्यै, **कथितम्**= निगदितम्, **तथैव** = तेनैव प्रकारेण, **आचरितम्** = विहितम् । **अहो** = आश्चर्यम्, **करुणो रसो यत्र तथाभूतो यो रागस्तं परिवहतीति तया, गीतिकया** = गानेन, **हृता चित्तानां वृत्तयो येषान्ते तथाभूताः, श्रोतारः** = श्रवणं कुर्वन्तो जनाः, **चित्रेषु लिखिताः**= आलेख्यगता इव, **प्रतिभान्ति** = दृश्यन्ते ।

९१ अत्र गन्धर्वराज उर्वश्याः गानकौशलं निरूपयति- **यदुक्त्येति** ।

अहो गानं मानं हरति तनुतेऽप्यत्र मनसः
सदोर्वश्यास्तस्या मुखकमलवश्या इव रसाः ।।१३।।

(नेपथ्ये)

९२ गन्धर्वा अलमधुना सुगीतवाद्यै-
र्यातोऽसौ सुरपतिरग्रतो रथस्थः ।
यूयं किं विरमथ दिव्यसुन्दरीभिः
कामार्ता इव पुरतः प्रयात शीघ्रम् ।।१४।।

अन्वयः - यदुक्त्या समुदिता अगाधा नः मनसिजबाधा तया करुणरसगीताकथनतः दूरं नीता । अहो अत्र गानम् मनसः मानम् तनुते, हरति अपि । रसा सदा तस्याः उर्वश्याः मुखकमलवश्या इव (सन्ति)

व्याख्या - यस्याः = उर्वश्याः, **उक्त्या** = कथनेन, **समुदिता** = समुत्पन्ना, **नास्ति गाधः** = स्थितिः, **यस्याः सा अगाधा** = अत्यन्तमेव गभीरा, अतिशयपीडादायिनीत्यर्थः । **नः** = अस्माकम्, **मनसि जायते इति मनसिजः** = कामः, **शम्बरारिर्मनसिजकुसुमेषुरनन्यज** इत्यमरः । **सप्तम्यां जनेर्डः** । **तस्य, बाधा**= पीडा, **तया** = उर्वश्या, **करुणो रसो यत्र तथाभूतं यद् गीतम्** = गानम्, **तस्य आकथनतः** = गानात्, **दूरम्** = विप्रकृष्टम्, **नीता** = प्रापिता । **अहो** = आश्चर्यम्, **अत्र** = अस्मिन् स्थाने, **गानम्** = गीतिः, **मनसः**= चेतसः, **स्वान्तं हृन्मानसं मन** इत्यमरः। **मानम्**= दर्पम्, **तनुते**= विस्तारयति । **हरति च**= निवारयति च। **रसाः**= करुणशृङ्गाराद्या रसाः, **सदा** = सर्वदा, **तस्याः** = प्रसिद्धायाः, **उर्वश्याः**= स्वर्वेश्यायाः, **मुखमेव कमलम्, मुखकमलम्** = वदनपद्मम्, **तस्य वश्याः** = अधीना इव सन्ति ।

सरलार्थः - यस्या ललितवचनैः समुत्पन्ना कामबाधा तस्या एव करुणरसप्रधानस्य गीतस्याकर्णनेन दूरङ्गता । नूनमेवास्या गानमस्माकं चेतसो मानं वर्धयति, हरति च । करुणशृङ्गाराद्या रसास्तस्या उर्वश्या मुखकमलस्याधीना इव दृश्यन्ते इति।

मुखमेव कमलमिति **रूपकालङ्कारः** । वश्या इवेत्यत्र च, **उत्प्रेक्षालङ्कारः**, तयोः परस्परमङ्गाङ्गिभावात् **सङ्करः** । **शिखरिणी**वृत्तम् ।

९२ अत्र नेपथ्येऽप्सरसः प्रति शक्रागमनसन्देशं प्रस्तौति कश्चित्- **गन्धर्वा** इति ।

अन्वयः (भोः) गन्धर्वाः अधुना सुगीतवाद्यैः अलम् । अग्रतः रथस्थः असौ सुरपतिः यातः । यूयम् कामार्ताः इव दिव्यसुन्दरीभिः किं विरमथ ? शीघ्रम् पुरतः प्रयात ।

९३ **गन्धर्वराजः** (कर्णं दत्वा) अमात्य! अहो गीतरागविमूढैरस्माभिः स्वनियोगोऽपि विस्मृतः, नूनं भगवतः सुत्राम्णो रथोऽस्मानतीत्य पुरतो वर्तते । यतः-

९४ **आरोहन्तु विमानमाशु सकला दिव्याङ्गनाः संयता**
नीयन्तां मुरजा मृदङ्गपटहा वीणादिवाद्यानि च ।
कुर्वन्तु त्वरितं भवन्त उपदां वन्यप्रसूनैश्चिता-
मस्माकं विभुरग्रतः सुरपतिर्यातो रथस्थोऽधुना ।।१५।।

व्याख्या- भो गन्धर्वाः! अधुना = अस्मिन् समये, **सु** = शोभनानि, **गीतानि च वाद्यानि च तैः सुगीतवाद्यैः** = शोभनगीतिवादनैः, **अलम्** = पर्याप्तम्। **यतः, अग्रतः** = पुरः, **रथे तिष्ठतीति रथस्थः** = स्यन्दनारूढः, **असौ** = एषः, **सुराणां** = देवानाम्, **पतिः** = इन्द्रः, **यातः** = प्रस्थितः, **यूयम्** = भवन्तो गन्धर्वाः, **कामेन** = मदनजविकारेण, **आर्ता इव** = पीडिता इव, **दिव्याश्च ताः सुन्दर्यः, दिव्यसुन्दर्यस्ताभिः दिव्यसुन्दरीभिः** = अप्सरोभिः, **किम्** = किमर्थम्, **विरमथ**= क्रीडथ । **शीघ्रम्** = द्रुतम्, **पुरतः** = अग्रे, **प्रयात** = गच्छत ।

सरलार्थः - भो गन्धर्वाः! युष्माकमग्रे रथारूढो मघवा समुपस्थितः । दिव्यसुन्दरीभिः सह रमणं परित्यज्य पुरतो गच्छत । सुगीतवाद्यमपि त्यजत, इति ।

अत्र कामार्ता इवेत्यत्र, **उत्प्रेक्षालङ्कारः** ।

९३ **गन्धर्वराजः** - (कर्णं दत्वा) **भो अमात्य** = हे सचिव! **अहो** = बत, **गीतस्य** = गानस्य, **रागैः** = कर्णाटकादिभिः, **विमूढाः** = विशेषेण जडतां याताः, **तैस्तथाविधैः अस्माभिः** = गन्धर्वैः, **स्वेषाम्** = स्वकीयानाम्, **नियोगः** = कर्तव्यमपि, **विस्मृतः**= विस्मृतिपथं नीतः । **नूनम्** = निश्चयेन, **भगवतः** = ऐश्वर्यशालिनः, **सुत्राम्णः** = इन्द्रस्य, **रथः** = स्यन्दनम्, **अस्मान्** = गन्धर्वान्, **अतीत्य** = अतिक्रम्य, **पुरतः** = अग्रे, **वर्तते** = विद्यते । अस्मानतीत्याग्रे यात इत्यर्थः । **यतः** = यस्मात्-

९४ अत्र गन्धर्वराजो गन्धर्वान् अप्सरसश्च सुरपतिसंमानार्थं सज्जीभवनाय प्रेरयति- **आरोहन्तु इति** ।

अन्वयः - सकलाः दिव्याङ्गनाः संयताः (सत्यः) आशु विमानम् आरोहन्तु। मुरजाः मृदङ्गपटहाः वीणादिवाद्यानि च नीयन्ताम्। भवन्तः त्वरितम् वन्यप्रसूनैः चिताम् उपदां कुर्वन्तु । अस्माकम् विभुः सुरपतिः रथस्थः (सन्) अधुना अग्रतः यातः ।

व्याख्या- सकलाः = समग्राः, **दिव्याश्च ता अङ्गनाः, दिव्याङ्गनाः** = अप्सरसः, **संयताः** = विहितकेशवेशाः सत्यः, **आशु** = शीघ्रम्, **विमानम्** = व्योमयानम्, **आरोहन्तु** = आरूढाः भवन्तु । **मुरजाः** = वाद्यविशेषाः, **मृदङ्गाश्च**

९५ हूहूः यदाज्ञापयति गन्धर्वराजः ।

(इति सर्वे निष्क्रान्ताः)

इति द्वितीयोऽङ्कः)

पटहाश्च ते मृदङ्गपटहाः = मृदङ्गदुन्दुभयः, **वीणा आदि येषां तानि वीणादीनि यानि वाद्यानि** = वादनयन्त्राणि च, **नीयन्ताम्** = प्राप्यन्ताम् । **भवन्तः** = यूयम्, **त्वरितम्** = शीघ्रम्, **वने भवानि वन्यानि** = वनोद्भवानि, **यानि प्रसूनानि** = कुसुमानि, **तैः चिताम्** = व्याप्ताम्, **उपदाम्** = उपहारम्, **उपायनमुपग्राह्यस्तथोपदा**, इत्यमरः । **कुर्वन्तु** = रचयन्तु । **अस्माकम्** = गन्धर्वाप्सरसाम्, **विभुः** = प्रभुः, **सुराणाम्** = देवानाम्, **पतिः** = स्वामी, राजेत्यर्थः । **रथे तिष्ठतीति रथस्थः** = स्यन्दनस्थः, **अग्रतः** = पुरः, **यातः** = प्रस्थितः ।

सरलार्थः - सुरपती रथस्थोऽग्रे प्रस्थितः । अतो दिव्याङ्गनाः सज्जीभूय शीघ्रं विमानमारोहन्तु, वनोद्भवैः, कुसुमैर्युक्तमुपहारं शीघ्रं रचयत, इति ।

शार्दूलविक्रीडितं छन्दः ।

९५ **हूहूः** - **गन्धर्वराजः, यद् आज्ञापयति** = आदिशति तत्करोमीत्यर्थः । (**इति** = इत्थम्, **सर्वे** = गन्धर्वाप्सरसः, **निष्क्रान्ताः** = निर्गताः)

इति श्रीनीलमणिढुङ्गानाविरचितायां यशोदाभिधायां

संस्कृतटीकायां सुन्दरचरितनाटकस्य

द्वितीयोऽङ्कः समाप्तः

सुन्दरचरितनाटकम्

तृतीयोऽङ्कः

तृतीयाङ्ककथासारः

रथारूढस्य वासवस्य तत्सूतस्य मातलेश्च प्रवेशानन्तरं शक्रानुच
हनुमद्वीर्यपरीक्षायै सुरसां त्वरयन्ति । तौ च तत्रैव प्रच्छन्नौ सुरस
हनुमतोर्विक्रमोर्जिताश्चेष्टाः पश्यतः । ततो हनुमतो मार्गमावृत्य स्थिता भीषण
सुरसा प्रविशति । दंष्ट्रकरालवदनां मार्गविरोधिनीं तां प्रथमतो हनुमान् वाचे
तर्जयति । सुरसा च तं भोक्तुं मुखं विदारयति । रामकार्यं विधाय प्रत्याव
सति तव मुखं प्रवेक्ष्यामीति हनुमतोऽनुरोधं सा नैव स्वीकरोति । ततो हनुमान
कठोरया वाण्या तामपलपति, शतयोजनमितायतं शरीरं संपादयति च । सुरस
च तं भक्षयितुं पञ्चयोजनविशालं मुखं प्रदर्शयति । तदैव मारुतिर्दशयोजनाय
शरीरं प्रकाशयति । ततः क्रुद्धा सुरसा विंशद्योजनपरिमितं वदनं विस्तारयति
हनुमाँश्च शरीरस्य त्रिंशद्योजनविस्तृतिं नाटयति । तद्विलोक्य तं भक्षति
सुरसापि पञ्चाशद्योजनं मुखं विदारयति । तदानीमेव हनुमान् अङ्गुष्ठसहि
शरीरं धृत्वा सुरसाया वदनं प्रविश्य बहिर्निर्गच्छति । सुरसा च तत्का
विलोक्य प्रसन्ना स्वपरिचयं प्रदाय सम्यक् परीक्षितस्य हनुमतः सर्वत्र विजय
कार्यसाफल्यञ्च भविष्यतीति सूचयति । प्रच्छन्नौ मातलिवासवौ चासमुद्रपरत
हनुमन्तमनुसरतः ।

अथ तृतीयोऽङ्कः

(ततः प्रविशति रथारूढो वासवस्तस्य सूतो मातलिश्च)

१ **वासवः** - सूत! पश्येह गन्धर्वाप्सरसां व्योमयानम् । तद्रश्मिः संयम्यताम् । तावद्वयमप्यत्रैव स्थित्वा सुरसाहनुमतोर्विप्रलपितं निरूपयाम ।

२ **सूतः** - यदाज्ञापयत्यायुष्मान् । (इति रश्मिसंयमनाद्रथस्य वेगं रुणद्धि)

(नेपथ्ये)

अम्ब! त्वरय त्वरय रोद्धुमिमम् । कोऽयं वनगोचरोऽतिगम्भीरं विशालाब्धिं लिलङ्घयिषुर्हठादम्बरं समाक्रामति । तथा हि -

---

१ **वासवः** - सूत = भो सारथे! इह = अत्र, **गन्धर्वाश्च, अप्सरसश्च, तासाम् गन्धर्वाप्सरसाम्** = देवयोनिविशेषाणाम्, **व्योमयानम्** = विमानम्, **पश्य** = विलोकय। **तद्** = तस्मात्, **रश्मिः** = प्रगहः, **संयम्यताम्** = प्रगृह्यताम् । **तावत्** = क्षणम्, **वयमपि** = वासवमुख्याश्च, **अत्रैव** = अस्मिन्नेव स्थाने, **स्थित्वा** = उषित्वा, **सुरसा च हनुमान् च तयोः सुरसाहनुमतोः** = नागजनन्याञ्जनेययोः, **विप्रलपितम्**= विरोधोक्तिम्, **विप्रलापो विरुद्धोक्तावनर्थकवचस्यपि**, इत्यमरः । **निरूपयाम**= निभालयाम ।

२ **सूतः** - **आयुष्मान्** = अत्र भवान्, **वदेद्राज्ञीञ्च चेटीञ्च भवतीति विदूषकः । आयुष्मान् रथिनं सूतो वृद्धं तातेति चेतरः** ।। यत् **आज्ञापयति** = आदिशति, तत्करोमीत्यर्थः । (**इति** = इत्थम्, **रश्मेः** = प्रग्रहस्य, **संयमनात्** = नियन्त्रणात् **रथस्य** = स्यन्दनस्य **वेगम्** = जवम्, **रुणद्धि** = शिथिलीकरोति ।) (नेपथ्ये) **अम्ब** = भो मात!, **इमम्** = वानरम्, **रोद्धुम्** = नियन्त्रयितुम्, **त्वरय** = द्रुतिं कुरु, (त्वरयेति वीप्सार्थे द्विरुक्तिः) **अयम्** = एषः, **वनगोचरः** = विपिनचारी, **अतिशयेन गम्भीरम्, अतिगम्भीरम्** = अतलंस्पर्शम्, **विशालश्चासौ अब्धिः विशालाब्धिः, तम्, विशालाब्धिम्** = विपुलार्णवम्, **लङ्घयितुमिच्छति, लिलङ्घयिषति, लिलङ्घयिषतीति लिलङ्घयिषुः** = लङ्घयितुमिच्छुः, **हठात्** = प्रसभम्, **अम्बरम्**= आकाशम्, **समाक्रामति** = उद्गच्छतीत्यर्थः । **तथा हि** = यतः-

३ हरिहरि ! हरिः कोऽयं पङ्के यथा हरिणी जले
पतति वदने यातो वाऽयं यथा शलभोऽनले ।
कुत इह समायातः केनेरितः क्व गमिष्यति
त्वरयति किमर्थं वा मातर्निवर्तय बालिशम् ।।१।।

अपि च -

४ जननि! निजजनिं विशालशाखां
दलदलितां सरतीव पुष्पिताग्राम् ।

---

३ अत्र नेपथ्ये कोऽपि हनुमतो निवर्तनाय सुरसां प्रति, अनुरुणद्धि- **हरिहरीति** ।

अन्वयः हरिहरि, अयम् कः हरिः हरिणी पङ्के जले यथा वदने पतति, वा अयम् अनले शलभः यथा यातः । इह (असौ) कुतः समायातः, केन ईरितः क्व गमिष्यति वा किमर्थं त्वरयति ? मातः, बालिशम् निवर्तय ।

व्याख्या- हरिहरीति नैपालकजनानां विस्मयभावाभिव्यञ्जकं पदम् । **अयम्**= एषः, **कः** = किन्नामधेयः, **हरिः** = वानरः, **पङ्के** = कर्दममये, **जले** = सलिले, **हरिणी यथा**= मृगीव, **वदने** = मुखे, **पतति** = निपतति । **वा** = अथवा, **अयम्**= एषः, **अनले**= वह्नौ, **शलभो यथा** = पतङ्ग इव, **समौ पतङ्गशलभावित्यमरः** । **यातः** = गतः, याधातोः क्तः । **इह** = अस्मिन् स्थाने, **असौ वानरः कुतः** = कस्मात् स्थानात्, **समायातः** = आगतः, **केन** = पुरुषेण, **ईरितः** = प्रेषितः, **क्व**= कुत्र, **गमिष्यति**= यास्यति, **वा** = अथवा, **किमर्थम्** = कस्य हेतोः, **त्वरयति** = शीघ्रं याति ? **भो मातः** = जननि, **सुरसे! बालिशम्** = मूर्खम्, **अज्ञे मूढयथाजातमूर्खवैधेयबालिशा**, इत्यमरः । **निवर्तय** = परावर्तय ।

सरलार्थः - अयं वानरः पङ्कमये जले हरिणीव, वह्नौ शलभ इव वा तव मुखे पतन्नस्ति । असौ कुत आगतः, केन प्रेषितः, कुत्र गमिष्यति ? किमर्थं त्वरयति? मूर्खमेनं निवर्तय, इति ।

अत्रोपमालङ्कारयोः **संसृष्टिः** । **हरिणीवृत्तम्** । तल्लक्षणं यथा-

रसयुगहयैर्न्सौ म्रौ स्लौ गो हरिणी तदा इति ।

अस्मिन् श्लोके हरिणीशब्दोपादानाच्छन्दोऽप्यस्ति हरिणीनामकं सूचितम् ।

४ अत्र नेपथ्ये वानरस्य साहसं वर्णयति कश्चित्- **जननीति** ।

अन्वयः - जननि! विगतभयः विशालसत्त्वः, प्लवगः निजजनिम् दलदलिताम् पुष्पिताग्राम् विशालशाखाम् इव निरवधि, नितराम् अनन्तम् एतत् सरति ।

व्याख्या- भो जननि = हे मातः ! **विगतं भयम् यस्मात् सः विगतभयः**=

निरवधि नितरामनन्तमेत-
द्विगतभयः प्लवगो विशालसत्वः ।।२।।

५ **वासवः** - (कर्णौ दत्वा) अये मातले! श्रूयताम् । पूर्वं प्रेषिता ममानुचराः सुरसां त्वरयन्तीव ।

६ **मातलिः** - (प्राञ्जलिः) आयुष्मता यदुक्तं तदेव मे मनसि भाति ।

७ **वासवः** - अत्रानयोः सुरसाहनुमतो समागमो भवितुमर्हति । तदिहैव प्रच्छन्नौ

गतभीतिः, **विशालं सत्त्वं यस्य सः विशालसत्त्वः** = विपुलबलः, **सत्त्वं गुणे पिशाचादौ बले द्रव्यस्वभावयोरिति**, मेदिनी । **प्लवेन गच्छतीति प्लवगः** = वानरः, **गमेश्चेति खच्, कपिप्लवङ्गप्लवगशाखामृगवलीमुखा** इत्यमरः । **निजा जनिर्यत्र ताम् निजजनिम्** = स्वोद्भवाम्, **दलैः दलिता, दलदलिता, ताम् दलदलिताम्**= पत्रयुक्ताम्, **दलं पर्णं छदः पुमानित्यमरः**। **पुष्पितानि** = विकसितानि, **अग्राणि** = अग्रभागाः, **यस्याः सा, ताम्, पुष्पिताग्राम्** = विकसिताग्रभागाम्, **विशाला चासौ शाखा विशालशाखा, ताम्, विशालशाखाम्** = विस्तृतद्रुमांशमिव, **शाखा द्रुमांशे वेदांशे भुजे पक्षान्तरेऽन्तिके**, इति हैमः, **समे शाखालते**, इति चामरः । **निर्गतः अवधि** = सीमा, **यस्मात्तत् निरवधि** = निःसीमम्, **न विद्यते अन्तः यस्य तत्, अनन्तम्**= अन्तरहितम्, **एतत्**= आकाशम्, **नितराम्** = अत्यन्तमेव, द्रुतमित्यर्थः । **सरति** = गच्छति ।

सरलार्थः - विपुलबलो निर्भीकोऽयं वानरः स्वजन्मस्थल्यां पत्रैराकीर्णायां पुष्पिताग्रायां शाखायामिव निरवधौ नभस्तलेऽनन्ते द्रुतं गच्छन्नस्ति, इति । अस्मिन् पद्ये पुष्पिताग्रापदोपादानात् पुष्पिताग्राभिधं वृत्तमपि सूचितम् ।

उपमालङ्कारः । स्वभावोक्तिश्च । तयोः परस्परमङ्गाङ्गिभावात्सङ्करः । **पुष्पिताग्रावृत्तम्** । तल्लक्षणं यथा-

अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा।

५ **वासवः** - (**कर्णौ** = श्रवणौ दत्वा) **अये मातले** = भो सारथे! **श्रूयताम्** = आकर्ण्यताम्, **पूर्वम्** = प्राक्, **प्रेषिताः** = प्रहिताः, **मम** = वासवस्य, **अनुचराः** = भृत्याः, **सुरसाम्** = नागमातरम्, **त्वरयन्ति** = शीघ्रं गमनाय प्रेरयन्ति, इवेत्युत्प्रेक्षा।

६ **मातलिः** - (**प्राञ्जलिः** = बद्धाञ्जलिः) **आयुष्मता** = भवता, **यत् उक्तम्** = कथितम्, **तत् एव मनसि** = चेतसि, **भाति** = प्रतीयते ।

७ **वासवः** - **अत्र** = अस्मिन् स्थाने, **अनयोः** = एतयोः, **सुरसा च हनुमान् च तयोः, सुरसाहनुमतोः**= सर्पमातुराञ्जनेयस्य च, **समागमः** = संमेलनम्, **भवितु-**

भूत्वा तयोर्विप्रलापकुतूहलं पश्याव, इमौ चावयोः प्रायः सन्निधीयेते सुरसहानुमन्तौ । मातले! त्वया दृष्टाऽनयोर्विक्रमोर्जिता चेष्टा । पश्येदानीम्।

८ **सुरसुरारिरसासुरसंस्तुता स्तुतिरता सरसाऽतितरां तता ।**
सुतरसा सुरसा सरतस्तिरोऽतति सुतस्य सृतेः सततातततः ।।३।

मर्हति= सम्भाव्यते । **तत्** = तस्मात्, **इहैव** = अत्रैव, **प्रच्छन्नौ** = गुप्तौ भूत्वा, **तयोः** = सुरसाहनुमतोः, **विप्रलापस्य** = विरोधोक्तेः, **कुतूहलम्** = कौतुकम्, **पश्याव** = विलोकयाव । **इमौ** = एतौ, **सुरसाहनुमन्तौ** = नागमाता, पवनसुतश्च **प्रायः** = बहुशः, **आवयोः** = वासवमातल्योः, **सन्निधीयेते** = समीपं प्राप्येते । **भो मातले** = हे सारथे! **त्वया** = भवता, **अनयोः** = सुरसाहनुमतोः, **विक्रमेण**= पराक्रमेण, **ऊर्जिता** = वृद्धिं गता, **चेष्टा** = क्रिया, **दृष्टा** = विलोकिता ? **इदानीम्**= अधुना, **पश्य** = विलोकय, तयोश्चेष्टा इति शेषः ।

८ अत्र वासवो मातलिं संबोध्य सुरसायाश्चेष्टां वर्णयति- **सुरसुरेति** ।

अन्वयः - सुरसुरारिरसासुरसंस्तुता स्तुतिरता सरसा अतितरां तता सुरसा सरतः सततातततः सुतस्य सृतेः तिरः सुतरसा अतति ।

व्याख्या- सुष्ठु परब्रह्मणि रमन्ते इति सुराः = देवाः, **सुराणाम्** = देवानाम्, **अरयः** = शत्रवः, असुरा इत्यर्थः । **रसायां** = भुवि, **सुराः** = देवाः ब्राह्मणा इत्यर्थः । **तैः सुरसुरारिरसासुरैः** = देवासुरब्राह्मणैः, **संस्तुता** = प्रार्थिता **अतएव स्तुतौ** = स्तवे, **रता** = प्रसन्ना, **स्तवः स्तोत्रं स्तुतिर्नुतिरित्यमरः** । **रसैः** = शृङ्गारादिभिः, **सहिता** = युक्ता, रसिकेत्यर्थः । **अतितराम्** = नितराम्, **तता** = विस्तृता, विशालतनुरित्यर्थः । **तनु विस्तारे** इत्यस्माद्धातोर्निष्ठायां क्तः । **सुरसा** = नागमाता, **सरतीति सरन् तस्य सरतः** = गच्छतः, सृ+शतृ । **सततम्** = निरन्तरम् **अतति** = गच्छतीति, **सततातन्, तस्य सततातततः** = सदागतेः, वायोरित्यर्थः **सुतस्य** = पुत्रस्य, हनुमत इति भावः । **सृतेः** = मार्गस्य, **अयनं वर्त्म मार्गाध्वपन्थानः पदवी सृतिरित्यमरः** । **तिरः** = तिरोधानम् **यथा स्यात्तथा सुतरसा** = अतिशयजवेन **अतति** = गच्छति ।

सरलार्थः - सुरैरसुरैर्विप्रैश्च संस्तुताऽत एव स्तवे प्रसन्ना रसिका विशालतनुः सुरसा नाम नागमाता प्रच्छन्ना हनुमतो मार्गे जवेन यातीति ।

अत्र सकारतकारयोर्नैकधावृत्तेर्वृत्यनुप्रासः, **द्रुतविलम्बितवृत्तम्**, तल्लक्षणं यथा-

'द्रुतविलम्बितमाह नभौ भरौ' इति ।

अपि च -

९ वहति पवनो मन्दं मन्दं सुखाय च मारुते-
नयति मलयामोदं मार्गे परिश्रमशान्तये ।
विधुवति रजोवृन्दं वेगोत्थितं गगनाङ्गणे
भवति हि दृढस्नेहः सत्यं सुते पितुरौरसे ।।४।।

(इति विष्कम्भः)

(ततः प्रविशति हनुमतो मार्गमावृत्य स्थिता भयंकरी सुरसा । तत्पुरतः

---

९ अत्र वासवः, हनुमतो वायोः साहाय्यं निरूपयति- **वहतीति** ।

अन्वयः - पवनः मारुतेः सुखाय मन्दं मन्दं वहति, मार्गे परिश्रमशान्तये मलयामोदं नयति, गगनाङ्गणे वेगोत्थितं राजोवृन्दं विधुवति । हि पितुः औरसे सुते सत्यं दृढस्नेहः भवति ।

व्याख्या - **पवनः** = वातः, **नभस्वद्वातपवनपवमानप्रभञ्जनाः**, इत्यमरः। **मरुतस्यापत्यं पुमान् मारुतिस्तस्य मारुतेः** = हनुमतः, **सुखाय** = आनन्दाय, तादर्थ्ये चतुर्थी। **मन्दं मन्दम्**= शनैः शनैः, **वहति** = गच्छति । **च** = पुनः, **मार्गे**= पथि, **परिश्रमस्य** = श्रान्तेः, **शान्तये** = अपनोदाय, **मलयस्य** = श्रीखण्डस्य, **आमोदम्** = सुगन्धम्, **नयति** = प्रापयति । **तथैव गगनम् एव अङ्गणम्, तस्मिन् गगनाङ्गणे** = आकाशप्राङ्गणे, **वेगेन** = जवेन, हनुमत इति शेषः । **उत्थितम्** = उद्गतम्, **रजसाम्** = धूलीनाम्, **वृन्दम्** = समूहम्, **विधुवति** = दूरीकरोति, **तदेव समर्थयति-हि** = यतः, **पितुः** = जनकस्य, **उरसि जातः, औरसस्तस्मिन् औरसे**= स्वपाणिगृहीतायां स्वयमेवोत्पादिते, **पुत्रे** = सुते, **स्वक्षेत्रे संस्कृतायान्तु स्वयमुत्पादयेद्धि यम्** । **तमौरसं विजानीयात् पुत्रं प्राथमकल्पिकमिति मनुः**। **सत्यम्** = नूनम्, **दृढः** = स्थिरः, **स्नेहः** = प्रेम, **भवति** = जायते ।

सरलार्थः - पवनो हनुमतः सुखाय शनैः वहति, परिश्रममपनेतुं मलयसुगन्धं नयति, गगने तद्वेगोत्थितं रजोवृन्दञ्च दूरीकरोति । एतेन ज्ञायते यत्- पितुरौरसे सुते प्रेम दृढं भवतीति सत्यमिति ।

गगनमेवाङ्गणमिति **रूपकालङ्कारः**, प्रथमद्वितीयतृतीयचरणान्तर्गतवाक्यार्थस्य चतुर्थचरणान्तर्गतवाक्यार्थेन समर्थनात्, **अर्थान्तरन्यासः**, तयोर्निरपेक्षतयावस्थाना-**त्संसृष्ट्यलङ्कारः** ।

(इति विष्कम्भकः)

विष्कम्भकलक्षणं यथा- **वृत्तवर्तिष्यमाणानां कथांशानां निदर्शकः** ।

स्थितः पवनात्मजश्च)

१० **सुरसा** हंहो वलीमुह! किंति दाव तुअं कुदूहलादोविअ इदिसं समुद्दं लंहिदुं इच्छसि हठादो । कोऽसि तुअं मम् । [*हंहो वलीमुख! किमिति तावत्त्वं कुतूहलादिवेदृशं समुद्रं लङ्घयितुमिच्छसि हठात् । कोऽसि त्वं, कथयस्व माम् ।*]

११ **हनुमान्-** (आत्मगतम्) कथमियमन्तरायमूर्तिरिव करालवदनान्तर्गतविशाल-रसनां परिदर्शयन्ती मदीयमार्गमवरुणद्धि । तथा हि -

१२ **दंष्ट्राकरालवदना ग्रसतीव सर्वं**
लोलां विशालरसनां परिदर्शयन्ती ।
दृग्ज्वालयाऽतितरसा दहतीव लोकं
किंवाऽऽशरी किमु सुरी किमुतासुरीयम् ।।५।।

संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः । मध्येन मध्यमाभ्यां वा पात्राभ्यां संप्रयोजितः । शुद्धः स्यात् स तु संकीर्णो नीचमध्यमकल्पितः ।

(ततः **हनुमतः** = पवनसुतस्य, **मार्गम्** = पन्थानम्, **आवृत्य** = आच्छाद्य स्थिता, **भयङ्करी** = भीषणा, **सुरसा** = नागमाता, प्रविशति । **तस्याः पुरतः**= अग्रे, **स्थितः** = विद्यमानः, **पवनस्य** = वायोः, **आत्मजः** = सुतश्च प्रविशति, इत्यर्थः)

१० **सुरसा-** **हंहो वलीमुख** = भो मर्कट! **किमिति** = किमर्थम्, **तावदिति** वाक्यालङ्कारे, **त्वम्** = भवान्, **कुतूहलात् इव** = कौतुकात् इव, **हठात्** = प्रसभम्, **ईदृशम्** = ग्राहमकरादिभिर्व्याप्तम्, **समुद्रम्**= सागरम्, **लङ्घयितुम् इच्छसि** = उल्लङ्घ्य पारे गन्तुं वाञ्छसि ? **त्वम्** = भवान्, **कः** = किन्नामकः, असि ? **माम्** = सुरसाम्, **कथयस्व** = वद ।

११ **हनुमान्-** (आत्मगतम्) **इयम्** = एषा, **अन्तरायस्य** = विघ्नस्य, **मूर्तिरिव** = विग्रह इव, **कराले** = भीषणे, **वदने** = मुखे, **अन्तर्गता** = अभ्यन्तरस्थिता, **विशाला**= विस्तृता, **या रसना** = जिह्वा, **ताम् परिदर्शयन्ती** = प्रकाशयन्ती, **कथम्** = कस्मात्, **ममायम् मदीयः** = मामकीनश्चासौ **मार्गः** = पन्थास्तम् **अवरुणद्धि**= निरुणद्धि । तथा हि-

१२ अत्र हनुमान् सुरसायाः स्वरूपं वर्णयति- **दंष्ट्रेति** ।

अन्वयः दंष्ट्राकरालवदना इयम् लोलां विशालरसनां परिदर्शयन्ती सर्वं ग्रसति इव अतितरसा दृग्ज्वालया लोकम् दहति इव (इयम्) आशरी किंवा सुरी

अथ च -

१३ मुष्ट्या किं हन्मि वत्से वमतु बहुतरं लोहितं लोहिताक्षी
किं वा पादेन हन्यां शिरसि पृथुशिरो जायतां निःशिरस्त्वम् ।
किं वा वेगेन साकं प्रविशतु मम सा पत्तनं राक्षसाना-
मित्थं मे भाति चित्ते तदपि च किमहं निश्चिनोम्यद्य कर्तुम् ।।६।।

किमुत आसुरी किमु ।

व्याख्या- दंष्ट्रया = दशनेन, **करालम्** = भीषणम्, **वदनम्** = मुखम्, **यस्याः सा, इयम्** = एषा सुरसा, **लोलाम्** = चञ्चलाम्, **विशाला चासौ रसना, विशालरसना, ताम् विशालरसनाम्** = विस्तृतजिह्वाम्, **रसज्ञा रसना जिह्वा,** इत्यमरः। **परितः** = सर्वतः, **दर्शयन्ती** = प्रकाशयन्ती, **सर्वम्** = अखिलम्, **जगत्**= लोकम्, **ग्रसति इव** = भक्षयति, इव । **अतितरसा** = अतिशयवेगेन, **दृशोः** = नयनयोः, **ज्वालया** = कीलेन, **लोकम्** = भुवनम्, **दहति** = भस्मीकरोति इव दृश्यते, इति शेषः। **अतः इयम्** = सुरसा, **आशृणातीति आशरः** = राक्षसः, **तस्य स्त्री आशरी** = राक्षसी, **किं वा** = अथवा, **सुरस्य स्त्री सुरी** = देवी । **किम्** = उत्प्रेक्षायाम्, **किमुत** = अथवा, **इयम् असुरस्य स्त्री असुरी** = असुरस्त्री वर्तते।

सरलार्थः - इयं सुरसा द्रंष्टया करालवदना, चपलां जिह्वां प्रदर्शयन्ती सर्वं जगत् ग्रसतीव दृश्यते, वेगवत्या नयनज्वालया लोकं दहतीव विभाव्यते । इयम् राक्षसी, देवी, असुरस्त्री वा विद्यते किमु, इति ।

अत्रोत्प्रेक्षासन्देहानां निरपेक्षतया **संसृष्टिः** । **वसन्ततिलकावृत्तम्** ।

१३ अत्र हनुमान् सुरसां वीक्ष्य स्वस्य कर्तव्यं विमृशति- **मुष्ट्या किमिति** ।

अन्वयः - मुष्ट्या वत्से हन्मि किम् ? (येन) लोहिताक्षी बहुतरं लोहितं वमतु । वा पादेन शिरसि हन्याम् किम् ? येन पृथुशिरः निःशिरस्त्वम् जायताम्, किंवा सा मम वेगेन साकम् राक्षसानाम् पत्तनम् प्रविशतु । इत्थम् मे चित्ते भाति, तदपि अद्य अहम् किं कर्तुम् निश्चिनोमि ।

व्याख्या- मुष्ट्या = संग्राहेण, **वत्से** = वक्षसि, **उरो वत्सञ्च वक्षश्चेत्यमरः**। **हन्मि** = ताडयामि किम् ? **येन कारणेन लोहिते अक्षिणी यस्याः सा लोहिताक्षी**= रक्तनयना, **सा बहुतरम्** = अत्यधिकम्, **लोहितम्** = रुधिरम्, **रुधिरेऽसृक्लोहितास्त्र-रक्तक्षतजशोणितमित्यमरः** । **वमतु** = उद्गिरतु । **वा** = अथवा, **पादेन** = चरणेन, **शिरसि** = मस्तके, **हन्याम्** = ताडयेयम्, **किम्** । **येन कारणेन पृथु च तत् शिरः पृथुशिरः** = विशालमस्तकम्, **उत्तमाङ्गं शिरः शीर्षं मूर्धा ना मस्तकोऽस्त्रियाम्**, इत्यमरः । **निःशिरसो भावः निःशिरस्त्वम्** = उत्तमाङ्गहीनत्वम्,

१४ भवतु । तावदेनामेवं पृच्छामि । (प्रकाशम्) भो भो स्त्रीसत्वावयवेऽज्ञात-जातिविशेषे कथय किमर्थं सिंहसमक्षं हरिणीव मम पुरतस्तिष्ठसि । अपेहि तावत् । न चेन्मार्जारस्य मूषिकायामिव मदीया दन्ता नखराश्च युगपत्त्वयि निपतिष्यन्ति ।

१५ **वासवः** - सूत! नूनमयं पवनात्मजो महानुभावो भावः । कुतः

जायताम् = भवतु । **किं वा** = अथवा, **मम** = मत्कृतताडनजन्येन, **वेगेन** = जवेन, **साकम्** = सहैव, **सा** = सुरसा, **राक्षसानाम्** = क्रव्यादानाम्, **पत्तनम्** = पुरम्, **पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनमित्यमरः** । **प्रविशतु**= यातु, **इत्थम्**= पूर्वोक्तम्, **मे** = मम, हनुमत इत्यर्थः । **चित्ते** = चेतसि, **चित्तं तु चेतो हृदयमित्यमरः**। **भाति** = प्रतीयते, **तदपि** = तथापि, **अद्य** = अस्मिन् दिने, **अहम्** = हनुमान्, **किं कर्तुम्** = किं विधातुम्, **निश्चिनोमि** = निर्णयामि ।

सरलार्थः - मुष्ट्या वक्षसि हत्वा लोहिताक्षीं रधिरं वमयामि, अथवा, शिरसि पादेन, ताडयित्वा निःशिरस्त्वं प्रापयामि यद्वा मम वेगेन सहैव राक्षसपुरीं प्रवेशयामि इति सन्देहेऽहमधुना किं कर्तुमुचितमिति निश्चिनोमीति ।

अत्र, **सन्देहालङ्कारः** । **स्रग्धरावृत्तम्** ।

१४ **भवतु** = अस्तु, **तावत्** = आदौ, **एनाम्** = सुरसाम्, **एवम्** = इत्थम्, **पृच्छामि** = प्रश्नं करोमि । (**प्रकाशम्** = स्फुटम्) **भो भोः**, इति संबोधनम् । **स्त्रीसत्वस्य** = नारीजातेः, **अवयवाः** = अङ्गानि, **यस्यास्तत्संबुद्धौ स्त्रीसत्वावयवे** = नार्यङ्गे, **द्रव्यासुव्यवसायेषु सत्त्वमस्त्री तु जन्तुषु** इत्यमरः । **न ज्ञातः जातिविशेषो यस्यास्तत्संबुद्धौ अज्ञातजातिविशेषे** = अविदितजाते!, **कथय** = वद, **किमर्थम्**= कस्य हेतोः, **सिंहस्य समक्षम्, सिंहसमक्षम्** = केशरिणः पुरः, **हरिणी** = मृगीव, **मम** = मे, हनुमतः इत्यर्थः। **पुरतः** = अग्रे, **तिष्ठसि** = निवससि? **अपेहि तावत्**= शीघ्रमपगच्छ । **नो चेत्** = अन्यथा, **मार्जारस्य** = विडालस्य, **मूषिकायाम् इव**= आखौ इव, **मम इमे मदीयाः** = मत्संबन्धिनः, **दन्ताः** = दशनाः, **नखराः** = नखाश्च, **नखमुख** इति रः । **युगपत्** = सकृत्, **त्वयि** = भवति, **निपतिष्यन्ति** = प्राप्स्यन्ति।

१५ **वासवः** - **भो सूत** = हे सारथे! **अयम्** = एषः, **पवनस्य** = वायोः, **आत्मजः** = सुतो हनुमान्, **महान् अनुभावो यस्य सः, महानुभावः** = प्रभावशाली, **अनुभावः प्रभावे च सताञ्च मतिनिश्चये**, इत्यमरः । **भावः** = विद्वानस्ति, **भावो विद्वानित्यमरः**। **कुतः** = कस्मादिति चेदाह-

१६ जात्याऽयं वानरत्वात्स्वनखरदशनादर्शनादेव पूर्वं
स्त्रीत्वात्सोऽभर्त्सयत्तां कथमपि परुषां वाचमेवाभ्यवोचत्।
स्त्रीहत्यादूयमानो रघुतिलककृतेः साधने दत्तदृष्टि-
र्नीतिज्ञः शास्त्रवेत्ता कविरयमपरो भाति नायं कपिर्मे ।।७।।

१७ मातलिः - अवितथमायुष्मतो वचनम् । ममापि तथैव भाति ।

---

१६ अत्र वासवो हनुमतश्चातुर्यं निरूपयति- जात्येति ।

अन्वयः - अयम् जात्या वानरत्वात् स्वनखरदशनादर्शनाद् एव पूर्वम् स्त्रीत्वात् ताम् अभर्त्सयत् । स्त्रीहत्यादूयमानः रघुतिलककृतेः साधने दत्तदृष्टिः सः कथमपि परुषां वाचम् एव अभ्यवोचत् । नीतिज्ञः शास्त्रवेत्ता अयम्, अपरः कविः अयं कपिः न (इति) मे भाति ।

व्याख्या- अयम् = एषः, हनुमान्, **जात्या** = जन्मना, **वानरस्य भावः वानरत्वम्, तस्माद् वानरत्वात्** = कपितया, **स्वस्य** = निजस्य, **नखराणाम्** = नखानाम्, **दशनानाम्** = दन्तानाञ्च, **अदर्शनात्** = अप्रकटनात् **एव पूर्वम्** = प्राक् **स्त्रिया भावस्त्रीत्वम् तस्मात् स्त्रीत्वात्** = नारीतया, **ताम्** = सुरसाम् **अभर्त्सयत्**= वाचाऽतर्जयत् । **स्त्रियाः** = नारीजातेः, **या हत्या** = वधः, **तया दूयमानः** = चिन्तितः, यदि सुरसाया वधो भवेत्तदा स्त्रीहत्या जायेत इति धिया चिन्तित इत्यर्थः। **रघूणाम्** = रघुवंशीयभूपानाम्, **तिलकः** = ललामभूतः, **रामस्तस्य कृतेः** = सीतान्वेषणकर्मणः, **साधने** = संपादने, **दत्ता दृष्टिर्येन सः, दत्तदृष्टिः** = धृतचेताः, **कथमपि** = संयमं विधाय, **परुषाम्** = कठोराम्, **वाचम्** = वाक्यमेव, **अभ्यवोचत्**= अकथयत् । **अतः नीतिं जानातीति नीतिज्ञः** = नयवेत्ता, **इगुपधज्ञाप्रीकिरः कः**, इति कः । **शास्त्रस्य** = आन्वीक्षिक्यादेः, **वेत्ता** = ज्ञाता, विद् + तृच् । **अयम्** = एषः, **अपरः** = भिन्नः, **कविः** = शुक्राचार्यः, **उशना भार्गवः कविरित्यमरः** । **अस्ति कपिः** = वानरो नास्तीति, **मे** = मम, **भाति** = प्रतीयते ।

सरलार्थः - हनुमान् नखरदशनं पूर्वमप्रदर्श्य स्त्रीत्वात् सुरसामभर्त्सयत् । स्त्रीहत्यादूयमानो रामस्य कार्ये दत्तदृष्टिरसौ परुषां वाचमेव अवोचत् । अतोऽयं शास्त्रज्ञो नीतिविदपरः शुक्राचार्योऽस्ति न कपिरिति, अहं मन्ये, इति ।

अत्र हनुमतः कपित्वं निषिध्य कवित्वस्य स्थापनात्, **अपह्नुत्यलङ्कारः**, **स्रग्धरावृत्तम्** ।

१७ **मातलिः - आयुष्मतः** = भवतः, **वचनम्** = वाक्यम्, **अवितथम्** = सत्यमस्ति, **ममापि** = मातलेरपि, **तथैव** = यत्त्वया कथितम् तद्वदित्यर्थः । **भाति** = प्रतीयते।

१८ **सुरसा** - शृणुहि रे मक्कड! दसनणहरभअं दंसिअ काणणे मिअसावअं वा ग्गामे वालअं परित्तासेहि । ण अहं तुह्मेरिसाणं वणौअसां भच्छणेण बिभेमिं। विहिणा समप्पिदं भक्खणं तुअम् । दाणिं बुभुक्खा खादेदिविअ मम् । ता सीग्धं मे मुहं पविस । [*शृणु रे मर्कट! दशननखरभयं दर्शयित्वा कानने मृगशावकं ग्रामे वा बालकं परित्रासय । नाहं त्वादृशानां वनौकसां भर्त्सनेन बिभेमि । विधिना समर्पितं भक्षणं त्वम् । इदानीं बुभुक्षा खादतीव माम् । तच्छीघ्रं मे मुखं प्रविश ।*]

१९ **हनुमान्** - (स्वगतम्) अहो कथमियं मामेव भर्त्सयति । भवतु तावदेनामेवं ब्रवीमि । (प्रकाशम्) भो अम्ब! इदानीं मे महतः कार्यातिपातान्नास्त्यवकाशो यद्भवत्या सहानुलपेयम् । पश्चात्कार्यसिद्धिं कृत्वा पुनरागत्य भवत्या मुखं प्रवेक्ष्यामि ।

---

१८ **सुरसा** - **रे मर्कट** = भो कपे! **शृणु** = आकर्णय । **दशनानाम्** = दन्तानाम्, **नखराणाम्** = नखानाञ्च, **भयम्** = भीतिम्, **दर्शयित्वा** = प्रदर्श्य, **कानने** = विपिने, **मृगस्य** = हरिणस्य, **शावकम्** = शिशुम्, **वा** = अथवा, **ग्रामे** = जनपदे, **बालकम्** = माणवकम्, **परित्रासय** = त्रासमुत्पादय । **अहम्** = सुरसा, **तव सदृशास्त्वादृशास्तेषाम् त्वादृशानाम्** = त्वत्तुल्यानाम्, **वनम् ओको येषान्ते वनौकसस्तेषाम्, वनौकसाम्** = वनवासिनाम्, **वानराणाम् भर्त्सनेन** = तर्जनेन, **न बिभेमि** = न भीतिमनुभवामि । **विधिना** = दैवन, **भक्षणम्** = भोजनरूपम्, **त्वम्** = वानरः, **समर्पितः** = मह्यं भोजनं दत्तम् । **इदानीम्** = अधुना, **भोक्तुमिच्छा बुभुक्षा** = भक्षणेच्छा, **माम्** = सुरसाम्, **खादति** = भक्षयति इव । **तत्** = तस्मात्, **शीघ्रम्** = द्रुतम्, **मे** = मम, (सुरसायाः) **मुखम्** = वदनम्, **प्रविश** = प्रवेशं कुरु ।

१९ **हनुमान्** - (**स्वगतम्** = आत्मगतम्) **अहो** = आश्चर्यम्, **कथम्** = कुतः, **इयम्** = सुरसा, **माम्** = हनुमन्तम् एव, **भर्त्सयति** = तर्जयति । **भवतु** = अस्तु, **तावत्** = प्रथमम्, **एनाम्** = सुरसाम्, **एवम्** = इत्थम्, **ब्रवीमि** = कथयामि ।

(**प्रकाशम्** = सर्वश्राव्यम्) **भोः अम्ब** = हे मातः! **इदानीम्** = अधुना, **मे** = मम, **महतः** = विशालस्य, **कार्यस्य** = कर्मणः, **अतिपातात्** = आगमनात्, **अवकाशः** = अवसरः, **नास्ति** = न वर्तते, **येन** = कारणेन, **भवत्या** = त्वया सह, **अनुलपेयम्** = संवदेयम् । **पश्चात्** = अनु, **कार्यस्य** = कर्मणः, **सिद्धिं** = संपादनम्, **कृत्वा** = विधाय, **पुनः** = भूयः, **आगत्य** = एत्य, **भवत्याः** = तव, **मुखम्** = वदनम्, **प्रवेक्ष्यामि** = प्रवेशं विधास्यामि ।

२० **वासवः** - अस्ति मे श्रोतुं कौतुकम् । अतः किमुत्तरं दास्यति सुरसा ।

२१ **मातलिः** - ममाप्यस्ति कुतूहलम् ।

२२ **सुरसा** - हंहो साहामिअ! कधं तुअं मे वअणादो विमुचिअ गमिस्ससि । गच्छ गच्छ दाणिं जेव्व तुमं खादेमि । पेक्खस्स मे मुहवीज्जम् । [*हंहो शाखमृग! कथं त्वं मे वदनाद्विमुच्य गमिष्यसि । गच्छ गच्छ, इदानीमेव त्वां खादामि । पश्य मे मुखवीर्यम् । तथा हि* -]

२३ **अग्गे सक्कस्स हत्थी वि भवदु जइ वा किंवि भक्खेमि सव्वं**
अह्मो तुह्मारिसाणं ण हि मम कअलं होदि साहामिआणम् ।
सीग्घं ले खुद्द! दाणिं पविस मम मुहं देत्थिणो मे मुहादो
मोक्खो इन्दो जमो वा जदि भवदु तुमं मोचिदुं णो समत्थो ।।८

---

२० **वासवः** - मे = मम, वासवस्येत्यर्थः । **श्रोतुम्** = आकर्णयितुम्, **कौतुकम्** = कुतूहलम्, **अस्ति** = विद्यते । **अतः** = अस्मात्परतः, **सुरसा** = नागमाता, **किम् उत्तरम् दास्यति** = किं कथयिष्यतीत्यर्थः ।

२१ **मातलिः** - **मम** = मातलेरपि, **कुतूहलम्** = कौतुकम्, **अस्ति** = विद्यते ।

२२ **सुरसा** - **हंहो शाखामृग** = हे मर्कट! **कथम्** = कस्मात्, **त्वम्** = भवान्, **मम** = सुरसायाः, **वदनात्** = मुखात्, **विमुच्य** = मुक्तो भूत्वा, **गमिष्यसि** = यास्यसि ? **गच्छ गच्छ** = याहि याहि, **इदानीम्** = अधुनैव, **त्वाम्** = कपिम्, **खादामि** = भक्षयामि । **मे** = मम, सुरसाया इत्यर्थः । **मुखस्य** = वदनस्य, **वीर्यम्** = पराक्रमम्, **पश्य** = विलोकय । **तथा हि** = यतः -

२३ अत्र सुरसा हनुमन्तं पुरः स्वसामर्थ्यमभिव्यनक्ति- **अग्र इति** ।

अन्वयः - अग्रे शक्रस्य हस्ती यदि वा किञ्चित् अपि भवतु सर्वं भक्षामि। अंहो मम त्वादृशानाम् शाखामृगाणाम् कवलम् न हि भवति । रे क्षुद्र! इदानीम् शीघ्रम् मम मुखम् प्रविश । ते मम मुखात् मोक्षः न अस्ति । इन्द्रः वा यमः भवतु त्वाम् मोक्तुम् न समर्थः ।

व्याख्या- अग्रे = पुरः, ममेति शेषः । **शक्रस्य** = इन्द्रस्य, **हस्ती** = ऐरावतः, **यदि वा** = अथवा, **किञ्चिदपि** = तद्भिन्नमपरमपि वस्तु, **भवेत् सर्वम्**= निखिलम्, **भक्षामि** = खादामि । **अंहो** = भोः, **मम** = सुरसायाः, **तव सदृशाः**, **त्वादृशास्तेषाम्**, **शाखामृगाणाम्** = वानराणाम्, **कवलम्** = ग्रासैकमपि, **न हि भवति** = नैव जायते। **रे क्षुद्र** = रे निकृष्ट! क्षुद्रो दरिद्रे कृपणे निकृष्टेऽल्पनृशंसयोरि-

[*अग्रे शक्रस्य हस्त्यपि भवतु यदि वा किंचिद्भक्षामि सर्वं*
अंहो त्वादृशानां न हि मम कवलं भवति शाखामृगाणाम् ।
शीघ्रं रे क्षुद्र! इदानीं प्रविश मम मुखं तेऽस्ति नो मे मुखा-
न्मोक्ष इन्द्रो यमो वा यदि भवतु त्वां मोक्तुं न समर्थः ।।]

२४ **वासवः** - (आत्मगतम्) अहो साधु नागमातः ! साधु साधु । कथं तव भीरोरपीयं शूरता । तथा हि

२५ **चलति न वचसा मनो भवत्या हरिशतकोटिमतेव भूधरेन्द्रः ।**
भगवति सुरसे परीक्षणे त्वं कुशलतरामिततेजसां विभासि ।।९।।

त्यमरः। **इदानीम्** = अधुना, **शीघ्रम्**= द्रुतम्, **मम** = सुरसायाः, **मुखम्** = वदनम्, **प्रविश** = प्रवेशं कुरु । **ते** = तव, **मम** = सुरसायाः, **मुखात्** = वदनात्, **मोक्षः** = मुक्तिर्नास्ति= न विद्यते, **अभावे नह्यनापीत्यमरः** । **इन्द्रः** = शक्रः, **वा** = अथवा, **यमः** = धर्मराजः, **भवतु**= अस्तु, **त्वाम्** = भवन्तम्, **मोक्तुम्** = त्याजयितुम्, **न समर्थः** = न शक्तः।

सरलार्थः - मम पुरः ऐरावतो वा अन्यत् किमपि यद् भवेत् सर्वमेव भक्ष्यामि । त्वत्तुल्यो जन्तुस्तु कवलपरिमितमपि न जायते । त्वं सुरसायाः मुखान्निर्गन्तुं न शक्नोषि । शक्रः यमो वाऽस्तु त्वां मोचयितुं न समर्थः । अतः मम मुखे प्रविश, इति । **स्रग्धरावृत्तम्** ।

२४ **वासवः** - (**आत्मगतम्** = स्वगतम्) **अहो** = आश्चर्यम्, **भो नागमातः** = सुरसे! **साधु** = सम्यक्, **त्वया कथितम्** । **साधु साधु** = सम्यक् सम्यक् । **भीरोः** = भयशीलस्यापि, **तव** = भवतः, **इयम् शूरता** = वीरता, **कथम्** = कुतः ? **तथा हि**= यतः -

२५ अत्र वासवः परीक्षणकुशलायाः सुरसाया मनसो दृढत्वं निरूपयति- **भगवतीति** ।

अन्वयः - भगवति, सुरसे हरिशतकोटिमता वचसा भवत्या मनः हरिशत-कोटिमता (मेघेन) भूधरेन्द्र इव न चलति । अमिततेजसाम् परीक्षणे त्वम् कुशलतरा विभासि ।

व्याख्या- **भगः** = **ऐश्वर्यमस्यास्तीति भगवती, तत्संबुद्धौ, हे भगवति सुरसे** = नागमातः ! **हरिः** = हनुमान्, **तस्य शतं कोटयः** = धाराः, **अस्यास्तीति तेन हरिशतकोटिमता** = हनुमतः शतविधेन, **वचसा** = वाक्येन, **भवत्याः** = सुरसायाः, **मनः** = चित्तम्, **स्वान्तं हृन्मानसं मन** इत्यमरः । **हरिः** = शक्रस्तस्य, **शतकोटिः** = वज्रम्, **अस्यास्तीति तेन, हरिशतकोटिमता** = इन्द्रवज्रयुतेन मेघेन,

२६ हनुमान् - मैवं भण । सत्यं ते ब्रवीमि ।

२७ **नियमः किल मेऽश्यते हि किंचिन्न मया रामसमागमादृते ।**
हरिजं खलु मामवेहि भद्रे न भिया रामचरो विमुह्यति ।।१०।।

२८ सुरसा जाणेमि तुमं जादिए वाणलं फलाहारणिअमकइदवं । किं तेण । ण अहं दे जादिं पुच्छेमि । इदो मम मुहादो विमुचिअ जहिं कहिंवि गच्छ वा चिठ्ठ । ण अह्माणां अस्स पओअणम् । [*जानामि त्वां जात्या वानरं फलाहारनियमकैतवम् । किं तेन । नाहं ते जातिं पृच्छामि । इतो मम मुखाद्विमुच्य यत्र कुत्रचिद् गच्छ वा तिष्ठ । नास्माकमस्य प्रयोजनम् ।*]

भूधरेन्द्रः = नगेन्द्र इव, **न चलति** = न दोलायते । **मातुं शक्यम् मितम्, न मितम् अमितम्, अमितम्, तेजः येषान्तेषाम्, अमिततेजसाम्** = अनुपम-पराक्रमवताम्, **पुंसाम् परीक्षणे** = परितो विचारणे, **त्वम्** = सुरसा, **कुशला** = निपुणा, **विभासि** = विलोक्यसे ।

सरलार्थः - हे सुरसे! शतकोटिमता मेघेन भूधरेन्द्र इव शतधारया हनुमतो वाचा तव मनो नैव चलितम् । नूनमेवामिततेजसां परीक्षणे त्वं कुशलासि, इति।

अत्र श्लेषोत्थापितः **पूर्णोपमालङ्कारः** । **पुष्पिताग्रावृत्तम्** ।

२६ **एवम्** = इत्थम्, **मा भण** = न कथय । **ते** = तुभ्यम्, **सत्यम्** = अवितथम्, **ब्रवीमि** = कथयामि ।

२७ अत्र हनुमान् सुरसां प्रति स्वस्य निर्भयत्वं निरूपयति- **नियम इति** ।

अन्वयः - हि रामसमागमात् ऋते मया किञ्चित् न अश्यते इति मे नियमः, भद्रे! मां हरिजम् अवेहि, भिया रामचरः न विमुह्यति ।

व्याख्या- **हि** = यतः, **रामस्य समागमः, रामसमागमः तस्मात् राम-समागमात्**= दाशरथिसंपर्कात्, **ऋते**= विहाय, **मया**= हनुमता, **किञ्चित्** = किमपि, **न अश्यते** = न भुज्यते । **इति** = एष, **मे** = मम, **नियमः** = व्रतं विद्यते। अतोऽहं त्वयि दशननखरक्षतादि न करोमीत्याशयः। **भद्रे** = कल्याणि! **माम्** = हनुमन्तम्, **हरेर्जातः हरिजस्तम्** = वानरोद्भवम् **अथ च** पवनोत्पन्नम्, **यमानिलेन्द्रचन्द्रार्क-विष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु**, इत्यमरः। **अवेहि**= विद्धि। **भिया** = भयेन, **रामस्य चरः**= दारशथेर्दूतः, **न मुह्यति** = मोहं न लभते।

सरलार्थः - रामसमागमात्पूर्वं मया किमपि न खाद्यते । अतस्त्वां वचसैव सर्वं कथयामि । नाहं वानरसाधारणः, परमस्मि पवनसुतः, अतः दाशरथेर्दूतोऽहम् भयेन न मुह्यामि, इति । **पुष्पिताग्रावृत्तम्** ।

२८ **सुरसा - त्वाम्** = भवन्तम्, **फलानाम् आहारः, फलाहारस्तस्मिन् नियमः एव**

२९ **वासवः** - अहो अस्य हनुमतो बुद्धिमत्ता । तादृशं परुषवचः श्रुत्वापि सुरसां सुरसं वदति न तु विसंवदति । तथा सुरसायाश्च विवदिषन्त्याः कथं वाक्पटुता। शृणु भो मातले !

३० **दीर्घाकारा मात्रा पवनजवाक्यादुरीकृता मात्रा ।**
कपिना विरोद्धुकामा धन्येयं नागमातार्या ।।११।।

कैतवो यस्य सः, फलाहारनियमकैतवस्तम् = फलभोजननियमछद्मम्, **वानरम्**= मर्कटम्, **जानामि** = वेद्मि। **तेन किम्** = छद्मना न किमपि भवतीत्यर्थः। **अहम्**= सुरसा, **ते** = तव, **जातिम्** = वानरभावम्, **न पृच्छामि** = न ज्ञातुमिच्छामि। **इतः**= अस्मात् स्थानात्, **मम** = सुरसायाः, **मुखात्** = वदनात्, **विमुच्य** = मुक्तो भूत्वा, **यत्र कुत्र चित्** = यस्मिन् कस्मिन्नपि स्थाने, **गच्छ** = याहि, **वा** = अथवा, **तिष्ठ**= निवस, **अस्य** = एतस्य, गमनस्य स्थितेर्वा, **अस्माकम्** = सुरसादीनाम्, **प्रयोजनम्**= अर्थः, **न** = नास्तीति भावः ।

२९ **वासवः - अहो** = आश्चर्यम्, **अस्य** = पुरोवर्तिनः, **हनुमतः** = पवनसुतस्य, **बुद्धिमत्ता** = प्रज्ञावत्ता । **तादृशम्** = अधुनैव सुरसया निगदितम्, **परुषम्** = कठोरम्, **वचः** = वाक्यम्, **श्रुत्वा अपि** = आकर्ण्य अपि, **सुरसाम्** = नागमातरम्, **सुरसम्** = कोमलवर्णं यथा स्यात्तथा, **वदति** = निगदति । **न तु विसंवदति** = विवदति । **विवदिषतीति विवदिषन्ती, तस्याः विवदिषन्त्याः** = विवादं विधातुमिच्छन्त्याः, **सुरसायाः** = नागमातुश्च, **कथम्** = केन प्रकारेण, **वाक्पटुता**= वचश्चातुर्यम्, आगता, इति शेषः। **भोः मातले** = हे सारथे! इति सम्बोधनपदम्। **शृणु** = आकर्णय ।

३० अत्र वासवः सुरसाया धन्यत्वं निरूपयति- **दीर्घाकारेति** ।

अन्वयः - पवनजवाक्यात् मात्रा दीर्घाकारा मात्रा उरीकृता कपिना विरोद्धुकामा इयम् नागमाता धन्या ।

व्याख्या - पवनाज्जातः पवनजः = हनुमान्, **तस्य वाक्यात्** = हरिजं खलु मामवेहीत्यादिवचनात्, **मात्रा**= सुरसया, **दीर्घ आकारो यस्याः सा दीर्घाकारा**= विपुलाकृतिः, **मात्रा** = परिणामः, **उरीकृता** = स्वीकृता। **कपिना**= वानरेण हनुमता, **विरोद्धुं कामो यस्याः सा, विरोद्धुकामा** = विग्रहितुमिच्छन्ती, **इयम्** = एषा, **आर्या** = श्रेष्ठा, **नागमाता** = सर्पजननी, सुरसेत्यर्थः । **धन्या** = प्रशंसनीया । अत्र पिङ्गलनागप्रतिपादितार्याछन्दोऽपि व्यज्यते । येन मात्राया दीर्घत्वमप्युरीकृतम्, सोऽयं हनुमान् महावैयाकरण आसीदित्यपि प्रतीयते ।

सरलार्थः - हनुमतो वाक्यं निशम्य विशालं कलेवरं धृत्वा तद्विरोधं कर्तुमिच्छन्तीयं सुरसा धन्या वर्तते इति । **अनुष्टुब्वृत्तम्** ।

३१ **हनुमान्** - (स्वगतम्) कथमियं विरोद्धुमिच्छत्येव । इदं ऋजुबुद्ध्या वा कुटिलधियोदितं भवेत् । अस्ति मेऽत्र द्वापरः । भवत्विदानीं, स्पष्टं पृच्छाम्येनाम्। (प्रकाशम्) शृणु रे कुटिलचारिणि! किं त्वया न श्रुता सूर्यवंशतिलकस्य दाशरथेर्विशालकीर्तिः ।

३२ **सुरसा** - सुणीअदि तस्य राएसिणो सुचरिदम् । किं तुअं तस्य कीत्तिं चोरिइअ पलाइदुं इच्छसि । [*श्रूयते तस्य राजर्षेः सुचरितम् । किं त्वं तस्य कीर्तिं चोरयित्वा पलायितुमिच्छसि ?*]

३३ **हनुमान्** - रे दुष्टबुद्धे! मम पलायनं मरणमेव जानीहि । कुतो मम पलायनं संभाव्यते त्वत्तः । किन्तु तस्य राजर्षे रामस्य कीर्तिं श्रावयामि । येन त्वं मन्मुष्टिहतापि तद्यशःश्रवणवैभवाद् दुरधिगमं पदं प्राप्स्यसि ।

---

३१ हनुमान् - (स्वगतम्= आत्मगतम्) **इयम्** = एषा सुरसा, **कथम्** = केन प्रकारेण, **विरोद्धुम्** = विग्रहं विधातुमेव, **इच्छति** = वाञ्छति । **इदम्** = एतत्, **ऋजुबुद्ध्या**= सरलधिया, **वा** = अथवा, **कुटिलधिया** = कपटपूर्णया बुद्ध्या, **उदितम्**= कथितम्, **भवेत्** = स्यात् । **अत्र** = अस्मिन् विषये, **मे** = मम विचारे, **द्वापरः** = सन्देहः, अस्तीति शेषः । **भवतु** = अस्तु, **इदानीम्** = अधुना, **स्पष्टम्** = स्फुटम्, **एनाम्** = सुरसाम्, **पृच्छामि** = जिज्ञासामुपस्थापयामि। (**प्रकाशम्** = स्फुटम्) **कुटिलं चरतीति तत्संबुद्धौ रे कुटिलचारिणि** = वक्रगामिनि! रे इति अनादरसूचकं संबोधनबोधकम् पदम् । कुटिलाचारवतीत्यर्थोऽपि प्रतीयते । **त्वया** = भवत्या, **सूर्यवंशतिलकस्य** = अर्ककुलललामस्य, **दशरथ-स्यापत्यं पुमान् दाशरथिस्तस्य दाशरथेः** = रामस्य, **विशाला चासौ कीर्तिः विशालकीर्तिः** = विपुलं यशः, **न श्रुता** = न आकर्णिता, **किम्** ?

३२ सुरसा - **तस्य राजर्षेः** = रामस्य, **सुचरितम्** = सुकृत्यम्, **श्रूयते** = आकर्ण्यते। **त्वम्** = भवान्, **तस्य** = रामस्य, **कीर्तिम्** = यशः, **चोरयित्वा** = मुषित्वा, **पलायितुम्** = दूरे यातुम्, **इच्छसि** = वाञ्छसि किम् ?

३३ हनुमान् - रे, **दुष्टा बुद्धिर्यस्यास्तत्संबुद्धौ दुष्टबुद्धे** = कपटमते! **मम** = हनुमतः, **पलायनम्**= त्वद्भयेन इतो धावनम्, **मरणम्**= मृत्युरेव, **जानीहि**= विद्धि। **त्वत्तः**= भवत्याः, **मम** = हनुमतः पलायनम्, **कुतः** = कस्मात्, **संभाव्यते** = संभवति ? **किन्तु** = परन्तु, **तस्य** = प्रसिद्धस्य, **राजा चासौ ऋषिः, राजर्षिः तस्य राजर्षेः**= नृपर्षेः, **रामस्य** = दाशरथेः, **कीर्तिम्** = यशः, **श्रावयामि** = आकर्णयामि । **येन**= यशःश्रावणेन, **त्वम्** = भवती, **मम मुष्ट्या हता** = घातिता अपि, **तस्य** = रामस्य,

३४ **सुरसा** - (सक्रोधमिव) हंहो दुट्ठ वाणल, किं तुअं धम्माधिआरो व्वह्मणो व पउराणिओ भाओ जेण मं धम्मं उवदिससि। वणलाणं उवदेसेण ण कस्सचि भधं होदि। किं सद्दुलो गाधां स्सावएदि। [*हंहो दुष्टवानर, किं त्वं धर्माधिकारो ब्राह्मणो वा पौराणिको भावः, येन मां धर्ममुपदिशसि। वानराणामुपदेशेन न कस्यचिद् भद्रं भवति। किं शार्दूलो गाथां श्रावयति।*]

३५ **हनुमान्** - (सरोषम्) अरे रे पापचारिणि! किं त्वं रामाभिभूतायाः शूर्पणखाया अन्तिकासि। येन त्वां भगिनीकर्णनासिकाच्छेदनरोषाद्रामचरितं कोपयतीव।

३६ **मातलिः** - सत्यं वदति हनुमान्। कुतः। पश्यतु महेन्द्र !

यशसः = कीर्तेः, **श्रवणस्य** = आकर्णनस्य, **वैभवात्** = सामर्थ्यात्, **दुःखेनाधिगन्तुं शक्यम् दुरधिगमम्** = दुष्प्रापम्, **पदम्** = स्थानम्, **प्राप्स्यसि** = लप्स्यसे।

३४ **सुरसा** - (**सक्रोधम्** = सकोपमिव) **हंहो** = भोः, **दुष्ट** = दुरात्मन्! **वानर** = कपे! **त्वम्** = भवान्, **धर्मे अधिकारो यस्य सः, धर्माधिकारः** = धर्मशास्त्री **ब्राह्मणः**= विप्रः, **वा** = अथवा, **पुराणमधीते वेत्ति वा पौराणिकः** = अष्टादशमहापुराणानामुपपुराणानाञ्च ज्ञाता, **भावः**= विद्वान् असि, **येन**= कारणेन, **माम्**= सुरसाम् **धर्मम् उपदिशसि** = निर्दिशसि। **वानराणाम्** = कपीनाम्, **उपदेशेन** = शिक्षया **कस्यचित् अपि भद्रम्**= कल्याणम्, **न भवति** = न जायते। **शार्दूलः** = व्याघ्रः **गाथाम्** = गीतम्, **श्रावयति**= श्रवणं कारयति किम्? अपि तु न श्रावयतीत्यर्थः।

३५ **हनुमान्** - (**सरोषम्** = रोषेण सहितं **यथा स्यात्तथा**) **अरे रे** = अपमानजनकसंबोधनवाचकः शब्दः, **पापं चरितुं शीलमस्यास्ति सा पापचारिणी, तत्संबुद्धौ**, हे **पापचारिणि! त्वम्**= भवती, **रामेण** = दाशरथिना, **अभिभूतायाः**= तिरस्कृतायाः **शूर्पा इव नखा यस्याः सा शूर्पणखा तस्याः शूर्पणखायाः, अन्तिका** = ज्येष्ठभगिनी, **ज्येष्ठभगिन्याञ्च नाट्योक्तौ कीर्त्यतेऽन्तिका**, इति मेदिनी। **असि**= विद्यसे किम्? **येन** = कारणेन, **त्वाम्** = सुरसाम्, **भगिन्याः** = शूर्पणखायाः **कर्णयोः** = श्रवणयोः, **नासिकाया** = नासायाश्च, **छेदनेन** = कर्तनेन, **यो रोषः** = क्रोधस्तस्मात्, **रामस्य** = दाशरथेः, **चरितम्** = चरित्रम्, **कोपयति** = क्रोधयति इवेति, **उत्प्रेक्षालङ्कारः**।

३६ **मातलिः** - **हनुमान्** = पवनपुत्रः, **सत्यम्** = अवितथम्, **वदति** = ब्रूते। **कुतः** = कस्मात्। **भो महेन्द्र** = शक्र! **पश्यतु** = विलोकयतु।

३७ रोषातिरिक्तनयना विकारालवक्त्रा
दीर्घोदरी विपुलगात्रभयङ्करी सा ।
क्रोधातिविस्फुरितलोलतराधरेयं
रात्रिञ्चरीव सुरसा प्रतिभाति सत्यम् ।।१२।।

३८ सुरसा - हंहो अवद्धमुह कवे! कहेहि अदो दे विकट्ठणं अवसिट्ठम् । [*हंहो अबद्धमुख कपे! कथयातस्ते विकत्थनमवशिष्टम् ।*]

३९ हनुमान् - तस्य राजर्षेः स्वयंवरपरिणीता जनकसुता सीता मुमूर्षुणा राक्षसाधमेन रावणेन सच्छलं हृत्वा लङ्का नीता ।

---

३७ अत्र मातलिर्हनुमतो वाक्यमेव समर्थयन् सुरसाया रात्रीञ्चरीत्वेनोत्प्रेक्षते- **रोषातिरिक्त-नयनेति** ।

अन्वयः - रोषातिरिक्तनयना विकरालवक्त्रा, दीर्घोदरी विपुलगात्रभयङ्करी क्रोधातिविस्फूरितलोलतराधरा सा इयम् सुरसा सत्यम् रात्रिञ्चरी इव प्रतिभाति ।

व्याख्या- रोषेण = क्रोधेन, **अतिशयेन रक्ते नयने यस्याः सा, रोषातिरक्तनयना** = क्रोधातिशयारुणनेत्रा, **विकरालम्** = भीषणम्, **वक्त्रम्** = वदनम्, **यस्याः सा, दीर्घम्** = लम्बम्, **उदरम्** = जठरम् **यस्याः सा, दीर्घोदरी**= लम्बोदरी, **विपुलेन** = विशालेन, **गात्रेण** = शरीरेण, **भयङ्करी** = भीषणा, **क्रोधस्य**= कोपस्य, **अतिशयं यद् विस्फुरितम्**= स्फुरणम्, **तेन लोलतरौ** = चञ्चलौ, **अधरौ**= ओष्ठौ **यस्याः सा, सा**= एषा, **इयम्** = पुरोवर्तिनी, **सुरसा** = नागमाता, **सत्यम्** = अवितथम्, **रात्रिञ्चरी** = राक्षसी इव, **प्रतिभाति** = प्रतीयते ।

सरलार्थः - इयम् सुरसा क्रोधेन रक्तनयना भीषणवदना लम्बोदरी विशालतनुः कोपातिशयेन विस्फुरिताधरा राक्षसीव प्रतीयते इति ।

अत्र सुरसाया रात्रिञ्चरीत्वेनोत्प्रेक्षणात्, उत्प्रेक्षालङ्कारः । वसन्ततिलकावृत्तम्।

३८ **सुरसा - हंहो** = भोः, **न वद्धं मुखं यस्य सः, अवद्धमुखः, तत्सम्बुद्धौ, हे अवद्धमुख** = हे वाचाल! **कपे** = मर्कट! **अतः** = अनन्तरम्, **तव** = भवतः, **अवशिष्टम्** = अवसितम्, **विकत्थनम्** = निरर्थकदर्पयुक्तवचनम्, **कथय** = वद।

३९ **हनुमान् - तस्य राजर्षेः** = रामस्य, **स्वयंवरे परिणीता** = ऊढा, **जनकस्य** = विदेहस्य, **सुता** = पुत्री, **सीता** = जानकी, **मर्तुमिच्छतीति मुमूर्षति, मुमूर्षतीति मुमूर्षुस्तेन मुमूर्षुणा** = मर्तुमिच्छता, **राक्षसेषु अधमः, राक्षसाधमः तेन राक्षसा-धमेन** = निशाचरनिकृष्टेन, **रावणेन** = दशमुखेन, **छलेन सहितं यथा स्यात्तथा सच्छलम्**= सकपटम्, **लङ्काम्** = स्वर्णपुरीम्, **नीता** = प्रापिता ।

४० **सुरसा** - तदो तदो । (ततस्ततः)

४१ **हनुमान्** - एकेन बाणेन वालिनं हत्वा रामः सुग्रीवेण सह सख्यं कृतवान्। ततः सुग्रीवसाहाय्येन रामेण प्रेषितानां वानराणामेकोऽहं तामन्वेष्टुं लङ्कां गच्छामि। तत्त्वं द्रुतमपसर । तावदहं त्वरितं गच्छामि ।

४२ **सुरसा** - अवेहि रे वञ्चअ! रामकज्जमिसेण रक्खसोववणफलाइं अवहत्तुं दे अहिलासो कहं गच्छसि गच्छ । [*अपेहि रे वञ्चक! रामकार्यमिषेण राक्षसोपवनफलान्यपहर्तुं तेऽभिलाषः । कथं गच्छसि गच्छ ।*]

(इति मुखविदारणं नाटयति ।)

४३ **वासवः** - मातले! कथमस्या वदनस्योग्रता । पश्य-

४४ **घोरा दीर्घमुखाः पुरःसरति सा रक्तायताक्षी रुषा**
दंष्ट्राभैरवतुण्डकुण्डपतितां जिह्वाभ्रुषीं बिभ्रती ।

---

४० **ततस्ततः** = तदनन्तरं किमभूदित्यर्थे द्विरुक्तिः ।

४१ **हनुमान्- एकेन** = अद्वितीयेन, **वाणेन** = शरेण, **वालिनम्** = वानरराजम्, **हत्वा**= घातयित्वा, **सुग्रीवेण** = तन्नामकेन वानरेण, **सह** = साकम्, **सख्युर्भावः सख्यम्**= मैत्रीम्, **कृतवान्** = विहितवान् । **ततः** = सुग्रीवेण सह मैत्रीमनु, **सुग्रीवः सहायो यस्य तेन, सुग्रीवसहायेन** = सुग्रीवसहयोगेन, **रामेण** = दशरथज्येष्ठतनयेन, **प्रेषितानाम्** = प्रहितानाम्, सीतान्वेषणायेति शेषः । **वानराणाम्** = प्लवगानाम् मध्ये, **एकः** = अपरः, **अहम्** = हनुमान्, **ताम्** = सीताम्, **अन्वेष्टुम्** = गवेषयितुम्, **लङ्काम्** = रावणनगरीम्, **गच्छामि** = यामि । **तत्** = तस्मात्, **त्वम्** = भवती, **द्रुतम्** = शीघ्रम्, **अपसर** = अपगच्छ । तावदिति वाक्यालङ्कारे। **अहम्** = हनुमान्, **त्वरितम्** = शीघ्रम्, **गच्छामि** = इतः, अग्रे सरामि ।

४२ **सुरसा** - रे **वञ्चक**= भो धूर्त! **अपेहि**= दूरं गच्छ, **रामस्य** = दाशरथेः, **कार्यम्**= सीतान्वेषणम्, **तस्य मिषेण** = व्याजेन, **राक्षसस्य** = रावणस्य, **उपवनानाम्** = वाटिकानाम्, **फलानि** = आम्रादीनि, **अपहर्तुम्** = चोरयितुम्, **ते** = तव, **अभिलाषः**= स्पृहा वर्तते, **कथम्**= केन प्रकारेण, **गच्छसि**= इतश्चलसि? **गच्छ**= चल । (**इति**= एवमभिधाय, **मुखस्य** = वदनस्य, **विदारणम्** = विस्तारम्, **नाटयति** = अभिनयति)

४३ **वासवः** - **मातले** = हे सारथे! **अस्याः** = सुरसायाः, **वदनस्य** = मुखस्य, **उग्रस्य भावः, उग्रता** = उत्कटता, **कथम्** = कीदृशी ? **पश्य** = विलोकय ।

४४ अत्र वासवः सुरसां वर्णयति- **घोरेति** ।

अन्वयः - घोरा, दीर्घमुखा सा रक्तायताक्षी दष्ट्राभैरवतुण्डकुण्डपतिताम

नादापूरितदिङ्मुखा त्रिजगतां किं वोरगाणामियं
मातेव प्रतिभाति मे सुरगणैः संप्रार्थितेहागता ।।१३।।

४५ **हनुमान्** - पश्य मम शरीरं योजनमितायतम्, कथमहं तवातिसङ्कटे मुखे प्रविशेयम् ।

४६ **सुरसा** - पेक्खस्स मे पञ्चजोअणविसालदां मुहस्स । [*प्रेक्षस्व मे पञ्चयोजन-विशालतां मुखस्य ।*] (इति मुखमुद्घाटयति)

जिह्वाझषीम् बिभ्रती, नादापूरितदिङ्मुखाः सुरगणैः संप्रार्थिताः (अत एव) इह आगता त्रिजगताम् किं वा उरगाणाम् माता इयम् पुरः सरति इव मे प्रतिभाति ।

व्याख्या - **घोरा** = भीषणाः, **दारुणं भीषणं भीष्मं भीमं घोरं भयानकमित्यमरः** । **दीर्घम्** = लम्बम्, **मुखम्** = वदनम्, **यस्याः सा, तथोक्ता रुषा** = क्रोधेन, **रक्ते** = अरुणवर्णे, **आयते** = विस्तृते च, **अक्षिणी** = नयने, **यस्याः सा, दंष्ट्राभिः** = दशनैः, **भैरवम्** = भीषणम्, **यत् तुण्डम्** = वदनम् एव **कुण्डम्, तत्र पतिताम्** = निमग्नाम्, **जिह्वा एव झषी ताम् जिह्वाझषीम्** = रसनामत्स्याम्, **बिभ्रती** = धारयन्ती, **नादैः** = शब्दैः, **आपूरितम्** = भरितम्,, **दिङ्मुखम्** = आशाग्रभागः, **यया सा, सुराणाम्** = देवानाम्, **गणैः** = समूहैः, **संप्रार्थिता** = अनुरुद्धा, अत एव, **इह** = अस्मिन् स्थाने, **आगता** = आयाता, **त्रीणि च तानि, जगन्ति तेषाम्, त्रिजगताम्,** = त्रिलोकानाम्, **किं वा** = अथवा, **उरगाणाम्**= सर्पाणाम्, **माता** = जननी, **इयम्** = पुरो विद्यमाना, **सा** = सुरसा, **पुरः** = अग्रे, **सरति** = गच्छति इव, **मे** = मम, **प्रतिभाति** = प्रतीयते ।

सरलार्थः- इयं भीषणा दीर्घवदना क्रोधारुणलोचना द्रंष्ट्रया भीषणे वदने विद्यमानां जिह्वाम् धारयन्ती नादैः दिगन्तं पूरयन्ती सुरगणानां प्रर्थनयाऽत्र समागता त्रिजगतां किंवोरगाणां माता सुरसा पुरः सरतीव प्रतीयते इति ।

अत्र, **रूपकोत्प्रेक्षयोः संसृष्टिः** । **शार्दूलविक्रीडितं छन्दः** ।

४५ **हनुमान्**- **योजनेन** = क्रोशचतुष्टयेन, **मितम्** = मातुमर्हम्, **आयतम्** = विस्तारो **यस्य, तत् तादृशम् शरीरम्** = देहम्, **पश्य** = विलोकय । **अहम्** = हनुमान्, **कथम्** = केन प्रकारेण, **तव** = भवत्याः, **अतिसङ्कटे** = प्रवेष्टुमशक्ये, **मुखे** = वदने, **प्रविशेयम्** = प्रवेशं कुर्याम् ?

४६ **सुरसा** - **मे** = मम, **मुखस्य** = वदनस्य, **पञ्च योजनम् यस्य स तथाभूतो यो विशालस्तस्य भावः, ताम्, प्रेक्षस्व** = विलोकय (**इति** = इत्थम्, **मुखम्** = वदनम्, **उद्घाटयति** = विस्तारयति) ।

४७ **हनुमान्** - पश्य मे शरीरमिदं दशयोजनायतम् । (इति तथा दर्शयति)

४८ **वासवः** - सूत! पश्य हनुमतो बुद्धिविक्रमौ ।

४९ **पूर्वं कृतः सुवचसा प्रणयस्तथापि**
भ्रान्तेव हन्त सुरसा न कदापि शान्ता ।
संकोपितोऽपि सुरसोक्तिभिरेष धीर-
श्चातुर्यतः प्रयतते वदनं प्रवेष्टुम् ।।१४।।

५० **सुरसा** - (आत्मगतम्) हद्धि ! हद्धि ! कधं अस्स गात्तस्स विसालदा । अध मए किं कज्जम् । [*हा धिक् । हा धिक् । कथमस्य गात्रस्य विशालता । अथ*

---

४७ **हनुमान्** - **दश योजनं आयतम् यस्य तत् तथाभूतम्, मे** = मम, **इदम्** = एतत्, **शरीरम्** = देहम्, **पश्य** = विलोकय ।

४८ **वासवः** - **हनुमतः**= पवनसुतस्य, **बुद्धेः** = धियः, **विक्रमम्** = पराक्रमम्, **पश्य**= विलोकय । (**इति** = इत्थम्, **तथा** = अङ्गुलिनिर्देशेन दर्शयति)

४९ अत्र वासवः हनुमतश्चातुर्यं प्रकाशयति- **पूर्वमिति** ।

अन्वयः - पूर्वम् सुवचसा प्रणयः कृतः तथापि भ्रान्ता इव सुरसा कदापि न शान्ता । हन्त सुरसोक्तिभिः संकोपित अपि धीरः असौ चातुर्यतः वदनं प्रवेष्टुम् प्रयतते।

व्याख्या- **पूर्वम्** = प्राक्, **सु** = शोभनम्, **वचः** = वचनम्, **भाषितं वचनं वच** इत्यमरः । **तेन सुवचसा** = मुदुलया वाचा, **प्रणयः** = प्रेम, **कृतः** = विहितः, हनुमता प्रदर्शित इति भावः । **तथापि** = प्रदर्शितेऽपि प्रणये, **भ्रान्ता इव**= भ्रममुपगता इव, **सुरसा** = नागमाता, **कदापि** = कस्यामप्यवस्थायाम्, **न शान्ता**= शान्तिं नोपगता, **हन्त** = खेदस्य विषयः । **सुरसायाः** = नागमातुः, **उक्तिभिः** = वचनैः, **संकोपितः** = क्रोधितः, **अपि धीरः** = धैयैशाली, **असौ** = हनुमान्, **चतुरस्य भावश्चातुर्यम्, तस्मात् चातुर्यतः** = पाटवात्, **वदनम्** = मुखम्, **प्रवेष्टुम्**= प्रवेशं कर्तुम्, प्र - विश् + तुमुन् । **प्रयतते** = उद्यमते ।

सरलार्थः - हनुमता पूर्वं सुवचोभिः प्रणये प्रदर्शितेऽपि सुरसा भ्रान्ता इव शान्तिं नोपगता। सुरसोक्तिभिः संकोपितोऽप्यसौ धैर्यमादाय चातुर्येण तस्या वदने प्रवेशाय यतते' इति ।

अत्र, **उत्प्रेक्षालङ्कारः** । **वसन्ततिलकावृत्तम्** । तल्लक्षणं यथा-

ज्ञेयं वसन्तलितकं तभजा जगौ गः ।

५० **सुरसा** - (आत्मगतम्)- **हा धिक्** इति खेदे । **अस्य** = एतस्य हनुमतः, **गात्रस्य**=

मया किं कार्यम् ।]

(प्रकाशम्) अलेले वञ्चअ! पेक्खस्स मे विंसजोअणपरिमिदिं मुहस्स।

५१ हंहो वाणलउत्त! चिट्ठण तुमं मुज्जेमि दाणिं कहं
किं दे पव्वदसद्दिसं जइ भवे खादेमि गत्तं अहम् ।
मिट्ठं मे अणुकंविणा क्खु विहिणा संदंसिदं भक्खणं
सद्दूली वअणा गदोवि हरिणो गच्छे कुदो ले कवे ।।१५।।

[अरे रे वञ्चक, प्रेक्षस्व मे विंशद्योजनपरिमितिं मुखस्य ।
हंहो वानरपुत्र ! तिष्ठ न त्वां मुञ्चामि इदानीं कथं
किं ते पर्वतसदृशं यदि भवेत् खादामि गात्रमहम् ।

शरीरस्य, **विशालता** = विस्तारः, **कथम्** = कुतोऽजायत ? **अथ** = अनन्तरम्, **मया** = सुरसया, **किं कार्यम्** = किं विधेयम् ? (**प्रकाशम्** = स्फुटम्) **अरे रे वञ्चक** = रे धूर्त, **मे** = मम, **मुखस्य** = वदनस्य, **विंशद्योजनस्य परिमितिम्** = परिमाणम्, **पश्य** = विलोकय ।

५१ अत्र सुरसा हनुमता विस्तारितं शरीरं विलोक्य विंशद् योजनैः परिमितं मुखं दर्शयन्ती परुषवचनमुपस्थापयति- **हंहो इति** ।

अन्वयः - हंहो वानरपुत्र! तिष्ठ, त्वाम् इदानीं कथं मुञ्चामि, यदि ते पर्वतसदृशं गात्रं भवेत् अहं न खादामि किम् अनुकम्पिना विधिना मे मिष्टम् भक्षणम् संदर्शितम् । रे कपे! शार्दूलीवदनागतोऽपि हरिणः कुतः गच्छेत् ?

व्याख्या - हंहो = भोः, **वानरपुत्र** = कपिसुत! (एतेनापमानातिशयो व्यज्यते) **तिष्ठ** = निवस, **इदानीम्** = अधुना, **त्वाम्** = हनुमन्तम्, **कथम्** = केन प्रकारेण, **मुञ्चामि**= त्यजामि ? कथमपि न त्यजामीत्यर्थः । **यदि**= चेत्, **ते** = तव, **गात्रम्** = शरीरम्, **गात्रं वपुः संहननं शरीरं वर्ष्म विग्रह** इत्यमरः । **पर्वतस्य**= अद्रेः, **सदृशम्** = तुल्यं भवेत्तदपि, **अहम्** = सुरसा, न **खादामि** = न भक्षयामि किम् ? पर्वताकारशरीरभक्षणेऽपि मम सामर्थ्यं विद्यत एवेति भावः । **अनुकम्पा अस्यास्तीति, अनुकम्पी, तेन अनुकम्पिना** = दयावता, **कृपा दयानुकम्पा स्यादित्यमरः** । **विधिना** = दैवेन, **दैवं दिष्टं भागधेयं भाग्यन्तु नियतिर्विधिरित्यमरः**। **मे**= मम, **मिष्टम्**= स्वादु, **भक्षणम्** = खाद्यम्, **सन्दर्शितम्**= प्रदर्शितम्। **रे कपे**= रे वानर! **शार्दूलस्य स्त्री शार्दूली**= व्याघ्री, **तस्याः वदनम्** = मुखम्, **आगतः** = प्राप्तः, **अपि** = च, **हरिणः** = मृगः, **कुतः** = कस्माद्, **गच्छेत्** = यायात् ।

सरलार्थः - हंहो वानरपुत्र! तिष्ठ, अहम् त्वामिदानीं न मुञ्चामि । यदि ते शरीरं पर्वताकारमपि भवेत् तदहं खादाम्येव । दयावता भाग्येन मह्यं स्वादु भक्षणं

मिष्टं मे ऽनुकम्पिना खलु विधिना संदर्शितं भक्षणं
शार्दूलीवदनागतोऽपि हरिणो गच्छेत्कुतो रे कपे ! ।।१५।।]

(इति तथा नाटयति)

५२ **हनुमान्** - पश्य मे शरीरस्य विस्तृतिं त्रिंशद्योजनपरिमिताम्। (इति तथा करोति)।

५३ **सुरसा** - (आत्मगतम्) अच्चाहिदं किदं अणेण । [*अत्याहितं कृतमनेन ।*]

(प्रकाशम्) चिठ्ठ चिठ्ठ दुट्ठ! तुअं क्व गच्छसि । दाणिं मे पेक्खस पच्चासजोअणप्पमिदं मुहम् । [*तिष्ठ तिष्ठ दुष्ट! त्वं क्व गच्छसि । इदानीं मे प्रेक्षस्व पञ्चाशद्योजनप्रमितं मुखम् ।*] (इति मुखविदारणं नाटयति)

५४ **हनुमान्** - (तदानीमेवाङ्गुष्ठसन्निभदेहस्तन्मुखप्रवेशनं तन्मुखान्निर्गमनं चानुकुर्वन् पुरतः स्थितो वदति ।)

५५ **कथं तावन्मातस्तव मुखमिदं विस्तृततरं**
प्रविश्याहं तूर्णं तव मुखबिलात्पश्य निरगाम् ।

समर्पितमस्ति । शार्दूलीवदनगतो हरिण इव त्वम् मत्सकाशाद् यातुं न शक्नोषीति।

अत्र सुरसाशार्दूल्योर्हनुमद्हरिणयोश्च परस्परं बिम्बप्रतिबिम्बभावाद् **दृष्टान्तालङ्कारः** । **शार्दूलविक्रीडितं छन्दः** । (**इति** = इत्थम्, **तथा** = पूर्वोक्तप्रकारेण, **नाटयति** = अभिनयति)

५२ **हनुमान्** - **मे** = मम, **त्रिंशद् योजनैः परिमिताम्**, **शरीरस्य** = देहस्य, **विस्तृतिम्** = विस्तारम्, **पश्य** = विलोकय (इति तथा **करोति** = तथैवाभिनयति)।

५३ **सुरसा** - **अनेन** = एतेन कपिना, **अत्याहितम्** = जीवानपेक्षि कर्म, **अत्याहितं महाभीतिः कर्म जीवानपेक्षि चेत्यमरः** । **कृतम्** = विहितम् । (**प्रकाशम्** = स्फुटम्) भो **दुष्ट** = रे दुर्बुद्धे! **तिष्ठ, तिष्ठ, त्वम्** = वानरः, **क्व** = कुत्र, **यासि** = गच्छसि ? **इदानीम्** = अधुना, **पञ्चाशद्योजनैः प्रमितम्** = तुल्यम्, **मुखम्** = वदनम्, **पश्य** = विलोकय (**इति** = इत्थम्, **मुखस्य** = वदनस्य, **विदारणम्** = विस्तृतिम्, **नाटयति** = अभिनयति) ।

५४ **हनुमान्** - (**तदानीम्** = तस्मिन्नेव समये, **अङ्गुष्ठेन** = ज्येष्ठाङ्गुलिना, **सन्निभः** = तुल्यः, **देहः** = शरीरम्, **यस्य सः**, **तथाभूतः तस्याः** = सुरसायाः, **मुखात्** = वदनात्, **प्रवेशम्** = अन्तर्गमनम्, **तस्याः** = सुरसायाः, **मुखात्** = वदनात्, **निर्गमनम्**= निःसरणञ्च, **अनुकुर्वन्** = अनुसरन्, **पुरतः** = अग्रे, **स्थितः** = विद्यमानः, **वदति**= कथयति ।)

५५ **अन्वयः** - मातः तावत् विस्तृततरम् तव इदं मुखं प्रविश्य अहम् तव मुखबिलात्

प्रतिज्ञा ते पूर्णा विशति मयि तुण्डं समभवन् -
नमस्ते गच्छेयं रघुतिलककार्यार्थमभयः ।।१६।।

५६ **वासवः** - मातले! दृष्टस्त्वया हनुमतो बुद्धिवीर्ययोः प्रभावः ?

५७ **मातलिः** - आयुष्मन्! दुर्लभं कुतुकमेतत् । अहो हनुमतो नेत्रेन्द्रियस्याप्यविषयकं कार्यम् । तथा हि -

५८ पञ्चाशत्प्रमितं यदा मुखमहं पश्यन्तदाऽऽसं कदा
सोऽङ्गुष्ठप्रमितोऽभवत्पुनरयं विष्टः कदा तन्मुखम् ।

तूर्णम् कथम् निरगाम् ? पश्य, मयि तुण्डं विशति ते प्रतिज्ञा पूर्णा समभवत्, ते नमः। अभयः रघुतिलककार्यार्थं गच्छेयम् ।

व्याख्या- भो मातः= हे जननि! सुरसे! **तावत्** = आदौ, **अतिशयेन विस्तृतम्, विस्तृततरम्** = अतिशयविशालम्, **तव** = भवत्याः, **मुखम्** = वदनम्, **प्रविश्य** = प्रवेशं विधाय, **अहम्** = कपिः, **तव** = सुरसायाः, **मुखस्य** = वदनस्य, **बिलात्** = छिद्रात्, **तूर्णम्** = शीघ्रम्, **कथम्** = कया रीत्या, **निरगाम्** = निर्गतवान्? **पश्य** = विलोकय । **मयि**= हनुमति, **तुण्डम्**= वदनम्, **विशति**= प्रविशति, **ते**= तव, सुरसाया इत्यर्थः। **प्रतिज्ञा** = प्रतिश्रवः, **पूर्णा** = सिद्धा, **समभवत्** = समजायत। **ते** = तुभ्यम्, **नमः** = नमस्कारोऽस्तु, **नमःस्वस्तिस्वाहास्वधाऽलंवषड्योगाच्चेति** नमोयोगे चतुर्थी । **अहम्, न विद्यते भयं यस्य सः अभयः** = निर्भीकः, **रघुतिलकस्य** = रामस्य, **कार्यार्थम्** = सीतान्वेषणकर्मसिद्धये, **गच्छेयम्** = यायाम् ।

सरलार्थः - भो मातः! तव विस्तृतं मुखं प्रविश्याहं निर्गतः । तव प्रतिज्ञा पूर्णा सञ्जाता । तुभ्यं नमोऽस्तु ।अहमधुना रामस्य कार्यार्थं गन्तुमनुमतिं प्रार्थये, इति।

तकारस्यासकृदावृत्तेर्वृत्यनुप्रासः । **शिखरिणीवृत्तम्** ।

५६ **वासवः** - भो मातले = हे सारथे! **त्वया** = भवत्या, **हनुमतः** = पवनकुमारस्य, **बुद्धिश्च वीर्यञ्च बुद्धिवीर्ये, तयोः बुद्धिवीर्ययोः** = मतिपराक्रमयोः, **प्रभावः** = सामर्थ्यम्, **दृष्टः** = विलोकितः ।

५७ **मातलिः** - **आयुष्मन्** = भगवन्! **एतत्** = इदम्, **कुतुकम्** = कौतूहलम्, **दुर्लभम्**= प्रायेण द्रष्टुमलभ्यम् । **अहो** = आश्चर्यम्, **नेत्रेन्द्रियस्य** = नयनेन्द्रियस्य अपि, **अविषयकम्** = अगोचरम्, **हनुमतः** = पवनसुतस्य, **कार्यम्** = कर्म । तथा हि-

५८ अत्र मातलिः हनुमतः सुरसामुखप्रवेशनिर्गमनादिकर्मणः क्षिप्रत्वं निरूपयन् तद्वैशिष्ट्यं प्रकाशयति- **पञ्चाशदिति** ।

अन्वयः - अहम् यदा पञ्चाशत् प्रमितम् मुखं पश्यन् आसम् तदा सः कदा

तस्मान्निःसरणं मुखात्कथमतोऽपश्यं पुरस्थं ततः
शीघ्रत्वं तडितोऽपि तस्य विजितं नूनं कपेः कर्मणा ।।१७।।

५९ **वासवः** - सूत! अतः परं किं ब्रवीति सुरसा । श्रोतव्यमावाभ्याम् ।

६० **सुरसा** - (सप्रमाणानुरूपं शरीरमभिनयन्ती संस्कृतमाश्रित्य)

६१ **कपे ! श्रेष्ठस्त्वं भो गतिमतिमतां वा बलवतां**
परीक्षा ते जाता भवतु सफला त्वत्कृतिरियम् ।

अङ्गुष्ठप्रमितः अभवत् पुनः अयम् कदा तन्मुखम् विष्टः । अतः तस्मात् मुखात् निःसरणम् कथम् ? ततः पुरस्थम् अपश्यम् । नूनम् तस्य कपेः कर्मणा तडितः अपि शीघ्रत्वम् विजितम् ।

व्याख्या- अहम् = मातलिः, **यदा** = यस्मिन् समये, **पञ्चाशद्योजनैः, प्रमितम्** = तुलितम्, **मुखम्** = सुरसाया वदनम्, **पश्यतीति पश्यन्** = विलोकयन्, **आसम् तदा** = तस्मिन् समये, **सः** = हनुमान्, **कदा** = कस्मिन् समये, **सर्वैकान्यकिंयत्तदः काले दा** इति दाप्रत्ययः । **अङ्गुष्ठेन** = ज्येष्ठाङ्गुलिना, **प्रमितः**= तुलितोऽभवत्, **पुनः** = भूयः, **अयम्** = एषः, **कदा** = कस्मिन् समये, **तस्याः** = सुरसायाः, **मुखम्** = वदनम्, **विष्टः** = प्रविष्टः ? **अतः** = अनन्तरम्, **तस्मात् मुखात्** = सुरसावदनात्, **निस्सरणम्** = निर्गमनम्, **कथमभूत्, ततः** = सुरसावदन-निर्गमनान्तरम्, **पुरस्तिष्ठतीति पुरस्थस्तम् पुरस्थम्** = अग्रे विद्यमानम्, हनुमन्तमिति शेषः । **अपश्यम्** = दृष्टवान् । **नूनम्** = निश्चयेन, **तस्य कपेः** = हनुमतः, **कर्मणा**= कार्येण, **तडितः** = विद्युतः अपि, **तडित्सौदामिनी विद्युच्चपला चञ्चलेत्यपीत्यमरः**। **शीघ्रस्य भावः शीघ्रत्वम्** = क्षिप्रकारित्वम्, **विजितम्** = निर्जितम् ।

सरलार्थः - अहं यदा हनुमन्तं पञ्चाशद्योजनप्रमितमपश्यम् तदा कदा सोऽङ्गुष्ठप्रमितं वपुर्धृतवान्, कदा च सुरसायाः वदनं प्रविश्य निर्गतः पुरस्थोऽदृश्यत? न जाने नूनमेव तस्य कर्मणा तडितः शीघ्रत्वमपि विजितमिति ।

उपमालङ्कारः । शार्दूलविक्रीडितं छन्दः ।

५९ **वासवः** - हे **सूत** = भो सारथे! **सुरसा** = सर्पमाता, **अतः परम्** = अनन्तरम्, **किं ब्रवीति** = किं कथयति ? **आवाभ्याम्** = वासवमातलिभ्याम्, **श्रोतव्यम्** = आकर्णयितव्यम् ।

६० **सुरसा** - (**सप्रमाणानुरूपम्** = यथास्थितम्, **शरीरम्** = वपुः, **अभिनयन्ती** = नाटयन्ती, **संस्कृतम्** = देवगिरम्, **आश्रित्य** = अवलम्ब्य वदतीत्यर्थः)

६१ अत्र सुरसा हनुमते शुभाशीषः प्रयच्छति- **कपे श्रेष्ठ इति** ।

अन्वयः - भो कपे! त्वम् गतिमतिमताम् वा बलवताम् श्रेष्ठः । ते परीक्षा

सुखेन त्वं लङ्कां प्रविशसि तथा पश्यसि मुखं
सुरम्यं जानक्या जयसि सकलं राक्षसबलम् ।।१८।।

६२ **हनुमान्** - का भवती । किमर्थं भवत्यैतदाचरितम् । सर्वं श्रोतुमिच्छामि ।

६३ **सुरसा** - कपीन्द्र! शृणोतु भवान् । अहं सुरसा नाम नागमाता । भवतो बुद्धि-बलपरीक्षणे सुरैः प्रेषिताहमिहागता । मया परीक्षितवीर्यस्य भवतो न कदापि कुत्रचित् पराजयः स्यात् । सर्वत्र ते विजयः । स्वच्छन्दं गच्छतु भवान् ।

जाता । इयम् त्वत्कृतिः सफला भवतु । त्वम् सुखेन लङ्काम् प्रविशसि तथा सुरम्यम् जानक्याः मुखम् पश्यसि । सकलम् राक्षसबलम् जयसि ।

व्याख्या- भो **कपे** = हे हनुमन्! **त्वम्** = भवान्, **गतिश्च मतिश्च ते गतिमती, गतिमती स्तः, येषान्ते गतिमतिमन्तस्तेषाम्, गतिमतिमताम्** = जववतां बुद्धिमताञ्च, **वा** = अथवा, **बलम् अस्ति येषान्ते बलवन्तस्तेषाम्** = शक्तिमताम्, **श्रेष्ठः** = अग्रणीः असि, **ते** = तव, **परीक्षा** = कार्यं कर्तुं शक्नोषि न वेति परीक्षणम्, **जाता** = संपन्ना । **इयम्** = एषा, **तव** = भवतः, **कृतिः** = सीतान्वेषणकार्यम्, **सफला** = सिद्धा, **भवतु** = अस्तु । **त्वम्** = भवान्, हनुमानित्यर्थः । **सुखेन** = अनायासेन, **लङ्काम्** = रावणनगरीम्, **प्रविशसि** = प्रवेशं करोषि, **तथा** = तेनैव प्रकारेण, **सुरम्यम्** = सुन्दरम्, **जनकस्यापत्यं स्त्री जानकी, तस्याः मुखम्** = वदनम्, **पश्यसि**= विलोकयसि । **सकलम्** = निखिलम्, **राक्षसानाम्** = क्रव्यादानाम्, **कुलम्** = वंशम्, **जयसि** = विजयसे । अत्र भविष्यत्यपि वर्तमानकालिकक्रियापदस्य प्रयोगः कार्यस्य शीघ्रत्वं सूचयति ।

सरलार्थः - भो कपे! गतिमतिबलवतां श्रेष्ठस्य तव परीक्षा सञ्जाता । तव कार्यं सफलं भवति । त्वम् लङ्कां प्रविश्य जानक्याः सुन्दरं मुखं वीक्ष्य राक्षसानां कुलं विजयसे इति ।

अत्र सकारतकारयोरसकृदावृत्तेः **वृत्यनुप्रासालङ्कारः** । **शिखरिणीवृत्तम्**।

६२ **हनुमान्** - **भवती** = त्वम् का असि ? **भवत्या** = त्वया, **किमर्थम्** = कस्मै प्रयोजनाय, **एतत्** = परीक्षणम्, **आचरितम्** = विहितम् ? **सर्वम्** = निखिलम्, **वृतान्तम्** = वार्ताम्, **श्रोतुम्** = आकर्णयितुम्, **इच्छामि** = वाञ्छामि ।

६३ **सुरसा - कपीन्द्र** = भो हनुमन्! **भवान्** = त्वम्, **शृणोतु** = आकर्णयतु । **अहम् सुरसा नाम** = सुरसेत्याख्या, **नागानाम्** = सर्पाणाम्, **माता** = जननी अस्मि । **भवतः** = तव, **बुद्धेः** = मतेः, **बलस्य** = शक्तेश्च, **परीक्षणे** = विचारणे, **सुरैः** = देवैः, **प्रेषिता** = प्रेरिता, **अहम्** = सुरसा, **इह** = अत्र, **आगता** = आयाता,

६४ **हनुमान्** - शिवमस्तु ते वचः । (इति परिक्रामति)

६५ **वासवः** - सूत! चोदयाश्वान् । आवामप्यन्तर्हितौ भूत्वाऽऽसमुद्रपरतीरं हनुमतोऽनुसरणं करवाव ।

६६ **सूतः** - यदाज्ञापयत्यायुष्मान् ।

(इति निष्क्रान्ताः सर्वे)

इति तृतीयोऽङ्कः

अस्मीति शेषः । **मया** = सुरसया, **परीक्षितम्** = विचारितम्, **वीर्यम्** = पराक्रमः, **यस्य तस्य, भवतः** = हनुमतः, **कुत्रापि** = कस्मिँश्चिदपि स्थले, **पराजयः** = पराभवः, **न स्यात्** = न भवेत् । **ते** = तव, **सर्वत्र** = सर्वेषु स्थलेषु युद्धेषु वा, **विजयः** = जयो भविष्यतीत्यर्थः । **भवान्** = त्वम्, **स्वच्छन्दम्** = स्वेच्छानुसारम्, **गच्छतु** = यातु ।

६४ **हनुमान्** - **ते** = तव, सुरसाया इत्यर्थः । **वचः** = वचनम्, **शिवम्** = कल्याणकरम्, **अस्तु** = भवतु (**इति** = इत्थम्, **परिक्रामति** = परितो पादौ विक्षिपति) ।

६५ **वासवः** - **सूत** = सारथे! **अश्वान्** = रथघोटकान्, **चोदय** = प्रेरय । **आवाम्** = मातलिवासवौ अपि, **अन्तर्हितौ** = गुप्तौ भूत्वा, **समुद्रस्य** = सागरस्य, **परम् तीरम्** = पारे तटं यावत्, **हनुमतः** = पवनसुतस्य, **अनुसरणम्** = अनुगमनम्, **करवाव** = विदधाव ।

६६ **सूतः** - **आयुष्मान्** = भवान् यद् **आज्ञापयति** = निर्दिशति तथैव करोमीत्यर्थः ।

(इति निष्क्रान्ता सर्वे)

इति श्रीनीलमणिढुङ्गानाविरचितायां यशोदाभिधायां

संस्कृतटीकायां सुन्दरचरितनाटकस्य

तृतीयोऽङ्कः समाप्तः

सुन्दरचरितनाटकम्

चतुर्थोऽङ्कः

चतुर्थाङ्ककथासारः

अङ्कारम्भे भुक्तानेकभोगोऽपि तृष्णाकवलितः कञ्चुकी, विद्याधरौ च अमरपुरस्य संपदो शक्रस्य वैशिष्ट्यञ्च निरूपयन्ति । वासवोऽपि आसमुद्रपरतीरं प्रच्छन्नो हनुमन्तमनुसरति । लङ्कां यातुं जवेन प्रस्थितो हनुमान् समुद्रवचसा पवनसूनोर्मार्गविरोधाय समुपस्थितं मैनाकमुरसा समुद्राम्भसि निपातयति । सीतान्वेषणकार्यात् तत्कृतातिथ्यस्य लघुतया तदस्वीकृत्यैव जवेनासौ पुरतो याति । मार्गे उद्गच्छतस्तस्य स्तब्धां गतिं निभाल्य वासवो नितरामेव चिन्तितो व्याकुलश्च विलोक्यते । छायया हनुमन्तमाकृष्य भक्षितुकामां सिंहिकामपि स तन्मुखे प्रविश्य निजनखरैस्तदवयवानाच्छिद्य घातयति । तद्वधेनोत्साहितश्च स दक्षिणदिशाभिमुखं त्वरयति। नानाविधजलजन्तुसहिताभिः सरिद्भिः, रत्नाकरैः, कनकमयशिलाभिः, स्वच्छैः कच्छैरनुपैरन्तरीपैश्च विचित्राया लङ्कायाः सौन्दर्यं विलोकयन्नसौ त्रिकूटाचलमूर्ध्नि घन इव शनैरवतरति । विविधवृक्षसमाकुलानां नीडोद्भवानां मधुलिहां रुतै रमणीयां प्राकारदुर्गैः परिवृतां रक्षोभिः परिरक्षितां भीषणां लङ्कां प्रवेष्टुमुपायं चिन्तयति। अन्ते च वनमक्षिकासमानरूपं गृहीत्वासौ रात्रौ निशाचरपुरीं प्रविशति । वासवोऽपि निशाचरभयेनेव रथमारुह्यामरपुरं प्रतिष्ठते ।

अथ चतुर्थोऽङ्कः

(ततः प्रविशति कञ्चुकी)

१ **कञ्चुकी-** (आकाशे) किं ब्रवीषि रे मनः! भगवतो वृत्रघ्नः प्रसादादहर्निशमप्सरसां तौर्यत्रिकदर्शनेन गन्धर्वविद्याधराणां गीतवाद्यश्रवणेन वा नानाविधासुरसंग्रामकुतूहलादिवीक्षणेन वा प्रियतममेतावद्वयः ससुखं नीतिमिति। बाढं रे मनः! द्रष्टव्यश्रोतव्ययोर्विषयो नावशिष्टस्तव। तथाप्येकवारं भुक्तानेकभोगां विरक्तिं पृच्छ (पुनराकाशे) किं भणसि रे मनः! तृष्णा प्रसभं बाधते मामिति। त्वयोदितं सत्यं प्रतिभाति मे। तथा हि -

---

१ **कञ्चुकी** - (आकाशे) रे मनः = रे चित्त! किं ब्रवीसि = किम् कथयसि ? भगवतः = ऐश्वर्यशालिनः, वृत्रं हन्तीति वृत्रहा, तस्य वृत्रघ्नः = इन्द्रस्य, प्रसादात्= अनुग्रहात्, अहश्च निशा च अहर्निशम् = रात्रिन्दिवसम्, अप्सु सरन्तीति अप्सरसस्तासाम्, अप्सरसाम् = स्वर्गणिकानाम्, तूर्यम्= मुरजादि, तत्र भवम् तौर्यम्, त्रयोंऽशा अस्येति त्रिकम्, तौर्योपलक्षितं त्रिकम् तौर्यत्रिकम् = नृत्यगीतवाद्यम्, तस्य दर्शनेन = विलोकनेन, वा = अथवा, नानाविधाः = नैकाः, असुराणाम् = दैत्यानाम्, ये संग्रामाः = युद्धाः, तेषाम् यत् कुतूहलम् = कौतुकम्, तत् आदि येषान्तेषाम्, वीक्षणेन = दर्शनेन, अतिशयेन प्रियम्, प्रियतमम् = अभीष्टतमम्, एतावत् = अद्यावधिकम्, वयः = बाल्यादि, वयः पक्षिणि बाल्यादौ यौवने च नपुंसकमित्यमरः। सुखेन = आनन्देन सहितं यथा स्यात्तथा, नीतम् = यापितम्। रे मनः! वाढम् तव = भवतः, द्रष्टुं योग्यम् द्रष्टव्यम्, श्रोतुं योग्यम् श्रोतव्यम्, द्रष्टव्यञ्च श्रोतव्यञ्च द्रष्टव्यश्रोतव्ये पदार्थजाते, तयोः द्रष्टव्यश्रोतव्ययोः = दर्शनीयश्रवणीययोः, विषयः = क्षेत्रम्, न अवशिष्टः= नास्त्यवशेषः, तथापि = तदपि, भुक्ताः = उपभुक्ताः, अनेकाः भोगा यया सा ताम्, भुक्तानेकभोगाम् = अनुभूतविविधविषयाम्, विरक्तिम् = वैराग्यम्, पृच्छ। रे मनः = चित्त! किं भणसि = किं कथयसि ? तृष्णा = स्पृहा, माम् = कञ्चुकीम्, प्रसभम् = हठात्, बाधते = पीडयति। त्वया = भवता, उदितम् = कथितम्, मे = मह्यम्, सत्यम् = अवितथम्, प्रतिभाति = प्रतीयते। तथा हि = यतः।

२ मद्धस्ताद्वेत्रयष्टिः पिपतिषति भृशं यत्नादपि धृता
दृष्ट्वा मे गात्रयष्टिं विहसति वलिभिः क्रान्तां सुवदना ।
दृष्टिर्मे नातिदूरं प्रसरति जरया तेजोविगलिता
तृष्णैका नो जहाति प्रतिदिनमिह मां मायाकवलिता ।।१।।

३ भो भो महेन्द्र! क्षपितं जीवितं महैश्वर्यस्य भवतोऽनुग्रहात् ससुखम् । तथा हि-

---

२ अत्र कञ्चुकी स्वशरीरस्य शक्तिहीनत्वं निरूपयन् तृष्णाया वैशिष्ट्यं प्रकाशयति- **मद्धस्तादिति ।**

अन्वयः - यत्नात् धृता अपि वेत्रयष्टिः मद्धस्तात् भृशम् पिपतिषति । सुवदना वलिभिः क्रान्ताम् मे गात्रयष्टिम् दृष्ट्वा विहसति । जरया तेजोविगलिता मे दृष्टिः अतिदूरम् न प्रसरति । मायाकवलिता एका तृष्णा इह माम् प्रतिदिनम् नो जहाति ।

व्याख्या - **यत्नात्** = प्रयासात्, **धृता** = गृहीता अपि, **वेत्रस्य यष्टिः, वेत्रयष्टिः** = वेतसदण्डः, **मम हस्तः, मद्धस्तस्तस्मात्, मद्धस्तात्** = मम करात्, **भृशम्** = अत्यन्तम्, **पतितुमिच्छतीति पिपतिषति** = पतितुं वाञ्छति । **सुष्ठु वदनं यस्याः सा सुवदना** = सुमुखी, **वलिभिः** = रेखाभिः, **क्रान्ताम्** = व्याप्ताम्, **मे** = मम, **गात्रमेव यष्टिस्ताम्, गात्रयष्टिम्** = शरीरदण्डम्, **दृष्ट्वा** = विलोक्य, दृश्+ त्क्वा । **विहसति** = अपहसति । **जरया** = वृद्धावस्थया, **तेजोविगलिता** = ओजःशून्या, **मे** = मम, **दृष्टिः** = नयनशक्तिः, **अतिशयेन दूरम्** = विप्रकृष्टम्, **न प्रसरति** = न याति । दूरस्थं वस्तु विलोकयितुं न शक्यते, इति भावः । **मायया** = अज्ञानेन, **कवलिता**= ग्रस्ता, **एका**= एकाकिनी, **तृष्णा**= स्पृहा, **इह**= अत्र, **माम्**= कञ्चुकिनम्, **दिने दिने इति प्रतिदिनम्** = प्रत्यहम्, **नो जहाति** = न त्यजति ।

सरलार्थः - यत्नेन धृतापि वेत्रयष्टिः मत्करात् पतति सुवदना वलिभिः क्रान्तं दण्डाकारं शरीरं विलोक्य अपहसति । जरया तेजोरहिता दृष्टिः दूरस्थान् पदार्थान् न पश्यति । केवलं मायापिहितैका तृष्णा मां प्रतिदिनं न त्यजतीति ।

अत्र गात्रस्य यष्टित्वारोपाद् **रूपकालङ्कारः** । **वृत्तञ्चात्र सुवदना**, तस्या लक्षणं यथा-

ज्ञेया सप्ताश्वषड्भिर्मरभनययुता भ्लौ गः सुवदना ।

३ **भो भो महेन्द्र** = हे देवेन्द्र! **भवतः** = तव, **प्रसादात्** = अनुग्रहात्, **महच्च तदैश्वर्यम् महैश्वर्यन्तस्य, महैश्वर्यस्य** = विपुलसमृद्धेः, **जीवितम्** = जीवनम्, **मया** = कञ्चुकिना, **सुखेन सहितं यथा स्यात्तथा, ससुखम्** = सानन्दम्, **क्षपितम्**=

४ शचीयं स्वच्छन्दं विहरति सदा नन्दनवने
वनेऽसौ स्वर्णद्याः सुरतरुचितायाश्च रमते ।
मतेयं गीर्वाणैरमरनगरी भाति निभृता
भृता मेरोः कूटैर्हरिहयविभूतिर्जयति सा ।।२२।।

(इति परिक्रामति)

(नेपथ्ये)

यापितम् । तथा हि = यतः

४ अत्र कञ्चुकी देवनगर्या वैशिष्ट्यं प्रकाशयति- **शचीयमिति-**

अन्वयः - इयम् शची नन्दनवने सदा स्वच्छन्दं विहरति । असौ सुरतरुचितायाः स्वर्णद्याः वने रमते च । इयम् गीर्वाणैः मता निभृता अमरनगरी भाति । मेरोः कूटैः भृता हरिहयविभूतिः सा जयति ।

व्याख्या - **इयम्** = एषा, पुरोवर्तिनीत्यर्थः । **शची** = इन्द्राणी, **पुलोमजा शचीन्द्राणीत्यमरः** । **नन्दयतीति नन्दनम्, तच्च तद्वनम् नन्दनवनम्, तस्मिन् नन्दनवने**= इन्द्रोद्याने, **सदा**= सर्वदा, **स्वच्छन्दम्** = यथारुचि, **विहरति** = विहारं करोति, **असौ** = एषा, शची **सुराणाम्** = देवानाम्, **तरुभिः** = वृक्षैः, कल्पवृक्षैरित्यर्थः। **चितायाः** = व्याप्तायाः, **अथ च सुरते** = निधुवने **रुचिता** = स्पृहा **यत्र तस्याः स्वर्णद्याः** = मन्दाकिन्याः, **मन्दाकिनी वियद्गङ्गा स्वर्णदी सुरदीर्घिकेत्यमरः**। **वने** = कानने **अथ च** जले, **रमते** = विहरति च । इन्द्रेण सहेत्यर्थः। **इयम्** = एषा, **गीर्वाणैः** = देवैः, **बर्हिर्मुखाः ऋतुभुजो गीर्वाणा दानवारयः**, इत्यमरः । **मता**= पूजिता, **निभृता** = शान्ता, उपद्रवादिशून्येत्यर्थः । **अमराणाम्**= देवानाम्, **नगरी**= पूरी, **पूः स्त्री पुरीनगर्यौ वा पत्तनं पुटभेदनमित्यमरः**। **भाति**= शोभते । **मेरोः** = सुमेरुपर्वतस्य, **कूटैः** = शिखरैः, **भृता** = धृता, **हरेर्हयः**, **हरिहयः** = इन्द्राश्वः, **स विभूतिर्यस्याः सा, हरिहयविभूतिः** = उच्चैःश्रवैश्वर्या, **सा** = अमरावती, **जयति**= सर्वोत्कर्षेण वर्तते ।

सरलार्थः - यस्या नन्दनवने शचीयं स्वच्छन्दं विहरति, सुरद्रुमाच्छन्नायाः निधुवनोपयोगिन्या वा मन्दाकिन्या विपिने जले वा रमते च। देवैः संमानिता सुमेरुशिखरैर्धृतेयम् उच्चैश्रवःसहिताऽमरनगरी सर्वोत्कर्षेण वर्तत इति ।

अत्र **सुरतरुचितायाः, वने** इति पदद्वयात् प्राकरणिकस्यैवार्थद्वयस्य प्रतीतेः **श्लेषालङ्कार**, वने, मते, भृतेति पदानामावृत्तेर्यमकालङ्कारश्च । **शिखरिणीवृत्तम्**। (**इति** = इत्थम्, **परिक्रामति** = परिक्रमां करोति ।

(नेपथ्ये)

५ **विद्याधरौ** - जयति जयति वासवः ।

एकः -

६ **पर्जन्याद् भवतीह वृष्टिरतुला भूमौ तदा पूरिता**
शस्यैः सा भवति प्रजास्तदशना जीवन्ति तस्यां ततः ।
हव्यं हव्यभुगाननाय भवते वेदोक्तमार्गेण ता
यच्छन्ति प्रयताः सदा हि महतां भूतिः परार्थाशया ।।३।।

---

५ **विद्याधरौ** - **वासवः** = इन्द्रः! **जयति** = सर्वोत्कर्षेण वर्तते ।

६ **एकः** - विद्याधरः कथयतीति भावः ।

अत्र विद्याधरो महतामैश्वर्यं परेभ्य एव भवतीति वर्णयति - **पर्जन्यादिति**।

अन्वयः - इह भूमौ पर्जन्यात् अतुला वृष्टिः भवति तदा सा शस्यैः पूरित भवति । ततः तस्याम् तदशनाः प्रजाः जीवन्ति । ताः वेदोक्तमार्गेण हव्यभुगानना भवते प्रयताः (सन्तः) हव्यम् यच्छन्ति। हि महताम् भूतिः सदा परार्थाशया भवति

व्याख्या - **इह** = अस्याम्, **भूमौ** = पृथिव्याम्, **पर्जन्यात्** = मेघात् **अथ च** इन्द्रात्, **पर्जन्यौ रसदब्देन्द्रावित्यमरः** । **न विद्यते तुला** = मापनं **यस्या सा, अतुला** = तोलयितुमशक्या, **वृष्टिः** = वर्षणम्, **भवति** = जायते, **तदा** = तस्मिन् समये, **सा** = भूमिः, **शस्यैः** = धान्यादिभिः, **पूरिता** = भरिता भवति **ततः** = तदनन्तरम्, **तस्याम्** = पृथिव्याम्, **तद्** = सस्यम्, **अशनम्** = भोज **येषान्ते तथाभूताः, प्रजाः** = जनाः, **प्रजाः स्यात्सन्ततौ जने**, इत्यमरः । **जीवन्ति** = प्राणान् धारयन्ति । **ताः** = प्रजाः, **वेदैः वेदेषु वा उक्तः** = कथितः, **यो मार्गस्तेन वेदोक्तमार्गेण** = ऋग्यजुसामाथर्वनिर्दिष्टदिशा, **हव्यम्** = हवनीयद्रव्यम्, **भुनक्तीति हव्यभुक्** = अग्निः, **स आननं यस्य तस्मै हव्यभुगाननाय** = अग्निवदनाय **देवाः हव्यं अग्नेः गृह्णन्तीति** सिद्धान्तः । **भवते** = तुभ्यम्, इन्द्रायेत्यर्थः **प्रयताः** = पूताः सन्तः, **पवित्रः प्रयतः पूत** इत्यमरः । **हूयन्ते** = प्रीण्यन्ते देव **येन तद् हव्यम्** = हवनीयद्रव्यम्, **यच्छन्ति** = समर्पयन्ति । **हि** = यतः, **महताम्** = विशिष्टव्यक्तीनाम्, **भूतिः** = ऐश्वर्यम्, **विभूतिर्भूतिरैश्वर्यमित्यमरः**। **परार्थः** = अन्यार्थः, **आशयः** = आश्रयो **यस्याः सा तथाभूता** भवतीति शेषः ।

सरलार्थः - पर्जन्याद् जातासु वृष्टिषु भूमिः शस्यपूर्णा जायते । तदे भुक्त्वा प्राणान् धारयन्तः प्रजाः प्रयता हव्यभुगाननायेन्द्राय वेदनिर्दिष्टदिशा ह समर्पयन्ति । यतो महतामैश्वर्यं परेभ्य एव संपद्यते इति ।

अर्थान्तरन्यासालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ।

अन्यः -

७ ये के दुष्टधियश्चरन्ति जगतां दुःखाय तेषां वधो-
द्युक्तस्त्वं सततं बिभर्षि कुलिशं हस्तेन वास्तोष्पते ।
लोकेऽस्मिन् हरिदश्व एक इतरोऽसि त्वं जगद्रक्षणे
प्रायो युक्ततुरङ्गमो हरिहयः स्वर्लोकचूडामणिः ।।४।।

अपि च -

८ उपेन्द्र इन्द्राद् भवतो विशेष उपोपसर्गेण न कर्मणायम् ।
हरिः स तापत्रयमूलहर्ता भवान् हरिश्चानशनस्य हर्ता ।।५।।

---

७ अत्र विद्याधर इन्द्रस्य सूर्याद् वैशिष्ट्यं प्रदर्शयति- **ये क इति ।**

अन्वयः - हे वास्तोष्पते, दुष्टधियः ये के जगताम् दुःखाय चरन्ति तेषाम् वधोद्युक्तः त्वम् हस्तेन कुलिशम् सततम् बिभर्षि । अस्मिन् लोके एकः हरिदश्वः (अस्ति) त्वं जगद्रक्षणे प्रायः युक्ततुरङ्गमः स्वर्लोकचूडामणिः इतरः हरिहयः असि।

व्याख्या - **वास्तोः** = गृहक्षेत्रस्य, **पतिः** = अधिष्ठाता, **तत्संबुद्धौ हे वास्तोस्पते** = हे इन्द्र! **दुष्टा धीर्येषान्ते दुष्टधियः** = दुर्मतयः, **ये के** = राक्षसादयः, **जगताम्** = लोकानाम्, **दुःखाय** = पीडायै, **पीडा बाधा व्यथा दुःखमित्यमरः** । **चरन्ति** = भ्रमन्ति, **तेषाम्** = राक्षसादीनाम्, **वधाय** = नाशाय, **उद्युक्तः** = तत्परः, **त्वम्** = भवान्, **हस्तेन** = करेण, **कुलिशम्** = वज्रम्, **कुलिशं भिदुरं पविरित्यमरः**। **सततम्** = निरन्तरम्, **बिभर्षि** = धारयसि । **अस्मिन्** = एतस्मिन्, **लोके** = संसारे, **एकः** = अद्वितीयः, **हरितः** = हरिद्वर्णाः, **अश्वाः** = घोटकाः, **यस्य सः**, **हरिदश्वः** = सूर्योऽस्ति। **जगताम्** = लोकानाम्, **रक्षणे** = अवने, **प्रायः** = बहुशः,, **युक्ताः तुरङ्गमाः** = घोटकाः, **यस्य सः**, **स्वर्लोकस्य** = स्वर्गस्य **चूडामणिरिव चूडामणिः**, **यः सः**, **त्वम्** = भवान्, **इतरः** = सूर्याद् भिन्नः, **हरिर्हयो यस्य सः**, **हरिहयः** = **त्वक्केशबालरोमाणि सुवर्णाभानि यस्य तु । हरिः स वर्णतोऽश्वस्तु पीतकौशेयसप्रभ** इति शालिहोत्रोक्तलक्षणलक्षितेन अश्वेन युक्तः, असि ।

सरलार्थः - हे इन्द्र! त्वं दुष्टानां वधाय सदैव वज्रं हस्तेन धारयसि । अस्मिन् लोके सदैव तुरङ्गयुतो लोकचूडामणिः हरिदश्वः सूर्य एकोऽस्ति । त्वञ्च कदाचित् तुरङ्गोपेतः स्वोर्लोकचूडामणिरितरो हरिहयः (इन्द्रः) असीति ।

इत्थञ्चात्रोक्तविशेषणैः सूर्यापेक्षया शक्रस्याधिक्यप्रतिपादनाद् **व्यतिरेकालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ।**

८ अत्र द्वितीयो विद्याधरः शक्रस्योपेन्द्राद् वैशिष्ट्यं वर्णयति - **उपेन्द्र इति ।**

(ततः प्रविशति तथाभूतो रथारूढो वासवस्तत्सूतो मातलिश्च)

९ **वासवः** - अहो किमत्र जातम् । पश्येदानीम् हनुमन्तमतीत्य पुरतोऽस्माकं रथः प्रवर्तते । रश्मयः संयम्यन्ताम् ।

१० **मातलिः** - यथाज्ञापयति देवः (इति तथा करोति ।)

११ **वासवः** - मातले! पश्येदानीं स्तब्धगतिरिव पवनात्मजोऽयं प्रतीयते । तथा हि -

---

अन्वयः - उपेन्द्रे भवतः इन्द्रात् उपोपसर्गेण विशेषः कर्मणा अयम् न । स हरिः तापत्रयमूलहर्ता (अस्ति) भवान् हरिः अनशनस्य च हर्ता अस्ति ।

व्याख्या- इन्द्रमुपगत इति, **उपेन्द्रस्तस्मिन्, उपेन्द्रे** = विष्णौ, **भवतः** = त्वत्, **इन्द्रात्** = शक्रात्, 'उप' **इत्युपसर्गेण, विशेषः** = आधिक्यमस्तीति भावः। **कर्मणा** = कार्येण, **अयम्**= विशेषः, **न** = नहि । **सः** = प्रसिद्धः, **हरिः** = विष्णुः, **तापानाम् त्रयम्, तस्य यद् मूलम्, तस्य हर्ता, तापत्रयमूलहर्ता** = आध्यात्मिकाधिदैविकाधिभौतिकतापानां बीजस्यैव नाशकः, अस्तीति शेषः । **भवान्** = त्वम्, **हरिः** = इन्द्रः, **यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु**, इत्यमरः । **न अशनम् अनशनम्, तस्य अनशनस्य** = खाद्याभावस्य च, वृष्ट्यादिनेति भावः। तापत्रयसहितस्य भोजनाभावस्येत्यर्थः, **हर्ता**= नाशकः, अस्ति।

सरलार्थः - उपेन्द्रो मघोन उपोपसर्गेण वैशिष्ट्यं धत्ते न तु कर्मणा, स हरिस्तापत्रयस्य मूलं हरति, भवान् हरिस्तु तापत्रयमनशनञ्च विनाशयतीति ।

अत्र उपेन्द्राद् हरेः, शक्रस्याधिक्यप्रतिपादनाद् **व्यतिरेकालङ्कारः** । **इन्द्रवज्रावृत्तम्**, तल्लक्षणं यथा -

स्यादिन्द्रवज्रा यदि तौ जगौ गः ।

(ततः प्रविशति तथाभूतो रथारूढो वासवस्तत्सूतो मातलिश्च)

९ **वासवः - अहो** = आश्चर्यम्, **अत्र** = अस्मिन् स्थाने, **किं जातम्** = किमभूत्? **इदानीम्** = अधुना, **हनुमन्तम्** = पवनसुतम्, **अतीत्य** = उल्लङ्घ्य, **पुरतः** = अग्रे, **अस्माकम्** = वासवादीनाम्, **रथः** = स्यन्दनम्, **प्रवर्तते** = गच्छति, **पश्य** = विलोकय । **रश्मयः** = प्रगहाः, **संयम्यन्ताम्** = प्रगृह्यन्ताम् ।

१० **मातलिः - देवः** = भवान्, **यथा आज्ञापयति** = निर्दिशति, तथैव करोमीति भावः । (इति तथा करोति)

११ **वासवः - मातले** = सूत! **इदानीम्** = अधुना, **अयम्** = एषः, **पवनस्य आत्मजः**

१२ आहोस्वित्पवनात्मजोऽयमधुनानन्ते श्रमादम्बरे
मन्दस्तब्धगतिः स्थितः कथमहो नायं तथा दुर्बलः ।
आहो विस्मृतमार्ग एष गगने भ्रान्तः सृतिं वीक्षते
नायं मूढमतिस्तथा कथमहो दृष्ट्वा मनो भ्राम्यति ।।६।।

पवनात्मजः = हनुमान्, स्तब्धा गतिर्यस्य सः स्तब्धगतिः = निश्चलप्रयाण इव, प्रतीयते = ज्ञायते । तथा हि = यतः ।

१२ अत्र व्योम्नि समुद्रमुपरि स्तब्धगतिं हनुमन्तं वीक्ष्य वासवो वितर्कते- आहोस्विदिति।

अन्वयः - अधुना अयम् पवनात्मजः अनन्ते अम्बरे श्रमात् मन्दस्तब्धगतिः स्थितः आहोस्वित् ? अहो कथम् ? अयं तथा दुर्बलः न, आहो एषः, विस्मृतमार्गः गगने भ्रान्तः सृतिम् वीक्षते । अहो, कथम् ? अयम् तथा मूढमतिः न । दृष्ट्वा मनः भ्राम्यति ।

व्याख्या- अधुना = अस्मिन् समये, एतर्हि संप्रतीदानीमधुना सांप्रतं तथेत्यमरः । अयम् = एषः, पुरो दृश्यमानः, पवनस्य आत्मजः पवनात्मजः = हनुमान्, न विद्यतेऽन्तो यस्य तस्मिन्, अनन्ते = अन्त्यविहीने, अम्बरे = आकाशे, व्योम पुष्करमम्बरमित्यमरः । श्रमात् = गमनजन्यपरिश्रमेण, मन्दास्तब्धा च गतिर्यस्य सः, मन्दस्तब्धगतिः = शिथिलावरुद्धप्रयाणः, स्थितः = विद्यमानो वर्तते, आहोस्वित् = किम्, आहो उताहो किमुत विकल्पे किं किमुत चेत्यमरः। अहो = आश्चर्यम्, कथम् = एतत्कथं संभवति ? यतः, अयम् = हनुमान्, तथा= तादृशः, दुर्बलः = अल्पशक्तिः, न = नास्ति । आहो = अथवा, एषः = हनुमान्, विस्मृतः मार्गः येन सः, विस्मृतमार्गः = स्मृत्यतिक्रान्ताध्वः । गगने = आकाशे, भ्रान्तः = भ्रान्तिमुपगतः, सृतिम् = पन्थानम्, अयनं वर्त्ममार्गाध्वपन्थानः पदवी सृतिरित्यमरः । वीक्षते = पश्यति ? अहो = आश्चर्यम्, एतदपि कथम् = केन प्रकारेण भवति ? यतः अयम् = एष हनुमान्, तथा = तादृशः, मूढा मतिर्यस्य सः मूढमतिः = मूर्खधीः, न = नास्ति । एतत्सर्वं दृष्ट्वा = विलोक्य, मनः = चित्तम्, ममेत्यर्थः । भ्राम्यति = भ्रान्तिमधिगच्छति ।

सरलार्थः - अधुना हनुमान् व्योम्नि गमनश्रमेण श्रान्त इव मन्दगतिः स्तब्ध-गतिर्वर्तते । किं वा दुर्बलभावेन नायं श्रान्तोऽपि तु गगने मार्गं विस्मृत्य भ्रान्तस्तं वीक्षमाण इव विभाव्यते, परमयं तादृशो मूढधीर्नास्ति । अतस्तादृशं हनुमन्तं विलोक्य मम मनो भ्रान्तं विद्यते, इति ।

अत्र सन्देहालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ।

अपि च -

१३ विधूनयति बालधिं विरमति त्वरातोऽम्बरे
प्रपश्यति सरित्पतेर्जलमधोऽधुना विस्मितः ।
न जातु बत यातु तं किमपि मारुतिं स्पर्धते
न वा ग्रसति तद्बलं जलचरः कदाचिद् भृशम् ।।७।।

(ततः प्रविशति तथाभूतो हनुमान्)

१४ हनुमान् - (आत्मगतम्) कथमहो रामकार्यसाधने विघ्नाः प्रपतन्ति । तथा

---

१३ अत्र सागरमुपरि स्तब्धगतिं हनुमन्तं विलोक्य वासवो वितर्कते- **विधूनयतीति** ।

अन्वयः - अधुना (असौ) विस्मितः बालधिं विधूनयति, अम्बरे त्वरातः विरमति, सरित्पतेः जलम् अधः प्रपश्यति, बत जातु किम् अपि यातु मारुतिम् न स्पर्धते ? वा कदाचित् जलचरः तद्बलम् भृशम् न ग्रसति ?

व्याख्या- अधुना = अस्मिन् समये, **असौ** = हनुमान्, **विस्मितः** = चकितः, **बाला धीयन्तेऽत्रेति बालधिस्तम् बालधिम्** = पुच्छम्, **कर्मण्यधिकरणे चेति किः** । **विधूनयति** = धुनोति, **अम्बरे** = आकाशे, **व्योम पुष्करमम्बरमित्यमरः**। **त्वरातः** = वेगात्, **विरमति** = विरतो भवति । **सरितां पतिः सरित्पतिस्तस्य सरित्पतेः** = समुद्रस्य, **समुद्रोऽब्धिरकूपारः पारावारः सरित्पतिरित्यमरः** । **जलम्**= सलिलम्, **अधः** = नीचैः, **प्रपश्यति** = विलोकयति । **बत** = खेदे, **जातु** = कदाचित्, **किम् अपि** = अज्ञातनाम, **यातु** = राक्षसः, **यातुधानः पुण्यजनो नैऋतो यातुरक्षसीत्यमरः** । **मरुतस्याऽपत्यं पुमान् मारुतिस्तम्, मारुतिम्** = हनुमन्तम्, **न स्पर्धते** = स्पर्धां न करोति किम् ? **वा** = अथवा, **कदाचित्** = जातु, **जले चरतीति जलचरः** = यादोविशेषः, **तस्य** = हनुमतः, **बलम्** = शक्तिम्, **न ग्रसति** = न भक्षयति ? अपि तु भक्षयत्येव ।

सरलार्थः - अधुना हनुमान्, विस्मयं गतः पुच्छं विधूनयति, अम्बरे त्वरां मुञ्चति, समुद्रसलिलमधः पश्यति । खेदस्य विषयो वर्तते यत् कोऽपि राक्षसो हनुमन्तं स्पर्धते किम् ? अथवा कोऽपि जलचरस्तद्बलं ग्रसतीति मे वितर्कः, इति ।

अत्र न स्पर्धते ? न ग्रसति ? इति क्रियाद्वयेन निषेधार्थकेन विधिरूपस्यार्थस्यापतनात्, **अर्थापत्यलङ्कारः** । काव्यलिङ्गसन्देहालङ्कारयोश्चात्र नीरक्षीरमिश्रणन्यायेन संमिश्रणात्, **सङ्करालङ्कारः** । **पृथ्वीवृत्तम्** । तल्लक्षणं यथा-

जसौ जसयला वसूग्रहयतिश्च पृथ्वी गुरुः ।

१४ **हनुमान्** - (**आत्मगतम्** = स्वगतम्) **अहो** = आश्चर्यस्य विषयः, **कथम्** = कुतः, **रामस्य** = दाशरथेः, **यत्कार्यम्** = सीतान्वेषणरूपं कर्म, **तस्य साधने** =

हि-

१५ आद्याभूत्सुरसा मम प्रचलतो विघ्नस्य मूर्तिस्तत-
स्तद्वक्त्रादपि सिंहिकासुतमुखान्मुक्तः शशीवागतः ।
अम्भोधेर्वचसा जलादुदपतन्मैनाकनामा गिरि-
स्तं वेगादुरसा निपात्य नभसस्तूर्णं समुद्राम्भसि ।।८।।
आतिथ्यञ्च तदर्पितं लघुतया कार्यस्य हित्वा गतः
केनेयं जविता ममेह सहसाकृष्टा न पश्यामि किम् ।

संपादने, विघ्नाः = अन्तरायाः, विघ्नोऽन्तरायः प्रत्यूहः, इत्यमरः । प्रपतन्ति = समायान्ति । तथा हि-

१५ अत्र हनुमान् सीतान्वेषणे गच्छतः स्वस्य विघ्नबाहुल्यं निरूपयति- **आद्याभूदिति।**

अन्वयः - प्रचलतः मम आद्या विघ्नस्य मूर्तिः सुरसा अभूत् । ततः सिंहिकासुतमुखात् मुक्तः शशी इव तद्वक्त्रात् अपि आगतः । मैमाकनामा गिरिः अम्भोधेः वचसा जलात् उदपतत् । तम् नभसः समुद्राम्भसि उरसा वेगात् तूर्णम् निपात्य तदर्पितम् आतिथ्यम् कार्यस्य लघुतया हित्वा गतः । इह इयम् मम जविता केन सहसा आकृष्टा? किम् न पश्यामि ? अधः स्थिता नभसि विधोः भ्रान्त्या सुतवक्त्रनिर्गत इति धिया क्रुद्धा तज्जननी सा छाया माम् वृथा अग्रहीत् (इति) अहम् शङ्के ।

व्याख्या- प्रचलतीति प्रचलन् तस्य प्रचलतः = गच्छतः, **मम** = हनुमतः, **आद्या**= प्रथमा, **विघ्नस्य**= अन्तरायस्य, **विघ्नोऽन्तरायः प्रत्यूह** इत्यमरः । **मूर्तिः**= शरीरम्, **सुरसा** = नागमाता, **अभूत्** = अजायत । **ततः** = तदनन्तरम्, **सिंहिका**= छाया, **तस्याः सुतः**= राहुस्तस्य, **मुखात्** = वदनात्, **मुक्तः** = निर्गतः, **शशोऽस्यास्तीति शशीव** = चन्द्र इव, **तस्याः** = सिंहिकायाः, **वक्त्रात्** = मुखात्, **अपि आगतः** = आयातः । **मैनाक इति नाम यस्य सः, मैनाकनामा** = मैनाकाख्यः, **गिरिः**= पर्वतः, **अम्भोधेः**= समुद्रस्य, **वचसा** = वाक्येन, अनुरोधेनेत्यर्थः, **जलात्**= सलिलात्, **उदपतत्** = उद्गतवान् । **तम्** = मैनाकम्, **नभसः** = आकाशाद्, **समुद्रस्य**= सागरस्य, **अम्भसि** = जले, **अम्भोऽर्णतोय-पानीयनीरक्षीराम्बुशम्बरमित्यमरः।** **उरसा** = वक्षस्थलेन, **वेगात्** = जवात्, **तूर्णम्** = शीघ्रम्, **निपात्य** = पातयित्वा, **तेन** = मैनाकेन, **अर्पितम्** = दत्तम्, **अतिथेर्योग्यम्, आतिथ्यम्** = अभ्यागतसत्कारम्, **कार्यस्य** = सीतान्वेषणकर्मणः, **लघोर्भावो लघुता, तया लघुतया** = क्षिप्रकारितया, **हित्वा** = त्यक्त्वा, अगृहीत्वेति भावः। **गतः** = प्रस्थितः। **इह** = अस्मिन् स्थाने, **इयम्**= एषा, **मम**= हनुमतः, **जविता**= शैघ्र्यम्, **केन**= अज्ञातेन, **सहसा** = हठात्,

शङ्केऽहं सुतवक्त्रनिर्गत इति क्रुद्धा धिया साऽग्रहीत्
छाया तज्जननी विधोर्नभसि मां भ्रान्त्या वृथाधः स्थिता।।१।।
(युग्मम्)
(चिरं विचार्य)

अलं निरुत्साहेन ।

१६ उद्योग एव महतां यशसे श्रिये च
विघ्नैर्हता न विरमन्ति कृतेः कृतीन्द्राः ।

आकृष्टा = गृहीता । **किम्, न पश्यामि**= कथं न विलोकयामि। **अधः**= नीचैः, **स्थिता** = विद्यमाना, **नभसि** = आकाशे, **विधोः** = चन्द्रस्य, **भ्रान्त्या** = भ्रमेण, **सुतस्य** = राहोः, **वक्त्रात्**= वदनात्, **निर्गतः**= निसृत इति, **धिया**= बुद्ध्या, **क्रुद्धा**= रोषमुपगता, **तस्य** = राहोः, **जननी**= माता, **सा** = छाया, **माम्** = हनुमन्तम्, **वृथा**= निष्प्रयोजनम्, यथार्थमविदित्वैवेत्यर्थः, **अग्रहीत्**= गृहीतवतीति **अहम्, शङ्के** = मन्ये।

सरलार्थः - लङ्कां प्रस्थिते मयि प्रथमं विघ्नमूर्तिः सुरसा समुपस्थिता। राहुमुखाच्चन्द्र इव तस्या मुखान्निर्गतो मार्गे गच्छन्नहं समुद्रानुरोधेन समुपस्थितं मैनाकं प्राप्तवान् । तञ्चोरसा समुद्रजले जवेन निपात्य सीतान्वेषणकर्मणः क्षिप्रकारितया तदातिथ्यमस्वीकृत्य प्रस्थितोऽस्मि । अधुना जवेन गच्छन्नहं केनापि समाकृष्टोऽस्मि। नभसि मां राहुवक्त्रान्निर्गतं चन्द्रं मत्वा भ्रमेण क्रुद्धा राहुजननी छाया वृथैवाग्रहीदित्यहं मन्ये, इति ।

सुरसाया विघ्नमूर्तित्वेनारोपाद् **रूपकालङ्कारः** । सिंहिकासुतमुखमुक्तचन्द्रेण सह सुरसामुखनिर्गतस्य हनुमत औपम्यादुपमालङ्कारः । छायाकर्षणस्य राहुमुखनिर्गतत्वेन संभावनादुत्प्रेक्षालङ्कारः, हनुमतः चन्द्रत्वेन भ्रान्तेः, **भ्रान्तिमदलङ्कारः**। तथा चात्र भ्रान्तिमदुत्प्रेक्षयोरङ्गाङ्गिभावात्सङ्करालङ्कारः, तदन्यत्र तिलतण्डुलन्यायेन संमिश्रणात् **संसृष्टिः** । **शार्दूलविक्रीडितं वृत्तम्** ।

(**चिरम्** = बहुकालम्, **विचार्य** = चिन्तयित्वा) **निरुत्साहेन** = निरुद्योगेन पर्याप्तम्, न किमपि भवतीत्यर्थः ।

१६ अत्र हनुमान् विघ्नान् विजित्य कार्यं संपादयितुं शक्यत इति दृढतामभिव्यनक्ति- **उद्योग एवेति** ।

अन्वयः - उद्योग एव महताम् यशसे श्रिये च (भवति) विघ्नैः हताः कृतीन्द्राः कृतेः न विरमन्ति । विघ्नान् विजित्य स्वकृत्ये सहसा प्रयतः महानुभावः, उद्योगसिद्धफलम् एति ।

व्याख्या - उद्योगः = उद्यम एव, **महताम्** = महानुभावानाम्, **यशसे** =

उद्योगसिद्धिफलमेति महानुभावो
विघ्नान्विजित्य सहसा प्रयतः स्वकृत्ये ।।१०।।

१७ यतोऽहमिदानीमेवाधः स्थितां तां पदाघातेन हत्वा यमायतनं प्रापयिष्यामि ।
(इति वेगादधः पतनमनुकरोति)

(नेपथ्ये)

१८ बहुदिअस बुभुक्खिदाह्मि दाणिं
भवसि तुअं मम दिट्ठि आक्खु भोज्जम् ।
अहह विस मुहं इदो इदो मे
वणचल ! गच्छसि अज्झ रे कहिं किम् ।।११।।

कीर्त्यै, श्रिये = लक्ष्म्यै च भवति । विघ्नैः = अन्तरायैः, विघ्नोऽन्तरायः प्रत्यूह इत्यमरः । हताः= ताडिताः, कृतिषु इन्द्रा कृतीन्द्राः= कुशलिनः, कृतेः = कार्याद्, न विरमन्ति = न विरता जायन्ते । विघ्नान् = अन्तरायान्, विजित्य = जित्वा, स्वस्य कृत्यम् स्वकृत्यम् तस्मिन् स्वकृत्ये = निजकार्ये, प्रयतः = कृतप्रयत्नः, महान् अनुभावो यस्य सः, महानुभावः = महापुरुषः, उद्योगस्य सिद्धिः उद्योगसिद्धिस्तस्याः फलम् उद्योगसिद्धिफलम् = उद्यमसिद्धिलाभम्, एति = प्राप्नोति ।

सरलार्थः - उद्योग एव कीर्तिं श्रियञ्च ददाति, अत एव कृतीन्द्रा विघ्नैस्ताडिता अपि निजकार्ये प्रयताः सिद्धिं लभन्त इति । वसन्ततिलकं वृत्तमत्र ।

१७ यतः = यस्मात्, अहम् = हनुमान्, इदानीम् = अधुना, अधः = नीचैः, स्थिताम्= विद्यमानाम्, ताम् = छायाम्, पादाघातेन = चरणताडनेन, हत्वा = घातयित्वा, यमस्य = कालस्य, आयतनम् = गृहम्, प्राप्स्यामि = यापयिष्यामि । (इति = इत्थम्, वेगाद् = जवेन, अधःपतनम् = नीचैर्गमनम्, अनुकरोति)

१८ अत्र सिंहिका हनुमन्तं विलोक्य भक्षणाभिलाषं प्रकटयति - बहुदिवस इति ।

अन्वयः - इदानीम् बहुदिवसबुभुक्षिता अस्मि । त्वम् दिष्ट्या मम भोज्यम् भवसि खलु अहह, इतः मे मुखम् विश, रे वनचर ! अद्य इतः कुत्र गच्छसि किम्?

व्याख्या- इदानीम् = अधुना, बहुभिः = अधिकैः, दिवसैः = दिनैः, बुभुक्षिता = बुभुक्षाकुला, अस्मि = वर्ते । त्वम् = भवान्, दिष्ट्या = भाग्येन, मम = सिंहिकायाः, भोज्यम् = खाद्यम्, भवसि, खलु = निश्चयेन । अहह = भो, कपे, अह हेत्यद्भूते खेदे परिक्लेशप्रहर्षयोः । संबोधनेऽपीति मेदिनी । प्रकृष्टे हर्षे वायं शब्दः । इतः = अस्मात् स्थानात्, मे = मम, मुखम् = वदनम्, विश =

[बहुदिवसबुभुक्षिताऽस्मीदानीं
भवसि त्वं मम दिष्ट्या खलु भोज्यम् ।
अहह विश मुखमित इतो मे
वनचर ! गच्छस्यद्य रे कुत्र किम् ।]

(ततः प्रविशति राहुमाता सिंहिका)

१९ **सिंहिका** - (ऊर्ध्वं वीक्ष्य) अह्मो ! कधं बुभुक्खिदए मए अअं महं सत्तो समासादिदो । दिट्ठिआ मम मुहं लक्खीकदुअ गअणादो परिपदेदि । ता सच्चम् । जा अलगद्दस्स मुहे दैअं आहारं णएत्ति । [*अहो ! कथं बुभुक्षितया मयाऽयं महान् सत्वः समासादितः । दिष्ट्या मम मुखं लक्ष्यीकृत्य गगनात्परिपतति। तत्सत्यम् । यदगलगर्दस्य मुखे दैवमाहारं नयेदिति ।*]

२० **एक्कमत्तं विकअलं होइ अणेण वि बुभुक्खिदाए मे ।**
अवराइं कअलाइं दिट्ठिआ उवसप्पन्ति मे अग्गे ।।

प्रविश । रे **वनचर** = मर्कट! **अद्य** = अस्मिन् दिने, **इतः** = अस्मात् स्थानात्, **कुत्र** = कस्मिन्नपि स्थाने, **गच्छसि** = यासि किम् ?

सरलार्थः - अहं बहोः कालाद् बुभुक्षाकुलाऽस्मि । भाग्येन त्वम् मम भोज्यम् यातः । अतस्त्वं मम मुखं प्रविश । स्थानादस्मात् त्वं न कुत्रापि गन्तुं शक्नोषीति भावः । **आर्यावृत्तमत्र** । (**ततः** = तदनन्तरम्, **राहुमाता** = सिंहिका, **प्रविशति** = विशति)

१९ **सिंहिका** - (**ऊर्ध्वम्** = उपरि, **वीक्ष्य** = विलोक्य) **अहो** = आश्चर्यम् । **कथम्**= कस्मात्, **बुभुक्षितया** = बुभुक्षाकुलया, **मया** = सिंहिकया, **महान्** = विशालः, **सत्वः** = प्राणी, **समासादितः** = लब्धः । **दिष्ट्या** = भाग्येन, **मम** = मे, **मुखम्** = वदनम्, **लक्ष्यीकृत्य** = उद्दिश्य, **गगनात्** = आकाशात्, **परिपतति** = निपतति । **तत्** = पतनम्, **सत्यम्** = अवितथम्, **यत् अलगर्दस्य** = जलव्यालस्य, **अलगर्दो जलव्याल** इत्यमरः। **मुखे** = वदने, **दैवम्** = भाग्यम्, **आहारम्**= भोज्यम्, **नयेत्**= प्रापयेत् ।

२० अत्र सिंहिका हनुमन्तं विलोक्य तस्य भक्षणे स्वाभिलषितं प्रकटयति- **एकमात्रमिति**।

अन्वयः- वुभुक्षितायाः मे अनेन अपि एकमात्रम् कवलम् भवति । अपराणि कवलानि दिष्ट्या मे अग्रे उपसर्पन्ति ।

व्याख्या- भोक्तुमिच्छा बुभुक्षा, बुभुक्षा सञ्जाता अस्या इति **बुभुक्षितास्तस्याः**, **बुभुक्षितायाः** = क्षुधाकुलायाः, **मे** = मम, **अनेन** = एतेन

[एकमात्रमपि कवलं भवति अनेनापि बुभुक्षिताया मे
अपराणि कवलानि दिष्ट्योपसर्पन्ति मेऽग्रे ।।]

२१ चन्दो वा सूज्जो वा विमुचिअ पदेदि वि अ उत्तमुहादो ।
हग्गे गसेमि सअलं खगोलअं सणक्खत्तं वि ।।१२।।
[चन्द्रो वा सूर्यो वा विमुच्य पततीव पुत्रमुखात् ।
अहं ग्रसामि सकलं खगोलकं सनक्षत्रमपि ।।१२।।]

(इति मुखं विदारयति)

२२ वासवः - सूत! पश्यानयोरुदधःपततोः कौतुकम् । तथा हि -

२३ कपिर्व्योम्नस्तुङ्गात्पतति जवतस्तां प्रति रुषा
तमाक्रान्तुं छायोत्पतति मुखमास्तीर्य सहसा ।

अपि, कपिनेत्यर्थः । **एकमात्रम्** = एकमेव, **कवलम्** = ग्रासः, **भवति** = जायते। **अपराणि** = अन्यानि, **कवलानि** = ग्रासाः, **मे** = मम, **दिष्ट्या** = भाग्येन, **अग्रे** = आगामिनि समये, **उपसर्पन्ति** = समीपमेष्यन्ति ।

सरलार्थः - क्षुधार्ताया मम वानरोऽयमेक एव ग्रासो जायते, अपराश्च ग्रासाः पश्चादुपसर्पन्तीति । **आर्यावृत्तम्** ।

२१ अत्र सिंहिका हनुमन्तं निरीक्ष्य तद्भक्षणस्याभिलाषं प्रकाशयति- **चन्द्रो वेति** ।

अन्वयः - चन्द्रः वा सूर्यः पुत्रमुखात् विमुच्य पतति इव । अहम् सनक्षत्रम् सकलम् खगोलकम् अपि ग्रसामि ।

व्याख्या- चन्द्रः = हिमांशुः, **हिमांशुश्चन्द्रमाश्चन्द्र** इत्यमरः । **वा** = अथवा, **सरति आकाशे इति सूर्यः** = भानुः, **सूरसूर्यार्यमादित्यद्वादशात्मदिवाकरा** इत्यमरः । **वेत्यलङ्कारे** । **पुत्रस्य** = राहोः, **मुखात्** = वदनात्, **विमुच्य** = निर्गत्य, **पतति** = अध आगच्छति इव । **अहम्** = सिंहिका, **नक्षत्रेण सहितम् सनक्षत्रम्**= ऋक्षसहितम्, **नक्षत्रमृक्षं भं तारा** इत्यमरः । **सकलम्** = समग्रम्, **खगोलकम्** = आकाशमपि, **ग्रसामि** = भक्षयामि ।

सरलार्थः - असौ राहुर्गगनात्पतितः सूर्यो वा चन्द्र इव प्रतीयते । नक्षत्रसहितं खगोलमपि यदि पतेत्तदहं ग्रसामि, इति ।

अत्र, **उत्प्रेक्षालङ्कारः** । **आर्यावृत्तम्** । (इति मुखं विदारयति)

२२ **वासवः - सूत** = मातले! **अनयोः** = सिंहिकाहनुमतोः, **उदधःपततोः** = उत्पतन-निपतनयोः, **कौतुकम्** = कुतूहलम्, **पश्य** = विलोकय । **तथा हि** = यतः

२३ अत्र वासवः सिंहिकाहनुमतोर्निपतनोत्पने निरूपयति- **कपिरिति** ।

द्वयोर्वेगाद्वायुः सुतमपि समुत्सृज्य विरुवन् ।
मुखं दृष्ट्वा तस्याः परिपतति भीत्येव गगनम् ।।१३।।

२४ सूतः - आयुष्मन्! अस्याः स्वरूपं दृष्ट्वा सर्वे शूरतरा अपि बिभीयुः । अस्या परिचयं श्रोतुमिच्छामि ।

२५ वासवः - शृणु हे मातले! कथयामि तस्याः परिचयम् । तथा हि -

२६ स्वर्भानुर्भानुमन्तं विधुमपि सकलं प्राप्य यः पर्वसन्धिं
गृह्णाति व्योममार्गे ग्रहणमिति हि तत्कारणं राहुमाहुः ।
मातेयं तस्य राहोर्ग्रसति पतितया छायया सन्मुखस्थं
स्रष्टा तां हन्तुकामः पवनसुतमिमं वेगवन्तं ससर्ज ।।१४।।

अन्वयः - कपिः तुङ्गात् व्योम्नः तां प्रति रुषा जवतः पतति । छाया मुखम् आस्तीर्य तम् आक्रान्तुम् सहसा उत्पतति । द्वयोः वेगात् वायुः सुतम् अपि समुत्सृज्य विरुवन् उत्पतति । गगनम् तस्याः मुखम् दृष्ट्वा भीत्या पतति इव ।

व्याख्या - **कपिः** = वानरः, **तुङ्गात्** = उन्नतात्, **व्योम्नः** = आकाशात्, **ताम्**= सिंहिकां प्रति, **रुषा**= क्रोधेन, **जवतः**= वेगेन, **पतति** = निपतति। **छाया**= सिंहिका च, **मुखम्**= वदनम्, **आस्तीर्य** = विस्तार्य, **तम्** = हनुमन्तम्, **आक्रान्तुम्**= आक्रमणं विधातुम्, **सहसा** = हठात्, **उत्पतति** = उद्गच्छति । **द्वयोः** = सिंहिका-हनुमतोः, **वेगात्** = जवात्, **वायुः** = पवनः, **सुतम्** = हनुमन्तमपि, **समुत्सृज्य** = त्यक्त्वा, **विरुवन्** = शब्दायमानः, **उत्पतति** = ऊर्ध्वं याति, **गगनम्**= आकाशम्, **तस्याः** = सिंहिकायाः, **मुखम्** = वदनम्, **दृष्ट्वा** = विलोक्य, **भीत्या**= भयेन, **पतति** = निपतति इव दृश्यत इति भावः । अत्र, **उत्प्रेक्षालङ्कारः** । **शिखविरणीवृत्तमत्र**।

२४ **सूतः - आयुष्मन्**= स्वामिन्! **अस्याः**= सुरसायाः, **स्वरूपम्** = आकारम्, **दृष्ट्वा**= विलोक्य, **सर्वे** = निखिलाः, **अतिशयेन शूराः**, **शूरतराः** = अतिपराक्रमशालिनोऽपि, **बिभीयुः** = त्रस्येयुः । **अस्याः** = सिंहिकायाः, **उद्भवस्य** = उत्पत्तेः, **कारणम्** = हेतुम्, **श्रोतुम्** = आकर्णयितुम्, **इच्छामि** = वाञ्छामि ।

२५ **वासवः - हे मातले** = भो सूत! **शृणु** = आकर्णय, **तस्याः** = सिंहिकायाः, **किंवदन्तीम्** = कथाम्, **कथयामि** = वदामि, **तथा हि** = यथा-

२६ अत्र वासवः सिंहिकायाः परिचयं प्रस्तौति - **स्वर्भानुरिति** ।

अन्वयः - यः स्वर्भानुः पर्वसन्धिम् प्राप्य भानुमन्तम् सकलम् विधुम् अपि व्योममार्गे गृह्णाति इति ग्रहणम् (कथ्यते) तस्य कारणम् राहुम् आहुः । तस्य राहोः इयम् माता पतितया छायया सन्मुखस्थं ग्रसति । स्रष्टा ताम् हन्तुकामः इमम्

२७ **हनुमान्** - (स्वगतम्) कथमियं मां भक्षयितुं मुखमावृत्यागतैव । अहमिदानीं तस्या मुखे निमज्ज्य तीक्ष्णैर्नखैरस्या महतो वपुषो मर्माणि छित्वा पातयामि। (इति तस्या मुखे निमज्जति ।)

२८ **वासवः** - हा हनुमन् ! हा महावीर ! कथमिदानीं भवाँस्तस्या दुष्टराक्षस्या

वेगवन्तम् पवनसुतम् ससर्ज ।

व्याख्या - यः = प्रसिद्धः, **स्वर्भानुः** = राहुः, **तमस्तु राहुः स्वर्भानुरित्यमरः। पर्वणः सन्धिः पर्वसन्धिः, तम् पर्वसन्धिम्** = दर्शप्रतिपदोः, पौर्णमासीप्रतिपदोर्वा संगमम्, **प्राप्य** = लब्ध्वा, प्र-आप् + क्त्वा > ल्यप् । **भानवः** = किरणाः सन्ति, **अस्येति भानुमान् तम् भानुमन्तम्** = सूर्यम्, **कलाभिः** = षोडशांशैः सहितः, **तम्, सकलम्** = पूर्णकलोपेतम्, **विधुम्** = चन्द्रम् अपि, **व्योममार्गे** = आकाशपथि, **गृह्णाति** = ग्रसति, **इति** = अस्माद् हेतोः, **ग्रहणम्**, कथ्यते । **तस्य** = ग्रहणस्य, **कारणम्** = हेतुम्, **रहति** = गृहीत्वा, त्यजति चन्द्रार्कौ **इति राहुस्तम् राहुम्, आहुः** = ऊचुः, मनीषिण इति शेषः । **तस्य** = पूर्वोक्तस्य, **राहोः** = स्वर्भानोः, **माता** = सिंहिका, **पतितया** = जले समागतया, **छायया** = अनातपरेखया, **संमुखे तिष्ठतीति संमुखस्थस्तम्, संमुखस्थम्** = पुरो विद्यमानम्, **ग्रसति** = गृहीत्वा खादति । **सृजतीति स्रष्टा** = विधाता, सृज + तृच्। **ताम्** = सिंहिकाम्, **हन्तुम् कामो यस्य सः, हन्तुकामः** = घातयितुमिच्छन्, **इमम्** = पुरो दृश्यमानम्, **वेगोऽस्यास्तीति वेगवान्, तम् वेगवन्तम्** = जविनम्, **पवनस्य सुतः, पवनसुतस्तम् पवनसुतम्** = हनुमन्तम्, **ससर्ज** = सृष्टवान् ।

सरलार्थः - पर्वसन्धौ यो व्योम्नि सूर्यश्चन्द्रश्च गृह्णाति, तदेव ग्रहणमिति कथ्यते । तस्य कारणम् राहुं कथयन्ति । तस्य माता सिंहिका समुद्रसलिलमुपरि पतितया छाययाकृष्य पुरस्थं ग्रसति । तामेव हन्तुं विधिर्वेगवन्तं हनुमन्तमसृजदिति।

वर्णानामसकृदावृत्तेः, **अनुप्रासालङ्कारः** ।

२७ **हनुमान्** - (**स्वगतम्** = आत्मगतम्) **इयम्** = एषा, **माम्** = हनुमन्तम्, **भक्षयितुम्**= खादितुम्, **मुखम्** = वदनम्, **आवृत्य** = विस्तार्य, **कथम्** = केन प्रकारेण, **आगता**= आयाता एव । **अहम्** = हनुमान्, **इदानीम्** = अधुना, **तस्याः** = सिंहिकायाः, **मुखे** = वदने, **निमज्य** = प्रविश्य, **तीक्ष्णैः** = निशितैः, **नखैः** = कराग्रैः, **महतः**= विशालस्य, **अस्याः** = सिंहिकायाः, **वपुषः** = शरीरस्य, **मर्माणि** = जीवाधारान्, **छित्वा** = कृन्तयित्वा, **पातयामि** = विनाशयामीत्यर्थः । (**इति** = इत्थम्, **तस्याः**= सिंहिकायाः, **मुखे** = वदने, **निमज्जति** = प्रविशति)

२८ **वासवः** - **हा हनुमान्** = भो आञ्जनेय! **भो महावीर** = हे महापराक्रमिन्!

मुखे निमग्नः । बताधुना तव बलप्रशंसा वृथा जाता । सिंहिकावधाय हनुमतः सृष्टिरिति यदुच्यते तदप्यसत्यं जातम् । अतःपरं कोऽन्यो रामकार्यं साध्नोति। त्वादृशस्य महोत्साहस्य स्वामिभक्तपरायणस्येदृशं मरणं दृष्ट्वा भृशं मनो मे व्यथते । किमत्र मया कार्यम् । क्व गच्छसि दुष्टे ! इदानीमेवानेन कुलिशाघातेन त्वां यमपुरीं प्रापयामि । (इति तथाकर्तुं नाटयति)

२९ सूतः - भगवन्! अलं विषादरोषाभ्याम् । नायं पवनात्मजस्तस्या मुखे निमज्ज्य प्राणाँस्त्यक्ष्यति । पश्यतु देवः ।

३० **यदायं राक्षस्या वदनमविशद्वायुतनय-**
स्तदासीद् हृष्टा सा चकितनयनास्तीर्णवदना ।

इदानीम् = अधुना, **भवान्** = त्वम्, **दुष्टा चासौ राक्षसी, तस्याः, दुष्टराक्षस्याः**= अधमनिशाचर्याः, **तस्याः**= सिंहिकायाः, **मुखे**= वदने, **निमग्नः** = प्रविष्टः, **बत**= खेदस्य विषयोऽस्ति **यत् तव** = हनुमतः, **बलस्य** = शक्तेः, **प्रशंसा** = श्लाघा, **वृथा**= निरर्थिका, **जाता** = अभवत् । **सिंहिकायाः** = छायायाः, **वधाय**= नाशाय, **हनुमतः** = पवनसुतस्य, **सृष्टिः** = उत्पत्तिः, **इति यत् उच्यते तदपि न सत्यम् असत्यम्** = अवितथञ्जातम् । **अतः परम्** = अनन्तरम्, **अन्यः** = अपरः, हनुमतो भिन्न इति शेषः । **कः** = कतमः, **जनः, रामस्य** = दाशरथेः, **कार्यम्** = कृत्यम्, **साध्नोति** = संपादयति । **त्वादृशस्य** = भवत्तुल्यस्य, **महान् उत्साहो यस्य तस्य महोत्साहस्य** = अतिशयमुत्साहं दधतः, **स्वामिनः** = प्रभोः, **या भक्तिः** = श्रद्धा, **तस्याम्, परायणः** = समर्थस्तस्य, **ईदृशम्** = एतादृशम्, **मरणम्**= मृत्युम्, **दृष्ट्वा**= विलोक्य, **मे** = मम, **मनः** = चेतः, **भृशम्** = अत्यन्तमेव, **व्यथते**= पीडितं भवति । **अत्र** = अस्मिन् विषये, **मया** = वासवेन, **किम् कार्यम्** = किं विधेयम् ? **भो दुष्टे** = हे पिशुने! **क्व** = कुत्र, **गच्छसि** = यासि ? **इदानीम्** = अधुना एव, **अनेन** = एतेन, **कुलिशस्य** = वज्रस्य, **आघातेन** = ताडनेन, **त्वाम्**= सिंहिकाम्, **यमस्य** = धर्मराजस्य, **पुरीम्** = नगरीम्, **प्रापयामि** = नयामि (इति तथा कर्तुं नाटयति) ।

२९ **सूतः - भो भगवन्! विषादः** = खेदः, **रोषः** = क्रोधश्च **ताभ्याम् अलम्** = पर्याप्तम् । न किमपि प्रयोजनमित्यर्थः । **अयम्** = एषः, **पवनस्य** = वायोः, **आत्मजः**= सूतः, **तस्याः**= सिंहिकायाः, **मुखे**= वदने, **निमज्य** = प्रविश्य, **प्राणान्**= असून्, **न त्यक्ष्यति** = न हास्यति । **देवः** = भवान्, **पश्यतु** = विलोकयतु ।

३० अत्र मातलिः सिंहिकाया अवस्थां वर्णयति- **यदायमिति** ।

इदानीं स्तब्धाक्षी विकृतवदनाधः पतति खे
नखैरन्तर्बाधामनुभवति किं सा हनुमतः ।।१५।।

अपि च -

३१ सूर्याचन्द्रमसोश्च मण्डलमसौ गृह्णाति राहुः स्वतः
शीघ्रं मुञ्चति धर्म एष सहजस्तस्याः कुलस्याधमः ।
स्वर्भानोर्जननीयमेवमचिरान्नूनं कपिं मोक्ष्यति
ज्ञात्वा मर्मभिदः कपेर्नखमुखध्वस्ताङ्गपीडां भृशम् ।।१६।।

अन्वयः - यदा अयम् वायुतनयः राक्षस्याः वदनम् अविशत् तदा सा हृष्टा चकितनयना आस्तीर्णवदना आसीत्, इदानीम् स्तब्धाक्षी विकृतवदना खे अधः पतति । सा हनुमतः नखैः अन्तर्बाधाम् अनुभवति किम् ?

व्याख्या - **यदा** = यस्मिन् काले, **अयम्** = एषः, **वायुतनयः** = पवनसुतः, **राक्षस्याः** = निशाचर्याः, **वदनम्** = मुखम्, **अविशत्** = प्रविष्टवान्, **तदा** = तस्मिन् काले, **सा** = सिंहिका, **हृष्टा** = प्रसन्ना, **चकिते** = विस्मययुते, **नयने** = नेत्रे **यस्याः सा, चकितनयना** = विस्मिताक्षी, **आस्तीर्णम् वदनं यस्याः सा आस्तीर्णवदना** = प्रफुल्लानना च, आसीत्, परम्, **इदानीम्** = अधुना, **स्तब्धे अक्षिणी यस्याः सा, स्तब्धाक्षी** = निश्चलनयना, **विकृतं वदनं यस्याः, सा विकृतवदना**= विवर्णानना च, **खे** = आकाशे, **अधः** = नीचैः, **पतति** = याति । **सा** = सिंहिका, **हनुरस्यास्तीति हनुमान्** = पवनसुतः, **तस्य नखैः** = कराग्रैः, **अन्तः** = शरीराभ्यन्तरे, **बाधाम्** = पीडाम्, **अनुभवति** = अनुजानीते ।

सरलार्थः - यदा हनुमान् सिंहिकायाः वदनं प्राविशत्तदा सा प्रसन्ना विस्मिताक्षी विवृतवदना चावर्तत । परमधुना स्तब्धनयना विवर्णानना चाकाशे नीचैः पतति, हनुमतो नखैः शरीरान्तर्बाधाञ्चानुभवतीति ।

अत्र सन्देहस्वभावोक्त्योः सङ्करालङ्कारः । शिखरिणीवृत्तम् ।

३१ अत्र मातलिः कुलधर्मानुसारं सिंहिका हनुमन्तं मोक्ष्यतीति प्रतिपादयति -

अन्वयः - असौ अधमः राहुः सूर्याचन्द्रमसोः मण्डलम् गृह्णाति, स्वतः शीघ्रम् मुञ्चति च । एषः तस्याः कुलस्य सहजः धर्मः, एवम् इयम् स्वर्भानोः जननी मर्मभिदः कपेः भृशम् नखमुखध्वस्ताङ्गपीडाम् ज्ञात्वा अचिरात् कपिम् नूनं मोक्ष्यति।

व्याख्या - **असौ**= एषः, **अधमः**= दुष्टः, **राहुः**= स्वर्भानुः, **सूर्यश्चचन्द्रमाश्च, तौ सूर्याचन्द्रमसौ** = रविचन्द्रौ, **देवता द्वन्द्वे चेत्यात्वम्** । **मण्डलम्** = बिम्बम्, **बिम्बोऽस्त्री मण्डलं त्रिषुः**, इत्यमरः । **गृह्णाति** = ग्रसति । **स्वतः** = स्वयमेव,

३२ वासवः - सूत! यत्त्वयोदितं तदवितथं प्रतिभाति । पश्य ।

३३ लम्बन्तेऽधोरुणाभाः परुषतरकचाः खात्पतन्त्याश्च तस्याः
संमीलच्चक्षुषोऽस्या उपरि परिगता डीयते गृध्रपंक्तिः ।
विद्युद्दीर्घौ च बाहू घनसमवपुषः संस्रतोऽस्याः प्रवेशो
वक्त्रान्तर्मारुतेः संजनयति निधनं काकतालीयमस्याः।।१७।।

शीघ्रम् = क्षिप्रम्, मुञ्चति = त्यजति च । एषः = ग्रहणत्यजनरूपः, तस्याः = सिंहिकायाः, कुलस्य = वंशस्य, धर्मः = स्वभावः, अस्तीति शेषः । एवम् = इत्थम्, इयम् = एषा, स्वर्भानोः = राहोः, जननी = माता, सिंहिकेत्यर्थः । मर्माणि भिनत्तीति मर्मभिद्, तस्य मर्मभिदः = जीवाधारभूताङ्गविदारकस्य, कपेः = वानरस्य, भृशम् = अत्यन्तम्, नखाश्च मुखञ्च नखमुखम् (समाहारद्वन्द्वः) तेन ध्वस्तानि यानि अङ्गानि तेषां पीडा, ताम्, नखमुखध्वस्ताङ्गपीडाम् = नखरदशनक्षतावयवबाधाम्, ज्ञात्वा = विदित्वा, अचिरात् = शीघ्रमेव, कपिम् = वानरम्, नूनम् = निश्चयेन, मोक्ष्यति = त्यक्ष्यति । अत्र शार्दूलविक्रीडितं वृत्तम्।

सरलार्थः - अयं राहुः सूर्यचन्द्रयोर्बिम्बं ग्रसित्वा पुनः शीघ्रमेव मुञ्चति । तस्य कुलस्यायं धर्मः । अतः सिंहिका च हनुमन्तं निगीर्य तदीयमुखनखक्षतपीडया द्रुतमेव तं मोक्ष्यतीति ।

३२ वासवः - सूत = मातले! यत् त्वया = भवता, उदितम् = कथितम्, तत् अवितथम् = सत्यम्, प्रतिभाति = प्रतीयते । पश्य = विलोकय ।

३३ अत्र वासवो मातलेर्वाक्यमेव समर्थयति- लम्बन्ते, इति ।

अन्वयः - खात् पतन्त्याः तस्याः अरुणाभाः परुषतरकचाः अधः लम्बन्ते। च संमीलच्चक्षुषः अस्या उपरि परिगता गृध्रपङ्क्तिः डीयते । घनसमवपुषः अस्याः विद्युद्दीर्घौ बाहू च संस्रतः । मारुतेः वक्त्रान्तःप्रवेशः अस्याः काकतालीयं निधनं जनयति ।

व्याख्या- खात् = आकाशात्, नभोऽन्तरीक्षं गगनमनन्तं सुरवर्त्म खमित्यमरः । पततीति पतन्ती, तस्याः पतन्त्याः= अधो गच्छन्त्याः, पत्+ शतृ। तस्याः= सिंहिकायाः, अरुणा = रक्तवर्णा, आभा = कान्तिर्येषान्ते तथाविधाः, अतिशयेन परुषाः परुषतरा, परुषतराश्च ते कचाः, परुषतरकचाः = कर्कशतरकेशाः, अधः = नीचैः, लम्बन्ते = लम्बिता भवन्ति । संमीलती चक्षुषी यस्यास्तस्याः संमीलच्चक्षुषः = निमीलन्नेत्रायाः, अस्याः = सिंहिकायाः, उपरि= उपरिष्टात्, परिगता= समागता, गृध्राणाम् = दाक्षाय्यानाम्, पङ्क्तिः = ततिः, डीयते= उद्गच्छति । घनेन समं वपुर्यस्यास्तस्याः, घनसमवपुषः = मेघोपमशरीरायाः,

अपि च -

३४ मृतप्राया नूनं कपिनखरलूनं वपुरसौ
दधाना क्रव्यादी निपतति पिधात्री हनुमतः ।
इदानीं पश्यामि च्युतमिव विधुं राहुमुखतः
कपीन्द्रं पूर्णाङ्गं करचरणविस्फूर्जितदिवम् ।।१८।।

अस्याः = सिंहिकायाः **विद्युदिव** = तडिदिव, **दीर्घौ** = लम्बौ, **बाहू** = करौ च, **संस्रतः** = नीचैर्गच्छतः । **मरुतस्यापत्यं पुमान् मारुतिस्तस्य मारुतेः** = हनुमतः, अत इञेति सूत्रेणेञ् । **वक्त्रस्य** = सिंहिकामुखस्य, **अन्तः** = अभ्यन्तरे, **प्रवेशः** = गमनम्, **अस्याः** = सिंहिकायाः, **काकतालीयम्** = काकागमनकाल एव तालपतनेन तुल्यम्, **निधनम्**= मृत्युम्, **जनयति** = ज्ञापयति ।

सरलार्थः - गगनात्पतन्त्याः सिंहिकाया अरुणवर्णाः परुषाः केशा लम्बन्ते। निमीलिताक्ष्या तस्या उपरि गृध्रपङ्क्तिरुड्डीयते । मेघसदृशवपुषोऽस्या विद्युत्तुल्यौ बाहू संस्रतः । हनुमतो वक्त्रान्तःप्रवेशः सिंहिकायाः काकतालीयं निधनं सूचयति ।

अत्र, उपमात्रयस्य **संसृष्टिः**, **स्वभावोक्तिश्च** ।

३४ अत्र वासवः सिंहिकां निपात्य निर्गतं हनुमन्तं वर्णयति-**मृतप्रायेति** ।

अन्वयः - मृतप्राया नूनम् कपिनखरलूनं वपुः दधाना हनुमतः पिधात्री असौ क्रव्यादी निपतति । इदानीम् राहुमुखतः च्यूतम् विधुम् इव पूर्णाङ्गम् करचरणविस्फूर्जितदिवम् कपीन्द्रम् पश्यामि ।

व्याख्या - प्रायेण मृतेति मृतप्राया = वहुशस्त्यक्तजीवना, **नूनम्** = निश्चयेन, **कपिना** = हनुमता, **नखैरः** = कराग्रैः **लूनम्** = छिन्नम्, **वपुः** = शरीरम्, **धत्ते इति दधाना** = धारयन्ती, धा + शानच् । **हनुमतः** = पवनसुतस्य, **पिधात्री**= अन्तर्धात्री, **क्रव्यम्** = आममांसम्, **अत्तीति क्रव्याद्, तस्य स्त्री क्रव्यादी** = राक्षसी, **राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्त्रप आशर** इत्यमरः । **निपतति** = नीचैर्याति । **इदानीम्** = अधुना, **राहोः** = स्वर्भानोः, **मुखतः** = वदनात्, **च्युतम्**= निर्गतम्, **विधुम्** = चन्द्रमिव **पूर्णानि अङ्गानि** = अवयवा **अन्यत्र, अंशाः यस्य तम् तथाविधम्, कराभ्याम्**= हस्ताभ्याम्, **चरणाभ्याम्** = पादाभ्याञ्च, **विस्फुर्जितम्** = प्रकाशितम्, **दिवम्** = द्यौः, **येन तम् तथाविधम् कपीनाम्, इन्द्रस्तम् कपीन्द्रम्**= वानरमुख्यम्, हनुमन्तमित्यर्थः । **पश्यामि** = विलोकयामि ।

सरलार्थः - हनुमता नखैः छिन्नं शरीरं धारयन्त्यसौ सिंहिका पतन्ती विद्यते। राहुमुखान्निर्गतं चन्द्रमिव सिंहिकां निहत्य बहिरागतं पूर्णाङ्गं करचरणैः प्रकाशितान्तरिक्षं हनुमन्तमहमधुना पश्यन्नस्मि, इति ।

३५ **सिंहिका** - हा हदाह्मि । कहिं चिट्ठसि पिअउत्त । [*हा हतास्मि । क्व तिष्ठसि प्रियपुत्र !*] (इति गगनाल्लवणसमुद्राम्भसि निपतति)

३६ **मातलिः** - आयुष्मन्! सोऽयं मारुतिः सिंहिकावधप्रोत्साहितो दक्षिणदिशाभिमुखं त्वरयतीव दृश्यते । आज्ञापयतु देवः । किमतःपरं कार्यम् ।

३७ **वासवः** - सूत! चोदयाश्वान् । आवामपि तत्पार्श्वकाविवान्तर्हितावनुसराव ।

३८ **मातलि** - यथा प्रभविष्णवे रोचते । (इति रथवेगं निरूपयति)

३९ **हनुमान्** - (दक्षिणदिशमवलोकयन् । आत्मगतम्) अहो रुचिरतास्य जलनिधितीरवर्तिनस्त्रिकूटाचलस्य । धन्येयं त्रिकूटाचलमूर्ध्नि स्थिता लङ्का रत्नकूटाचलमूर्ध्नि स्थितामरावतीव विराजते । तथा हि -

---

अत्र, **उपमालङ्कारः** । **शिखरिणीवृत्तम्** ।

३५ **सिंहिका** - **हा** = हन्त, **हता** = मारिता, अस्मि । **प्रियपुत्र** = हे राहो! **क्व** = कुत्र, **तिष्ठसि** = निवससि । (**इति** = इत्थम्, **गगनात्** = आकाशात्, **लवणसमुद्रस्य** = क्षारसागरस्य, **अम्भसि** = जले, **निपतति** = पतति)

३६ **मातलिः** - **आयुष्मन्** = स्वामिन्! **अयम्** = एषः, **सः** = पूर्वोक्तः, **मरुतस्याऽपत्यं पुमान्, मारुतिः** = हनुमान्, **सिंहिकायाः** = राहुजनन्याः, **वधेन** = नाशेन, **प्रोत्साहितः**= सोत्साहः, **दक्षिणदिशायाः** = दक्षिणाशायाः, **अभिमुखम्** = सन्मुखम्, **त्वरयतीव** = शीघ्रं यातीव, **दृश्यते** = विलोक्यते । **देवः** = भवान्, **आज्ञापयतु**= निर्दिशतु। **अतः परम्** = अनन्तरम्, **किं कार्यम्** = किं विधेयम् ?

३७ **वासवः** - **अश्वान्** = घोटकान्, **चोदय** = प्रेरय, **आवाम्** = मातालिवासवौ, **सः पार्श्वे ययोस्तौ तत्पार्श्वकौ** = हनुमत्समीपस्थौ, **अन्तर्हितौ** = गुप्तौ, **अनुसराव** = अनुगच्छाव ।

३८ **मातलिः** - **यथा** = यादृशम् **प्रभविष्णवे** = समर्थाय भवते, **रोचते** = स्पृहयति। (**इति** = इत्थम्, **रथस्य** = स्यन्दनस्य, **वेगम्** = जवम्, **निरूपयति** = प्रदर्शयति)

३९ **हनुमान्** - (**दक्षिणदिशम्** = दक्षिणाशाम्, **अवलोकयन्** = पश्यन्, **आत्मगतम्**= स्वगतम्) **अस्य**= पुरोवर्तिनः, **जलनिधेस्तीरे वर्तत इति तस्य जलनिधितीरवर्तिनः**= समुद्रतटावस्थितस्य, **त्रयः कूटाः, यस्य सः, त्रिकूटः स चासौ, अचलः, त्रिकूटाचलस्तस्य, रुचिरस्य भावः, रुचिरता** = रम्यता, **अहो** = आश्चर्योपादिका, अस्तीति शेषः । **इयम्** = एषा, **त्रिकूटाचलस्य** = त्रिकूटपर्वतस्य, **मूर्ध्नि** = शिखरे, **स्थिता** = विद्यमाना, **लङ्का** = रावणपुरी, **रत्नानां कूटाः सन्ति यस्मिन् सः, रत्नकूटः स चासौ, अचलः रत्नकूटाचलः** = सुमेरुपर्वतः, **तस्य मूर्ध्नि** =

४० स्वर्धुन्येवेह नानाविधभुवनचरव्याकुलद्वीपवत्या
युक्ता रत्नाकराढ्या कनकमयशिलासंवृता दिव्यवृक्षाः ।
कच्छैःस्वच्छैरनूपैरनुपमघटितैरन्तरीपैर्विचित्रा
लङ्का पूः किं त्रिकूटे किममरनगरी रत्नकूटेऽथवेयम् ।।१९।।

अपि च -

४१ ललिततरतरङ्गैः रत्नभूषां गृहीत्वा
पतिरपि सरितां कं दर्पचिह्नं दधानः ।

शिखरे, **स्थिता** = विद्यमाना, **अमरावतीव** = इन्द्रनगरीव, **विराजते** = शोभते । **तथा हि** = यतः ।

४० अत्र हनुमान् स्वगतमेव लङ्कां वर्णयति - **स्वर्धुन्येति** ।

अन्वयः - इह स्वर्धुन्या इव नानाविधभुवनचरव्याकुलद्वीपवत्या युक्ता रत्नाकराढ्या कनकमयशिलासंवृता दिव्यवृक्षा स्वच्छैः कच्छैः अनुपमघटितैः, अनुपैः अन्तरीपैः, विचित्रा इयम् पूः त्रिकूटे लङ्का किम् अथवा रत्नकूटे अमरनगरी किम्।

व्याख्या - **स्वर्धुन्या इव** = मन्दाकिन्या इव, **नानाविधैः** = अनेकैः, **भुवनेषु चरन्तीति भुवनचरास्तैः**, **भुवनचरैः** = प्राणिभिः, **व्याकुलया** = व्याप्तया, **द्वीपवत्या** = नद्या, **युक्ता** = समवेता, **रत्नानाम्** = स्वर्णगैरकादिधातूनाम्, **आकरैः खनिभिः**, **आढ्या** = पूर्णा, **कनकैर्निर्मिताः कनकमय्यः** = स्वर्णमय्यः, **याः शिलाः** = पाषाणास्ताभिः, **संवृताः** = आच्छादिताः, **दिव्याः** = स्वर्गीयाः, **वृक्षाः**= तरवो **यस्यां सा**, **स्वच्छैः** = निर्मलैः, **कच्छैः** = जलप्रायप्रदेशैः, प्राकृतिकैरिति भावः । **अनुपमं यथा स्यात्तथा घटितैः** = निर्मितैः, **अनूपैः** = कच्छैः, **अन्तर्गता आपोऽत्रेति अन्तरीपाः** = द्वीपास्तैः, **द्वीपो स्त्रियामन्तरीपं यदन्तर्वारिणस्तटम्**, इत्यमरः । **विचित्रा** = रम्या, **इयम्** = एषा, **पूः** = नगरी, **पूः स्त्री पुरीनगर्यौ** वेत्यमरः । **त्रयः कूटाः**, **यस्मिन् तस्मिन्**, **त्रिकूटे** = त्रिकूटाचले, **लङ्का** = रावणनगरी, **वर्तते किम् अथवा** = किं वा, **रत्नानां कूटा यत्र तस्मिन् रत्नकूटे**= सुमेरौ, **अमराणाम्** = देवानाम्, **नगरी** = पुरी, अमरावतीत्यर्थः । **वर्तते किम्**?

सरलार्थः - मन्दाकिन्येव विविधप्राणिसङ्कुलया नद्या परिलसिता रत्नानामाकरैराढ्या कनकशिलाच्छादिता कल्पवृक्षैर्युता प्राकृतिकैः स्वच्छैः कच्छैः, निर्मितैरनूपैरन्तरीपैश्च विचित्रेयं पूः त्रिकूटे लङ्का वर्ततेऽथवा रत्नकूटेऽमरावती वर्तत इति सन्देहं जनयतीति ।

उपमासन्देहयोः **संसृष्टिः** । **स्रग्धरावृत्तमत्र** ।

४१ अत्र हनुमान् लङ्कागतानां नदीनां समुद्रस्य च सङ्गमं वर्णयति- **ललिततरतरङ्गैरिति**।

प्रसरति तटिनीनां सङ्गमायेव तासां
मुखरसमपि लेढुं तत्र लङ्कागतानाम् ।।२०।।

४२ कथमहं गच्छेयम् । भवतु । अहं तावन्मेघ इव दिगन्तरविशालतां परिक्रम्य गगनात् त्रिकूटकूटे निपतेयम् । (इति विचिन्त्य वेगोत्पतनमनुकरोति)

४३ **वासवः** - पश्य, हनुमतोऽपरिमितोत्कर्षम् ।

४४ **मातलिः** - (साञ्जलिः) आयुष्मन्! कपित्रिकूटयोरन्तरालं विपुलतरमिव विभाति।

अन्वयः - सरिताम् पतिः अपि ललिततरतरङ्गैः रत्नभूषाम् गृहीत्वा कं दर्पचिह्नं दधानः तत्र लङ्कागतानाम् तटिनीनाम् सङ्गमाय, तासाम् मुखरसमपि लेढुम् इव प्रसरति ।

व्याख्या - **सरिताम्** = नदीनाम्, **पतिः** = स्वामी, सतीष्वपि वहीषु भार्यासु इत्यर्थो व्यज्यते । समुद्रः अपि **अतिशयेन ललिताः ललिततराः, ते च ते तरङ्गाः ललिततरतरङ्गास्तैः, ललिततरतरङ्गैः** = सुन्दरतरोर्मिभिः, **रत्नान्येव भूषा ताम् रत्नभूषाम्** = सुवर्णहीरकादि, **अन्यत्र रत्नानाम्** = सुवर्णादीनाम्, **भूषाम्** = अलङ्कारम्, **गृहीत्वा** = धृत्वा, **कम्** = जलमयम्, **दर्पस्य** = अभिमानस्य, **चिह्नम्** = लक्षणम्, **अन्यत्र कन्दर्पस्य** = कामदेवस्य, **चिह्नम्** = जननेन्द्रियम्, **धत्ते इति दधानः** = धारयन्, **तत्र** = समुद्रतटे, **अन्यत्र संगमनस्थले, लङ्कातः** = रावणनगरीतः, **आगतानाम्** = आयातानाम्, **तटिनीनाम्** = नदीनाम्, **अन्यत्र स्त्रीणाम्, सङ्गमाय** = मेलनाय, **अन्यत्र** संभोगाय, **तासाम्** = नदीनाम् **अन्यत्र** स्त्रीणाम्, **मुखस्य**= अग्रभागस्य, **अन्यत्र** वदनस्य, **रसम्** = जलम्, **अन्यत्र** स्वादम्, **लेढुम्** = लक्षणया, ग्रहीतुम् **अन्यत्र** चुम्बितुम्, **इव प्रसरति** = अग्रे याति ।

सरलार्थः - यथा पुंलिङ्गोपेतः स्त्रिया वल्लभः, हस्तैः भूषणानि गृहीत्वा सङ्गमायागतानामभिसारिकाणां मुखरसं लेढि तथैव सरित्पतिः जलमयं चिह्नं दधानः मेलनाय लङ्कागतानां नदीनामग्रभागस्य जलमास्वादयितुमिव प्रसरतीति ।

अत्रोत्प्रेक्षासमासोक्त्योः **सङ्करः** । **मालिनीवृत्तम्** । तल्लक्षणं यथा-

ननमयययुतेयं मालिनी भोगिलोकैः ।

४२ **कथम्** = केन प्रकारेण, **अहम्** = हनुमान्, **गच्छेयम्** = यायाम् ? **भवतु** = अस्तु। **अहम्** = हनुमान्, **मेघः** = घन इव, **दिशाम्** = आशानाम्, **अन्तरस्य** = मध्यस्य, **विशालताम्** = विस्तारम्, **परिक्रम्य** = परिभ्रम्य, **गगनात्** = आकाशात्, **त्रिकूटस्य**= त्रिकूटपर्वतस्य, **कूटे** = शिखरे, **निपतेयम्** = अवतरेयम् । (इति वेगोत्पातनमनुकरोति)

४३ **वासवः** - **हनुमतः** = पवनसुतस्य, **न परिमितम् अपरिमितम्** = अनुपमम्, **उत्कर्षम्** = उन्नतिम्, **पश्य** = विलोकय ।

४४ **मातलिः** - (**साञ्जलिः** = अञ्जलिं बद्ध्वा) **आयुष्मन्** = स्वामिन्! कपित्थ

हनुमानुत्प्लुत्य पारं गन्तुं शक्नोति वा न । पश्यतु भवान् । तथा हि -

४५ **त्रिकूटशिखरे पुरी तनुचरी दरीदृश्यते**
निशाचरदिशाचरो मलयमारुतो नागतः ।
वने विटपिनां ततिर्दृशि विभाति रेखेव सा
यतोऽस्ति महदन्तरं कपिवरः कथं यास्यति ।।२१।।

४६ **वासवः** - न त्वया कपिवरस्य वेगविस्फूर्जितविक्रमो दृष्टः । यतस्त्वमेवं

त्रिकूटश्च कपित्रिकूटौ तयोः, अन्तरालम् = मध्यम्, **अतिशयेन विपुलम्, विपुलतरम्** = विशालतरम् **इव, विभाति** = दृश्यते । **हनुमान्** = पवनसुतः, **उत्प्लुत्य** = उत्प्लवनं विधाय, **पारम्** = समुद्रस्य लङ्कानिकटतीरम्, **गन्तुम्** = यातुम्, **शक्नोति** = समर्थो भवति वा न भवतीत्यर्थः । **भवान्** = आयुष्मान्, **पश्यतु** = विलोकयतु । **तथा हि** = यतः -

४५ अत्र मातलिः कपित्रिकुटयोरन्तरालं वर्णयति- **त्रिकूटशिखर** इति ।

अन्वयः - त्रिकूटशिखरे तनुचरी पुरी दरीदृश्यते । निशाचरदिशाचरः मलयमारुतः न आगतः । वने रेखा इव सा विटपीनाम् ततिः दृशि विभाति । यतः अन्तरम् महत् अस्ति । कपिवरः कथम् यास्यति ।

व्याख्या - त्रयः कूटाः सन्ति यस्मिन् सः, त्रिकूटः, तस्य त्रिकूटस्य= त्रिकूटाचलस्य, **शिखरे** = शिरोभागे, **तनुम्** = शरीरम्, **चरन्ति** = भक्षयन्तीति, **तनुचराः** = राक्षसाः, **तनुचरा सन्ति यस्यां सा तनुचरी** = राक्षसवती, चरेष्टः, टित्वान् ङीप् । **पुरी** = लङ्कानगरी, **दरीदृश्यते** = सम्यग् विलोक्यते । **निशायां चरन्तीति निशाचरास्तेषाम् दिशायां चरतीति निशाचरदिशाचरः** = दक्षिणस्यां दिशि स्थितः, **मलयमारुतः** = चन्दनवायुः, **न आगतः** = नैव समागच्छति स्म। **वने** = विपिने, **अटव्यरण्यं विपिनं गहनं काननं वनमित्यमरः** । **रेखाः इव, विटपा सन्ति येषु ते विटपिनस्तेषाम् विटपिनाम्** = वृक्षाणाम्, **ततिः** = पङ्क्तिः, **दृशि**= नयने, **विभाति** = शोभते । **यतः** = यस्मात् स्थानात्, **अन्तरम्** = अन्तरालम्, **महत्** = अत्यधिकम्, **अस्ति** = वर्तते, **कपिषु वरः कपिवरः** = हनुमान्, **कथम्**= केन प्रकारेण, **यास्यति** = प्राप्स्यति ।

सरलार्थः - त्रिकूटाचले राक्षसवती लङ्का दरीदृश्यते । अधुना मलयजो वायुरपि न वहति। वने वृक्षाणां पङ्क्ती रेखेव दृश्यते । कपित्रिकूटयोर्महदन्तरालं विद्यते । कथमसौ वायुसुतस्तत्र प्राप्स्यतीति ।

अत्र, **उपमालङ्कारः । पृथ्वीवृत्तमात्र ।**

४६ **वासवः - त्वया** = भवता, **कपिवरस्य** = हनुमतः, **वेगेन** = जवेन, **विस्फूर्जितः**=

वदसि । तथा हि -

४७ **कपीन्द्रोऽयं क्राम्यन् गगनममितं मेघ इव स**
त्रिकूटाद्रेर्मूर्ध्नि प्रपतति सुखं पश्यतु भवान् ।
तडिद्वन्तं रोद्धुं कथमपि न शक्नोति सहसा
विशालाकाशोऽयं घन इव पतत्येव हनुमान् ।।२।।

४८ **हनुमान्** - (आत्मगतम्) सागरान्तादपि क्वचिच्छाद्वलं कुत्रचित्पुष्पितवनं

अतिशयेन वृद्धिमुपगतः, **विक्रमः** = पराक्रमः, **दृष्टः** = विलोकितः । **यतः** = यस्मात्, **त्वम्** = भवान्, **एवम्** = इत्थम्, वदसि ? **तथा हि** = यतः ।

४७ अत्र त्रिकूटाचले हनुमतोऽवतरणं निरूपयति- **कपीन्द्र** इति ।

अन्वयः - अयम् सः कपीन्द्रः मेघ इव अमितम् गगनं क्राम्यन् त्रिकूटाद्रेः मूर्ध्नि सुखं प्रपतति । भवान् सुखं पश्यतु । अयम् विशालाकाशः सहसा तडित्वन्तम् (इव) रोद्धुं कथम् अपि न शक्नोति । हनुमान् घन इव पतति एव ।

व्याख्या- अयम् = एषः, **सः पूर्वोक्तः, कपीनाम् इन्द्रः, कपीन्द्रः** = हनुमान्, **मेघः** = तडित्वान् इव, **मातुं शक्यम् मितम् न मितम् अमितम्** = अनुपमम्, **गगनम्** = आकाशम्, **क्राम्यतीति क्राम्यन्** = पादविक्षेपं कुर्वन्, **त्रयः** = कूटा **यस्य सः त्रिकूटः, स चासौ, अद्रिः, त्रिकूटाद्रिस्तस्य त्रिकूटाद्रेः** = त्रिकूटाचलस्य, **मूर्ध्नि** = शिखरे, **सुखम्** = अनायासम्, **प्रपतति** = अवतरति । **भवान्** = त्वम्, **पश्यतु** = लोकयतु । **अयम्** = एषः, **विशालश्चासौ आकाशः विशालाकाशः** = विपुलगगगनम्, **सहसा** = हठात्, **तडितः सन्ति यस्मिन् स तडित्वान् तम् तडित्वन्तम्** = मेघमिव, हनुमन्तम्, **रोद्धुम्** = अवरोधमुपस्थापयितुम्, **कथमपि**= केनापि प्रकारेण, **न शक्नोति** = न समर्थो भवति । **हनुमान्** = पवनसुतः, **घन इव**= मेघ इव, **पतति** = अवतरत्येव ।

सरलार्थः - हनुमान्! अधुना गगनं क्राम्यन् त्रिकूटाचलस्य शिखरेऽवतरति। विशालाकाशोऽपि तडित्वन्तमिव तं रोद्धुं न शक्नोति । स घन इवावतरत्येव, इत्येतद् भवान् पश्यतु, इति ।

अत्र, उपमाद्वयस्य **संसृष्टिः** । **शिखरिणीवृत्तमत्र** ।

४८ **हनुमान्** - (**आत्मगतम्**= स्वगतम्) **सागरस्य** = समुद्रस्य, **अन्तात्** = प्रान्तभागात्, **अपि क्वचित्** = कुत्रचित्, **शाद्वलम्** = पल्वलम्, **कुत्रचित्** = क्वचित्, **पुष्पितञ्च तद् वनम् पुष्पितवनम्** = कुसुमितविपिनम्, **नानाविधाः** = विविधाश्च **ते शैलाः** = पर्वतास्तान्, **च, समुल्लङ्घयन्** = अतिक्राम्यन्, **अत्र** = अस्मिन्, **त्रिकूटस्य** = तदाख्यस्य, पर्वतस्य, **शिखरे** = शृङ्गे, **प्राप्तः** = समुपस्थितोऽस्मि । **अथ** =

नानाविधशैलान्समुल्लङ्घ्यत्रत्र त्रिकूटशिखरे प्राप्तोऽस्मि । अथ कथं मयेयं लङ्का प्रवेष्टव्या । (इति लङ्कां पश्यति) (चिरं विचार्य) कष्टं भोः कष्टं भोः । केनोपायेन लङ्कां प्रवेक्ष्यामि । या च -

४९ **नानावृक्षसमाकुला मधुलिहां नीडोद्भवानां रुतै**
रम्या रावणपालिता परिवृता प्राकारदुर्गैर्दृढैः ।
दुर्धर्षेव सुरासुरैश्च सकलै रक्षोभिरालिङ्गिता
तां दृष्ट्वैव बिभेमि तत्र सहसा गन्तुं कथं शक्यते ।।२३।।

५० भवतु । तावद्रात्रौ वृकदंशकसमानवपुषा प्रवेक्ष्यामि ।(इति चिन्तामनुकरोति)

अनन्तरम्, **कथम्** = केन प्रकारेण, **इयम्** = एषा, **लङ्का** = रावणनगरी, **प्रवेष्टव्या**= गन्तव्या, (लङ्कां पश्यन् चिरं विचार्य) **कष्टम् भोः, कष्टम् भोः** = दुःखम् भोः! दुःखम् भोः! **केनोपायेन** = केनोद्यमेन, **लङ्काम्** = रावणनगरीम्, **प्रवेक्ष्यामि** = प्रवेशं विधास्यामि। **कुतः** = यतो हि -

४९ **अन्वयः** - (या) नानावृक्षसमाकुला नीडोद्भवानाम् मधुलिहाम् रुतैः रम्या रावणपालिता दृढैः प्राकारदुर्गैः परिवृता सुरासुरैः दुर्धर्षा इव स्थिता सकलैः रक्षोभिः च आलिङ्गिता (अस्ति) तां दृष्ट्वा एव बिभेमि, तत्र सहसा गन्तुम् कथम् शक्यते ?

व्याख्या- (या = लङ्का) **नाना च ते वृक्षाः, नानावृक्षाः**= विविधास्तरवस्तैः, **समाकुलाः**= व्याप्ताः, **नीडेषु** = कुलायेषु, **उद्भवानाम्** = उत्पन्नानाम्, **मधु लिहन्तीति मधुलिहस्तेषाम्, मधुलिहाम्** = भ्रमराणाम्, **रुतैः** = शब्दैः, **तिरश्चां वाशितं रुतमित्यमरः**। **रम्या**= रमणीया, **रावणेन** = दशमुखेन, **पालिता** = रक्षिता, **दृढैः**= स्थूलैः, **कठोरैश्च प्राकाराणाम्** = वरणानाम्, **प्राकारो वरणः साल** इत्यमरः। **दुर्गैः, सुराश्च असुराश्च सुरासुराः तैः, सुरासुरैः** = देवदानवैः, **दुर्धर्षा**= दुष्प्रवेशा **इव स्थिता, सकलैः** = समग्रैः, **रक्षोभिः** = राक्षसैः, **आलिङ्गिता**= आश्रिता, वर्तते। **ताम्**= लङ्काम्, **दृष्ट्वा**= विलोक्य एव, **बिभेमि**= त्रस्यामि । **तत्र**= तस्याम् लङ्कायाम्, **सहसा** = झटिति, **गन्तुम्** = यातुम्, **कथम्** = केन प्रकारेण, शक्यते ? धीरोदात्तनायकस्य हनुमतो भीतेरभिव्यक्तिर्न प्रतिभाति समीचीना ।

सरलार्थः - इयं लङ्का नीडेषु विद्यमानानां भ्रमराणां रुतैर्रमणीया रावणेन रक्षिता दृढैः प्रकारदुर्गैर्युता, सुरासुरैर्दुर्धर्षा राक्षसैराश्रिता, अत एव भीषणा च वर्तते। तत्र कथं गन्तुं शक्यते ? इति ।

अत्र, उत्प्रेक्षास्वभावोक्त्योः **संसृष्टिः** । **शार्दूलविक्रीडितं वृत्तम्** ।

५० **भवतु** = अस्तु, **तावत्** = आदौ, **वृकदंशकेन** = वनमक्षिकाविशेषेण, **समानम्** = तुल्यम्, **वपुः** = शरीरम्, **तेन प्रविशामि** = प्रवेशं करोमि ।

५१ **वासवः** - सूत! इदानीमस्य दिवसस्य प्रायः परिणामो जातः । यतः

५२ **निशाचरा रात्रिबलाः समग्रा इतस्ततो द्रष्टुमिहाचरेयुः ।**
यतो वरं गन्तुमितो यथा तैः कथञ्चनावां न भवेव बुद्धौ ।।२४।।

५३ तन्निवर्तयस्व रथममरावतीं प्रति ।

५४ **सूतः** - (आत्मगतम्) ज्ञाता मया रावणभीरोस्तव लङ्कासमीपतः पलायनेच्छा। अहो कथं देवराजस्यापि तवेदृशी भीतिर्निशाचरात् । (प्रकाशम्) यदाज्ञापयति देवः । (इति रथवेगं निरूपयति)

(इति निष्क्रान्ताः सर्वे)

इति चतुर्थोऽङ्कः ।

---

५१ **वासवः - सूत**= मातले! **इदानीम्**= अधुना, **अस्य**= एतस्य, **दिवसस्य** = दिनस्य, **परिणामः**= सन्ध्यावस्था, **प्रायः**= प्रायेण, **जातः**= अभूत्। **यतः**= यस्माद् हेतोः-

५२ अत्र वासवः प्रत्यावर्तनस्यौचित्यमुपस्थापयति- **निशाचरा** इति ।

अन्वयः - रात्रिवलाः समग्राः निशाचराः इतस्ततः द्रष्टुम् इह आचरेयुः । यतः इतः गन्तुम् वरम् यथा आवाम् तैः कथञ्चन बुद्धौ न भवेव ।

व्याख्या- रात्रौ = निशायाम्, **बलम्** = शक्तिर्येषान्ते **रात्रीवलाः**= निशा-शक्तयः, **समग्राः** = सकलाः, **निशायां चरन्तीति निशाचराः** = राक्षसाः, **इतस्ततः**= यत्रतत्र, **द्रष्टुम्** = विलोकयितुम्, **इह** = अस्मिन् स्थाने, **आचरेयुः** = भ्रमणं कुर्युः। **यतः** = यस्य हेतोः, **इतः** = अस्मात् स्थानात्, **गन्तुम्** = प्रस्थातुम्, **वरम्**= समुचितम्, **यथा**= येन प्रकारेण, **आवाम्** = मातलिवासवौ, **तैः** = राक्षसैः, **कथञ्चन**= कथमपि, **बुद्धौ** = ज्ञातौ, न भवेव । यथा तैर्न ज्ञायते तथा करवावेत्यर्थः ।

सरलार्थः - निशासु शक्तिसंपन्ना सकला राक्षसाः स्थानेऽस्मिन् द्रष्टुमिहाप्या-गच्छेयुः, अतोऽस्माकमधुना प्रस्थानमेवोचितम्, येन तेऽस्मान् द्रष्टुं न शक्नुयुरिति।

अत्र काव्यलिङ्गमलङ्कारः । **वंशस्थमत्र** वृत्तम् ।

५३ **तत्**= तस्मात्, **रथम्**= स्यन्दनम्, **अमरावतीम्**= देवपुरीं प्रति, **निवर्तयस्व**= परावर्तय।

५४ **सूतः** - (आत्मगतम्) **मया** = मातलिना, **रावणात्** = दशवदनात्, **भीरोः** = भयशीलस्य, **तव**= इन्द्रस्य, **लङ्कासमीपतः** = लङ्कानिकटाद्, **पलायनस्य इच्छा**= वाञ्छा, **ज्ञाता**= विदिता । **अहो** = आश्चर्यम्, **कथम्** = कस्मात्, **तव** = भवतः, **देवराजस्य** = इन्द्रस्यापि, **निशाचरात्** = राक्षसाद्, **ईदृशी** = एतादृशी, **भीतिः** = भयम्, (**प्रकाशम्**= स्फुटम्) **देव** = भवान् **यथा, आज्ञापयति** = यत्कथयसि तत्करोमीत्यर्थः ।

(इति निष्क्रान्ताः सर्वे)

इति श्रीनीलमणिढुङ्गानाविरचितायां यशोदाभिधायां संस्कृतटीकायां सुन्दरचरितनाटकस्य चतुर्थोऽङ्कः समाप्तः ।

सुन्दरचरितनाटकम्

पञ्चमोऽङ्कः

पञ्चमाङ्ककथासारः

अङ्कारम्भे मिथुनानुचराभ्यां सहिता लङ्काभिधाना निशाचरी प्रविश्य रावणस्य प्रशस्तिं प्रस्तौति । उग्रमुखो रावणेन गोपुररक्षणे नियुक्तां भट्टिनीं तां स्वनियोगं पालयितुं पत्यन्तरञ्चासेवितुमनुरुणद्धि । परं लङ्का एकमात्रेण पुरुषेण जीवनं यापयितुं स्वस्या असामर्थ्यमभिव्यनक्ति । उग्रमुखेण सह रमणाभिलाषञ्च प्रकटयति । उग्रमुखो दशवदनस्य भोगिन्या सह विहारो निधनमेवेति मत्वा लङ्कायाः प्रस्तावं नैव स्वीकरोति । लङ्कावचनं पालयितुं प्रेरयन्त्या व्याघ्रणख्या मुखे च चपेटेन ताडयति । रहस्यकथनस्यानौचित्यं तर्कयन्ती लङ्का स्वकथनस्य परिहासजल्पनं निरूपयति । व्याघ्रणख्या उग्रमुखेण च सह गोपुररक्षणाय प्रतिष्ठते।

विष्कम्भकान्ते हनुमान् लङ्कायाः सौन्दर्यं निरीक्ष्य विस्मयमावहति । लङ्काप्रवेशायोपायमतर्कयन्नसौ रामचन्द्रं स्मृत्वा गगने पश्यति । आकाशाच्छ्रुतं वाक्यमनुसृत्यासौ सूक्ष्मं वपुर्धारयित्वा लङ्कायां प्रविशति । रात्रौ कोऽपि मलिम्लुचः प्रविशतीति नेपथ्यवचनेन प्रबुद्धा मदिरया निद्रया चार्धचेतना लङ्का सहसोत्थाय उग्रमुखं व्याघ्रणखीञ्च पृच्छति । इतस्ततो विलोकयन्ती व्याघ्रणखी तालवृक्षशिखरमारुह्यावस्थितमुपालम्भमानं मर्कटं पश्यति, तञ्च दर्शयति लङ्कायै। सापि क्रुद्धा हनुमन्तं संबोध्य प्रवेशस्य कारणं पृच्छति । स च राक्षसपुर्याः काननसौन्दर्यं राक्षससैन्यञ्च विलोकयितुमागतोऽस्मि, त्वं मां रोद्धुं न शक्नोषीति कथयति । तच्छ्रुत्वा लङ्का क्रुद्धा मुष्टिप्रहारमभिनयति । हनुमानपि तां मुष्ट्या प्रहरति । लङ्का भूमौ मूर्च्छिता निपतति । उत्थाय च सा दिव्यरूपं गृहीत्वा वेधसो वचनं स्मृत्वा रक्षोकुलं नूनमेव नश्यतीति विचिन्त्य शुभाशीर्वचनैर्हनुमन्तं लङ्काप्रवेशायानुमतिं प्रयच्छति । ततः प्रस्थितो हनुमान् सर्वाणि राजसदनानि काननान्यपि विलोकयन् सीताञ्चान्वेषयन्नशोक-वाटिकामाप्नोति । प्रच्छन्न एव क्षामां लुलितकेशां सीतां च विलोक्यासौ चिन्तितः प्रणम्य तत्रैव तिष्ठति । प्रातर्निशाचरैः परिवृतो रावण आगमिष्यति चेत्तं सकुलं हनिष्यामीति च चिन्तयति ।

अथ पञ्चमोऽङ्कः

(ततः प्रविशति मिथुनानुचराभ्यां सहिता राक्षसी लङ्का)

लङ्का -

१ जअदु जअदु भट्टा रावणो विंसहत्थो
दसमुहपरिवुत्तो रक्खसाणं अहीसो
विवसदि अलआइं भीदिए जक्खराओ
विमुचिअ सुविमाणं पुप्फकं जस्स हत्थे ।।१।।

(ततः = वासवप्रस्थानानन्तरम्, मिथुनौ = युगलौ, यौ अनुचरौ = भृत्यौ, ताभ्याम् सहिता = युक्ता, राक्षसी = निशाचरी, लङ्का प्रविशति)

१ लङ्का - अत्र लङ्का रावणस्य वैशिष्ट्यं वर्णयति- जयतु इति ।

अन्वयः - भर्ता विंशद्हस्तः दशमुखपरिवृतः राक्षसानाम् अधीशः रावणः जयतु जयतु । यक्षराजः यस्य भीत्या हस्ते सुविमानं पुष्पकं विमुच्य अलकायाम् विवसति ।

व्याख्या - भरतीति भर्ता = पालयिता, विंशतिर्हस्ताः यस्य सः, विंशद्हस्तः = विंशत्करः, दशभिः = दशसंख्याकैः, मुखैः = वदनैः, परिवृत्तः= युक्तः, राक्षसानाम् = निशाचराणाम्, राक्षसः कौणपः क्रव्यात् क्रव्यादोऽस्त्रप आशरः, इत्यमरः । अधिक ईशः, अधीशः = स्वामी, रावणः = पौलस्त्यः, जयतु जयतु = सर्वोत्कर्षेण वर्तताम् । नित्यवीप्सयोरिति वीप्सायां द्वित्वम् । यक्षानाम् राजा, यक्षराजः = कुवेरः, कुवेरस्त्र्यम्बकसखो यक्षराट् गुह्यकेश्वरः, इत्यमरः । 'राजाहःसखिभ्यष्टच्' इति टच् । यस्य = रावणस्य, हस्ते = करे, लक्षणया तत्स्वामित्व इत्यर्थः । भीत्या = भयेन, सु = शोभनम्, पुष्पकम् = तन्नामकम्, विमानम् = व्योमयानम्, विमुच्य = त्यक्त्वा, रावणाय दत्वेत्यर्थः । अलकायाम् = अलकापुर्याम्, निवसति = वासं कुरुते ।

सरलार्थः - विंशद्भिः करैः समन्वितो राक्षसाधिपो रावणः सर्वोत्कर्षेण वर्तताम् । यक्षराजोऽपि भीत्या पुष्पकं नाम विमानं तस्मै रावणाय समर्प्य अलकायां निवसति, इति । मालिनीवृत्तम् ।

[जयतु जयतु भर्ता रावणो विंशद्धस्तो
दशमुखपरिवृत्तो राक्षसानामधीशः ।
निवसति अलकायां भीत्या यक्षराजो
विमुच्य सुविमानं पुष्पकं यस्य हस्ते ।।१।।]

२ **उग्रमुखः** - अयि भट्टिनि लङ्के ! इदानीमस्माकं भट्टारकेण वशीकृतलोकत्रयेण राज्यविभूतिरक्षणे देवी मन्दोदरीव गोपुररक्षणे भट्टिनी कृतासि । तस्मात्त्वया सम्यक्परिपालनीया पुरी । मा पूर्ववत् पत्यन्तरं भजस्व ।

३ **व्याघ्रणखी** - सच्चं विण्णवेदि मम अज्जउत्तो उग्गमुहो । एव्वं करेदु भट्टिणी । [*सत्यं विज्ञापयति ममार्यपुत्र उग्रमुखः । एवं करोतु भट्टिनी ।*]

४ **लङ्का** - हंहो उग्गमुह, सुणुहि मम वअणम् । ण अहं परिव्वदएविअ एक्कमत्तेण पुरिसेण जीविदं विक्खवेमि । [*हंहो उग्रमुख! शृणु मम वचनम् । नाहं पतिव्रतेवैकमात्रेण पुरुषेण जीवितव्यं क्षिपामि ।*] तथा हि -

५ **पुरिसस्स इत्थिआणं जइहोइ सतं पदिव्वदा अवला ।**

---

२ **उग्रमुखः - अयि भट्टिनि लङ्के** = भो अकृताभिषेके ! **इदानीम्** = अधुना, **अवशं वशं यथा संपद्यते तथा कृतम् वशीकृतम्** = अधीनीकृतम्, लोकानां त्रयम्, **लोकत्रयम्** = भूर्भुवःस्वर्लोकाः, **येन सः, तेन, तथाभूतेन, अस्माकम्** = निशाचराणाम्, **भट्टारकेण** = राज्ञा , **राजा भट्टारको देवः**, इत्यमरः । **राज्यस्य** = राष्ट्रस्य, **या विभूतिः** = ऐश्वर्यम्, **तस्य रक्षणे** = गोपने, **देवी** = कृताभिषेका, **मन्दोदरीव** = राज्ञी ज्येष्ठमहिषीव, **गोपुरस्य** = नगरद्वारस्य, **रक्षणे** = अवने, **भट्टिनी**= महिषी, **त्वम् कृता** = विहिता, **असि** । **तस्मात्** = कारणात्, **त्वया** = भवत्या, **पुरी** = नगरी, **सम्यक्** = साधु, **परिपालनीया** = रक्षणीया, **पूर्ववत्** = प्रागिव, **पत्यन्तरम्** = अन्यवरम्, **मा भजस्व** = नाश्रय ।

३ **व्याघ्रणखी - मम** = व्याघ्रणख्याः, **आर्यपुत्रः** = स्वामी, **उग्रम् मुखं यस्य सः**, **उग्रमुखः** = तदाख्यो निशाचरः, **सत्यम्** = यथार्थम्, **विज्ञापयति** = कथयति । **भट्टिनी** = राज्ञी, **एवम्** = मत्पत्युक्तदिशा, **करोतु** = विदधातु ।

४ **लङ्का - हंहो उग्रमुख ! मम** = लङ्कायाः, **वचनम्** = वाक्यम्, **शृणु** = आकर्णय। **अहम्** = लङ्का, **पतिव्रतेव** = सतीव, **एकमात्रेण** = केवलमेकेन, **पुरुषेण** = पुंसा, **जीवितव्यम्** = जीवनम्, **न क्षिपामि** = न यापयामि । **तथा हि** = यतः -

५ अत्र लङ्का व्याघ्रणखीं परिहसति- **पुरुषस्येति** ।

ता किं णहोइ पुरिसो बहु महिलाणं पदी वेस्सा ।।२।।

[पुरुषस्य स्त्रीणां यदि भवति शतं पतिव्रताऽबला ।
तत्किं न भवति पुरुषो बहुमहिलानां पतिर्वेश्या ।।२।।]

६ लङ्का - (जनान्तिकम्) हंहो व्याग्घणहि! रहस्सं दे कहेमि ण उण तुअं उग्गमुहं कहेहि । [*हंहो व्याघ्रणखि! रहस्यं ते कथयामि न पुनस्त्वमुग्रमुखं कथय ।*]

७ **व्याघ्रणखी** - जधा आण्णवेदि भट्टिणी तधा करेमि । ण उण अहं कहिंचि कहिस्सम् । [*यथाज्ञापयति भट्टिनी तथा करोमि । न पुनः कुत्रचित्कथयिष्यामि।*]

लङ्का -

८ **पुरात्थि भट्टा मम राअराओ तदो दसास्सो वि धवीकिदोत्थि ।**
अदोपिअं बह्मउले करेमि विभीसणं जामिण कुंहकण्णम् ।।३।।

अन्वयः - पुरूषस्य स्त्रीणां शतम् यदि अबला पतिव्रता भवति तत् बहुमहिलानाम् पतिः पुरुषः वेश्या किम् न भवति ?

व्याख्या - पुरुषस्य = पुंसः, **स्त्रीणाम्** = नारीणाम्, **शतम्**, **यदि** = चेत् **अबला** = स्त्री, **पतिव्रता** = सती भवति, **तत्** = तदा, **वह्व्यश्च ता महिलास्तासाम्**, **बहुमहिलानाम्** = अनेकस्त्रीणाम्, **पतिः** = भर्ता, **किम्** = किमर्थम्, **वेश्या न भवति** ।

सरलार्थः - पुरुषस्य शंतसंख्याकास्त्रियो भवेयुस्तदापि ताः पतिव्रता एव भवन्ति, तत्र बहुमहिलानां पतिः कथं वेश्या न भवतीति । **अर्यावृत्तम्** ।

६ **लङ्का** - (सर्वश्राव्यम्) **हंहो व्याघ्रस्येव नखौ यस्याः सा तत्संबुद्धौ भो व्याघ्रणखि**= हे सखि ! **ते** = तुभ्यम्, **रहस्यम्** = गोप्यम्, **कथयामि** = वदामि। **पुनः** = भूयः, **त्वम्** = व्याघ्रणखी, **उग्रमुखम्** = त्वत्पतिम्, **न कथय** = न ब्रूहि।

७ **व्याघ्रणखी** - **भट्टिनी** = राजमहिषी, **यथा आज्ञापयति** = आदिशति, **तथा करोमि** = विदधामि । **पुनः** = भूयः, **कुत्रचित्** = कुत्रापि, **न कथयिष्यामि** = न वदिष्यामि ।

८ अत्र लङ्का ब्राह्मणप्रियत्वं निरूपयति - **पुरास्तीति** ।

अन्वयः - पुरा मम भर्ता राजराजः अस्ति । ततः दशास्यः अपि धवीकृतः अस्ति । अतः ब्रह्मकुले प्रियम् करोमि, विभीषणं यामि कुम्भकर्णं न ।

[पुरास्ति भर्ता मम राजराजस्ततो दशास्योऽपि धवीकृतोऽस्ति ।
अतः प्रियं ब्रह्मकुले करोमि विभीषणं यामि न कुम्भकर्णम् ।।३।।]

९ **व्याघ्रणखी** – (सत्वरं स्वपतिमुपसृत्य । जनान्तिकम्) अज्जउत्त ! अदोपभिदि भट्टिणी बिभीसणं रोचइ । ता अह्ये तस्स अणुसरणं अणुचिट्ठामो । [आर्यपुत्रः ! अतः प्रभृति भट्टिनी बिभीषणाय रोचते । तद्वयं तस्यानुसरणमनुतिष्ठामः ।]

१० **अग्रमुखः** – अरे रे दुर्मतिहते ! कथमेवमनुचितमात्मविनाशकरं ब्रवीषि ?

११ **व्याघ्रणखी** – मा कुप्पदु अज्जउत्तो ! भट्टिणीए तुह परोक्खे एव्वं कहिदम्।

व्याख्या – **पुरा** = प्राक्, **मम** = लङ्कायाः, **भर्ता** = स्वामी, पतिरित्यर्थः। राज्ञां राजा राजराजः = कुवेरः, **अस्ति** = वर्तते । **ततः** = तदनन्तरम्, **दश आस्यानि यस्य सः, दशास्यः** = रावणोऽपि, **अधवो धवो यथा संपद्यते तथाकृत इति धवीकृतः** = पतीकृतः, **अस्ति** = विद्यते । **अतः** = अस्मात्, **ब्रह्मणः** = ब्राह्मणस्य, **कुले** = वंशे, **प्रियम्** = प्रेम, **करोमि** = विदधामि । **विभीषणम्** = रावणकनिष्ठानुजम्, **यामि** = अनुसरामि, **कुम्भौ इव कर्णौ यस्य तम् कुम्भकर्णम्**= रावणमध्यमानुजम्, **न यामि** = नानुसरामि ।

सरलार्थः – मम प्रथमः पतिः कुवेरो वर्तते, रावणमधुना पतित्वेन वृतवत्यस्मि। ब्रह्मकुलं प्रति मम प्रेम वर्ततेऽतः परं विभीषणं भजामि न तु कुम्भकर्णमिति ।

उपेन्द्रवज्रावृत्तम्, तल्लक्षणं यथा–

उपेन्द्रवज्रा जतजास्ततो गौः ।

९ **व्याघ्रणखी** – (**सत्वरम्** = शीघ्रम्, **स्वपतिम्** = उग्रमुखम्, **उपसृत्य** = समीपं गत्वा) **भो आर्यपुत्र** = स्वामिन् ! **अतः प्रभृति** = अनन्तरम्, **भट्टिनी** = राजमहिषी, **विभीषणाय** = रावणकनिष्ठानुजाय, **रोचते** = स्पृहयति । **तत्** = तस्मात्, **वयम्**= व्याघ्रणखीप्रमुखाः, **तस्य** = विभीषणस्य, **अनुसरणम्** = अनुगमनम्, **अनुतिष्ठाव**= अनुसराव ।

१० **उग्रमुखः** – **अरे रे** = भोः, **दुष्टा चासौ मतिः, दुर्मतिस्तया हता, तत्संबुद्धौ, हे दुर्मतिहते** = दुर्बुद्धिपीडिते ! **कथम्** = केन प्रकारेण, **एवम्** = इत्थम्, **न उचितम् अनुचितम्** = अकथनीयम्, **आत्मनः विनाशः, तं करोतीति तम्, आत्मविनाश करम्**= निजघातकम्, **वचनम्** = वाक्यम्, **ब्रवीषि** = कथयसि ।

११ **व्याघ्रणखी** – **भो आर्यपुत्र** = स्वामिन् ! **मा कुप्यतु** = न क्रुध्यतु । **भट्टिन्या** = राजमहिष्या लङ्कया, **तव** = भवतः, **परोक्षे** = अप्रत्यक्षे, **एव कथितम्** ।

[मा कुप्यतु आर्यपुत्र! भट्टिन्या तव परोक्षे एवं कथितम् ।]

१२ **लङ्का** - हंहो उग्गमुह! सच्चं कहेहि किं तुअं मं भोत्तुं अहिलससि [हंहो उग्रमुख! सत्यं कथय, किं त्वं मां भोक्तुमभिलषसि ?]

१३ **उग्रमुखः** - (आत्मगतम्) सत्यं खलु राजविग्रहकारणं स्त्री । इयं सीता-मधिकृत्यैवं मन्त्रयति । इमे च संहर्तुकामः कालोऽयमेवं वक्तुं मुखरयति । (प्रकाशम् । कर्णौ पिधाय) शान्तं पापम्, शान्तं पापम् । कथमहो भट्टिन्या-नुचितमीदृशमुदितम् । सत्यमेतत् । यदुत्प्लुत्य मूत्रयन्त्या नायिकायाश्चेटी परिभ्राम्य प्रसावयतीति ।

१४ **लङ्का** - कुदो । [*कुतः*]

१५ **उग्रमुखः** - अत्र भवत्या अनुचर्यप्येवं वदति । मां किमेवमकारणमरणो-

---

१२ **लङ्का** - हंहो उग्रमुख! **सत्यम्** = यथार्थम्, **कथय** = वद । **त्वम्** = भवान्, **माम्** = लङ्काम्, **भोक्तुम्** = उपभोगं कर्तुम्, मया सह रन्तुमित्यर्थः । **अभिलषसि** = इच्छसि ?

१३ **उग्रमुखः** - (**आत्मगतम्** = स्वगतम्) **सत्यम् खलु** = निश्चयेन, **राज्ञः** =नृपस्य, **विग्रहः** = विरोधः, **तस्य कारणम्** = हेतुः, **स्त्रीरेवास्ति** । **इयम्**= लङ्का, **सीताम्**= जानकीम्, **अधिकृत्य** = लक्ष्यीकृत्य, **एवम्** = इत्थम्, **मन्त्रयति**= विचारयति । **संहर्तुं कामो यस्य सः**, **संहर्तुकामः** = संहाराभिलाषी, **अयम्** = एषः, **कालः** = समयः, **एवम्** = इत्थम्, **वक्तुम्** = कथयितुम्, **इमौ** = लङ्काव्याघ्रणख्यौ, **मुखरयति**= वाचालायते । (**प्रकाशम्** = स्पष्टम्, **कर्णौ** = श्रवणौ, **पिधाय** = आच्छाद्य) **शान्तम् पापम्, शान्तम्**, इत्थं नैव कथनीयमिति भावः । **अहो** = आश्चर्यम्, **कथम्** = केन कारणेन, **भट्टिन्या** = राजमहिष्या, **ईदृशम्** = एतादृशम्, **अनुचितम्**= अकथ्यम्, **उदितम्** = निगदितम् ? **एतत्** = अधुनैवोक्तम्, **सत्यम्** = अवितथम्। **यत्** = यस्मात्, **उत्प्लुत्य** = उत्प्लवनं विधाय, **मूत्रयतीति मूत्रयन्ती तस्याः**, **मूत्रयन्त्याः** = मूत्रं स्रवन्त्याः, **नायिकायाः**= नट्याः, **चेटी** = सुता, **परिभ्राम्य**= परिक्राम्य, **प्रस्त्रावयति** = मूत्रयति ।

१४ लङ्का - कुतः = कथम् ?

१५ **उग्रमुखः** - **अत्र भवत्याः** = लङ्कायाः, **अनुचरी** = भृत्याऽपि, **एवम्** = इत्थमेव,, **वदति** = कथयति । **युवाम्** = लङ्का, व्याघ्रणखी च, **माम्** = उग्रमुखम्, **किम्** =

पायमुपदिशथो युवाम् । नास्ति मे त्रिलोकीनाथस्य दशमुखस्य भोगिन्या सह विहर्तुमभिलाषः ।

१६ **व्याघ्रणखी** – (सहसोपसृत्य) अज्जउत्तो मा बिभेदु । जधा भट्टिणी उण्णवेदि तधा करेदु । ता इअं उण भट्टिणी जेव्व होइस्सदि अहं देइ होइस्सम् । [आर्यपुत्रो ! मा बिभेतु । यथा भट्टिनी आज्ञापयति तथा करोतु । तदियं पुनर्भट्टिन्येव भविष्यति । अहं देवी भाविष्यामि ।]

१७ **उग्रमुखः** – अरे रे दुर्बुद्धे! मैवं भण । ईदृशं वचनं मुखान्न कदाप्युच्चार्यम् । (इति चपेटेन तस्या मुखं ताडयति)

१८ **व्याघ्रणखी** – (लङ्कां निरीक्ष्य) अब्बह्मण्णम् । अब्बह्मण्णम् । अणेण पत्थरसद्दिसचवेडताडिदमुहाह्मि । [अब्रह्मण्यम् अब्रह्मण्यम् । अनेन प्रस्तरसदृश-चपेटताडितमुखास्मि ।]

(इति लङ्कायाः पादयोः प्रपतति)

किमर्थम्, **एवम्** = इत्थम्, **न विद्यते कारणं यस्मिन् कर्मणि तद् यथा स्यात्तथा अकारणम्** = हेतुं विनैव, **मरणस्य** = मृत्योः, **उपायम्** = उद्योगम्, **उपदिशथः**= शिक्षयथः । **त्रयाणां लोकानां समाहारस्त्रिलोकी, तस्या नाथः, त्रिलोकीनाथः तस्य त्रिलोकीनाथस्य** = लोकत्रयाधिपतेः, **दश मुखानि यस्य सः, तस्य दशमुखस्य** = रावणस्य, **भोगिन्या** = भोगार्थमेव स्वीकृतया स्त्रिया, **सह** = साकम्, **विहर्तुम्** = रन्तुम्, **अभिलाषः** = इच्छा, **नास्ति** ।

१६ **व्याघ्रणखी - आर्यपुत्र** = स्वामिन्! **मा बिभेतु** = न त्रस्यतु । **यथा भट्टिनी** = राज्ञी, **आज्ञापयति**= आदिशति, **तथा**= तेनैव प्रकारेण, **करोतु**= विदधातु । **तत्**= पुनः, **इयम्** = एषा, **भट्टिनी** = राजस्त्री, **एव भविष्यति** ।

१७ **उग्रमुखः - अरे रे दुर्बुद्धे** = भो दुर्मते ! **एवम्** = इत्थम्, **मा भण** = नैव कथय। **ईदृशम्** = एतादृशम्, **वचनम्** = वाक्यम्, **मुखात्** = वदनात्, **कदापि** = कश्मिंश्चित्कालेऽपि, **नोच्चार्यम्** = नोच्चारणीयम्, (**इति** = इत्थम्, **कथयित्वा**= उक्त्वा, **चपेटेन** = प्रहस्तेन, **तस्याः** = व्याघ्रणख्याः, **मुखम्** = वदनम्, **ताडयति**)

१८ **व्याघ्रणखी** - (**अब्रह्मण्यम् अब्रह्मण्यम्** = अनुचितम्, अनुचितम् । **अनेन** = एतेन, **प्रस्तरसदृशेन** = पाषाणतुल्येन, **चपेटेन** = प्रहस्तेन, **ताडितं मुखं यस्याः, सा तथाभूता अस्मि** । (**इति** = इत्थम्, **लङ्कायाः** =तन्नाम्न्या निशाचर्याः, **पादयोः**=

१९ **लङ्का** - (आत्मगतम्) अह्मो, कधं मए ईदिसेहिं सह रहस्सं कहिदम् ।

(अहो कथं मयेदृशैः सह रहस्यं कथितम्)

(प्रकाशम्) हंहो उग्गमुह! हण्डे व्याग्घणहि ! जुवं दुवे वि मए कहिदं सव्वं पडिहासभणिदं जाणीदं ण सच्चम् । आगच्छदं अह्मे सव्वे गोउरं गच्छिअ रण्णो अणुशासणे अवहिदाओ भवामो । ण कोवि कविविअ चवलोप्पच्छणो कहंचि पुरस्स अब्भन्तरं पविसे । [*हंहो उग्रमुख! हण्डे व्याघ्रणखि! युवां द्वे अपि मया कथितं सर्वं परिहासभणितं जानीतं न सत्यम् । आगच्छत वयं सर्वे गोपुरं गत्वा राज्ञोऽनुशासनेऽवहिता भवाम । न कोऽपि कपिरिव चपलः प्रच्छन्नः, कथंचित्पुरस्याभ्यन्तरं प्रविशेत् ।*]

(इति विष्कम्भकः)

(ततः प्रविशति तथाभूतो हनुमान्)

२० **हनुमान्** - (आत्मगतम्) कुत्रागतोऽहमिदानीम् । किमयं त्रिकूटशिखरी ।

चरणयोः, **प्रपतति** = निपतति)

१९ **लङ्का** - **(आत्मगतम्) अहो** = आश्चर्यम्, **कथम्** = केन प्रकारेण, **मया** = लङ्कया, **ईदृशैः** = उग्रमुखसदृशैः, **सह** = साकम्, **रहस्यम्** = गोप्यम्, **कथितम्**= निगदितम् । (प्रकाशम्) **हंहो उग्रमुख! हंहो व्याघ्रणखि! युवाम्, द्वौ** = व्याघ्रणखी, उग्रमुखश्च, **मया** = लङ्कया, **कथितम्** =उक्तम्, **परिहासेन** = मनोविनोदेन, **कथितम्**= भणितम्, **जानीतम्** = वित्तम् । **सत्यम्** = यथार्थम्, **न जानीतम्** । **आगच्छतम्**= आयातम्, **वयम् सर्वे** = निखिलाः, **गोपुरम्** = पुरद्वारम्, **गत्वा** = प्राप्य, **राज्ञः** = नृपस्य, **अनुशासने** = आज्ञापालने, **अवहिताः** = सावधानाः, **भवाम** । **कोऽपि**= अज्ञातनामा, **कपिरिव** = वानर इव, **चपलः** = चञ्चलः, **प्रच्छन्नः** = गुप्तश्च, **कथञ्चित्**= केनापि प्रकारेण, **पुरस्य** = नगरस्य, **अभ्यन्तरम्** = अन्तः, **न प्रविशेत्**= प्रवेशं न कुर्यात् ।

(इति विष्कम्भकः)

(**ततः** = तदनन्तरम्, **तथाभूतः** = चञ्चलः, प्रच्छन्नश्च, **हनुमान्** = पवनसुतः, **प्रविशति**)

२० **हनुमान्** - **अहम्** = हनुमान्, **इदानीम्** = अस्मिन् समये, **कुत्र** = कस्मिन् स्थाने, **आगतः** = प्राप्तः, अस्मीति शेषः । **अयम्** = एषः, **त्रिकूटस्य** = त्रिकूटाचलस्य, **शिखरः** = अग्रभागोऽस्ति ? **किम्** = अथवा, **इदम्** = एतदेव, **लङ्कायाः** =

किमिदमेव लङ्काया गोपुरम् । (इति परिक्रम्य आकाशं वीक्ष्य) अहो त्रिकूटाचल-शिखरमारूढोऽयं सविता । उदयास्ताचलमारुरुक्षोः पुष्पवतोः कीदृशे दिशा-निशयोः समं हर्षव्यसने दृश्येते । तथाहि –

२१ **त्रिकूटशिखराय किं परिणतोंऽशुमाली करैः**
समर्पयति दिग्वधूमरुणताविरूपाननाम् ।
प्रसादयति किङ्करैरुदयमेत्य चन्द्रो निशाम्
भवन्ति खलु योषितः पतिसुखापदा लक्षिताः ।।३।।

रावणपुर्याः, **गोपुरम्** = पुरद्वारं वर्तते ? (**इति** = इत्थम्, **परिक्रम्य** = परिभ्रम्य, **आकाशम्** = गगनम्, **वीक्ष्य** = विलोक्य) **अहो** = आश्चर्यम्, **अयम्** = एषः, **सविता** = सूर्यः, **त्रिकूटाचलस्य शिखरम्** = शृङ्गम्, **आरूढः** = प्राप्तः । **उदयाचलम्** , **अस्ताचलञ्च आरुरुक्षोः** = आरोढुमिच्छोः, **पुष्पवतोः** = चन्द्रसूर्ययोः, **दिवा च निशा च दिवानिशे, तयोः दिवानिशयोः** = दिनरात्र्योः, **कीदृशे** = कथंभूते, **हर्षश्च व्यसनञ्च हर्षव्यसने** = आनन्दव्यसने, **दृश्येते** = विलोक्येते । **तथा हि** = यतः ।

२१ अत्र हनुमान् लङ्काप्रवेशसमये सूर्यास्तं चन्द्रोदयञ्च वर्णयति – **त्रिकूटशिखरायेति।**

अन्वयः – परिणतः अंशुमाली करैः अरुणताविरूपाननाम् दिग्वधूम् त्रिकूटशिखराय समर्पयति किम् ? चन्द्रः उदयम् एत्य करैः निशां प्रसादयति किम्? योषितः खलु पतिसुखापदा लक्षिताः भवान्ति ।

व्याख्या – **परिणतः** = ह्रासोन्मुखः, **अंशूनाम्** = किरणानाम्, **माला** = पङ्क्तिर्यस्यास्तीति **अंशुमाली** = सूर्यः, **करैः** = किरणैः, **अन्यत्र** हस्तैः, **अरुणस्य भावः, अरुणता, तया विरूपम् आननम् यस्य सः, तम् अरुणताविरूपान-नाम्** = रक्तिमविरूपवदनाम्, **दिग् एव वधूस्ताम् दिग्वधूम्** = पश्चिमाशाम्, **त्रिकूटशिखराय** = त्रिकूटाचलाय, **समर्पयति**= प्रयच्छति, किमित्युत्प्रेक्षायाम् । ह्रासोन्मुखो युवकोऽपि कुरूपाम् स्वपत्नीम्, अन्यस्मै हस्तेन समर्पयति । **चन्द्रः** = हिमांशुः, **उदयम्** = उदयाचलम्, **अन्यत्र**, उन्नतिम्, **एत्य** = प्राप्य, **करैः** = हस्तैः, **निशाम्** = रात्रीम्, **प्रसादयति** = प्रसन्नां कारयति, **किम्** ? अन्योऽप्युन्नतिमापन्नः स्वपत्नीं प्रसादयति । **खलु** = निश्चयेन, **योषितः** = स्त्रियः, **पत्युः** = भर्तुः, **सुखञ्च, आपच्च सुखापदौ ताभ्याम् सुखापद्भ्याम्** = सुखविपद्भ्याम्, **आलक्षिताः** = विदिताः, **भवन्ति** । भर्तुः सुखे स्त्रियोऽपि सुखम्, भर्तुरापदि तस्या

अपि च -

२२ सुधांशोश्चण्डांशोरपि पतति शीर्षे शिखरिणः
समं रश्मौ शोभा लुठति करयोः शीतखरयोः ।
असाध्वी सन्ध्येयं परिहसति वीक्ष्येव रजनीं
कटाक्षं सासूयं नयति पतिरक्तामिव निशा ।।४।।

अपि विपज्जायते, इत्यर्थः ।

सरलार्थः - यथा ह्रासोन्मुखो युवको विरूपाम् स्त्रियमन्यस्मै स्वकरेण समर्पयति तथैव परिणतोंऽशुमाली किरणहस्तैर्विरूपां दिग्वधूं त्रिकूटाय समर्पयति किमु । अथवा उन्नतिमापन्नो युवको यथा स्त्रियं प्रसादयति तथैव उदयाचलमारूढो हिमांशुर्निशाम् प्रसादयति किम् ? यतः नार्यः पत्युः सुखापद्भ्यामालक्षिता जायन्ते इति ।

अत्र दिग्वध्वाः, अंशुमालिकृतत्रिकूटसमर्पणे वृद्धपुरुषकृतयुवतिसमर्पणरूप-व्यवहारस्य निशायाश्चन्द्रकृतप्रसादने उन्नतिमापन्नेन पुरुषेण कृतस्य स्त्रीप्रसादनरूप-व्यवहारस्य च प्रतीतेः **समासोक्तिद्वयम्** । किमित्यनेनोत्प्रेक्षणाद्, **उत्प्रेक्षाद्वयञ्च** । पादत्रयगतार्थस्य चतुर्थपादेन समर्थनात्, **अर्थान्तरन्यासालङ्कारश्च** । एतेषामलङ्काराणां परस्परमङ्गाङ्गिभावात् **सङ्करालङ्कारः, पृथ्वीवृत्तमत्र** ।

२२ अत्र हनुमान् त्रिकूटाचलं वर्णयन् सन्ध्यायाः सौन्दर्यमुपस्थापयति - **सुधांशोरिति**।

अन्वयः - सुधांशोः चण्डांशोः अपि रश्मौ शिखरिणः शीर्षे पतति शितखरयोः करयोः शोभा समं लुठति । इयम् असाध्वी सन्ध्या रजनीम् वीक्ष्य परिहसति इव । निशा पतिरक्ताम् कटाक्षं सासूयं नयति इव ।

व्याख्या - सुधायुक्ता अंशवो यस्य सः, सुधांशुस्तस्य सुधांशोः = चन्द्रस्य, **विधुः सुधांशुः शुभ्रांशुरोषधीशो निशापतिरित्यमरः । चण्डा अंशवो यस्य तस्य चण्डाशोः** = सूर्यस्य अपि, **रश्मौ** = किरणे, **शिखराणि सन्ति यस्य स शिखरी, तस्य शिखरिणः** = पर्वतस्य, **शीर्षे** = शिखरे, **पतति** = आपतति, सति, **शीतश्च खरश्च शीतखरौ, तयोः शीतखरयोः** = अतिशीतलात्युष्णयोः, **करयोः** = किरणयोः, **शोभा** = श्रीः, **समम्** = समानमेव, **लुठति** = शोभते । **इयम्** = एषा, **असाध्वी** = अशोभना, अन्यत्र नायिका **रजनीम्** = रात्रीम्, अन्यत्र स्त्रियम्, **वीक्ष्य** = विलोक्य, **परिहसति इव** = उपहसति इव । **निशा** = रजनी च, **पत्या** = सूर्येण, **रक्ता** = रक्तवर्णा, **अथ च पत्यौ** = स्वमिनि, **रक्ता** = अनुरक्ता,

अपि च -

२३ शिव शिव ! कथमेतां द्वादशात्मा जहाति
निजकरपरिणीतां दिग्वधूं प्राप्य सन्ध्याम् ।
परिहरति खरांशोर्हन्त सन्ध्या प्रकाशं
हरति भृशमसत्याः सङ्ग ओजः सतां हि ।।५।।

ताम् सन्ध्यामिति शेषः । **असूयया सहितं सासूयम्** = सेर्ष्यम्, **कटाक्षम्** = नेत्रापाङ्गवीक्षणम्, **नयति** = क्षिपति इव । नयतेर्द्विकर्मकत्वात्, **अकथितञ्चेति** कर्मसंज्ञा ।

सरलार्थः - चन्द्रस्य सूर्यस्य च किरणे त्रिकूटमूर्ध्नि निपततः, तत्र द्वयोरेव तयोः शोभा सममेव विलोडति । असाध्वीयं सन्ध्यानायिका शोभनां रजनीं वीक्ष्य परिहसतीव दृश्यते । रजनी च पतिरक्तां तां सन्ध्याम्, सासूयं कटाक्षं क्षिपतीवेति।

अत्र सन्ध्यायां सतीत्वस्य निशायाञ्च कुलटात्वस्यारोपात् **समासोक्त्यलङ्कारः**।

शिखरिणीवृत्तम् ।

२३ अत्र हनुमान् त्रिकूटाचलं वर्णयन् रवेरस्तङ्गमनेन सन्ध्यायाः स्थितिं निरूपयति - **शिव शिवेति** ।

अन्वयः - शिव शिव, द्वादशात्मा निजकरपरिणीतां दिग्वधूं प्राप्य एताम् सन्ध्यां कथं जहाति ? हन्त! सन्ध्या खरांशोः प्रकाशं परिहरति । हि असत्याः सङ्गः सताम् ओजः भृशम् हरति ।

व्याख्या - **शिव शिव** = अत्याहितम् भोः, **द्वादश आत्मानः** = मूर्तयो **यस्य सः**, **द्वादशात्मा** = सूर्यः, **सूरसूर्यार्यमादित्यद्वादशात्मदिवाकराः**, इत्यमरः। **निजैः** = स्वकीयैः, **करैः** = किरणैः, **अथ च** हस्तैः, **परिणीताम्** = पिङ्गलाम्, **अथ च** विवाहिताम्, **दिक् एव वधूस्ताम् दिग्वधूम्** = दिग्योषितम्, **प्राप्य** = लब्ध्वा, **एताम्** = इमाम्, **सन्ध्याम्** = सायङ्कालम्, **कथम्** = कुतः, **जहाति** = त्यजति ? **हन्त** = खेदस्य विषयः, **सन्ध्या** = सायम्, **खराः** = तीक्ष्णाः, **अंशवः**= किरणाः, **यस्य सः**, **तस्य खरांशोः** = सूर्यस्य, **प्रकाशम्** = तेजः, **परिहरति** = दूरीकरोति । **हि** = यतः, **न सती, असती, तस्याः, असत्याः** = कुलटायाः, **सङ्गः** = सम्पर्कः, **सताम्** = सज्जनानाम्, **ओजः** = तेजः, **भृशम्** = अत्यन्तमेव, **हरति** = अपनयति ।

सरलार्थः - सूर्यः कथं निजकरपरिणीतां दिग्वधूं प्राप्य सन्ध्याम् त्यजति ?

अपि च -

२४ उपपतिमिव सन्ध्या सेवते यामिनीशं
कृतरतिमपहाय स्वल्पकालेन सूर्यम् ।
पुनरपि सरतीयं नूतनं नायकं किं
भवति हि कुलटाया अस्थिरं प्रेम पुंसि ।।६।।

सन्ध्या च सूर्यस्य प्रकाशं हरति । यतोऽसत्याः सङ्गतिः सतां तेजसो विनाशाय जायते इति ।

अत्र सन्ध्यासूर्ययोर्नायिकानायकयोर्व्यवहारसमारोपात्**समासोक्तिः**, पादत्रस्यार्थस्य चतुर्थपादार्थेन समर्थनात्, **अर्थान्तरन्यासश्च** । तयोररङ्गाङ्गिभावतयाऽत्र **सङ्करालङ्कारः**।

२४ अत्र हनुमान् पुनरपि सन्ध्यामेव वर्णयति - **उपपतिमिवेति** ।

अन्वयः - सन्ध्या स्वल्पकालेन कृतरतिम् सूर्यम् अपहाय उपपतिम् इव यामिनीशं सेवते । पुनः, अपि इयम् नूतनं नायकम् सरति किम् ? हि कुलटायाः पुंसि प्रेम अस्थिरं भवति ।

व्याख्या - सन्ध्या = सायङ्कालः, **स्वल्पकालेन** = क्षणम्, **कृता रतिर्येन तम्, कृतरतिम्** = विहितारुणिमानम्, **अन्यत्र** विहितनिधुवनम्, **सूर्यम्** = भाष्करम्, **अन्यत्र** नायकम्, **अपहाय** = त्यवत्वा, **उपपतिम्** = उपग्रहम्, **अन्यत्र** जारम्, **सेवते** = आश्रयति । **पुनरपि** = भूयश्च, **इयम्** = सन्ध्या, **नूतनम्** = नवीनम्, **नायकम्**= पुरुषम्, **सरति** = गच्छति किम् ? **हि** = यतः, **कुलटायाः** = असत्याः, **पुंसि** = पुरुषे, **प्रेम** = प्रीतिः, **न स्थिरम्, अस्थिरम्** = चञ्चलम्, **भवति**= जायते।

सरलार्थः - यथा कापि पुंश्चली स्वपुरुषं परित्यज्य पुरुषान्तरं गच्छति तथैव स्वल्पकालेन रक्ता सन्ध्या सूर्यम् परित्यज्य चन्द्रम् भजते । यतः कुलटायाः पुंसि प्रेम स्थिरम् न भवतीति ।

यामिनीशस्योपपतित्वेन सादृश्यकथनात्, **उपमालङ्कारः** । सन्ध्यायाः नायकान्तरगमनरूपक्रिययोत्प्रेक्षणात् **क्रियोत्प्रेक्षालङ्कारः** । यामिनीशे उपपतित्वस्य सन्ध्यायाञ्च कुलटाया व्यवहारस्यारोपात्**समासोक्तिः**। चतुर्थचरणगतवाक्यार्थेन प्रथमद्वितीय- तृतीयचरणगतवाक्यार्थस्य समर्थनात्, **अर्थान्तरन्यासालङ्कारः** । परस्परमेषां संमिश्रणात्**सङ्करालङ्कारः** । **मालिनीवृत्तमत्र** ।

(नेपथ्ये)

२५ अतःपरं मया किमनुष्ठेयम् । परितो रत्नविरचितदृढप्रकारवलयैर्जाम्बूनदाङ्कितहस्तिनखप्रच्छन्नतोरणादिभिर्विघटितदुर्गमदुर्गैरगम्याया नानाविधखड्गचर्मखट्वाङ्गतोमरभिन्दिपालशूलशतघ्नीपरिवृतभयानकराक्षसभटरक्षितोपशल्याया अस्या लङ्कापुर्या बहिर्द्वारस्यापीदृशी विस्फूर्जिता श्रीः, न ज्ञायते पुरान्तः कीदृशी राजलक्ष्मीर्विलसति । यस्य त्रिलोकवशवर्तिनो राक्षसेन्द्रस्य प्रचण्डप्रतापात्पवनस्यापि पुरान्तप्रवेशे संशयः । सर्वेऽन्ये दिक्पालास्तस्य भयाल्लङ्कां प्रति दृष्टिक्षेपमपि कर्तुं न शक्नुवन्ति । तेषां तत्र प्रवेशने का वार्ता । इदानीं न मे बुद्धिः प्रसरति । नान्यमुपायान्तरं पश्यामि । सन्ध्यासमयेऽस्मिन् भगवतो रामचन्द्रस्य

---

२५ **अतः परम्** = अनन्तरम्, **मया** = हनुमता, **किम् अनुष्ठेयम्** = किं कर्तव्यम् ? **परितः** = सर्वतः, **रत्नैः** = स्वर्णादिधातुभिः, **विरचिताः** = निर्मिताः, **ये प्राकाराः**= वरणाः, **तेषां वलयैः** = कङ्कणाकारैः, **जाम्बूनदैः** = सुवर्णैः, **अङ्किताः** =युक्ताः, **ये हस्तिनखाः** = करिनखरास्तैः, **प्रच्छन्नानि तोरणादीनि, तैः विघटिताः** =विशेषेण रचिताः, **दुर्गमाः** = दुःखेनैव गन्तुं शक्याः, **ये दुर्गाः** = पुररक्षायै निर्मतानि स्थानानि, **तैः, अगम्यायाः** = गन्तुमशक्यायाः, **नानाविधैः** = अनेकैः, **खड्गैः** =परशुभिः, **चर्ममिः** = फलकैः, **फलकोऽस्त्री फलं चर्मेत्यमरः** । **खट्वाङ्गैः** = शैवास्त्रैः, **तोमरैः** =शर्वलाभिः, **भिन्दिपालैः** = अश्मच्छेपणसाधनास्त्रैः, **शूलैः** = त्रिशूलैः, **शतघ्नीभिः** = अस्त्रविशेषैः, **परिवृताः** = युक्ताः, **भयानकाः** = भीषणाः, **ये राक्षसाः** = क्रव्यादाः, **तेषां भटैः** = सैनिकैः, **रक्षितानि** = संरक्षितानि, **उपशल्यानि**= ग्रामान्तप्रदेशाः, **यस्यास्तस्याः, अस्याः** = एतस्याः, **लङ्कापुर्याः** = दशमुखनगर्याः, **बहिर्द्वारस्य** = वाह्यकपाटस्य, **अपि ईदृशी** = एतादृशी, **श्रीः** = शोभा, **विस्फूर्जिता**= दीप्ता अस्ति । **पुरस्य** = लङ्कानगरस्य, **अन्तः** = अभ्यन्तरे, **कीदृशी** = किंरूपा, **राजलक्ष्मीः** = राज्यश्रीः, **विलसति** = शोभते ? **न ज्ञायते** = न वेद्यते। **त्रयाणां लोकानां समाहारस्त्रिलोकम्, तत् वशे वर्तते यस्य तस्य, त्रिलोकवशवर्तिनः**= वशीकृतस्वर्गमर्त्यपातालस्य, **राक्षसानाम् इन्द्रः राक्षसेन्द्रस्तस्य राक्षसेन्द्रस्य** = रावणस्य, **प्रचण्डः** = प्रखरः, **यः प्रतापः** = ओजस्तस्मात्, **पवनस्य** = वायोरपि, **पुरान्तः** = लङ्काभ्यन्तरे, **प्रवेशः** = गमनम्, **संशयः** = सन्देह एव । **सर्वे** = निखिलाः, **अन्ये** = अपरे, **दिक्पालाः** = इन्द्रादयः, **भयात्** = भीत्या, **लङ्काम्** = रावणपुरं प्रति, **दृष्टिक्षेपम्** = दृक्पातमपि, **कर्तुम्** = विधातुम्, **न शक्नुवन्ति** = न समर्थाः । **तेषाम्** = इन्द्रादीनाम्, **तत्र** = लङ्कायाम्, **प्रवेशने** = अन्तर्गमने, **का**

चरणारविन्दयोर्मनः समर्पयामि । तेन यद् भवेद् तद् भवतु । (ऊर्ध्वमाकाशं वीक्ष्य) भगवन्, किमाज्ञापयसि सीतापते ! सीतामन्वेष्टुं शीघ्रं लङ्कां प्रविश। ते बलस्य पुरतो राक्षसा अकिंचित्करा इति । भवतु भवतो वचनमवितथम् । तथाप्यनेनोपायेन प्रवेष्टव्या सेति न मे मतिरुपायं प्रतिदिशति। (पुनराकाशे) किं ब्रवीषि प्रभो ! यथेच्छाप्रमाणमात्मनो रूपं कर्तु शक्नोषि त्वमिति । (आम्, ज्ञातम्) सूक्ष्मतरवपुरहं लङ्कां प्रवेक्ष्यामि । विभो ! पुनः किं भणसि ? मामेव सर्वदा मनसि धृत्वा कार्यं कुर्वतस्तव सर्वत्र विजयो भवेदिति । बाढं विभो ! कण्ठागतप्राणस्यपि मे मनोऽलिर्भवच्चरणारविन्दमकरन्दं न विस्मरति। किं बहुना भक्तिभावकथनेन । यदि कश्चिन्मम हृदयं भित्वान्तः प्रपश्येत भवच्चरणारविन्दयोर्दर्शनं लभेत । तच्च भेत्तुं भवच्चरणारविन्द-स्मरणनिर्धूत-

---

वार्ता = का कथा ? न शक्नुवन्तीत्याशयः । **इदानीम्** = अधुना, **मे** = मम, **बुद्धिः** = मतिः, **न प्रसरति** = कथं प्रवेशो विधेय इत्यस्मिन् विषये चिन्तयितुं न शक्नोति, इति भावः । **अन्यम्** = अपरम्, **उपायान्तरम्** = उद्यमम्, **न पश्यामि** = न विलोकयामि । **अस्मिन् समये तेन** = कारणेन, **यद् भवेत्** = स्यात्, **तद् भवतु**= अस्तु । (**ऊर्ध्वम्** = उपरि, **अकाशम्** = नभः, **वीक्ष्य** = विलोक्य) **भगवन्, सीतापते** = जानकीवल्लभ! **किम् आज्ञापयसि** = किम् आदिशसि ? **सीताम्** = जानकीम्, **अन्वेष्टुम्** = गवेषयितुम्, **शीघ्रम्** = द्रुतम्, **लङ्काम्** = दशवदनपुरम्, **प्रविश** = प्रवेशं कुरु । **ते** = तव, **बलस्य** = शक्तेः, **पुरतः** = अग्रे, **राक्षसाः** = निशाचराः, **किञ्चित् कुर्वन्तीति किञ्चित्कराः, न किञ्चित्कराः, अकिञ्चित्कराः** = किमपि कर्तुं नैव शक्ष्यन्तीति भावः । **भवतः** = रामस्य **वचनम्**= वाक्यम्, **अवितथम्** = सत्यम्, **अस्तु** = भवतु । **तथापि** = तदपि, **अनेन** = एतेन, **उपायेन** = उद्यमेन, **सा** = लङ्का, **प्रवेष्टव्या** = प्रवेष्टुं शक्या, **इति** = अस्मिन् विषये, **मे**= मम, **मतिः** = बुद्धिः, **न प्रतिदिशति** = न निर्दिशति। (**पुनः**= भूयः, **आकाशे** = गगनं वीक्ष्येत्यर्थः) **प्रभो** = भो राम ! **किं ब्रवीसि** = किं कथयसि ? **त्वम्** = भवान्, **आत्मनः** = स्वस्य, **यथेच्छम्** = इच्छानुसारम्, **प्रमाणम्**= परिमितिर्यस्य तम्, **रूपम्**= आकारम्, **कर्तुम्**= विधातुम्, **शक्नोषि**= क्षमोऽसि । (**आम्, ज्ञातम्** = विदितम्) **अतिशयेन सूक्ष्मम्, सूक्ष्मतरम्** = अतिशयेन लघु, **वपुः** = शरीरम्, **यस्य सः, तथाभूतः लङ्काम्** = निशाचरनगरीम्, **प्रवेक्ष्यामि** = प्रवेशं करिष्यामि । **विभो** = प्रभो! **पुनः** = भूयः, **किं भणसि** =

कल्मषेण योगीन्द्रमनसा शक्येत न रावणादिशस्त्रास्त्रप्रहारेण । (इति नेत्रयोः सम्मीलनं निरूपयति)

(नेपथ्ये) ।

२६ शरत्कुमुदबान्धवो विमलतारयाराधितो
विशालतरवृत्तभृद्वियति रामचन्द्रोऽधुना ।

किं कथयसि ? **माम्** = राममेव, **सर्वदा** = सदैव, **मनसि** = चेतसि, **धृत्वा** = स्थापयित्वा, **कार्यम्** = कर्म, **करोतीति कुर्वन् तस्य कुर्वतः**, = विदधतः, **तव**= भवतः, **सर्वत्र** = यत्रतत्र, **विजयः** = जयः, **भवेत्** = स्यात्। **विभो** = प्रभो! **बाढम्** = शोभनम्, **कण्ठे आगताः प्राणाः यस्य तस्य, कण्ठागतप्राणस्यापि मे**= मम, **मनः** = चेतः एव, **अलिः** = भ्रमरः, **भवतः चरणौ** = त्वत्पादौ, **एवारविन्दे** = कमले, **तयोः मकरन्दम्** = पुष्परसोपमभक्तिम्, **न विस्मरति** = सदैव स्मरति । **भक्तिभावस्य** = त्वद्भक्तेः, **कथनेन** = भाषणेन, **किं बहुना** = किमधिकं भवति ? **यदि** = चेत्, **कश्चित्, मम** = हनुमतः, **हृदयम्** = वक्षस्थलम्, **भित्वा** = भेदनं विधाय, **अन्तः** = अभ्यन्तरम्, **प्रपश्येत** = अवलोकयेत्, **तदा भवतः** = तव, **चरणारविन्दयोः** = पादयोः, **दर्शनम्** = विलोकनम्, **लभेत** = प्राप्नुयात्, **तच्च** = हृदयम्, **भेत्तुम्** = विभिद्यान्तः प्रवेष्टुम्, **भवतः** = तव, **चरणारविन्दयोः** = पादयोः, **स्मरणेन** = स्मृत्या, **निर्धूतम्** = दूरीकृतम्, **कल्मषम्**= वृजिनम्, **येन तेन, योगीन्द्राणाम्** = तपस्विनाम्, **मनसा** = हृदयेन, **शक्यते** । **रावण आदि येषान्तैः, रावणादिभिः** = दशवदनप्रभृतिभिः, राक्षसैः, **शस्त्रञ्च अस्त्रञ्च तयोः प्रहारः** = हननम्, **तेन, न** = न शक्यत इति भावः । (**इति** = इत्थम्, **नेत्रयोः** = नयनयोः, **संमीलनम्** = निमीलनम्, **निरूपयति** = अभिनयति)

(नेपथ्ये)

२६ अत्र हनुमान् नेपथ्ये पठितं रामचन्द्रयोर्वैशिष्ट्यप्रत्यायकं श्लेषालङ्कृतं पद्यमेकं शृणोति - **शरदिति** ।

अन्वयः - अधुना शरत्कुमुदबान्धवः विमलतारया आराधितः विशालतरवृत्तभृत् सुषमालयः सहजलक्ष्मणालिङ्गितः रामचन्द्रः वियति चकास्ति। कपे! तम् विलोक्य राक्षसानाम् पुरम् अरम् प्रविश ।

व्याख्या - **चन्द्रपक्षे- शरदि** = आश्विनकार्तिकमासयोः, **यानि कुमुदानि**= कमलिन्यः, **तान्येव बान्धवा यस्य सः, शरत्कुमुदबान्धवः** = शरत्कमलिनीप्रियः,

चकास्ति सुषमालयः सहजलक्ष्मणालिङ्गितो
विलोक्य तमरं कपे ! प्रविश राक्षसानां पुरीम् ।।८।।

(श्रुत्वा हनुमान् दृष्टी वियति समुन्मीलयति ।)

विमलया = निर्मलया, **तारया** = नक्षत्रसमूहैः, **आराधितः** = सेवितः, **अतिशयेन विशालम् विशालतरम्** = विपुलतरम्, **वृत्तम्** = मण्डलम्, **बिभर्ति** = धारयतीति, **विशालतरवृत्तभृत्** = विपुलतरमण्डलधारी, **सुषमायाः** = शोभायाः, **आलयः**= आश्रयभूतः, **सह जायते इति सहजम्** = सहैवोत्पन्नम्, **यत् लक्ष्मणम्** = कलङ्कः, **तेन आलिङ्गितः** = युक्तः, **रामः** = रमणीयः, **चन्द्रः** = इन्दुः, **वियति** = आकाशे, **चकास्ति** = शोभते, **भो कपे** = हे हनुमन्! **त्वम्** = भवान्, **तम्** = चन्द्रम्, **विलोक्य** = अवलोक्य, **राक्षसानाम्** = निशाचराणाम्, **पुरम्** = नगरीम्, **अरम्**= शीघ्रम्, **प्रविश** = प्रवेशं कुरु ।

सरलार्थः – कुमुदबन्धुः विमलाभिस्ताराभिर्विलसितं विशालमण्डलं दधानः, श्रिया युतः कलङ्कलाञ्छितः सुन्दरश्चन्द्रो वियति प्रकाशते । भो हनुमन्! तं विलोक्य त्वं शीघ्रं लङ्कां प्रविश, इति ।

रामचन्द्रपक्षे – शरदि = शरत्काले, **कुमुदः** = तदाख्यवानरः, **एव बान्धवो यस्य सः**, **विमलया** = निष्कपटया, **तारया** = सुग्रीवपत्न्या, **आराधितः** = परमेश्वरभावेन पूजितः, **विशालतरम्** = आदर्शयुतम्, **वृत्तम्** = चरित्रं **बिभर्तीति विशालतरवृत्तभृत्** = आदर्शचरित्रोपेतः, **सुषमायाः** = सौन्दर्यस्य, **आलयः** = आश्रयभूतः, **सहजः** = लक्षणयाऽनुजः, **यो लक्ष्मणः** = सौमित्रिः, **तेन आलिङ्गितः**= आश्रितः, **रामचन्द्रः** = दाशरथिः, **अधुना** = कालेऽस्मिन्, **वियति** = आकाशे, **चकास्ति** = शोभते । **भो कपे** = भो वानर! **तम्** = रामचन्द्रम्, **वीक्ष्य** = विलोक्य, **राक्षसानां पुरीम्** = लङ्काम्, **अरम्** = द्रुतम्, **प्रविश** = प्रवेशं कुरु ।

सरलार्थः – कुमुदनामकवानरप्रियः सुग्रीवपत्न्या तारया परमेश्वरभावेन पूजितः, आदर्शचरित्रयुतः सुशोभितो लक्ष्मणाश्रितो रामोऽधुना वियति शोभते, हे कपे! तं वीक्ष्य शीघ्रं लङ्कां प्रविशेति ।

अत्र चन्द्ररामचन्द्रयोर्द्वयोरर्थयोर्वाक्येनैकेन प्रतीतेः **श्लेषालङ्कारः**। **पृथ्वीवृत्तमत्र** ।

(**हनुमान्** = आञ्जनेयः, **श्रुत्वा** = तद्वाक्यमाकर्ण्य, **वियति** = आकाशे, **दृष्टी** = नेत्रे, **समुन्मीलयति** = प्रसारयतीत्यर्थः)

२७ कोऽयं करुणाकरः श्रोत्राभ्यां सुधारसं पाययत इव माम् । आकाशे चन्द्रश्चकास्ति न च रामचन्द्रः । किमस्यार्थश्चन्द्रमसि घटते ?

(चिरं विचार्य)

२८ **अष्टासु मूर्तिषु शिवस्य शशाङ्कमेकां**
मूर्तिं वदन्ति मुनयः परतत्त्वविज्ञाः ।
तस्मान्मम प्रथममेव नमोऽस्तु तस्मै
लङ्काप्रवेशसुखसिद्धिकृते शिवाय ।।९।।

(इति लङ्कापुरीं प्रविशति ।)

२९ **हनुमान्** - (आत्मगतम्) अहो रमणीयता लङ्कापुर्याः । तथा हि -

---

२७ **अयम्** = एषः, **करुणायाः** = दयायाः, **आकरः** = खनिः, **कः** = किन्नामधेयो जनः, **श्रोत्राभ्याम्** = कर्णाभ्याम्, **माम्** = हनुमन्तम्, **सुधारसम्** = अमृतम्, **पाययते इव** = आस्वादयतीव विद्यते । **आकाशे** = व्योम्नि, **चन्द्रः** = सुधांशुः, **चकास्ति** = शोभते, **रामचन्द्रः** = दाशरथिः, **न च** = न शोभते । **अस्य पद्यस्य**= अस्य श्लोकस्य, **अर्थः** = अभिधेयः, **चन्द्रमसि** = इन्दौ, **घटते** = सङ्गच्छते , **किम्** ? (**चिरम्** = बहुकालम्, **विचार्य** = विचिन्त्य)

२८ अत्र हनुमान् शिवांशं चन्द्रं नमति - **अष्टासु** इति ।

अन्वयः - परतत्त्वविज्ञाः मुनयः शिवस्य अष्टासु मूर्तिषु शशाङ्कम् एकाम् मूर्तिम् वदन्ति । तस्मात् प्रथमम् एव लङ्काप्रवेशसुखसिद्धिकृते तस्मै शिवाय मम नमः अस्तु ।

व्याख्या - **परञ्च तत् तत्त्वम् परतत्त्वम्** = परब्रह्म, **तस्य विज्ञाः** = वेत्तारः, **मुनयः** = ऋषयः, **शिवस्य** = शङ्करस्य, **अष्टासु** = अष्टसंख्याकासु, **मूर्तिषु** = तनुषु, स्त्रियां मूर्तिस्तनुस्तनूरित्यमरः। **शशाङ्कम्** = चन्द्रम्, **एकाम् मूर्तिम्** = तनुम्, **वदन्ति** = कथयन्ति, **तस्मात्** = तद्हेतोः, **प्रथमम्** = आदौ एव **लङ्कायां प्रवेशः**, **तस्य सुखेन सिद्धिः**, **तस्याः कृते**, **लङ्काप्रवेशसुखसिद्धिकृते**= सानन्दलङ्काप्रवेशसाधकाय, **शिवाय** = शङ्कराय, **मम** = हनुमतः, **नमः** = प्रणामः, **अस्तु** = भवतु । (इति लङ्कापुरीं प्रविशति)

२९ **हनुमान्** - **लङ्कापुर्याः** = लङ्कानगर्याः, **रमणीयस्य भावः**, **रमणीयता** = सौन्दर्यम्, **अहो** = विस्मयोत्पादिका । **तथा हि** = यतः ।

३० वज्रैर्गारुत्मकैर्वा स्फटिकमणिगणैर्मौक्तिकैर्हर्म्यकुड्यम्
खर्जूरैर्हाटकैर्वा चितमपि पटलं क्षौममस्यां विशालम् ।
चैत्यैराढ्या गवाक्षैर्मणिचितवलभीसर्वतोभद्ररम्या
लङ्का सीतां न चैकां दशवदनहृतामादधातीव लक्ष्मीम् ।।१०।।

अपि च -

३१ प्रमदवनतरूणां मालतीमञ्जरीणा-
मुपरि परिणदन्तो मञ्जुघोषा द्विरेफाः ।

---

३० अत्र हनुमान् लङ्काया वैभवं वर्णयति - **वज्रैरिति** ।

अन्वयः - गारुत्मतैः वज्रैः वा स्फटिकमणिगणैः मौतिकैः वा खर्जूरैः हाटकैः चितमपि हर्म्यकुड्यम् अस्याः विशालम् पटलम् क्षौमम् (अस्ति) गवाक्षैः चैत्यैः आढ्या, मणिचितवलभीसर्वतोभद्ररम्या लङ्का दशवदनहृताम् एकाम् लक्ष्मीम् सीताम् च न आदधाति इव ।

व्याख्या - **गरुत्मत इमानि गारुत्मतानि तैः, गारुत्मतैः** = मारकतैः, **गारुत्मतं मरकतमश्मगर्भो हरिन्मणिरित्यमरः। तस्येदमित्यण्** । **वज्रैः** = हीरकैः, **वज्रोऽस्त्री हीरकं पवौ** इत्यमरः। **वा** = अथवा, **स्फटिकमणीनाम्** = स्फटिकरत्नानाम्, **गणैः** = समूहैः, **मुक्ता एव मौक्तिकानि, तैः, मौक्तिकैः** = मुक्तामणिभिः, **खर्जूरैः** = रजतैः, **दुर्वर्णं रजतं रूप्यं खर्जूरं श्वेतमित्यपि**, इत्यमरः। **हाटकैः** = सुवर्णैः, **स्वर्णं सुवर्णं कनकं हिरण्यं हेम हाटकम्**, इत्यमरः । **चितम्** = व्याप्तम्, **अपि अस्याः** = लङ्कायाः, **विशालम्** = विस्तृतम्, **पटलम्**= गृहाच्छादनम्, **क्षौमम्** = दुकूलम्, **विद्यते** । **गवाक्षाः** = वातायनानि, **सन्ति येषु तैः, चैत्यैः** = यज्ञस्थानैः, बुद्धागारैर्वा, **आढ्याः** = युक्ताः, **मणिभिः** = रत्नैः, **चिताः** = आच्छादिताः, **वलभ्यः** = गोपानस्यः, **यत्र तैः, तथोक्तैः, सर्वतोभद्रैः**= ईश्वरगृहविशेषैः, **स्वस्तिकः सर्वतोभद्रो नन्द्यावर्तादयोऽपि च । विच्छन्दकप्रभेदा हि भवन्तीश्वरसद्मनामित्यमरः**। **रम्या** = रमणीया, **लङ्का** = दशवदननगरी, **दशवदनेन** = रावणेन, **हृताम्** = अपहृताम्, **एकाम्** = केवलाम्, **लक्ष्मीम्** = तद्रूपाम्, **सीताम्** = जानकीम्, **न आदधाति** = न गृह्णाति, **इव लक्ष्यते** । निखिलसम्पत्पूर्णाऽपीयं लङ्का रावणापहृतां सीतामात्मनि स्थापितुमशक्तेवेत्यर्थः । अत्र, **उत्प्रेक्षालङ्कारः** । **स्रग्धरावृतमत्र** ।

३१ अत्र हनुमान् लङ्कां वर्णयन् भ्रमराणां घोषस्य वैशिष्ट्यं निरूपयति - **प्रमदवन-तरूणामिति** ।

मधुपरिमलमत्ताः कोकिलानां रुतानि
द्रुमशिखरगतानां भर्त्सयन्तीव यस्याम् ।।११।।

अपि च -

३२ उपनतरवोऽस्यां भूरिसौभाग्यभाजः
परभृतमधुपानां शब्दमाकर्णयन्तः ।
पवनचलितवल्लीनर्तकीश्लिष्टहस्ता
श्रुतशुषिरनटास्ते व्यञ्जयन्तीव लास्यम् ।।१२।।

अन्वयः - यस्याम् प्रमदवनतरूणाम् मालतीमञ्जरीणाम् उपरि परिणदन्तः मधुपरिमलमत्ताः मञ्जुघोषाः द्विरेफाः द्रुमशिखरगतानां कोकिलानां रुतानि भर्त्सयन्ति इव ।

व्याख्या - **यस्याम्** = लङ्कायाम्, **मालतीनाम्** = जातीनाम्, **मञ्जर्यो यत्र तेषाम्, प्रमदाम्यः** = अबलाभ्यः, तेषां क्रीडायै इत्यर्थः । **यानि वनानि** = विपिनानि, स्त्रीणां विहाराय निर्मितानि विपिनानीत्यर्थः । **तत्र ये तरवः** = वृक्षाः, **तेषाम्** तत्र स्थितानामित्याशयः । **उपरि** = उपरिष्टात्, **परिणदन्तः** = शब्दायमानाः, **मधुनः** = पुष्परसस्य, **परिमलेन** = सुगन्धेन, **मत्ताः** = उन्मत्ताः, **अत एव मञ्जु** = सुन्दरः, **घोषः** = शब्दः, **येषान्ते तथाभूताः, द्वौ रैफौ येषान्ते द्विरेफाः** = भ्रमराः, **द्रुमाणाम्**= वृक्षाणाम्, **शिखरेषु** = शृङ्गेषु, **गतानाम्** = प्राप्तानाम्, **कोकिलानाम्** = पिकानाम्, **रुतानि** = शब्दान्, **भर्त्सयन्ति** = तिरस्कुर्वन्ति, **इव** ।

सरलार्थः - यस्यां लङ्कायां प्रमदवनानां मालतीमञ्जरीणां तरूणामुपरिष्टात् शब्दायमानाः पुष्परसस्य पानेन मत्ता भ्रमराः वृक्षाग्रेषु स्थितानां कोकिलानां रुतानि तिरस्कुर्वन्तीव लक्ष्यन्त, इति । अत्र, **उत्प्रेक्षालङ्कारः** । **मालिनीवृत्तम्** ।

३२ अत्र हनुमान् लङ्कायाः प्राकृतिकं वैभवं निरूपयति - **उपवनेति** ।

अन्वयः - अस्याम् भूरिसौभाग्यभाजः उपवनतरव : परभृतमधुपानां शब्दम् आकर्णयन्तः पवनचलितवल्लीनर्तकीश्लिष्टहस्ता श्रुतशुषिरनटाः लास्यं व्यञ्जयन्ति इव ।

व्याख्या - **अस्याम्** = पुरोवर्तिन्याम् लङ्कायाम्, **भूरि** = अधिकम्, **सौभाग्यम्**= भागधेयं भजन्तीति, **भूरिसौभाग्यभाजः** = अतिशयभाग्यशालिनः, **उपवनानाम्** = वाटिकानाम्, **तरवः** = वृक्षाः, **परान् भरन्तीति परभृतः** = कोकिलाः, **मधु पिबन्तीति मधुपाः** = भ्रमराः, **तेषाम् शब्दम्** = नादम्, **आकर्णयन्तः** = शृण्वन्तः, **पवनेन** = वायुना, **चालिता** = कम्पिता, **या वल्ली सा एव नर्तकी** =

अन्यच्च -

३३ कलरवकलविङ्काः खञ्जरीटाः कलिङ्गा
विटपिनमथ हित्वा गुल्मिनीमाश्रयन्ति ।
तरुतलमपि वन्या यान्ति सन्त्यज्य वल्लीं
कृषति खलु मनांसि स्त्रीत्वमेकं हि पुंसाम् ।।१३।।

नटी, **तया श्लिष्टाः** = गृहीताः, **हस्ताः** = कराः, अन्यत्र शाखाग्राः **येषान्ते तथोक्ताः**, **श्रुतम्** = आकर्णितम्, **शुषिरम्** = वाद्यशब्दः, **यैस्ते तथाभूताः नटाः**= तद्रूपाः, **ते** = वृक्षाः, **लास्यम्** = नृत्यम्, **व्यञ्जयन्ति** = प्रकटयन्ति, **इव दृश्यन्ते**।

सरलार्थः - उपवने सौभाग्ययुक्तास्तरवः कोकिलभ्रमराणां शब्दान् आकर्णयन्ति । पवनचालितया वल्ल्या श्लिष्टा वृक्षनटा शुषिरं श्रुत्वा नृत्यन्तीव दृश्यन्त इति। अत्र, **उत्प्रेक्षारूपकसमासोक्तीनां** संमिश्रणात्**संङ्करः** । **मालिनी** चात्र **वृत्तम्** ।

३३ अत्र कविः लङ्कायाः प्राकृतिकं सौन्दर्यं वर्णयति - **कलरवेति** ।

अन्वयः - कलरवकलविङ्काः खञ्जरीटाः कलिङ्गाः अपि विटपिनम् हित्वा गुल्मिनीम् आश्रयन्ति । वन्याः तरुतलम् सन्त्यज्य वल्लीम् यान्ति । हि एकं स्त्रीत्वम् पुंसाम् मनांसि खलु कृषति

व्याख्या - **कलः** = मनोरमः, **रवः** = शब्दः, **येषान्ते तथाभूताः**, **कलविङ्काः** = चटकाः, **खञ्जरीटाः** = खञ्जनाः, **कलिङ्गाश्च** = धूम्याटाश्च, **विटपिनम्** = वृक्षम्, **हित्वा** = त्यक्त्वा, **गुल्मिनीम्** = शाखादिभिर्विस्तृतवल्लीम्, **आश्रयन्ति** = सेवन्ते । **वने भवाः वन्याः** = अरण्योद्भवाः प्राणिनः, **तरूणाम् तलम् तरुतलम्** = वृक्षाधोभागम्, **सन्त्यज्य** = अपहाय, **वल्लीम्** = व्रततिम्, **यान्ति** = प्राप्नुवन्ति । पुंस्त्वबोधनाय **विटपिनम् तरुललम्** इति पदद्वयस्य, स्त्रीत्वाभिव्यक्तये, **गुल्मिनी- वल्लीशब्दयोश्च** प्रयोगः । **हि** = यतः, **एकम् स्त्रीत्वम्**= नारीभावः, **पुंसाम्** = पुरुषाणाम्, **मनांसि** = चेसांसि, **खलु** = निश्चयेन, **कृषति**= आकर्षति ।

सरलार्थः - मधुरं नदन्तश्चटकाः खञ्जनाः कलिङ्गाश्च पुरुषगुणोपेतं विटपिनं परित्यज्य स्त्रीलक्षणां गुल्मिनीमाश्रयन्ति । वनोद्भवाः प्राणिनस्तरुतलं त्यक्त्वा वल्लीं गच्छन्ति । यतः स्त्रीत्वं पुरुषाणां मनः कर्षति, इति ।

अत्र **समासोक्त्यर्थान्तरन्यासयोः** संमिश्रणात् **सङ्करालङ्कारः** ।

तथा च -

३४ परिजन इव नित्यं नीलकण्ठोऽपि हर्म्ये
दशमुखपरितुष्टो मेघनादानुलासी ।
प्रतिवसति समिच्छन् रामरक्षोपहारं
जटिलतरशिखायां चन्द्रकं सन्दधानः ।।१४।।

अपि च -

३५ नीललोहितमुखच्युतवाचा यातुधानपुरि बद्धपदं यम् ।
रावणं भर निशाचरि! मां त्वं मोचयेति वदतीव शुकोऽस्याम् ।।१५।।

(नेपथ्ये)

---

३४ अन्वयः - नीलकण्ठः अपि परिजन इव दशमुखपरितुष्टः, मेघनादानुलासी रामरक्षोपहारम् समिच्छन् जटिलतरशिखायाम् चन्द्रकम् सन्दधानः हर्म्ये नित्यम् प्रतिवसति ।

व्याख्या - नीलः = नीलवर्णः, कण्ठे यस्य सः, नीलकण्ठः = मयूरः, अन्यत्र शिवः परिजन इव = आत्मीयजन इव, दश मुखानि यस्य सः, दशमुखः= रावणस्तेन परितुष्टः = अन्नादिदानेन, अन्यत्र सम्यगर्चनया प्रसन्नतां नीतः, मेघस्य नादेन = शब्देन, अनुलसति = हर्षितो भवतीति, सः, अन्यत्र मेघनादेन = रावणज्येष्ठसुतेन, अनुलासः = प्रेम, अस्यास्तीति तथोक्तः, रामात् = दाशरथेः सकाशात्, रक्षा = रावणस्य त्राणम्, एव उपहारः = उपदा, तम्, समिच्छन् = वाञ्छन्, अतिशयेन जटिला, जटिलतरा, सा चासौ शिखा = चूडा, तस्याम् चन्द्रकम् = मेचकम्, अन्यत्र बालचन्द्रञ्च सन्दधानः = धारयन् , हर्म्ये = भवने, अन्यत्र मन्दिरे, प्रतिवसति = निवसति । शिवमयूरौ रावणस्य जीवनोपहारं रामं याचत इत्यर्थः । श्लेषोत्थापितः पूर्णोपमालङ्कारः ।

३५ अत्र हनुमान् शुकस्य गिरं वर्णयति - नीललोहितेति ।

अन्वयः - अस्याम् शुकः भो निशाचरि! नीललोहितमुखच्युतवाचा यातुधानपुरि बद्धपदम् रावणम् भर, त्वम् माम् मोचय इति वदति इव ।

व्याख्या - अस्याम् = नगर्याम्, शुकः = कीरः, भो निशाचरि = हे राक्षसि! नीललोहितः = शिवः, तस्य मुखात् = वदनात्, च्युतया = वररूपेण निर्गतया, वाचा = वाक्येन, शिववरेणेत्यर्थः । यातुधानानाम् = राक्षसानाम्, पुर्याम् = नगर्याम्, बद्धम् = दृढीकृतम्, पदम् = स्थानम्, येन तम्, तादृशम्

३६ दशमुखनगरीमुपेत्य रात्रौ

प्रविशति कोऽपि मलिम्लुचः पुरेऽस्मिन् ।

अहह ! निशि विलोकयाशु लङ्के !

स्वपिषि किं पुरगोपुरेऽधुना त्वम् ।।१६।।

ततः प्रविशति हस्ताभ्यां नेत्रद्वयं स्पृशन्ती मिथुनाचुचराभ्यां सहिता लङ्का ।

रावणम् = दशवदनम्, **भर** = पालय, **त्वम्** = निशाचरी, **नीललोहिताः** = शुकाः, **तेषां मुखात्** = तुण्डात्, **च्युतया** = निर्गतया, **वाचा** = श्रवणसुखदया वाण्या, **यातुधानानाम्**= राक्षसानाम्, **पुर्याम्** = नगर्याम्, **बद्धौ** = निबद्धौ, **पदौ**= चरणौ, **यस्य तम्, तादृशम् माम्** = शुकम्, **मोचय** = त्याजय, **इति वदति** = कथयति, **इव** प्रतीयते ।

सरलार्थः - यातुधानगर्यां स्थितः शुकः शिववचसा दृढपदं रावणं पालय, स्ववचसा बद्धपदं माञ्च त्यज इति वदतीव लक्ष्यते । **रथोद्धतावृत्तम्**, तल्लक्षणम् यथा -

रात्परैर्नरलगैरथोद्धता इति ।

३६ अत्र हनुमतो लङ्काप्रवेशं सूचयति नाटककारः- **दशमुखेति** ।

अन्वयः - अस्मिन् पुरे रात्रौ उपेत्य कोऽपि मलिम्लुचः दशमुखनगरीम् प्रविशति । हि हे लङ्के ! अहह त्वम् अधुना निशि पुरगोपुरे किं स्वपिषि ? आशु विलोकय ।

व्याख्या - **अस्मिन्** = एतस्मिन्, **पुरे** = नगरे, लङ्कायामित्यर्थः । **रात्रौ** = निशायाम्, **उपेत्य** = समेत्य, अत्रेत्यर्थः । **कोऽपि** = अज्ञातपरिचयः, **मलिम्लुचः**= चौरः, **चौरैकागारिकस्तेनो दस्युतस्करमोषकाः । प्रतिरोधिपरास्कन्धिपाट-च्चरमलिम्लुचाः**, इत्यमरः । **दश मुखानि यस्य सः, दशमुखः तस्य नगरीम्**= पुरम्, **पूः स्त्री पुरी नगर्यौ वा पत्तनं पुटभेदनमित्यमरः । प्रविशति** = प्रवेशं करोति। **अहह** = आश्चर्यस्य विषयः, **हि** = यतः, **हे लङ्के** = भो निशाचरि! **त्वम्**= भवती, **अधुना** = इदानीम्, **निशि** = रात्रौ, **पुरस्य** = नगरस्य, **गोपुरे** = पुरद्वारे, **पुरद्वारन्तु गोपुरमित्यमरः । किम्** = किमर्थम्, **स्वपिषि**= शेषे ? **आशु** = शीघ्रम् **विलोकय** = पश्य । निशाचर्यास्तव रात्रिशयनमनुचितमित्यर्थः।

सरलार्थः - अस्मिन्नगरे कोऽपि चौरस्त्वामुपेत्य रात्रौ लङ्कां प्रविशन्नस्ति, त्वञ्च पुरद्वारे शयानाऽसि। अतः शीघ्रं जागृहि, इति । **हरिणीवृत्तम्** ।

(**ततः** = तदनन्तरम्, **हस्ताभ्याम्** = कराभ्याम्, **नेत्रयोः** = नयनयोः,

३७ लङ्का - आः को अअं अधण्णो मं उवेक्खिअ दसमुहणअरं पविसदि । दाणिं जेव्व सो जमसदनस्स अदिधी होदि । उग्गमुह, किं तु ए अधवा इमएण किं विकहिदम् । दाव जुवं मम हत्थादो मरणं अहिलसधो । [*आः कोऽयमधन्यो मामुपेक्ष्य दशमुखनगरं प्रविशति । इदानीमेव स यमसदनस्यातिथिर्भवति । उग्रमुख! किं त्वयाऽथवाऽनया न किमपि कथितम् । तावद्युवां मम हस्तान्मरणमभिलषथः ।*]

३८ उग्रमुखः - प्रसीदतु भट्टिनी। अद्य हि मदिरापानाविद्धचेता अहमात्मानमपि वियदारूढं पश्यामि। कुतोऽहमागन्तुकं भूमौ पश्येयम् । तथा हि -

३९ **कादम्बरी भगवती मदिरायताक्षी**
नित्यं मदीयहृदये वसति प्रसन्ना ।

द्वयम् = युगलम्, **स्पृशन्ती मिथुनानुचराभ्याम्** = भृत्याभ्याम्, **सहिता** = युक्ता, **लङ्का** = पुरद्वारे रक्षायां नियुक्ता निशाचरी, **प्रविशति** ।

३७ **आः** = आश्चर्यबोधकोऽयं शब्दः । **अयम्** = एषः, **अधन्यः** = भाग्यहीनः, **माम्**= निशाचरीम्, लङ्कामित्यर्थः । **उपेक्ष्य** = तिरस्कृत्य, **दशमुखनगरीम्** = लङ्काम्, **प्रविशति** = अन्तर्गच्छति । **इदानीम्** = अधुनैव, **सः** = पुरुषः, **यमसदनस्य** = धर्मराजालयस्य, **अतिथिः** = अभ्यागतो भवति, मृत्युं प्राप्नोतीत्यर्थः । **भो उग्रमुख**= हे रक्षक! **त्वया** = भवता, **अथवा** = यद्वा, **अनया** = त्वत्पत्न्या, **किम्** = कुतः, **किमपि, न कथितम्** = नोक्तम् । **तावदिति** वाक्यालङ्कारे । **युवाम्** = भवन्तौ, **मम** = लङ्कायाः, **हस्तात्** = करात्, **मरणम्** = मृत्युम्, **अभिलषथः** = इच्छथः?

३८ **उग्रमुखः - भो भट्टिनि! प्रसीदतु** = प्रसन्ना भवतु। **हि** = यतः, **अद्य** = अस्मिन्दिने, **मदिरायाः** = मद्यस्य, **पानेन** = सेवनेन, **आविद्धम्** = विह्वलम्, **चेतः** = चित्तं **यस्य सः, अहम्, कुतः** = कस्मात्, **भूमौ** = पृथिव्याम्, **आगन्तुकम्** = आयान्तम्, **पुरुषम्, पश्येयम्** = विलोकयेयम् । मद्यसेवनेनोन्मत्तोऽहं किमपि नापश्यमिति भावः ।

३९ अत्रोग्रखो नाम निशाचरो मद्यपानावस्थां निरूपयति-**कादम्बरीति** ।

अन्वयः - आयाताक्षी भगवती कादम्बरी मदिरा प्रसन्ना नित्यं मदीयहृदये वसति । सा एकदा माम् आलिङ्ग्य मुहुः खे नयति । माम् भूमौ (च) निपातयति। अहम् ससुखम् शये ।

व्याख्या - **आयते** = विस्तृते, **अक्षिणी** = नयने, **यस्यां सा, तथोक्ता भगवती** = पूजनीया, लक्षणयाऽतीवप्रियेत्यर्थः । **कादम्बरी** = तान्नाम्नी, **मदिरा**=

आलिङ्ग्य मां नयति खे मुहुरेकदा सा
भूमौ निपातयति मां ससुखं शयेऽहम् ।।१७।।

(इति भूमौ लुठति)

४० **व्याघ्रणखी** - उच्चिट्ठदु उच्चिट्ठदु अज्जउत्तो । (उत्तिष्ठतूत्तिष्ठत्वार्यपुत्र!)

(इति उत्थापयति, लङ्कां निरीक्ष्य)

मा कप्पदु भट्टिणी । सच्चं विण्णवेदि मम उज्जउत्तो । पीदाणेण अणज्जेण मज्झण दिअसे पहुदा कादम्बरी ताअअं इदिसो उम्मदो जादो । क्खन्दव्वो भट्टिणीए एक्को अवराहो अस्स अणुचलस्स [मा कुप्यतु भट्टिनि! सत्यं विज्ञापयति ममार्यपुत्रः । पीतानेनानार्येण मध्याह्नदिवसे प्रभूता कादम्बरी। तदयमीदृश उन्मत्तो जातः । क्षन्तव्यो भट्टिन्यैकोऽपराधोऽस्यानुचरस्य ।]

४१ **लङ्का** - हंडे व्याग्घणहि! ममवि मदिरएविअ णिद्दए अहिहूदाए कण्णे केणचि

मद्यम्, **प्रसन्ना सती मम इदम्, मदीयम्, तच्च तद् हृदयम्, तस्मिन्, मदीयहृदये**= मच्चिते, **वसति** । मह्यं मदिरा सर्वदैव रोचते, इति भावः । **सा** = कादम्बरी नाम मदिरा, **एकदा** = कदाचित्, **माम्** = उग्रमुखम्, **आलिङ्ग्य** = आश्लिष्य, **मुहुः** = भूयोभूयः, **खे** = आकाशे, **नयति** = प्रापयति ।

सरलार्थः - मद्यपानेन नर आकाशे, उड्डीयमानः, कदाचित् भूमौ शयान इवानन्दमनुभूय स्वपितीति ।

अत्र कादम्बर्या भगवतीत्वेनारोपाद् **रूपकालङ्कारः** । **वसन्ततिलकावृत्तम्**। (**इति** = इत्थममिधाय **भूमौ** = भूभागे, **लुठति**)

४० **व्याघ्रणखी** - **भो आर्यपुत्र** = स्वामिन्! **उत्तिष्ठतु** = उत्थाय तिष्ठतु । (वीप्सायां द्विरुक्तिः) (इति उत्थापयति **लङ्काम्** = निशाचरीम्, **निरीक्ष्य** = विलोक्य) **हे भट्टिनि** = भो लङ्के! **मा कुप्यतु** = नैव क्रुध्यतु । **मम** = व्याघ्रणख्याः, **आर्यपुत्रः**= स्वामी, **उग्रमुखः**, **सत्यम्** = अवितथम्, **कथयति** = वदति । **मध्याह्नदिवसे** = मध्यदिने, **अनेन** = एतेन, **अनार्येण** = आर्यभिन्नेन, **प्रभूता** = प्रचुरा, **कादम्बरी**= मदिरा, **पीता** = पानविषयीकृता, **तत्**= तस्मात्, **अयम्** = एषः, **ईदृशः** = एतादृशः, **उन्मत्तः** = मदविह्वलः, **जातः** । **अनुचरस्य** = भृत्यस्य, **अस्य** = उग्रमुखस्य, **एकः** = अद्वितीयः, **अपराधः** = आगः, **भट्टिन्या** = त्वया, **क्षन्तव्यः** = सोढव्यः।

४१ **लङ्का** - हण्डे **व्याघ्रणखि**, 'हण्डे' इति संबोधनबोधकपदम् । **मदिरया** = मद्येनेव, **निद्रया** = स्वापेन, **अभिभूतायाः** = वशीकृतायाः, **मम** = लङ्कायाः, **कर्णे** =

उत्तम् - पाटच्चलो कच्चिललङ्कां पविठ्ठत्ति । [*हण्डे व्याघ्रणखि! ममापि मदिरयेव निद्रयाभिभूतायाः कर्णे केनचिदुक्तम्- पाटच्चरः कश्चिल्लङ्कां प्रविष्ट इति ।*]

४२ **व्याघ्रणखी** - सच्चम् सच्चम् । हमरिदं दाणिं मए किंचिपीदमदिरए अहमो कोऽबि वाणलाकिदिओ विकदंसकादोविसूक्मो आवरणसालादो मं मुहविआरं दंसिअ पुरदो गदो । वाणलसावओ अअं किं करिस्सदित्ति भएण विण्णविदा भट्टिणी । (इति इतस्ततः पश्यति) भट्टिणी, अअं दुव्विणीदो मक्कडो सालरूक्दसिहरं अरूहिअ णो उवालंहदि पस्सदु भट्टिणी । [*सत्यं सत्यं, स्मृतमिदानीं किंचित्पीतमदिरया । अंहो कोऽपि वानाराकृतिको वृकदंशकादपि सूक्ष्म आवरणशालान्मां मुखविकारं दर्शयित्वा पुरतो गतः । वानरशावकोऽयं किं करिष्यतीति मया न विज्ञापिता भट्टिनी । भट्टिनि! अयं दुर्विनीतो मर्कटस्तालवृक्षशिखरमारुह्यावामुपालभते, पश्यतु भट्टिनि ।*]

४३ **लङ्का** - अअं जेव्व अक्कडोत्थि । (अयमेव मर्कटोऽस्ति)

श्रवणे, **केनचित्** = अदृष्टेन, **उक्तम्** = कथितम्, **कश्चित्** = अपरिचितः, **पाटच्चरः** = चौरः, **लङ्काम्** = दशमुखनगरम् **प्रविष्टः**, इति ।

४२ **व्याघ्रणखी** - **सत्यम्, सत्यम्** = एतत्सत्यमस्तीति भावः । **किञ्चित्** = स्वल्पम्, **पीता** = सेविता, **मदिरा** = मद्यम्, **यया तया, मया इदानीम्** = अधुना, **स्मृतम्**। **अंहो कोऽपि** = अविदितः, **वानरस्याकृतिरिवाकृतिर्यस्य सः, वानराकृतिकः** = मर्कटाकारः, **वृकदंशात्** = वनमक्षिकाविशेषात्, **अपि सूक्ष्मः** = स्वल्पः, **आवरणशालात्** = प्राकारात्, **माम्** = व्याघ्रणखीम्, **मुखस्य** = वदनस्य, **विकारम्** = विकृतिम्, **दर्शयित्वा** = प्रदर्श्य, **पुरतः** = अग्रे, **गतः**। **अयम्** = एषः, **वानरशावकः** = मर्कटशिशुः, **किं करिष्यति** = किं विधास्यति, **इति धिया मया** = व्याघ्रणख्या, **भट्टिनी** = भवती, **न विज्ञापिता** = न निवेदिता । **भट्टिनि** = लङ्के! **अयम्** = एषः, **दुर्विनीतः** = दुष्टः, **मर्कटः** = वानरः, **तालवृक्षस्य** = ताडतरोः, **शिखरम्** = अग्रभागम्, **आरुह्य** = आरोहणं विधाय, **आवाम्** = माम्, भवतीञ्च, **उपालभते** = तर्जयति । **भट्टिनी** = भवती, **पश्यतु** = विलोकयतु ।

४३ **लङ्का** - **अयम्** = एषः, एव **मर्कटः** = वानरः, अस्ति ?

४४ **व्याघ्रणखी** - अध इम् । अणेण दुव्विणीदेण अच्चाहिदं किदम् । अअं मज्झरत्तिं आगच्छिअ मम पुरदो एक्कहत्थेण पुच्छं उक्खिवन्तो एक्कहत्थेण पुच्छमूलं कण्डूअन्तो तिण्णिहिं हत्थपादेहिं हिण्डन्तो मंडवालं हन्तो णअरं पविट्ठो । [*अथ किम् । अनेन दुर्विनीतेन अत्याहितं कृतम् । अयं मध्यरात्रावागत्य मम पुरत एकहस्तेन पुच्छस्य मूलं कण्डूयन्, पादाभ्यामेकेन हस्तेन च हिण्डन् मामुपालभमानो नगरं प्रविष्टः ।*]

४५ **लङ्का** - अले ले हदमक्कड ! मं उवालम्भिअ गच्छसि, चिट्ठ दाव तुएण विदिदा दसमुहस्स तिण्णिभुअणस्स भट्टुणअरी इयन्ति इदो तुण्णं निगच्छ। [*अरे रे हतमर्कट ! मां किं उपालभ्य गच्छसि ? तिष्ठ तावत् । त्वया न विदिता दशमुखस्य त्रिभुवनस्य भर्तुर्नगरीयमिति । इतस्तूर्णं निर्गच्छ ।*]

४६ **हनुमान्** - अहो अस्या रावणद्वारपालिन्या अपीदृशी वाक्परुषता । इदानीं

---

४४ **व्याघ्रणखी - अथ किम्** = एवमेव, **अनेन** = एतेन, **दुर्विनीतेन** = दुष्टेन, **अत्याहितम्** = जीवानपेक्षिकर्म, **अत्याहितं महाभीतिः कर्म जीवानपेक्षि चेत्यमरः।** **कृतम्** । **अयम्** = एषः, **मध्यरात्रौ** = निशामध्ये, **आगत्य** = एत्य, **मम** = व्याघ्रणख्याः, **पुरतः** = अग्रे, **एकहस्तेन** = एककरेण, **पुच्छम्** = लाङ्गूलम्, **तस्य मूलम्** = आद्यभागम्, **कण्डूयन्** = खर्जन्, **पादाभ्याम्, एकेन च हस्तेन, हिण्डन्**= गच्छन्, **माम्** = व्याघ्रणखीम्, **उपालभमानः** = तिरस्कुर्वन्, **नगरम्** = पुरम्, **प्रविष्टः** = प्राविशत् ।

४५ **लङ्का - अरे रे हतमर्कट** = वानराधम! **त्वम् किम्** = किमर्थम्, **माम्** = लङ्काम्, **उपालभ्य** = तिरस्कृत्य, **गच्छसि** = यासि ? **तावदिति** वाक्यालङ्कारे । **तिष्ठ त्वया** = भवता, **इयम्** = एषा, **त्रयाणां भुवनानां समाहारः, त्रिभुवनम् तस्य भर्ता** = स्वामी, **तस्य, दशमुखस्य** = रावणस्य, **नगरी** = पुरी **इति न विदिता**= न ज्ञाता । **इतः** = स्थानादस्मात्, **तूर्णम्** = शीघ्रम्, **निर्गच्छ** = बहिर्याहि ।

४६ **हनुमान् - अहो** =आश्चर्यम्, **रावणस्य** = दशवदनस्य, **द्वारपालिन्याः** = कपाटपालयत्र्याः, **अपि ईदृशी** = एतादृशी, **वाक्परुषता** = कठोरवचनप्रयोगः ? **इदानीम्** = अधुना, **इयम्** = एषा, **भयङ्करी** = भीतिदा, **राक्षसी** = निशाचरी, **माम्** = हनुमन्तम्, **बलात्** = हठात्, **निवर्तयितुम्** = परावर्तयितुम्, **इच्छति** । **भवतु** = अस्तु, **तावत्** = आदौ, **एनाम्** = लङ्काम्, **एवम्** = इत्थम्, **ब्रवीमि** = कथयामि । (प्रकाशम्) **अरे रे राक्षसि** = भो निशाचरि! **किमर्थम्** = कुतः,

कथमियं राक्षसी भयङ्करी मां बलान्निवर्तयितुमिच्छति । भवतु तावदेनामेवं ब्रवीमि । (प्रकाशम्) अरेरे राक्षसी, कमिर्थं मां भयं दर्शयसि ? नाहं त्वत्तो बिभेमि ।

४७ **लङ्का** - हंहो मुख्ख! किंतुअं हठादो लङ्कां पविहुं इच्छुसि । किं दे कज्जं लङ्कापवेसस्स । को तुअम् । [*हंहो मूर्ख ! किं त्वं हठाल्लङ्कां प्रवेष्टुमिच्छसि? किं ते कार्यं लङ्काप्रवेशस्य । कस्त्वम् ?*]

४८ **मए हदोजास्ससि जामिणीं तुअं**
कधं ण लङ्कां दसवक्करक्खिदाम् ।
अवेहि रे मूक्ख कवे इदो तुअं
वरं तुअं इच्छसि अत्तणो जइ ।।१८।।
[मया हतो यास्यसि यामिनीं त्वं
कथं न लङ्कां तशवक्ररक्षिताम् ।

माम्= हनुमन्तम्, **भयम्** = भीतिम्, **दर्शयसि** = विलोकयसि ? **त्वत्तः राक्षस्याः**, **अहम्** = वानरः, **न बिभेमि** = न त्रस्यामि ।

४७ **लङ्का** - हंहो **मूर्ख** = भो मूढ! **त्वम्**, **किम्** = कुतः, **हठात्** = बलात्, **लङ्काम्** = दशवदननगरीम्, **प्रवेष्टुम्** = प्रवेशं विधातुम्, **इच्छसि** ? **लङ्कायाम्** = अस्यां नगर्याम्, **प्रवेशस्य**, **कार्यम्** = कृत्यम्, **किमस्ति** ? **त्वम्** = वानरः, **कोऽसि** = तव परिचयः क इति भावः ।

४८ अत्र लङ्का नाम राक्षसी हनुमन्तमुपालभते - **मया हत इति** ।

अन्वयः - मया हतः त्वम् यामिनीम् यास्यसि दशवक्त्ररक्षिताम् लङ्काम् कथं न ? हे कपे ! यदि त्वम् आत्मनः वरम् इच्छसि त्वम् इतः अपेहि ।

व्याख्या - **मया** = लङ्कया, **हतः** = घातित एव, **त्वम्** = वानरः, **यमस्येयम्**, **यामिनी ताम् यामिनीम्** = यमपुरीम्, **यास्यसि** = गमिष्यसि, **यामिनीम्** = दक्षिणाशावलम्बिनीम्, **दश वक्त्राणि यस्य तेन दशवक्त्रेण** = रावणेन, **रक्षिताम्**= पालिताम्, **लङ्काम्** = तान्नगरीम्, **कथम्** = केनापि प्रकारेण, **न यास्यसि** = न प्राप्नोसि ? मया त्वयि हत एव त्वं यमपुरीं गन्तुं शक्नोसि न तु रावणपालितां लङ्कापुरीमित्यर्थः । **रे मूर्ख कपे** = मूढ वानर! **त्वम् यदि** = चेत्, **आत्मनः** = स्वस्य, **वरम्** = हितम्, **इच्छसि** = वाञ्छसि, **त्वम् इतः** = अस्मात् स्थानात्, **अपेहि** = दूरं गच्छ । **उपेन्द्रवज्रावृत्तम्** । तल्लक्षणं यथा-

उपेन्द्रवज्रा जतजास्ततो गौ, इति ।

अपेहि रे मूर्ख कपे ! इतस्त्वं
वरं त्वमिच्छसि आत्मनो यदि ।।१८।।]

४९ हनुमान् - का त्वम्, किमर्थं मां रुणत्सि । नाहं लङ्कां ग्रहीतुमागतः । किंतु कीदृशीयं राक्षसीपुरी, तस्याः काननश्रीश्च ? राक्षसानां कीदृशं बलम् ? कीदृशी च तत्र वन्या विटपिलताङ्कुरकुसुमप्रसवबन्धनकोरकाशस्यादिशोभा ? सर्वमेतत्तमालशिखरोत्सेधमारुह्य प्रपश्यामि । तदनन्तरं द्रुतं निवर्तिष्ये । तद्देहि मे प्रवेशम् ।

५० लङ्का - अवेहि रे साहामिअ, तुअं कस्सवि महप्पभावस्स रण्णेचर विअ अत्तणे गव्वं दंसअन्तो छलान्दो उववणं पविटठुं अहिलससि । जाणेमि तुहमारिसाणं मक्कडाणं अहिलासं उववणफलार्य चोरइदुं आगादोसि । ता दाणिं अणुभवसि कीदिसाई मे मुठिप्पहारफलाइन्ति । अहं दाव रक्खसाणं

---

४९ **हनुमान् - त्वम्** = भवती, **का, असि ? माम्** = कपिम्, **किमर्थम्** = कस्मात् कारणात्, **रुणत्सि** = निवारयसि ? **अहम् लङ्काम्** = दशवदनपुरम्, **ग्रहीतुम्** = चोरयितुम्, लङ्कावस्तूनि मुषितुमित्यर्थः । **नागतः** = नायातोऽस्मि । **किन्तु** = परन्तु, **इयम्** = एषा, **राक्षसी** = निशाचरमयी, **पूरी** = लङ्का, **तस्याः** = लङ्कायाः, **काननस्य** = वनस्य, **श्रीः** = शौभा च कीदृशी ? **राक्षसानाम्** = क्रव्यादानाम्, **बलम्** = सैन्यम्, **कीदृशम् ? तत्र** = लङ्कायाम्, **वन्या** = विपिनोद्भवा, **विटपिनाम्**= पुष्पाणाम्, **प्रसवबन्धनानाम्** = वृन्तानाम्, वृन्तं प्रसवबन्धनमित्यर्थः । **कोरकाणाम्**= कुड्मलानाम्, **सस्यादीनाम्** = फलादीनाम् आदिपदेन पल्लवादीमपि ग्रहणम् । **शोभा** = श्रीः, **कीदृशी वर्तते ? एतत्** = पूर्वोक्तम्, **सर्वम्** = निखिलम्, **तमाला-शिखरस्य** = तालवृक्षशृङ्गस्य, **उत्सेधम्** = उच्छ्रयम्, उन्नतभागमित्यर्थः । **आरुह्य**= आरोहणं विधाय, **प्रपश्यामि** = सम्यग् विलोकयामि । **तदन्तरम्** = तत्पश्चात्, **द्रुतम्** = शीघ्रम्, **निवर्तिष्ये** = परावर्तिष्ये । **तत्** = तस्मात्, **मे** = मह्यम्, **प्रवेशम् देहि** = पुरान्तर्यातुमाज्ञां दिशतु ।

५० **लङ्का - भो शाखामृग** = हे वानर! **अपेहि** = पलायस्व, **त्वम्** = वानरः, **महान् प्रभावो यस्य तस्य महत्प्रभावस्य** = शक्तिशालिनः, **कस्यापि राज्ञः** = नृपतेः, **चरः** = दूत इव, **आत्मनः** = स्वस्य, **गर्वम्** = अभिमानम्, **दर्शयन्** = प्रकटयन्, **छलात्** = वन्यशोभादर्शनव्याजेन, **उपवनम्** = उद्यानम्, **प्रवेष्टुम्** = प्रवेशं कर्तुम्, **अभिलषसि** = वाञ्छसि, **त्वादृशानाम्** = त्वत्तुल्यानाम्, **मर्कटानाम्** = वानराणाम्, **अभिलाषम्**= इच्छाम्, **जानामि** = वेद्मि । **त्वम् उपवनस्य** = उद्यानस्य, **फलानि**=

अहीसेण पुरीकाणणरक्खणे णिउतीह्म । ताहुतं इदो अवसर । [*अपेहि रे शाखामृग! त्वं कस्यापि महत्प्रभावस्य राज्ञश्चर इवात्मनो गर्वं दर्शयन् छलादुपवनं प्रवेष्टुमभिलषसि ? जानामि, त्वादृशानां मर्कटानामभिलाषमुपवनफलानि चोरयितुमागतोऽसि । तदिदानीमनुभवसि कीदृशानि मे मुष्टिप्रहारफलानीति। अहं तावद्राक्षसानामधीशेन पुरीकाननरक्षणे नियुक्ताऽस्मि । तद्द्रुतमितोऽपसर।*]

५१ **हनुमान्** - (आत्मगतम्) कथं मम पुनरपि कार्ये प्रत्यूहमूर्तिरुपस्थिता । (चिरं विचार्य) राक्षसाः स्वभावक्रूरास्तेषामपि स्त्रीजातिरियम् । भवत्वेनां वाग्दण्डेन स्मारयामि । (प्रकाशम्) भो दुष्टराक्षसि! न कदापि रोद्धुं शक्नोषि माम् । स्त्रीत्वसहाया त्वं प्राणवियोगादेतावत्कालं विरमसि । पश्य -

५२ **मुष्ट्याऽहं वज्रहस्तोऽ हनमपि शतशस्त्वादृशी राक्षसीस्त्वं**
मा कार्षीर्गर्वमेवं दशमुख इह ते किं करोति प्रगल्भे !

सस्यानि, **चोरयितुम्** = मुषितुम्, **आगतः** = आयातः, **असि** । **तत्** = तस्मात्, **इदानीम्** = सांप्रतम्, **मे** = मम, **मुष्टिप्रहारस्य**= मुष्टिताडनस्य, **फलानि** = परिणामाः, **कीदृशानि ? इति अनुभवसि** = जानासि। **अहम्** = लङ्का, **राक्षसानाम्** = निशाचराणाम्, **अधीशेन**= स्वामिना, रावणेनेत्यर्थः। **पुर्याः** = लङ्कानगर्याः, **यत् काननम्** = उपवनम्, **तस्य रक्षणे** = त्राणे, **नियुक्ता** = प्रयुक्ता, **अस्मि, तत्** = तस्मात्, **द्रुतम्** = शीघ्रम्, **इतः**= स्थानादस्मात्, **अपसर**= दूरं याहि ।

५१ **हनुमान्** - (आत्मगतम्) **पुनरपि** = भूयोऽपि, **मम** = हनुमतः, **कार्ये** = लङ्कागमनकर्मणि, **प्रत्यूहस्य** = विघ्नस्य, **मूर्तिः** = शरीरम्, **कथम्** = कस्मात्, **उपस्थिता** = आगता ? (चिरं विचार्य) **राक्षसाः** = क्रव्यादाः, **क्रूराः** = निष्ठुराः, भवन्ति, **तेषाम्** = निशाचराणां मध्ये, **इयम्** = एषा, **स्त्रीजातिः, वर्तते** । **भवतु** = अस्तु, **एनाम्** = राक्षसीम्, **वाग्दण्डेन** = वाण्या, **स्मारयामि** = बोधयामि, (प्रकाशम्) **भो दुष्टराक्षसि** = हे लङ्के! **माम्** = हनुमन्तम्, **कदापि** = कस्यामप्यवस्थायाम्, **रोद्धुम्** = निवारयितुम्, **न शक्नोषि** = न क्षमसे । **स्त्रीत्वम्, एव सहायो यस्याः सा, त्वम्, प्राणवियोगात्** = मृत्योः, **एतावत्कालम्** = सांप्रतं यावत्, **विरमसि**= जीवसीत्यर्थः । **पश्य** = विलोकय ।

५२ अत्र हनुमान् स्वसामर्थ्यं प्रकाशयति - **मुष्ट्याहमिति** ।

अन्वयः - वज्रहस्तः, अहम् , मुष्ट्या, शतशः, त्वादृशीः, राक्षसीः अहनम्। त्वम् एवम् गर्वम् मा कार्षीः । प्रगल्भे ! इह ते दशमुखः किम् करोति ? अतः

हन्तुं शक्नोमि रक्षोगणमखिलमतो मुष्टिपातेन सद्य -
स्तस्मात्प्लायस्व दुष्टेऽभयमहमधुना ते ददामि प्रसन्नः ।।१९।।

५३ लङ्का - को तुअं मम अभअदाअको अण्णो तिण्णिभुअणाणाहो दसमुह विअ । [कस्त्वां ममाभयदायकोऽस्त्यत्र त्रिभुवननाथो दशमुख इव ।]

(इति हनुमति मुष्टिप्रहारमभिनयति)

५४ हनुमान् - (महानादं कृत्वा, सक्रोधमिव)

रे रे रावणकिङ्करि ! त्वमनया मुष्ट्यापि मे वामया
प्राणान् प्रेमपरान् जहासि चपलं तिष्ठ क्षणं सन्मुखे ।

मुष्टिपातेन अखिलम् रक्षोगणम् सद्यः हन्तुम् शक्नोमि । तस्मात् प्लायस्व । दुष्टे, अहम् अधुना प्रसन्नः ते अभयम् ददामि ।

व्याख्या - **वज्रौ इव हस्तौ यस्य सः**, **वज्रहस्तः** = कुलिशकरः, **अहम्**= कपिः, हनुमानित्यर्थः। **मुष्ट्या**, **शतशः शताधिकाः**, **त्वादृशीः त्वत्सदृशीः राक्षसीः**= निशाचरीः, (कर्मपदम्) **अहनम्** = घातितवान् । **त्वम्** = लङ्का, **एवम्** = पूर्वोक्तम्, **गर्वम्** = अभिमानम्, **गर्वोऽभिमानोऽहङ्कारः**, इत्यमरः । **मा कार्षीः** = नैव कुरु। माङ्योगेऽडागमाभावः । **भो प्रगल्भे** = हे वाचाटे ! **इह** = अस्मिन् स्थाने, **ते** = तव, **दशमुखः** = रावणः, **किं करोति** = किं विदधाति ? किमपि विधातुं न शक्नोतीति भावः । **अतः** = अस्य हेतोः, **मुष्ट्याः** = अङ्गुलिबन्धस्य, **पातेन** = ताडनेन, **अखिलम्** = समग्रम्, **रक्षसां गणः रक्षोगणस्तम्** = निशाचरसमूहम्, **सद्यः** = तत्क्षणे, **हन्तुम्** = मारयितुम्, **शक्नोमि** = समर्थोऽस्मि। **तस्मात्** = तद्धेतोः, **प्लायस्व** = पलायनं विधेहि । **भो दुष्टे** = हे दुर्विनीते ! **अहम्**= कपिः, **अधुना** = सांप्रतम्, **प्रसन्नः** = हृष्टः, **ते** = तुभ्यम्, लङ्कायै, इत्यर्थः । **न भयम्**, **अभयम्** = भयहीनत्वम्, **ददामि** = प्रयच्छामि ।

सरलार्थः - वज्रतुल्यकरेण मया मुष्ट्या त्वत्सदृशाः निशाचरीः घातिताः, अतः त्वमेवं गर्व नो विधेहि । मुष्टिपातेनाधुना सकलराक्षसगणान् व्यापादयितुं शक्यते । अतस्त्वं शीघ्रमतः प्लायस्व, तुभ्यमहमभयदानं प्रयच्छामीति ।

५३. **लङ्का- मम**= लङ्कायाः, **अभयस्य** = भीत्यभावस्य, **दायकः** = दाता, **त्रिभुवननाथः**= त्रिलोकपतिः, **दशमुख इव** = रावण इव, **कः** = कोऽसीत्यर्थः ।

५४ हनुमान् - (**महान् चासौ नादः**, **महानादस्तं कृत्वा**, **सक्रोधम्** = सकोपमिव)

रक्षान्तेऽद्य करोतु राक्षसशतैः संसेव्यमानः स्वयं
लङ्केशो न कदापि जीवसि इतः पश्याद्य मे विक्रमम् ।।२०।।

(इति मुष्टिं प्रहरति ।)

५५ लङ्का - हा हदह्मि । क्व चिट्ठसि रावण, कथं मं पशुमारं मारिदां पेक्ससे ।
[*हा हतास्मि । क्व तिष्ठसि रावण! कथं मां पशुमारं मारितां प्रेक्षसे ।*]

(इति मूर्च्छिता भूमौ निपतनमभिनयति)

५६ हनुमान् - (स्वगतम्) कथं मम रामकार्यसाधनोद्यतस्य स्त्रिय एव विघ्नरूपेण परिणता अभूवन् । कुतः

अन्वयः - रे रे रावणकिङ्करि! अनया वामया अपि मे मुष्ट्या प्रेमपरान् प्राणान् जहासि । क्षणं सन्मुखे चपलं तिष्ठ । अद्य राक्षसशतैः संसेवव्यमानः स्वयं लङ्केशः ते रक्षाम् करोतु । हता कदापि न जीवसि । अद्य इतः मे विक्रमम् पश्य ।

व्याख्या - रे रे इति निन्दाव्यञ्जकसंबोधनवाचकमव्ययपदम् । **रावणस्य किङ्करी तत्संबुद्धौ, रावणकिङ्करि** = दशवदनसेविके! **अनया** = एतया, **वामया दक्षिणेतरया, अपि मे** = मम, **मुष्ट्या** = बद्धाङ्गुलिना, **प्रेमपरान्** = अतिशयप्रियान्, **प्राणान्** = असून्, **जहासि** = त्यजसि । **क्षणम्** = किञ्चित्कालम्, **सन्मुखे** = अग्रे, ममेति शेषः । **चपलम् चञ्चलं यथा स्यात्तथा तिष्ठ** । **अद्य** = दिनेऽस्मिन्, **राक्षसानाम्** = निशाचराणाम्, **शतैः**= समूहैः, **संसेव्यमानः**= परिचर्यमाणः, **स्वयम् लङ्केशः**= रावणः, **ते**= तव, **रक्षां करोतु** = अवतु । **हता** = ताडिता, मयेति शेषः। **कदापि** = कथञ्चिदपि, **न जीवसि** = नैव प्राणान् धारयसि । **अद्य**= दिनेऽस्मिन्, **इतः**= स्थानादस्मात् **मे** = मम, **विक्रमम्** = पराक्रमम्, **पश्य** = विलोकय ।

सरलार्थः - हे लङ्के! वाममुष्ट्याऽपि ताडिता त्वं न जीविष्यसि । राक्षसैः सेवितो रावणोऽपि त्वां रक्षयितुं न शक्नोति । अधुना मम पराक्रमं पश्येति ।

शर्दूलविक्रीडितं वृत्तम् । (इति मुष्टिं प्रहरति)

५५ लङ्का - हा = धिक्, **हता** = ताडिता, **अस्मि** । **भो रावण** = लङ्केश ! **क्व** = कुत्र, **तिष्ठसि** = वर्तसे ? **कथम्** = कया रीत्या, **पशुमारेण** = पशुहननविधिना, **मारिताम्** = घातिताम्, **माम्** = लङ्काम्, **प्रेक्षसे** = विलोकयसि ? (इति मूर्च्छिता भूमौ निपतनमभिनयति)

५६ हनुमान् - (स्वगतम्) **रामस्य** = दाशरथेः, **कार्यस्य** = कर्मणः, **साधने** = सम्पादने, **उद्यतस्य** = तत्परस्य, **मम** = हनुमतः, **स्त्रियः** = नार्यः, (सुरसाद्याः) **एव विघ्नरूपेण** = बाधकतया, **परिणताः**, अभूवन् । **कुतः** = कस्मादिति ।

५७ सुरसया गिलितस्तदनन्तरं वियति सिंहिकया चकृषेऽप्यहम् ।
निरगमं मुखतोऽपि तयोर्बताऽभवदसौ मम विघ्नकरी पुनः ।।२१।।

अपि च -

५८ वाममुष्टिनिहताप्यसौ मया चण्डमारुतहतेव चञ्चला ।
भैरवं रवमुदीर्य भूतले राक्षसी पतितमूर्च्छितोत्थिता ।।२२।।

(श्रोतव्यमिदानीमतः परं किं कथयिष्यति निशाचरी)

---

५७ तत्र कारणं निर्दिशति - **सुरसयेति** ।

अन्वयः - अहम् प्रथमम् सुरसया गिलितः तदनन्तरम् वियति सिंहिकया चकृषे तयोः मुखतः अपि निरगमम् बत पुनः असौ मम विघ्नकरी अभवत् ।

व्याख्या - **अहम्** = हनुमान् । **प्रथमम्** = आदौ, **सुरसया** = सर्पजनन्या, **गिलितः** = निगीर्णः, अभवमिति शेषः । **तदनन्तरम्** = तत्पश्चात्, **वियति** = आकाशे, **सिंहिकया** = राहुजनन्या, **चकृषे** = आकृष्टः, **तयोः** = सुरसासिंहिकयोः, **मुखतः** = वदनाभ्याम्, **अपि निरगमम्** = निर्गतवान्, अस्मीति शेषः । **बत** = खेदस्य विषयः । **पुनः** = भूयः, **असौ** = एषा, **मम** = हनुमतः, **विघ्नं करोतीति विघ्नकरी** = कार्यसंपादनबाधिका (टच्, टित्वात्, ङीप्) **अभवत्** ।

सरलार्थः - प्रथममहं सुरसया गिलितस्ततः सिंहिकयाऽऽकृष्टः सञ्जातः । तयोर्मुखाभ्यां निर्गतोऽपि पुनरियं निशाचरी लङ्का विघ्नकरी जातेति ।

द्रुतविलम्बितं वृत्तम् ।

५८ अपि चेत्यनेन पुनरपि विघ्नस्यास्तित्वं निरूपयति - **वाममुष्टिनिहतेति** ।

अन्वयः - असौ मया वामुमुष्टिनिहता अपि चण्डमारुतहता चञ्चला इव राक्षसी भूतले पतितमूर्च्छिता भैरवम् रवम् उदीर्य उत्थिता ।

व्याख्या - **असौ** = एषा, पुरो दृश्यमानेति भावः । **मया** = हनुमता, **वामश्चासौ मुष्टिस्तेन निहता** = ताडिता, **राक्षसी** = निशाचरी, **अपि चण्डः** = प्रचण्डः, **यः मारुतः** = वायुः, **तेन हता** = ताडिता, **चञ्चला इव** = विद्युत् इव, **भूतले** = पृथिव्याम्, **पतिता** = स्खलिता, **अथ च मूर्च्छिता** = गतचेतना, **अपि**, **पुनः** = भूयः, **भैरवम्** = भीषणम्, **रवम्** = शब्दम्, **उदीर्य** = उच्चार्य, **उत्थिता**= उदतिष्ठत् ।

सरलार्थः - मया वाममुष्ट्या ताडितेयं निशाचरी प्रचण्डवाताहता विद्युदिव पतितमूर्च्छिता भीषणशब्दमुच्चार्योत्तिष्ठति । कथनस्यायमभिप्रायः - यथा वाताहता विद्युत् कदाचित् भूमौ निपत्य सशब्दमाकाशे गच्छति तथैव हनुमता ताडितेयं राक्षसी

५९ लङ्का - (दिव्यमूर्तिः सत्वरमुपसृत्य संस्कृतमाश्रित्य) हनुमन्! जिताऽहं लङ्का।

६० **वेधा माह यदाऽत्र कश्चन कपिस्त्वां जेष्यति श्रेयसे**
रक्षोमण्डलमेष्यति प्रविलयं लङ्के ! तदेति ध्रुवम् ।
सोऽयं वासर एष वीर! भवता लङ्काऽहमेषा जिता
नूनं नो महतां मुखाम्बुजगता वाणी व्यतिक्राम्यति ।।२३।।

धरायां पतित्वा भीषणशब्दं विधाय पुनरुत्थितेति ।

अत्र, **उपमालङ्कारः** । **रथोद्धतावृत्तम्**, तल्लक्षणं यथा -

रात्परैर्नरलगै रथोद्धता, इति ।

इदानीम् = अधुना, **श्रोतव्यम्** = आकर्णयितव्यम्, **अस्ति यत्** - अतः, **परम्** = अनन्तरम्, **निशाचरी** = राक्षसी, **किं कथयिष्यति** = किं वदिष्यति ?

५९ **लङ्का** - (**दिव्या मूर्तिर्यस्याः सा, दिव्यमूर्तिः** = अलौकिकाकृतिः, **सत्वरम्** = शीघ्रम्, **उपसृत्य** = समीपमेत्य, **संस्कृतम्** = गीर्वाणवाणीम्, **आश्रित्य** = अवलम्ब्य कथयति) **भो हनुमन्** = हे कपे! **अहम्** = लङ्का, **त्वया** = कपिना, **जिता** = विजिता ।

६० अत्र लङ्का पुरावृत्तं निरूपयति - **वेधा** इति ।

अन्वयः - लङ्के! वेधाः मा आह यदा अत्र कश्चन कपिः त्वाम् श्रेयसे, जेष्यति तदा रक्षोमण्डलम् ध्रुवम् प्रविलयम्, एष्यति । हे वीर ! भवता लङ्का जिता, स अयं एषः वासरः । नूनम् महताम् मुखाम्बुजगता वाणी नो व्यतिक्राम्यति ।

व्याख्या - **हे लङ्के** = भो निशाचरि! **वेधा** = ब्रह्मा, **मा** = माम्, **आह** = उक्तवान्, **यदा** = यस्मिन् समये, **अत्र लोके कश्चन** = अविदितः, **कपिः** = वानरः, **त्वाम्** = भवतीम्, **श्रेयसे** = तव कल्याणाय, **लङ्काम्, जेष्यति, तदा रक्षसां मण्डलम्, रक्षोमण्डलम्** = निशाचरसमूहः, **प्रविलयम्** = विनाशम् , **एष्यति** = प्राप्स्यति । **हे वीर** = हनुमन्! **भवता** = त्वया, **एषा** = पुरोवर्तिनी, **अहम् लङ्का** = निशाचरी, **जिता, अतः, एषः** = अयम्, **सोऽयम्** = ब्रह्मणोक्तः, **वासरः** = दिवसः, अस्तीति शेषः । तदेवार्थान्तरन्यासेन समर्थयति - **नूनम्** = निश्चयेन, **महताम्** = विशिष्टपुरुषाणाम्, **मुखमेव, अम्भोजम् मुखाम्भोजम्** = वदनपद्मम्, **गता** = प्राप्ता, **वाणी** = वाक्, **न व्यतिक्राम्यति** = वैपरीत्यं न यातीत्यर्थः ।

सरलार्थः - हे लङ्के! पुरा वेधसा यदुक्तं तदद्य सत्यं जातम् । तेनोक्तमासीद्

अथ च -

६१ यथासुखं प्रविशतु वीर ! निर्भयः
पुरीमिमां मृगयतु जानकीं वने ।
करोतु तां पतिविरहेण कातरां
प्रसन्नतां गद्गदभाषिणीं भवान् ।।२४।।

अपि च -

६२ जयसि कपिवर ! त्वं यातुधानं समग्रं
हरसि जनकजाया मानसन्तापमुग्रम् ।

यद् यदा कपिस्त्वां मुष्टिना प्रहृत्य भूमौ पातयिष्यति तदा सकलमपि राक्षसकुलं विनश्यति, इति । अद्य स एव राक्षसकुलविनाशकारी वासरः समागत इत्यनुमिनोमि। यतो महतां मुखान्निसृता वाणी निरर्था न भवतीति ।

अत्र चरमचरणगतवाक्यार्थेन प्रथमद्वितीयतृतीयपादस्थवाक्यार्थस्य समर्थनात्, **अर्थान्तरन्यासः । शर्दूलविक्रीडितं वृत्तम् ।**

६१ अत्र लङ्का ब्रह्मवाक्यं स्मृत्वा राक्षसकुलविनाशं निश्चित्य हनुमते लङ्कापुरप्रवेशायानुमतिं प्रयच्छति - **यथासुखमिति ।**

अन्वयः - हे वीर! निर्भयः इमाम्, पुरीम् यथासुखं प्रविशतु । वने जानकीम् मृगयतु । भवान् पतिविरहेण कातराम्, गद्गदभाषिणीम् ताम् प्रसन्नताम् करोतु ।

व्याख्या - हे वीर = भो शूर! **निर्गतम् भयम् यस्मात् सः, निर्भयः** = भीतिरहितः, **इमाम्** = लङ्कानाम्नीम्, **पुरीम्** = नगरीम्, **यथासुखम्** = सानन्दम्, **प्रविशतु** = अन्तर्यातु । **ततः, वने** = उद्याने, **जनकस्यापत्यं स्त्री, जानकी ताम् जानकीम्** = वैदेहीम्, **मृगयतु** = गवेषयतु । **भवान्** = त्वम्, **पत्युः विरहः, तेन पतिविरहेण** = रामवियोगेन, **कातराम्** = विह्वलाम्, **गद्गदं भाषते इति गद्गदभाषिणी, ताम् गद्गदभाषिणीम्** = सगद्गदं ब्रुवाणाम्, **ताम्** = सीताम्, **प्रसन्नस्य भावः, प्रसन्नता, ताम् प्रसन्नताम्** = सन्तुष्टिम्, **करोतु** = विदधातु ।

सरलार्थः - हे हनुमन्! त्वं निर्भयं लङ्कां प्रविश्य वने जानकीमन्विष्य गद्गदभाषमाणां तां प्रसन्नां विधेहि, इति ।

रुचिरावृत्तमिदम् । तल्लक्षणं यथा -

चतुर्ग्रहैरिह रुचिरा जभौ स्जगाः, इति ।

६२ अत्र हनुमतः कार्यस्य साफल्यं निरूपयति लङ्का - **जयसीति ।**

अन्वयः - (हे) कपिवर! त्वम् समग्रम् यातुधानम् जयसि । जनकजायाः

दहसि सपदि तस्याः शोकवह्निं गृहीत्वा
पुरभवनवनश्रीं तेन रात्रिञ्चराणाम् ।। २५ ।।

अथ च -

६३ मैथिलीवदनचन्द्रचकोरं राममानय पुनर्भगवन्तम् ।
घातय त्वमिह राक्षसवर्गं स्वागता भवतु भो तव यात्रा ।। २६ ।।

उग्रम्, मानसम्, तापम्, हरसि । सपदि तस्याः शोकवह्निम् गृहीत्वा तेन रात्रिञ्चराणाम् पुरभवनश्रीम् दहसि ।

व्याख्या - कपीनां कपिषु वा वरः, तत्संबुद्धौ हे कविवर = वानरश्रेष्ठ! **त्वम्** = हनुमान्, **समग्रम्** = निखिलम्, **यातुधानम्** = निशाचरसमूहम्, **जयसि**। **जनकाज्जाता जनकजा** = सीता, **तस्याः जनकजायाः** = वैदेह्याः, **उग्रम्** = अतिशयेन वृद्धम्, **मनस इदम् मानसम्** = हार्दम्, **तापम्** = सन्तापम्, मानसीं पीडामित्यर्थः । **हरसि** = दूरीकरोषि । **सपदि** = तत्क्षणे, **तस्याः सीतायाः शोक एव वह्निः** = अग्निस्तम्, **गृहीत्वा** = आदाय, **तेन** = शोकवह्निना, **रात्रिषु चरन्तीति, रात्रिञ्चराः, तेषाम्, रात्रिञ्चराणाम्** = निशाचराणाम्, राक्षसानामित्यर्थः । **पुरस्य**= नगरस्य, **भवनानाम्** = प्रासादानाम्, **च श्रीम्** = शोभाम्, (अव्ययपदमिदम्) **दहसि** = भस्मसात् करोषि ।

सरलार्थः - भो वानरश्रेष्ठ! त्वं समग्रं राक्षससमूहं विजित्य सीताया नितरां वृद्धं मनस्तापं हरसि । ततः शोकाग्निना लङ्कायाः पुरो भवनानाञ्च शोभां दहसीति ।

अत्र शोक एव वह्निरिति **रूपकालङ्कारः** । **मालिनीवृत्तम्** । तल्लक्षणं यथा-

ननमयययुतेयं मालिनी भोगिलोकैः, इति ।

६३ अत्र लङ्का हनुमतो यात्रासाफल्यं द्योतयति - **मैथिलीति** ।

अन्वयः - त्वम् इह मैथिलीवदनचन्द्रचकोरम् , भगवन्तम् रामम् आनय । पुनः राक्षसवर्गम् घातय । भोः, तव यात्रा स्वागता भवतु ।

व्याख्या - त्वम् = भवान्, **इह** = स्थानेऽस्मिन्, **मैथिल्याः** = सीतायाः, **वदनम्** = मुखमेव, **चन्द्रः** = हिमांशुः, **तस्य चकोरम्** = च्याखुरा इति नेपालीभाषायां प्रसिद्धं चक्रवाकनामकं पक्षिविशेषम्, **तद् रूपम्, भगवन्तम्** = षडैश्वर्यसंपन्नम् , **रामम्** = दाशरथिम्, **आनय** = प्रापय । **पुनः** = भूयः, **राक्षसानां वर्गः, राक्षसवर्गः, तम्, घातय** = नाशय । **भो वानर! तव** = भवतः, हनुमत इत्यर्थः । **यात्रा** = गमनम्, **स्वागता** = शोभना फलदा वा भवतु ।

६४ **हनुमान्** - भवतु भवत्या वचनं सत्यम् । भगवति लङ्के! इदानीमहं पुरतो जिगमिषामि । गच्छ भवति! स्वस्थानं प्रति । (इति गमनं व्यञ्जयति) (आत्मगतम्) अहो राज्यलक्ष्मीसंपन्नानां लङ्कापुरनिवासिनां कार्यारम्भोद्योगः । नूनं रात्रिञ्चरा अर्थतोऽपि निशाचराः । तथा हि -

६५ **पूर्णे चन्द्रमसीह केचिदधुना तज्ज्योत्स्नयाह्लादिता**
अभ्यस्यन्ति सदायुधानि पुरुषा गीतानि तद्योषितः ।

सरलार्थः - त्वं सीताप्रियं राममानीय राक्षसकुलं नाशय । तव यात्रा सफला भवतु इति ।

अत्र वदनस्य चन्द्रत्वेन, रामस्य च चकोरत्वेनारोपाद्, **रूपकालङ्कारः** । **स्वागतावृत्तम्** । तल्लक्षणं यथा -

स्वागतेति रनभाद् गुरुयुग्मम्

६४ **हनुमान्** - **भवत्याः सुरसायाः वचनम्** = वाक्यम्, **सत्यम्** = अवितथम्, **भवतु। भगवति लङ्के ! इदानीम्** = अधुना, **अहम्** = हनुमान्, **पुरतः** = अग्रे, **जिगमिषामि**= गन्तुमिच्छामि । **गच्छतु भवति स्वस्थानं प्रति, इति गमनम्** = यात्राम्, **व्यञ्जयति**= प्रकाशयति । (आत्मगतम्) **अहो** = आश्चर्यम्, **राज्यलक्ष्म्या** = राष्ट्रशोभया, **संपन्नानाम्** = युक्तानाम्, **लङ्कापुरं निवसन्तीति, तेषाम् लङ्कापुरनिवासिनाम्** = लङ्कानगरमधिवसताम्, **कार्यस्य आरंभः, कार्यारम्भः, तस्योद्योगः कार्यारंभोद्योगः**= कार्यप्रारंभोद्यमः । **नूनम्** = निश्चयेन, **रात्रिञ्चराः** = निशाचराः, **न केवलं शब्दतः, अपि तु अर्थतः** = वाच्यतोऽपि, **निशाचराः** = रात्रिञ्चरा एवेति । **तथा हि** = यतः -

६५ तदेव प्रतिपादयति - **पूर्णे चन्द्रमसीति** ।

अन्वयः - इह केचित् अधुना पूर्णे चन्द्रमसि तज्ज्योत्स्नया आह्लादिताः सदा आयुधानि, तद्योषितः गीतानि अभ्यस्यन्ति । केचित् दीक्षिताः पुण्यजनाः वैश्वानरे हविः जुह्वति तथा केचित् दीर्घजटाधराः तपः तप्तुम् प्रवृत्ता इव (सन्ति)

व्याख्या - **इह** = अस्मिन् स्थाने, **केचित्** = राक्षसाः, **अधुना** = सांप्रतम्, **पूर्णे** = परिपूर्णे, **चन्द्रमसि** = विधौ , **तस्य ज्योत्स्ना, तज्ज्योत्स्ना, तया तज्ज्योत्स्नया** = चन्द्रिकया, **आह्लादिताः** = सानन्दाः, **सदा** = सर्वदा, **आयुधानि**= अस्त्राणि, **अभ्यस्यन्ति** = अभ्यासं कुर्वन्ति । **तेषां योषितः तद्योषितः** = राक्षसस्त्रियः, **च गीतानि** = गायनानि, **अभ्यस्यन्ति** । **केचित्** = केचन, **पुण्यजनाः** = राक्षसाः, **यातुधानः पुण्यजनो नैऋतो यातुरक्षसी**, इत्यमरः । धर्मात्मान इत्यर्थोऽपि व्यज्यते,

केचित्पुण्यजनाश्च जुह्वति हविर्वैश्वानरे दीक्षिताः
केचिद्दीर्घजटाधरा इव तपस्तप्तुं प्रवृत्तास्तथा ।।२७।।

तथा च -

६६ नृत्यन्ति जल्पन्ति हसन्ति रामाः क्रीडन्ति गायन्ति चरन्ति वामाः ।
दीव्यन्ति दिव्यैः कुतुकैश्च दिव्या लङ्कागृहाट्टालकमाश्रयन्त्यः ।।२८।।

दीक्षिताः = गृहीतदीक्षाः, **वैश्वानरे** = अग्नौ, **अग्निर्वैश्वानरो वह्निरित्यमरः** । **हविः** = हवनीयद्रव्यविशेषम्, **जुह्वति** = हवनं कुर्वन्तीत्यर्थः । **तथा** = पुनः, **केचित्** = केचन राक्षसाः, **दीर्घाश्च ताः जटाः दीर्घजटाः** = लम्बायमानसटाः, **तासां धराः** = धारकाः, **तपः** = तपस्याम्, **तप्तुम्** = आचरितुम्, **प्रवृत्ताः** = उद्यता **इव सन्ति** ।

सरलार्थः - लङ्कायां केचन राक्षसाः, आयुधानामभ्यासे, तेषां स्त्रियः गाने, केचन दीक्षिता वह्नौ हवने, केचिच्च दीर्घा जटा धारयन्तस्तपस्तप्तुं प्रवृत्ता इव विलोक्यन्ते, इति ।

अत्र, **उत्प्रेक्षालङ्कारः** । **शार्दूलविक्रीडितमत्र छन्दः** ।

६६ अत्र हनुमान् स्वगतं लङ्कान्तर्गतानां नारीणां चरित्रं निरूपयति - **नृत्यन्तीति** ।

अन्वयः - लङ्कागृहाट्टालकम् आश्रयन्त्यः रामाः नृत्यन्ति, जल्पन्ति, हसन्ति च । वामाः क्रीडन्ति, गायन्ति, चरन्ति । दिव्याः (च) दिव्यैः कुतुकैः दीव्यन्ति ।

व्याख्या - **लङ्कायाम्** = रावणपुर्याम्, **यानि गृहाणि** = भवनानि, **तेषाम् अट्टालकम्** = क्षौमम्, **आश्रयन्त्यः** = अधिवसन्त्यः, **रामाः** = सुन्दर्यः, **नृत्यन्ति**= नटन्ति । **जल्पन्ति** = संवदन्ति, **हसन्ति** = हास्यं कुर्वन्ति । **वामाः** = अन्याः स्त्रियः, **क्रीडन्ति** = खेलन्ति, **गायन्ति** = गानं कुर्वन्ति, **चरन्ति** = गच्छन्ति च । **दिव्याः** = दिवि भवाः, स्त्रियश्च, स्वर्गीया इत्यर्थः । **दिव्यैः** = अलौकिकैः, असामान्यैरित्यर्थः । **कुतुकैः** = कुतूहलैः, **दीव्यन्ति** = क्रीडन्ति । **हलिचेति** दीर्घः।

सरलार्थः - लङ्काया भवनाट्टमाश्रयन्तीषु स्त्रीषु काश्चचन नृत्यन्ति, जल्पन्ति, हसन्ति च, काश्चन क्रीडन्ति गायन्ति चरन्ति च । पुनः काश्चन दिव्याः स्त्रियः, अलौकिकैः कुतूहलैः क्रीडन्ति, इति ।

अत्र नारीणां स्वभाववर्णनात्स्वभावोक्त्यलङ्कारः, कारकदीपकालङ्कारश्च।

अपि च -

६७ स्वपतिमनुसरन्त्याः शिञ्जितं नूपुराणां
मणिमयवलयानां यातुधानप्रियायाः ।
जयति किमिव वीणाक्वाणमट्टालकेऽस्मिन् ।
दशवदननगर्या मन्दिराणां समन्तात् ।।२९।।

अपि च -

६८ प्रतिक्षणं यौवनतुङ्गचूचुका पतिं समालिङ्ग्य सुरारुणेक्षणा ।
अशङ्कमङ्कं रमणस्य निस्त्रपा मत्ताधिशेते निशि मत्तकाशिनी ।।३०।।

---

६७ पुनस्तदेव निरूपयति - **स्वपतिमिति** ।

अन्वयः - अस्मिन् अट्टालके स्वपतिम् अनुसरन्त्याः यातुधानप्रियायाः मणिमयवलयानाम् नूपुराणाम् शिञ्जितम् दशवदननगर्याः मन्दिराणाम् समन्तात् (स्थितम्) वीणाक्वाणम् जयति इव किम् ?

व्याख्या - **अस्मिन्** = एतस्मिन्, **अट्टालके** = क्षौमे, **स्वपतिम्** = निजधवम्, **अनुसरतीति अनुसरन्ती**, **तस्याः**, **अनुसरन्त्याः** = अनुयान्त्याः, **यातुधानस्य** = राक्षसस्य, **यातुधानः पुण्यजनो नैऋतो यातुरक्षसीत्यमरः** । **प्रियायाः** = स्त्रियाः, **मणिभिः निर्मिताः मणिमयाः**, **ते च ते वलयाः** = कटकाः, **तेषाम्**, **नूपुराणाम्**= पादाङ्गदानाम् च, **पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियामित्यमरः** । **शिञ्जितम्**= स्वनितम्, **अथ मर्मरः** । **स्वनितं वस्त्रपर्णानां भूषणानान्तु शिञ्जितमित्यमरः**। **दशवदनस्य** = रावणस्य, **नगर्याः** = पुर्याः, लङ्काया इत्यर्थः । **मन्दिराणाम्** = भवनानाम्, **समन्तात्** = परितः, श्रूयमाणमिति शेषः । **वीणानाम्** = वल्लकीनाम्, **वीणा तु वल्लकीत्यमरः** । **क्वाणम्** = निक्वाणम्, वीणाशब्दमित्यर्थः, **निक्वाणो निक्वणः क्वाणः क्वणः क्वणनमित्यपि**, इत्यमरः । **जयति** = विजयते, किमिवेति संभावनायाम् ।

सरलार्थः - अस्मिन्नट्टालके स्वपतिमनुसरन्त्या राक्षस्या मणिनिर्मितानां वलयानाम्, नूपुराणाञ्च शिञ्जितं लङ्काया मन्दिरेषु क्वणन्तीनां वीणानां ध्वानं जयतीवेति।

अत्र, **उत्प्रेक्षालङ्कारः** । **मालिनीवृत्तमत्र** ।

६८ पुनरपि निशाचर्याश्चरितमेव वर्णयति - **प्रतिक्षणमिति** ।

अन्वयः - निशि यौवनतुङ्गचूचूका सुरारुणेक्षणा मत्तकाशिनी प्रतिक्षणं पतिं समालिङ्ग्य मत्ता निस्त्रपा रमणस्य अङ्कम् अशङ्कम् अधिशेते ।

व्याख्या - **निशि** = रात्रौ, **यौवनेन** = युवावस्थया, **तुङ्गे** = उन्नते,

६९ अवलोकिता मया लङ्का पूः । सर्वाणि राजसदनानि काननानि च दृष्टानि । तत्र कुत्रापि च सीता नाधिगता । अतो मया किं कर्तव्यम् । (इति दीर्घं निश्वस्य) आम्, ज्ञातं लङ्कावचनस्मरणात् । अतोऽशोकवनिकां गच्छामि।(इति परिक्रामति। परितो निरीक्ष्य) किमिदमशोकवनम् । किमयं शिंशपातरुः । अहो सीतादर्शनं लब्धम् । दूरतः परोक्षस्थोऽहं भगवतीं प्रणमामि । (इति प्रणाममभिनयति । चिरं निरीक्ष्य) हन्तः, कष्टं भोः, सीता पतिविरहात्कृच्छ्रेण प्राणान् बिभर्तीव संलक्ष्यते ।

चूचुके= स्तनाग्रे, **यस्याः सा, सुरया** = मदिरया, **अरुणे** = रक्तवर्णे, **ईक्षणे** = नयने, **यस्याः सा, मत्ता इव काशते, इति मत्तकाशिनी**= वरवर्णिनी, **वरारोहा मत्तकाशिन्युत्तमा वरवर्णिनीत्यमरः** । रमणीयावयवा, इत्यर्थः। **क्षणे क्षणे इति प्रतिक्षणम्** = प्रतिदशपलम्, **पतिम्** = स्वामिनम्, **समालिङ्ग्य** = आश्लिष्य, **मत्ता** = उन्मत्ता, अत एव, **निर्गता त्रपा यस्याः सा निस्त्रपा** = निर्लज्जा, **रमयतीति रमणः, तस्य रमणस्य** = पत्युः, **अङ्कम्** = क्रोडम्, **न विद्यते शङ्का यस्मिन् कर्मणि तद् यथा स्यात्तथा, अधिशेते** = स्वपिति, **अधिशीङ्स्थासां कर्म** ।

सरलार्थः - यौवनेनोन्नतकुचचूचुका मदिरयाऽरुणेक्षणा उत्तमाङ्गी निशाचरी रात्रौ पतिमालिङ्ग्य सानन्दं तदीयाङ्के शेते, इति । **वंशस्थवृत्तमत्र** ।

६९ **मया** = हनुमता, **लङ्का पूः** = लङ्कानगरी, **अवलोकिता** = दृष्टा । **सर्वाणि** = निखिलानि, **राजसदनानि** = नृपगृहाणि, **काननानि** = वनानि च, **दृष्टानि** = विलोकितानि । **तत्र** = तेषु नृपगृहेषु वनेषु च, **सीता** = जानकी, **नाधिगता** = न प्राप्ता । **अतः** = अस्मात् कारणात्, **मया** = हनुमता, **किं कर्तव्यम्** = किं विधेयम् । **इति दीर्घं निश्वस्य, आः, लङ्कायाः** = निशाचर्याः, **वचनस्य** = वाक्यस्य, **स्मरणात्** = स्मृतेः, **ज्ञातम्** । **अतः अशोकवनिकाम्**= अशोकवाटिकाम्, गच्छामि (इति परिक्रामति **परितः** = सर्वतः, **निरीक्ष्य** = विलोक्य) **इदम्** = एतत्, **अशोकवनम्**= अशोकवाटिकाऽस्ति **किम्** ? **अयम्** = एषः, **शिंशपातरुः**= शिंशपावृक्षोऽस्ति **किम्** ? **अहो** = आश्चर्यम्, **सीतायाः** = जानक्याः, **दर्शनम्**, **लब्धम्** = विलोकनञ्ज्ञातम् । **दूरतः** = विप्रकृष्टात्, चिरं निरीक्ष्य, **हन्त** = खेदस्य, विषयः, भोः, **कष्टम्** = दुःखं सञ्ज्ञातम् । **सीता** = जानकी, **पत्युः** = रामस्य, **विरहाद्** = वियोगाद्, **कृच्छ्रेण** = कष्टेन, **प्राणान्** = असून्, **बिभर्ति** = धारयतीव, **संलक्ष्यते** = दृश्यते ।

७० क्षामं कपोलयुगलं लुलिताश्च केशा
अन्तर्गते च नयने मुखचन्द्रिकायाम् ।
रामस्य दीर्घविरहव्रतमाचरन्तीं
लावण्यमेव वपुषो न जहाति सीताम् ।।३१।।

अपि च -

७१ पीयूषाभा सुवृत्ता क्षितिनिहितकरा कर्बुरालीवृताङ्गा
पूर्णश्रीलक्षणाढ्या बुधजनकभवा रात्रिसञ्चारसङ्गा ।

---

७० अत्र हनुमान् विरहार्तायाः सीतायाः शरीरावस्थां निरूपयति - **क्षाममिति** ।

अन्वयः - कपोलयुगलम् क्षामम् , केशाः च लुलिताः सन्ति । नयने च मुखचन्द्रिकायाम् अन्तर्गते (स्तः) वपुषः लावण्यम् एव रामस्य दीर्घव्रतम् आचरन्तीम् सीताम् न जहाति ।

व्याख्या - **कपोलयोः** = गण्डस्थलयोः, **युगलम्** = द्वयम्, **क्षामम्** = कृशमस्ति, सीताया इति शेषः । **केशाः** = कचाः च, **लुलिताः** = शिथिलाः, **सन्ति** । **नयने** = नेत्रे च, **मुखमेव चन्द्रः तस्य चन्द्रिकायाम्** = ज्योत्स्नायाम्, **अन्तर्गते** = विलीने स्तः । **वपुषः** = शरीरस्य, सीताया इति शेषः । **लावण्यम्** = सौन्दर्यम्, **एव रामस्य** = दाशरथेः, **दीर्घव्रतम्** = बहुकालाद् रामस्य प्राप्त्यै विहितं धर्मम्, **आचरन्तीम्** = कुर्वतीम्, **सीताम्** = जानकीम्, **न जहाति** = न त्यजति।

सरलार्थः - सीतायाः कपोलौ कृशौ दृश्येते । तस्याः केशाश्च शिथिलाः सन्ति । नेत्रे च वदनस्यान्तर्गते स्तः । केवलं शरीरस्य लावण्यमेव तां न जहातीति।

अत्र **रूपकालङ्कारः** । **वसन्ततिलकावृत्तमत्र** ।

७१ अत्र हनुमान् श्लिष्टैर्विशेषणैः सीतां चन्द्रमूर्तिञ्च **वर्णयति = पीयूषाभेति** ।

अन्वयः - पीयूषाभा, सुवृत्ता, क्षितिनिहितकरा, कर्बुरालीवृताङ्गा पूर्णश्रीलक्षणाढ्या, बुधजनकभवा, रात्रिसञ्चारसङ्गा दिव्याभा तारकाढ्या विधुपदगमना, रामनामप्रसन्ना इयम् सीता (अस्ति) किम् आहो एषा परिधिवृता चन्द्रमोमूर्तिः (अस्ति)

व्याख्या- सीतापक्षे - पीयूषस्य = अमृतस्य, **आभा इव आभा** = कान्तिर्यस्याः **सा पीयूषाभा** = सुधोपमच्छविः, **पीयूषममृतं सुधेत्यमरः** । **सु** = शोभनम्, **वृत्तम्** = चरितम्, **यस्याः सा, सुवृत्ता** = सच्चरित्रा, **वृत्तं पद्ये चरित्रे त्रिष्वतीते वर्तुलेऽपि चेति कोशः** । **क्षितौ** = पृथिव्याम्, **निहितौ** = स्थापितौ **करौ** = हस्तौ, **यया सा, क्षितिनिहितकरा** = शोकवशाद् भूमिप्रसारितकरा,

दिव्याभा तारकाढ्या विधुपदगमना रामनामप्रसन्ना
सीतेयं वा किमाहो परिधिपरिवृता चन्द्रमोमूर्तिरेषा ।।३२।।

अपि च -

७२ किमियं बत राक्षसीवृता विरहार्ता भयविह्वला सती ।
वसतिं कुरुते सदा तले बकुलान्तर्गतशिंशपातरोः ।।३३।।

कर्बुराणाम् = राक्षसीनाम्, कर्बुरो निकषात्मजः, इत्यमरः । आलीभिः = पंक्तिभिः, आली सख्यावली अपि, इत्यमरः । वृतानि = वेष्टितानि, अङ्गानि = अवयवाः, यस्याः सा, कर्बुरालीवृताङ्गा = राक्षसीगणपरिवृतशरीरा, पूर्णा = परिपूर्णा या श्रीः = राज्यलक्ष्मीः, तस्याः लक्षणैः= चिह्नैः, आढ्या= युक्ता, पूर्णश्रीलक्षणाढ्या= पूर्णराज्यलक्ष्मीलक्षणविशिष्टा, बुधः = विद्वान्, यः जनकः = विदेहः, तस्मात् उद्भवः = उत्पत्तिर्यस्याः सा, तथोक्ता, रात्रौ सञ्चारो येषान्ते, रात्रिसञ्चाराः = राक्षसाः, तेषां सङ्गः = संपर्कः, यस्याः सा तथाभूता, दिव्या = रमणीया, आभा= कान्तिर्यस्याः सा, तारकाभ्याम् = अक्ष्णोः कनीनिकाभ्याम्, आढ्या = युक्ता, विधोः = हरेः, विधुर्विष्णौ चन्द्रमसीत्यमरः । पदम् = चरणारविन्दम्, गच्छतीति तत् तथाविधम्, मनः = चित्तम्, यस्याः सा तथोक्ता, रामस्य = दाशरथेः, नाम्ना= संज्ञया, रामेतिनामाकर्णनेनेत्यर्थः । प्रसन्ना = हृष्टा, इयम् = एषा, सीता= जानकी, अस्ति किम्, आहो = अथवा, एषा = पुरो दृश्यमाना । चन्द्रमूर्तिपक्षे- पीयूषस्य = सुधायाः, आभा = कान्तिर्यस्याः सा, सु = शोभनम्, रमणीयमित्यर्थः। वृत्तम् = मण्डलम्, यस्याः सा, क्षितौ = पृथिव्याम्, निहिताः= आपतिताः, कराः = किरणाः, यस्याः सा, कर्बुराणाम् = चित्रवर्णानाम्, आल्या= पङ्क्त्या, परिवृत्तानि = वेष्टितानि, अङ्गानि = मण्डलावयवाः, यस्याः सा, बुधः = ग्रहविशेषः, तस्य जनकः = चन्द्रः, तस्मात्, उद्भवः = उत्पत्तिर्यस्याः सा, रात्रौ = निशायाम्, सञ्चारः = गमनम्, तत्र सङ्गः = आसक्तिर्यस्याः सा, दिव्या = रमणीया, आभा= कान्तिर्यस्याः सा, तारकाभिः = भगणैः, आढ्या = समेता, विधुपदे = आकाशे, गमनम् = गतिर्यस्याः सा, रामैः = सुन्दरैः, नामभिः= सुधाकरादिभिः संज्ञाभिः, प्रसन्ना = मनोहरा, परिधिना = रेखया, परिवृता = परितो वेष्टिता, चन्द्रमसः = इन्दोः, मूर्तिः = बिम्बमस्ति किम् ?

अत्र श्लेषोत्थापितसन्देहालङ्कारः । स्रग्धरावृत्तमत्र ।

७२ अत्र हनुमान् विरहार्तां सीतामेव पुनरपि वर्णयति - किमियमिति ।

अपि च -

७३ हत रावण ! ते कथं मनो रचितं ग्रावमयं स्वयंभुवा ।
कलिकां परिणामकोमलां वत खड्गेन कथं निकृन्तसि ।।३४।।

अन्वयः - इयम् , राक्षसीवृता, विरहार्ता, भयविह्वला सती बकुलान्तर्गत-शिंशपातरोः तले सदा वसतिम् कुरुते किम् वत ।

व्याख्या - **इयम्** = पुरो दृश्यमाना, **राक्षसीभिः** = निशाचरीभिः, **वृता** = वेष्टिता, **विरहेण** = रामवियोगेन, **आर्ता** = पीडिता, **भयेन** = भीत्या, **विह्वला** = विकला, **सती** = पतिव्रता, **बकुलानाम्** = अशोकवृक्षाणाम्, **अन्तः** = मध्ये, **गतः** = स्थितः, **यः शिंशपातरुः** = शिंशपावृक्षः, **तस्य तले** = अधोभागे, **सदा**= बहुकालात्, **वसतिम्** = निवासम्, **कुरुते** = विदधाति **किम्** ?

सरलार्थः - इयं राक्षसीभिर्वृता विरहार्ता भीता सीता अशोकवनान्तर्गतस्य शिंशपातरोरधोभागे स्थिता वर्तते किमिति ।

सुन्दरीवृत्तमत्र । तल्लक्षणं यथा -

अयुजोर्यदि सौ जगौ युजोः सभराल्गौ यदि सुन्दरी तदा ।

७३ अत्र हनुमान् सीतासन्तापकरं रावणं निन्दति - **हतेति** ।

अन्वयः - रावण! स्वयंभुवा ते मनः ग्रावमयम् कथम् रचितम् (त्वम्) परिणामकोमलाम् कलिकाम् खड्गेन कथम् निकृन्तसि बत ।

व्याख्या - **भो रावण** = हे दशमुख! **स्वयं भवतीति स्वयंभूः, तेन स्वयंभुवा** = ब्रह्मणा, **ते** = तव, रावणस्येत्यर्थः । **मनः** = चित्तम्, **ग्रावणा निर्मितम् ग्रावमयम्** = पाषाणमयम्, **कथम्** = कुतः, **निर्मितम्** = रचितम् ? (यतस्त्वम्) **परिणामेन** = परिपाकेन, **कोमलाम्** = मृदुलाम्, **कलिकाम्** = कोरकम्, **खड्गेन** = तरवारिणा, **कथम्** = कुतः, **निकृन्तसि** = छिनत्सि ? **वत**= खेदस्य विषयः ।

सरलार्थः - भो रावण ! तव मनः पाषाणनिर्मितं विद्यते, यतस्त्वं कोमलावयवां कलिकोपमां सीतां खड्गेन छेत्तुमुद्यतोऽसीति ।

अत्राप्रस्तुतमृदुलावयवकलिकावर्णनेन कोमलाङ्ग्याः सीतायाः प्रतीतेः, **अप्रस्तुतप्रशंसालङ्कारः** । **सुन्दरीवृत्तमत्र** ।

किं च -

७४ **अयि राघववल्लभे ! कथं निकषा त्वं निकषात्मजा वसेः ।**
हृदयं वत पश्यतोऽधुना भवतीं मे शतधा विशीर्यते ।।३५।।

७५ अलं मम शोकेन । अधुना विटपान्तरितः सर्वं विलोकयन् जानकीं प्रतिपालयामि । प्रातरुदयङ्गते सवितरि राक्षसैः परिवृत्तो रावण आगमिष्यति चेत्सकुलं निहनिष्यामि । (इति परिक्रामति)

(इति निष्क्रान्ताः सर्वे)

इति पञ्चमोऽङ्कः ।

---

७४ अत्र हनुमान् सीताया दुरवस्थां विलोक्य शोकमभिव्यनक्ति - **अयीति** ।

अन्वयः - अयि राघववल्लभे ! त्वम् निकषात्मजाः निकषा कथम् वसेः? वत अधुना भवतीम् पश्यतः मे हृदयम् शतधा विशीर्यते ।

व्याख्या - **अयि** = भोः, **राघवस्य वल्लभा, राघववल्लभा, तत्संबुद्धौ, राघववल्लभे** = सीते, **त्वम्** = भवती, **निकषात्मजाः** = राक्षसीः, **निकषा** = समीपे, **अभितः परित** इति द्वितीया । **कथम्** = केन प्रकारेण, **वसेः** = निवासं करोषीत्यर्थः । **वत** = खेदस्य विषयः, **अधुना** = अस्मिन् समये, **भवतीम्** = सीताम्, **पश्यतीति पश्यन् तस्य पश्यतः** = विलोकयतः, दृश् + शतृ । **मे** = मम, हनुमत इत्यर्थः । **हृदयम्** = चित्तम्, **शतधा** = शतप्रकारैः, **विशीर्यते** = भिद्यते ।

सरलार्थः - हे सीते ! त्वं राक्षसीनां समीपे कथं वससि ? त्वां विलोकयतः मे मनो नितरामेव दुःखमनुभवतीति ।

७५ **मम** = हनुमतः, **शोकेन** = शुचा, **अलम्** = पर्याप्तम् । किमपि न भवतीत्यर्थः । **अधुना** = इदानीम् , **विटपे** = वृक्षे, **अन्तरितः** = गुप्तः, **सर्वम्** = निखिलम् **विलोकयन्**= पश्यन्, **जानकीम्** = सीताम्, **प्रतिपालयामि** = रक्षामि । **प्रातः** = प्रभाते, **सवितरि** = सूर्ये, **उदयम् गते** = उदिते, **राक्षसैः** = निशाचरैः, **परिवृत्तः** = सहितः, **रावणः** = राक्षसराजः, **आगमिष्यति चेत्** = आयास्यति यदि, **कुलैः सहितः सकुलस्तम् सकुलम्** = सान्वयम्, **तम्** = रावणम्, **निहनिष्यामि** = घातयिष्ये, (इति परिक्रामति) इति निष्क्रान्ताः सर्वे ।

इति श्रीनीलमणिढुङ्गानाविरचितायां यशोदाभिधायां संस्कृतटीकायां सुन्दरचरितनाटकस्य पञ्चमोऽङ्कः समाप्तः

सुन्दरचरितनाटकम्

षष्ठोऽङ्कः

षष्ठाङ्ककथासारः

प्रातः नेपथ्यतो वनध्वंसिनं वानरं बद्ध्वाऽऽनयत, अहं तं वीक्षितुं गच्छामीति वाक्यं निशम्य हनुमान् विटपिपर्णपुटान्तरे स्वं पिदधाति । ततो रक्षोभिः परिवृतो रावणोऽनिष्टस्वप्नस्य परिहारोपायं पृच्छति । प्रहस्तः प्रतापस्याये प्रत्यूहस्य नास्ति कापि चिन्तेति निवेदयति । ततः सोऽपि प्रहस्तेन सह सीतां वशीकर्तुं प्रतिष्ठते । शिंशपावृक्षमधः स्थिता सीता च रामलक्ष्मणयोः परोक्षे रावणकृतमपहरणकृत्यं स्मारं स्मारं बहुधा विलपति । नेपथ्ये रावणवचनं निशम्य सा स्वोरुभ्यामुदरं बाहूभ्यां पयोधरौ च निपीडयन्ती - हा अम्ब ! तव शरणं गतास्मीत्यभिधाय मुखं पृथिव्यै समर्पयति । हनुमान् तस्याः पातिव्रत्यं भूयो भूयो प्रशंसते । रावणः सत्वरं सीतामुपसृत्य मधुरया वाचा तां हस्ताभ्यासं कर्तुमिच्छति । सीता तृणमभ्यन्तरं कृत्वा वाग्वज्रेण तं ताडयति। ततः क्रुद्धोऽयं रावणस्तां हन्तुं करवालं गृह्णाति, मन्दोन्दरी तन्निषिध्य रावणकराद् खड्गं गृह्णाति । ततोऽसौ मासद्वयाभ्यन्तरे सीतां वशीकर्तुं राक्षसीर्निर्दिश्य मन्दोदर्याः करमालम्ब्य प्रहस्तेन निर्दिष्टमार्गो राजसदनं याति । एकजटा- विकटा-हरिजटादिभिर्बहुधा स्मारिताऽपीयं सीता रावणस्य स्त्रीत्वं नैवाङ्गीकरोति। रात्रौ विलोकितं स्वप्नं त्रिजटा श्रावयति । ततश्च तन्निशम्य परस्परं विलोकयन्त्यः सर्वा निशाचर्यो राक्षसकुलस्य नाशं निश्चित्य निर्गच्छन्ति। सकले च राक्षसीगणे प्रस्थिते मर्तुमुद्यतायाः सीतायाः पुरः पवननन्दन आदितो लङ्काप्राप्तिं यावद् वाचा रामचरित्रमुपस्थापयति । प्रहर्षिण्यां निबद्धं तद्वृतान्तं निशामयन्तं पुरतोऽवस्थानाय सीताऽऽदिशति । हनुमान् तत्रागत्य स्वपरिचयं प्रस्तूय रामनामाङ्कितां मुद्रामर्पयति तस्यै । ततश्च सा विश्वस्ता रामाय साभिज्ञानं सन्देशं प्रेषयति । पवनसूतश्च स्वभुजदण्डयोर्वीर्यं प्रदर्शयितुं रावणस्य प्रियतमं वनं विनाश्य तं साक्षात्कर्तुं समीहते ।

अथ षष्ठोऽङ्कः

(ततः प्रविशति हनुमान्)

१ **हनुमान्** - (आत्मगतम्) कथमिह घनमहीरुहपर्णपिहितप्रदेशत्वात्कियन्त्यो रजनीघट्योऽवशिष्टा इति न ज्ञायते। यतोऽहमस्य विटपिन उत्तुङ्गशिखरमवलम्ब्य पूर्वापरदिशौ सम्यगवलोकयामि। (इति विलोक्य) हन्त प्रयातेयं रजनी।

कुतः

२ **पूर्वाशां त्यजति प्रभातविजिता ज्यौत्स्नी पराशामपि**
त्यक्त्वा गच्छति चक्रवाकयुगलं प्रोल्लासयन्ती मुदा।

---

१ **हनुमान्** - (**आत्मगतम्** = स्वगतम्) **इह** = अस्मिन् स्थाने, **घनाः** = निविडाः, **ये महीरुहाः** = वृक्षाः, **तेषां पर्णैः** = पत्रैः, **पिहिंताः** = आच्छादिताः, **प्रदेशाः** = स्थानानि, **यस्य तस्य भावस्तस्मात्**, **कियन्त्यः** = कति, **रजन्याः** =रात्रेः, **घटयः**= घटिकाः, **अवशिष्टाः** = अवशेषङ्गताः, इति **न ज्ञायते** = न वेद्यते। **यतः** = यस्मात्, **अहम्** = हनुमान्, **अस्य** = एतस्य, **विटपिनः** = वृक्षस्य, **उत्तुङ्गम्** = उन्नतम्, **शिखरम्** = शृङ्गम्, **अवलम्ब्य** = आश्रित्य, **पूर्वा च अपरा च पूर्वापरे**= प्राचीप्रतीच्यौ, **दिशौ** = आशे, **सम्यक्** = साधु, **अवलोकयामि** = पश्यामि (**इति** = इत्थम्, **विलोक्य** = दृष्ट्वा) **हन्त** = खेदे, **इयम्** = एषा, **रजनी** = रात्री, **प्रयाता** = गता, **कुतः** = कस्मात्?

२ अत्र हनुमान् प्रभातोदयं वर्णयति - **पूर्वाशामिति**।

अन्वयः - प्रभातविजिता ज्यौत्स्नी पूर्वाशां त्यजति, चक्रवाकयुगलं मुदा प्रोल्लासयन्ती पराशाम् अपि त्यक्त्वा गच्छति। उद्गच्छन् अरुणः नैशम् तमः व्यपोहति। प्रातः मारुतचारु तिरश्चाम् रुतम् प्रभातोदयम् सञ्जनयते हन्त।

व्याख्या - **प्रभातेन** = प्रातःकालेन, **विजिता** = जिता, **ज्यौत्स्नी** = चन्द्रकान्तिः, **पूर्वा चासौ आशा, ताम् पूर्वाशाम्** = प्राचीदिशम्, **त्यजति** = जहाति। **चक्रवाकयोः, युगलम्** = द्वन्द्वम्, **मुदा** = हर्षेण, **उल्लासयन्ती** = प्रफुल्लयन्ती, **पराशाम्** = पश्चिमाशाम्, **अपि, त्यक्त्वा** = परित्यज्य, **गच्छति** = याति। **उद्गच्छतीति उद्गच्छन्** = उदयं प्राप्नुवन्, **अरुणः** = सूरसूतः,

उद्गच्छन्नरुणो व्यपोहति तमो नैशं तिरश्चां रुतं
प्रातर्मारुतचारु सञ्जनयते हन्त प्रभातोदयम् ।।१।।

अपि च

३ हरिदियमतिभाति पाटलाभा
रविकिरणद्युतिमिश्रिता च पूर्वा ।
दिशमिव समुपेक्षते प्रतीचीं
शशिकिरणच्युतमौलिमादधानाम् ।।२।।

(नेपथ्ये)

४ स्वप्नः किं किमुत भ्रमो मम मतेर्न ज्ञायते तत्वतः
सुप्तोऽहं विललाप वानरकृतं दृष्ट्वा वनध्वंसनम् ।

सूरसूतोऽरुणोऽनूरुरित्यमरः । **नैशम्**= रात्र्युद्भूतम्, **तमः** = अन्धकारम्, **व्यपोहति**= निराकरोति । **प्रातः** = प्रभातकालिकम्, **मारुतेन** = वायुना, **चारु** = मनोरमम्, **तिरश्चाम्** = पक्षिणाम्, **रुतम्** = शब्दः, **प्रभातस्य** = प्रातकालस्य, **उदयम्** = आविर्भावम्, **सञ्जनयते** = सूचयति । **हन्त** = हर्षस्य विषयः ।

सरलार्थः - प्रातः चन्द्रिकायुता रजनी पूर्वाशां परित्यजति । चक्रवाकमिथुन-माह्लादयन्ती चन्द्रिका पश्चिमाशामपि जहाति । उदीयमानोऽरुणो रात्रेस्तमो नाशयति। मारुतयुतं पक्षिणां रुतं प्रभातस्योदयं सङ्केतयतीति।

३ **अन्वयः** - इयम् पाटलाभा रविकिरणद्युतिमिश्रिता च पूर्वा हरित् अतिभाति । सा शशिकिरणच्युतमौलिम् आदधानाम् प्रतीचीम् दिशम् समुपेक्षते इव ।

व्याख्या - **इयम्** = एषा, **पाटला** = श्वेतरक्ता, **श्वेतरक्तस्तु पाटलः**, इत्यमरः । **आभा** = कान्तिर्यस्याः सा, **रवेः** = सूर्यस्य, **किरणैः** = करैः, **मिश्रिता** = युता, **पूर्वा** = प्राची, **हरित्** = दिशा, **अतिभाति** = अतिशयेन शोभते। **सा दिक्**, **शशिनः** = चन्द्रस्य, **किरणैः** = करैः, **च्युतः** = विहीनः, **यः मौलिः**= उपरिभागः, **तम् आदधानाम्** = धारयन्तीम्, **प्रतीचीम्** = पश्चिमाम्, **दिशम्** = आशाम्, **समुपेक्षते** = उपेक्षां करोति, **इव** । अत्र, **उत्प्रेक्षालङ्कारः** ।

(नेपथ्ये)

४ **अन्वयः** - स्वप्नः किम् उत मम मतेः भ्रमः किम् तत्त्वतः न ज्ञायते । अहम् सुप्तः वानरकृतम् वनध्वंसनं दृष्ट्वा विललाप । यूयम् कानने गच्छत । क्षिप्रं रक्षिणः मृगयत। तम् च शीघ्रम् दृढम् बध्वा रक्षत । अधुना अहम् वीक्षितुं गच्छामि ।

यूयं गच्छत कानने मृगयत क्षिप्रं दृढं रक्षिणो
बध्वा रक्षत तं च शीघ्रमधुनाऽऽगच्छाम्यहं वीक्षितुम् ।।३।।

५ (श्रुत्वा भयचकितो हनुमान् विटपिपर्णपुटान्तरे स्वात्मानं पिदधाति । ततः प्रविशति रक्षोभिः परिवृतो राक्षसराजो रावणः)

६ **रावणः** - अमात्य प्रहस्त! अद्य गतनिशीथे मयाऽनिष्टः स्वप्नो दृष्टः, यस्ते पूर्वमभिहितः । अपि कश्चित्परिहारोऽस्यास्ति ।

७ **प्रहस्तः** - अत्र भवतो महाराजस्य प्रतापात्प्रत्यक्षप्रत्यूहस्यापि निष्फलत्वम् ।

व्याख्या - **स्वप्नः**= स्वापः, **किमुत** = अथवा, **मम** = रावणस्य, **मतेः**= बुद्धेः, **भ्रमः** = भ्रान्तिः, **किम् इति तत्त्वतः** = वस्तुतः, **न ज्ञायते** = न वेद्यते। **अहम्** = रावणः, **सुप्तः** = निद्रामुपगतः, **वानरेण** = कपिना, **कृतं** = विहितम्, **वनस्य** = उद्यानस्य, **ध्वंसनम्** = विनाशम्, **दृष्ट्वा** = विलोक्य, **विललाप** = व्यलपम् । **यूयम्** = भवन्तो राक्षसाः, **कानने** = वने, **गच्छत** = यात, **क्षिप्रम्** = द्रुतम्, **रक्षिणः** = रक्षकान्, **मृगयत** = गवेषयत । **तम्** = वानरञ्च, **दृढं यथा स्यात्तथा, बद्ध्वा** = आबध्य, **रक्षत** = त्रायध्वम्, **अधुना** = इदानीम्, **अहम्** = रावणः, **वीक्षितुम्** = विलोकयितुम्, **शीघ्रम्** = द्रुतम्, **आगच्छामि** = आयामि।

सरलार्थः - मया स्वप्ने वानरेण वनं विनाशितं विलोकितम्, तं वानरं दृढं बद्ध्वा रक्षत । अहञ्च तमवलोकयितुमागच्छामीति ।

शार्दूलविक्रीडितं वृत्तम् ।

५ **इति श्रुत्वा** = एतदाकर्ण्य, **भयेन** = भीत्या, **चकितः** = विह्वलः, **हनुमान्** = पवनपुत्रः, **विटपिनः** = वृक्षस्य, **पर्णपुटस्य** = पत्रपुटस्य, **अन्तरे** = अभ्यन्तरे, **स्वात्मानम्** = स्वशरीरम्, **पिदधाति** = आच्छादयति । (**ततः रक्षोभिः** = राक्षसैः, **परिवृतः** = सहितः, **राक्षसराजः** = निशाचराधिपः, **रावणः** = दशमुखः, **प्रविशति**)

६ **भो अमात्य** = हे सचिव! **प्रहस्त, अद्य** = अस्मिन् दिने, **गतनिशीथे** = विगतरात्रौ, **मया** = रावणेन, **अनिष्टः** = अशुभः, **स्वप्नः, दृष्टः** = विलोकितः, **यः** = स्वप्नः, **पूर्वम्** = प्राक्, **ते** = तुभ्यम्, **अभिहितः** = कथितः । **अस्य** = स्वप्नस्य, **कश्चित्परिहारः** = कश्चन निवारणोपायः, **अस्ति अपि** = वर्तते किम् ?

७ **प्रहस्तः** - अत्र भवतः = पूजनीयस्य, महान् चासौ राजा, तस्य महाराजस्य = भवतः, **प्रतापात्** = प्रभावेण, **प्रत्यक्षः** = अग्रे समुपस्थितः, **यः प्रत्यूहः** = विघ्नस्तस्यापि निष्फलस्य भावस्तत्त्वम्, **निष्फलत्वम्** = निष्क्रियत्वम्, **अतः**, **तस्य** = रात्रौ दृष्टस्य, **परोक्षः** = अप्रत्यक्षो **यः स्वप्नस्तस्य, विचारः** = चिन्तनम्,

कुतस्तस्य परोक्षस्वप्नस्य विचारः ।

८ **मन्दोदरी** - अमच्च, ण दे इदिसं अजुत्तं लपितुं जुत्तम् । सच्चं विण्णावणीआ राआणो अमच्चेहिम् । ता किं तुअंवि तादिसो भविअ तस्स मणोणुसारं अणुसरसि । [*अमात्य ! न ते ईदृशमयुक्तं लपितुं युक्तम् । सत्यं विज्ञापनीया राजानोऽमात्यैः, तत्किं त्वमपि तादृशो भूत्वा तस्य मनोऽनुसारमनुसरसि ।*]

९ **राजा** - अयि देवि मन्दोदरि ! किं वाक्कशया ताडयसि ममामात्यतुरगम् । अयं यथाभिप्रायं नायकस्य चलति न नायिकायाः । न वयमन्ये राजान इव स्त्रैणबुद्धिमवलम्ब्य राज्यतन्त्रभारं वहामः । स्त्रीनायकस्य कस्यचिदपि राज्ञो राज्यलक्ष्मीः स्थिरा न भवति ।

१० **मन्दोदरी** - (सकोपम्) हे अणज्ज अज्जउत्त, किं मज्झेव्व उद्दिसिअ

तु **कुतः** = दूरेऽस्तु इति भावः ।

८ **मन्दोदरी - भो अमात्य** = हे मन्त्रिन्! **ते** = तव, **ईदृशम्** = पूर्वोक्तम्, **अयुक्तम्**= अनुचितम्, वचनमिति शेषः । **लपितुम्** = कथयितुम्, **न युक्तम्** = नोचितम् । **अमात्यैः** = मन्त्रिभिः, **राजानः** नृपाः, **सत्यम्** = ऋतम्, **वचः** = वचनम्, **विज्ञापनीयाः** = निवेद्याः । **तत्** = तस्मात्, **त्वम्** = भवान्, **किम्** = किमर्थम्, **तादृशः** = प्रशंसनपटुः भूत्वा, **तस्य** = राज्ञः, **मनसः** =चित्तस्य, **अनुसारम्** = अनुरूपम्, **अनुसरसि** = अनुगच्छसि ।

९ **राजा - अयि देवि** = भो राजमहिषि ! **मम** = रावणस्य, **अमात्यः** = सचिव एव **तुरगः** = अश्वस्तम्, **वाक्** = वाणी, **एव**, **कशा** = ताडनी, **तया ताडयसि** = आहंसि । **अहम्** = एषः, **प्रहस्तः**, **नायकस्य** = मम, **यथाभिप्रायम्** = आशयानुसारम्, **चलति** = व्यवहरति, **नायिकायाः** = तव, आशयानुसारम् न चलतीत्यर्थः। **वयम्**= रावणादयः, **अन्ये**= अपरे, **राजानः** = नृपा इव, **स्त्रैणबुद्धिम्**= स्त्रीजातिमनीषाम्, **अवलम्ब्य** = आश्रित्य, **राज्यतन्त्रस्य** = राजशासनस्य, **भारम्**= भरम्, **न च वहामः** = न च धारयामः । **स्त्री नायको यस्य तस्य**, **स्त्रीनायकस्य**= स्त्रीनेतुः, **कस्यचित् अपि राज्ञः** = नृपस्य, **राज्यलक्ष्मीः** = राज्यश्रीः, **स्थिरा न भवति** = स्थैर्यं न लभते ।

१० **मन्दोदरी** - (सकोपम्) हे **अनार्य** = अनुचितजल्पिन् ! **आर्यपुत्र** = स्वामिन्! **किम्** = किमर्थम्, **माम्** = मन्दोदरीम्, **उद्दिश्य** = लक्ष्यीकृत्य, **अधिक्षिपसि** = आक्षिपसि ? **अहं तव भट्टिनी** = अनभिषिक्ता स्त्री, **वा** = अथवा, **चेटी** = दासी न अस्मि । **कृताभिषेका** = अभिषिक्ता, **महिषी** = राज्ञी, **अस्मि** । **दासीपुत्रीम्** =

अहिक्खिवसि । ण अहं दे भट्टिणी वा चेटी । किदाभिसेआ महिसी अहह्मि। दासीउत्तींविअ माउवेक्खस्स मम् । [*हे अनार्य आर्यपुत्र ! किं मामेवोद्दिश्याऽधिक्षिपसि । नाहं ते भट्टिनी वा चेटी, कृताऽभिषेका महिष्यस्मि। दासीपुत्रीमिव मोपेक्षस्व माम् ।*]

(इति मुखं परिवर्तयति)

११ **हनुमान्** - (आत्मगतम्) दृष्टा मयाऽस्य दुष्टस्य दुश्चेष्टा । प्रथममेव जम्पत्योर्विवादो दर्शयति विनाशं राक्षसानाम् ।

१२ **प्रहस्तः** - अयि देवि ! मा कुप्यत्वत्रभवती । सत्यमेव निवेदितमनेन प्रभोर्भूतिमिच्छतानुचरेण न त्वलीकम् ।

१३ **मन्दोदरी** - (सक्रोधम्) रे अमच्चहदक ! तुअं जेव्व अस्स रण्णो विहूदिं इच्छसि । अण्णे तस्स अवचअं अहिलसन्ति । अवेहि रे मूक्ख दूरम् । [*हे अमात्यहतक ! त्वमेवास्य राज्ञो विभूतिमिच्छसि । अन्ये तस्याऽपचयमभिलषन्ति। अपेहि रे मूर्ख ! दूरम् ।*]

१४ **रावणः** - अमात्य, आगच्छतु भवान् । तावदियमेकाकिनी प्रलपतु । वयं

सेविकासुताम्, **इव**, **माम्** = मन्दोदरीम्, **मा उपेक्षस्व** = उपेक्षां नो विधेहि । (इति = इत्थम्, मुखम् = वदनम्, **परिवर्तयति** = घोटयति)

११ हनुमान् - (आत्मगतम्) **मया** = हनुमता, **दुष्टस्य** = दुरात्मनः, **अस्य** = रावणस्य, **दुश्चेष्टाः** = दुष्क्रियाः, **दृष्टाः** = विलोकिताः । **प्रथमम्** = आदौ, **एव जम्पत्योः** = दम्पत्योः, **विवादः** = विरुद्धो वादः, **राक्षसानाम्** = क्राव्यादानाम्, **विनाशम्** = क्षयम्, **दर्शयति** = प्रकटयति ।

१२ **प्रहस्तः** = **अयि देवि** = भो राजमहिषि! **अत्र भवती**, **मा कुप्यतु** = न क्रुध्यतु। **प्रभोः** = स्वामिनः, **भूतिम्** = ऐश्वर्यम्, **इच्छता** = वाञ्छता, **अनुचरेण** = सेवकेन, **सत्यम् एव**, **निवेदितम्** = कथितम्, **अलीकम्** = असत्यन्तु, न कथित मित्यर्थः ।

१३ **मन्दोदरी** - (सक्रोधम्) रे **अमात्यहतक** = दुष्टसचिव! **त्वम्** = प्रहस्त, **एव**, **अस्य** = एतस्य, **राज्ञः** = नृपतेः, **विभूतिम्** = ऐश्वर्यम्, **इच्छसि** = वाञ्छसि । **अन्ये** = अपरे, **तस्य** = राज्ञः, **अपचयम्** = अपकर्षम्, **इच्छन्ति** = वाञ्छन्ति । रे **मूर्ख** = रे मूढ ! **दूरम्** = विप्रकृष्टम्, **अपेहि** = अपसर ।

१४ रावणः - **अमात्य** = भो सचिव! **भवान्**= त्वम्, **आगच्छतु** = आयातु । **इयम्**=

वाचा जानकीं हस्ताभ्यासगतां कुर्मः । (इति परिक्राम्यतः)

१५ **हनुमान्** - (आत्मगतम्) अरे रे आसन्नमृत्यो दृष्टराक्षस ! जानकीं हस्ताभ्यासगतां कर्तुमिच्छन् स्वयमेव पञ्चत्वहस्ताभ्यासं गतो भवसि । पश्य -

१६ **विनागसा रामकलत्रमीदृशं परोक्षमस्य प्रसभं यदा हृतम् ।**
स्वयं त्वया दुष्ट ! तदावरोपितं परेतताबीजमिदं स्वमृत्यवे ।।४।।

१७ भवतु । श्रोतव्यमस्य दुरात्मनः कालसर्पस्य सीतां निकषोद्गीर्णं दुःसहं प्रलपितगरलमेकवारम् । पश्चाद्यत्कर्तव्यं तत्करिष्यामि (इति प्रच्छन्नस्तिष्ठति)

(ततः प्रविशति तथाभूता राक्षसीपरिवृता शिंशपामूलमाश्रयन्ती सीता)

एषा, **मन्दोदरी, एकाकिनी, प्रलपतु** = प्रलापं करोतु । **वयम्** = रावणाः, **जानकीम्**= सीताम्, **हस्ताभ्यासगताम्** = स्वाधीनताम्, **कुर्मः** = संपादयामः । (इति परिक्रामतः)

१५ **हनुमान्** - (स्वागतम्) **अरे आसन्नः** = समीपस्थः, **मृत्युः** = कालो, **यस्य सः**, **तथाविधः**, **दुष्टराक्षसः** = निशाचराधमः, **जानकीम्** = सीताम्, **हस्ताभ्यासगताम्**= करगताम्, **कर्तुम्** = विधातुम्, **इच्छन्** = वाञ्छन्, **स्वयमेव** = आत्मनैव, **पञ्चत्वस्य**= मृत्योः, **हस्ताभ्यासम्** = अधीनताम्, **गतो भवसि** = प्राप्नोषि । **पश्य** = विलोकय।

१६ अत्र हनुमान् रावणकृतं सीताहरणमेव तस्य मृत्योर्बीजमिति निरूपयति - **विनागसेति**।

अन्वयः - हे दुष्ट ! यदा आगसा विना ईदृशम् रामकलत्रम् अस्य परोक्षम् प्रसभम् हृतम् तदा स्वमृत्यवे इदम् परेतताबीजम् अवरोपितम् ।

व्याख्या - **हे दुष्ट** = भो दुरात्मन् ! **त्वया** = रावणेन, **स्वयम्** = आत्मना, **आगसा** = अपराधेन, **विनैव, यदा** = यस्मिन् समये, **ईदृशम्** = एतादृशम्, **रामस्य** = दाशरथेः, **कलत्रम्** = पत्नीम्, **अस्य** = रामस्य, **परोक्षम्** = अप्रत्यक्षे, **प्रसभम्** = हठात्, **हृतम्** = अपहृतम्, **तदा** = तस्मिन्नेव काले, **स्वस्य मृत्युस्तस्मै, स्वमृत्यवे** = स्वनाशाय, **परेततायाः** = मृत्योः, **बीजम्** = कारणम्, **हेतुर्ना कारणं बीजमित्यमरः** । **अवरोपितम्** = स्थापितम् ।

सरलार्थः - यदा रामस्य पत्नी सीताऽपराधं विनैव रावणेन हृता तदैव तेन स्वमृत्योः कारणं स्थापितमिति । **वंशस्थवृत्तम्** ।

१७ **भवतु** = अस्तु, **दुरात्मनः** = दुष्टस्य, **कालसर्पस्य** = कृष्णाहितुल्यस्य, **अस्य** = रावणस्य, **सीताम्** = जानकीम्, **निकषा** = समया, **उद्गीर्णम्** = उच्चरितम्, **दुःसहम्** = सोढुमशक्यम्, **प्रलपितम्** = अनर्थकं वच एव, **गरलम्** = विषम्, **एकवारम्** = क्षणैकम्, **श्रोतव्यम्** = आकर्णयितव्यम्, **अस्ति** । **पश्चात्** = तदनु,

१८ **सीता** - (सोच्छासम्) हा हदविहे ! किं मं मन्दभाइणीं मज्जारेण भक्खिदुं विअरे त्थाविदां मूसिआंविअ रक्खसा रुक्खाब्भन्तरे प्पाविदां हदजीविदासां अज्झावहि जीअअसि । दाणिं जेव्व मारेहि । हा राम ! हा लक्खण ! वां परोक्खे दुव्विणीदेण राक्खसहदकेण रावणेण अवणीदाह्मि । सुवण्णमि-आब्भत्थणपरए मए इअं अवत्था समासादिदा । हा णाह ! हा देअर !

१९ **क्व गदोसि विहाअ मं चिरं रहुणाह ! क्व गदोसि लक्खण !**
अहह ! क्खणदाचलेण मं अहिहूदां परिरक्खतं जुवम् ।।५।।

[हा हतविधे ! किं मां मन्दभागिनीं माजरिण भक्षयितुं विवरे स्थापितां मूषिकामिव रक्षसा वृक्षाभ्यन्तरे प्रापितां हतजीविताशामद्यावधि जीवयसि ।

यत् कर्तव्यम् = यद् विधेयम्, तत् करिष्यामि = विधास्यामि । (इति = इत्थं विचार्य, प्रच्छन्नः = गुप्तः, तिष्ठति)

१८ सीता - हा हतविधे = दुष्ट दैव ! किम् = किमर्थम्, मन्दभागिनीम् = भाग्यहीनाम्, माजरिण = विडालेन, भक्षितुम् = खादितुम्, विवरे = छिद्रे, स्थापिताम् = निहिताम्, मूषिकाम् = आखुमिव, हता जीवितस्य आशा यस्यास्ताम्, माम् = सीताम्, अद्यावधि = अद्यपर्यन्तम्, जीवयसि = प्राणयसि । इदानीम् = अधुना एव, मारय= घातय । हा राम= भो दाशरथे ! हा लक्ष्मण = भो देवर ! युवयोः= रामलक्ष्मणयोः, परोक्षे = अप्रत्यक्षे, दुर्विनीतेन = दुष्टेन, राक्षसहतकेन = निशाचराधमेन, रावणेन = दशमुखेन, अपनीता = अपहृता, अस्मि । सुवर्णस्य= हेम्नः, यो मृगः = हरिणस्तस्य या अभ्यर्थना = याच्ञा, तत्र परया = आशक्तया, मया = सीतया, इयम् = एषा, अवस्था = दशा, समासादिता = लब्धा । हा नाथ = भो स्वामिन् ! हा देवर = भो लक्ष्मण ! इति निम्नपद्येन संबन्धः।

१९ अत्र सीता रामलक्ष्मणौ मनसा स्वजीवनरक्षणं याचते = क्व गतोऽसीति ।

अन्वयः - रघुनाथ ! मां चिरं विहाय क्व गतः असि, हे लक्ष्मण ! क्व गतः असि अह हा युवाम् क्षणदाचरेण अभिभूताम् माम् परिरक्षतम् ।

व्याख्या - भो रघुनाथ = हे राम ! माम् = सीताम्, चिरम् = बहुकालम्, विहाय = त्यक्त्वा, क्व = कुत्र, गतः = यातः, असि = वर्तसे । हे लक्ष्मण = सुमित्रानन्दवर्धन ! क्व = कुत्र, गतः = यातोऽसि ? अहह = खेदे । युवाम् = रामलक्ष्मणौ, क्षणदायां चरतीति क्षणदाचरस्तेन क्षणदाचरेण = निशाचरेण रावणेन, अभिभूताम् = तिरस्कृताम्, पीडितामित्यर्थः । माम् = सीताम्, परिरक्षतम्= त्रायेथाम् । सुन्दरीवृत्तम् । तल्लक्षणं यथा -

इदानीमेव मारय । हा राम ! हा लक्ष्मण ! युवां परोक्षे दुर्विनीतेन राक्षसहतकेन रावणेनापनीतास्मि । सुवर्णमृगाभ्यर्थनपरया मयेयमवस्था सामासादिता । हा नाथ ! हा देवर !

क्व गतोऽसि विहाय मां चिरं रघुनाथ! क्व गतोसि लक्ष्मण!
अहह क्षणदाचरेण मामभिभूतां परिरक्षतं युवाम् ।।५।।]

अवि अ

२० **वअणं तुह देअर ! स्सुदं ण मए स्वण्णमिआहिलासए ।**
हद तस्स फलं दुतं मए अणुभूदं गदबुद्धिए तदो ।।६।।

२१ **हद रख्खसभीदिए इदो हिअअं वेपइ मे अहण्णिसम् ।**
चवलं मम णाह! जीअणं परिरख्ख क्खणिअं दआणिहे ।।७।।

अपि च -

[वचनं तव देवर ! श्रुतं न मया स्वर्णमृगाभिलाषया ।
हत तस्य फलं द्रुतं मया ह्यनुभूतं गतबुद्धया ततः ।।६।।

अयुजोर्यदि सौ जगौ युजोः सभराल्गौ यदि सुन्दरी तदा, इति ।

२० **अन्वयः** - देवर स्वर्णमृगाभिलाषया मया तव वचनम् न श्रुतम् । ततः गतबुद्धया मया तस्य फलम् द्रुतम् हि अनुभूतम् हत ।

व्याख्या - हे देवर = भो लक्ष्मण ! **स्वर्णस्य** = हेम्नो यो मृगः = हरिणस्तस्य, **अभिलाषया** = इच्छया, **तव** = भवतः, लक्ष्मणस्येत्यर्थः, **वचनम्**= वाक्यम्, **न श्रुतम्** = नाकर्णितम् । **ततः** = तस्मात् कारणात्, **गतं बुद्धं** = ज्ञानं यस्याः, **तया** = ज्ञानशून्यया, **मया** = सीतया, **तस्य** = देवरवचनानाकर्णनस्य, **फलम्** = परिणामः, **हि** = निश्चयेन, **द्रुतम्** = शीघ्रमेव, **अनुभूतम्** = लब्धम् ।

सरलार्थः - भो लक्ष्मण ! मया स्वर्णमृगस्याभिलाषया तव वचनं यदनाकर्णितं तस्यैव फलमधुना प्राप्तमिति । **सुन्दरीवृत्तम्** ।

२१ अत्र सीता रामं स्वजीवनरक्षणं मनसा प्रार्थयते - **हतराक्षस इति** ।

अन्वयः - इतः हतराक्षसभीत्या मे हृदयम् अहर्निशम् वेपते । हे नाथ ! हे दयानिधे ! मम चपलम् क्षणिकम् जीवनम् परिरक्ष ।

व्याख्या - **इतः** = अस्मिन् स्थाने (सप्तम्यास्त्रल्) **हतराक्षस्य** = दुष्टरावणस्य, **भीत्या** = भयेन, **मे** = मम, **हृदयम्** = चेतः, **अहश्च निशा च, अहर्निशम्** = रात्रिन्दिवम्, **वेपते** = कम्पते । **हे नाथ** = भो स्वामिन्! **हे दयानिधे**=

हतराक्षसभीत्या इतो हृदयं वेपते मेऽहर्निशम् ।
चपलं मम नाथ ! जीवनं परिरक्ष क्षणिकं दयानिधे ।।७।।]

(इति रोदिति)

(नेपथ्ये)

२२ भो भो राक्षस्यः ! परिष्कृता यूयं मामनुसरत, तावदहं जानकीं स्मारयितुं गच्छामि ।

२३ **सीता** - (आकर्ण्य) अह्मो णूवुराणं सिञ्चिदं सुणीअदि णूणं आगदो रावणहतको। हा कट्ठम् ! किं करेमि दाणिम् । [*अंहो नूपुराणां सिञ्चितं श्रूयते नूनमागतो राक्षसहतकः । हा कष्टम् ! किं करोमीदानीम् ।*]

(इति स्वोरूभ्यामुदरं बाहूभ्यां च पयोधरौ निपडियन्ती)

हे अम्ब ! तुह सरणं गदह्मि । [*हे अम्ब ! तव शरणं गतास्मि ।*]

(इति मुखं पृथ्व्यै समर्पयति)

हे करुणाकर! **मम** = सीतायाः, **चपलम्** = चञ्चलम्, **क्षणिकम्** = अस्थिरम्, **जीवनम्** = जीवितम्, **परिरक्ष** = त्रायस्व ।

सरलार्थः - दुष्टरावणभयेन मम मनः सदैव कम्पमानं विद्यते । हे दयानिधे! स्वामिन् ! क्षणिकमिदं मम जीवनं त्रायस्व, इति । **सुन्दरीवृत्तम्** । (**इति रोदिति** = क्रन्दति)

(नेपथ्ये)

२२ **भो भो राक्षस्यः** = निशाचर्यः ! **परिष्कृताः** = केशविन्यासालङ्कारवसनादिभिः सज्जिताः, **यूयम्** = राक्षस्यः, **माम्** = रावणम्, **अनुसरत** = अनुगच्छत । **तावत्**= प्रथमम्, **अहम्** = रावणः, **जानकीम्** = सीताम्, **स्मारयितुम्** = प्रलोभनादिभि-राकर्षयितुम्, **गच्छामि** = प्रतिष्ठे ।

२३ **सीता** - (आकर्ण्य) **अहो** = वत, **नूपुराणाम्** = मञ्जीराणाम्, **शिञ्जितम्** = ध्वनिः, **श्रूयते** = आकर्ण्यते । **नूनम्** = निश्चयेन, **राक्षसहतकः** = दुष्टो रावणः, **आगतः** = आयातः । **हा** = धिक्, **कष्टम्** = दुःखम्, **इदानीम्** = अधुना, **किं करोमि** = किं विदधामि । (**इति** = इत्थम्, **निगद्य स्वोरूभ्याम्** = निजसक्थिभ्याम्, **बाहूभ्याम्** = हस्ताभ्याञ्च, **पयोधरौ** = स्तनौ, **निपीडयन्ती** = बलेन छादयन्ती, **हे अम्ब** =हे मात! हे पृथ्वीत्यर्थः । **तव** = भवत्याः, **शरणम्** = आश्रयम्, **गता** =

२४ **हनुमान्** - (आत्मगतम्) हा भगवति सीते ! किमेवं वीरभार्याया भीरुत्वं प्रतीयते । भवत्याः सेवकोऽहमुपस्थितः । मा बिभेहि । (इत्थमात्मानं प्रकटीकर्तुमिच्छन् पुनर्मनसि किमपि विचार्य विरमति) हा कष्टम् । सीता नूनमतीव भीता। जीविताशां विहाय स्वपातिव्रत्यमेव रक्षितुं यतते । धन्येयं पतिव्रतानामुत्तमा।

कुतः -

२५ **दृष्ट्वा मुखं मम सुयौवनभासमानं**
रम्यं कुचोरुयुगलं नवयौवनायाः ।
कन्दर्पसायकहतः परिमुह्यतेऽयं
क्रव्यादितीत्थमनया पिहिता वयःश्री ।।८।।

प्राप्ता, अस्मि । (इति = इत्थम्, निगद्य, मुखम् = वदनम्, **पृथिव्यै** = धरायै, समर्पयति)

२४ **हनुमान्** - (आत्मगतम्) हा भगवति! **सीते** = भो जानकि! **किम्** = किमर्थम्, **वीरस्य** = शूरस्य, **रामस्य**, **भार्यायाः** = पत्न्याः, **भीरुत्वम्** = कातरत्वम्, प्रतीयते। **भवत्याः** = तव, **सेवकः** = भृत्यः, **अहम्** = हनुमान्, **उपस्थितः** = समागतः । **मा बिभेहि** = भयं न धारय । (**इति आत्मानम्** = स्वम् **प्रकटीकर्तुम्** = प्रकाशयितुम्, **इच्छन्** = वाञ्छन्, **पुनः** = भूयः, **मनसि** = चित्ते, **किमपि विचार्य** = चिन्तयित्वा, **विरमति** = स्वं न प्रकटयति) हा **कष्टम्** = दुःखम्, **सीता** = जानकी, **अतीव** = नितान्तमेव, **भीता** = भयाकुला । **जीवितस्य** = जीवनस्य, **आशाम्** = अभिलाषम्, **विहाय** = त्यक्त्वा, **स्वस्य** = निजस्य, **पातिव्रत्यम्** = पतिव्रताधर्मम्, **एव रक्षितुम्**= पालयितुम्, **यतते** = प्रयासं करोति । **इयम्** = एषा, **पतिव्रतानाम्** = सतीनाम्, **उत्तमा** = श्रेष्ठा, **सीता**, **धन्या** = प्रशस्या, अस्तीति शेषः ।

२५ अत्र हनुमान् प्रकारान्तरेण सीतायाः पातिव्रत्यरक्षणशीलत्वं प्रकाशयति- **दृष्ट्वा मुखमिति**।

अन्वयः - नवयौवनायाः मम सुयौवनभासमानम् मुखम्, रम्यम् कुचोरुयुगलम् (च) दृष्ट्वा कन्दर्पसायकहतः, अयम् क्रव्यात् परिमुह्यते इति इत्थम् अनया वयः श्रीः पिहिताः ।

व्याख्या - **नवम्**= नूतनम्, **यौवनम्** = युवावस्था यस्यास्तस्याः, **मम**= सीतायाः, **सुयौवनेन** = शोमनतारुण्येन, **भासमानम्** = शोभमानम्, **मुखम्** = वदनम्, **रम्यम्** = हृदयाकर्षकम्, **कुचयोः** = स्तनयोः, **ऊर्वोः** = सक्थ्योश्च, **युगलम्**= द्वयम्, **च दृष्ट्वा**= विलोक्य, **कन्दर्पस्य** = कामस्य, **सायकेन** = वाणेन, **हतः** = विद्धः, **अयम्** = एषः, **क्रव्यम्** = आममांसम्, **अत्तीति क्रव्यात्** =

अपि च -

२६ द्रक्ष्यामि नास्य मुखमित्यनया स्वदृग्भ्यां
दुष्टस्य भूपतितयाऽपि निमीलिते ते ।
नूनं परस्य मुखदर्शनतो हि पुंसः
संमीलनं नयनयोर्वरमेव सत्याः ।।९।।

२७ **रावणः** - (सत्वरं सीतामुपसृत्य) अयि विशालाक्षि सीते! शृणु मम हितं

राक्षसो रावणः, **परिमुह्यते** = मोहं प्राप्नोति, **इति** = इत्थम्, **विचार्य, अनया** = सीतया, **वयसः** = युवावस्थायाः, **श्रीः** = शोभा, **पिहिता** = आच्छादिता ।

सरलार्थः - युवावस्थया समुल्लसन्मम मुखम्, कुचावूरुद्वयञ्च वीक्ष्य रावणः कामासक्तो भवतीति मनसि निधाय सीतया स्ववयःश्रीराच्छादितेति ।

अत्र मुखस्य कुचयोरूरुयुलस्य च दर्शनरूपक्रियैकसंबन्धात्तुल्ययोगिता-**लङ्कारः** । **वसन्ततिलकावृत्तम्** ।

२६ अत्रापि हनुमान् स्वपातिव्रत्यरक्षणाय सीतया विहितं प्रयासमेव प्रकारान्तरेण निरूपयति- **द्रक्ष्यामीति** ।

अन्वयः - दुष्टस्य अस्य मुखम् स्वदृग्भ्याम् न द्रक्ष्यामि इति भूपतितया अपि अनया ते निमीलिते । हि सत्याः परस्य मुखदर्शनतः नयनयोः संमीलनमेव नूनम् वरम् ।

व्याख्या - दुष्टस्य = दुरात्मनः, **अस्य** = रावणस्य, **वदनम्** = मुखम्, **न द्रक्ष्यामि** = न विलोकयिष्यामि, **इति धिया, भुवि पतिता, तया भूपतितया** = भूमौ निपतितया अपि, राज्ञोऽपि दुष्टस्यावलोकनमनुचित्तमिति व्यज्यते । **अनया** = सीतया, **ते**= नेत्रे, **निमीलिते**= सङ्कोचिते । **तदेव द्रढयति - हि** = यतः, **सत्याः**= पतिव्रतायाः, **परस्य** = पुरुषान्तरस्य, **मुखस्य** = वदनस्य, **दर्शनतः** = अवलोकनात्, **नयनयोः** = नेत्रयोः, **संमीलनम्** = सङ्कोच एव, **नूनम्** = निश्चयेन, **वरम्** = श्रेष्ठम्, अस्तीति शेषः ।

सरलार्थः - दुरात्मनो रावणस्य मुखं न विलोकयितुं भूमौ पतिताऽपि सीता नेत्रे निमीलितवती । यतः पतिव्रतायाः परपुरुषस्य मुखदर्शनात् नयनयोः संमीलनमेव समुचितमिति ।

अर्थान्तरन्यासालङ्कारः । **वसन्ततिलकावृत्तम्** ।

२७ **रावणः** - (**सत्वरम्** = शीघ्रम्, **सीताम्** = जानकीम्, **उपसृत्य** = समीपं गत्वा, **अयि विशाले** = विस्तृते, **अक्षिणी** = नयने, **यस्याः सा, तत्संबुद्धौ, हे सीते** =

वचः । तथा हि -

२८ अयि नितम्बिनि ! तं विनिकेतनं
वनचरं स्मर मा स्मर मा वरम् ।
निवस मानिनि ! मानिनि मे गृहे
विलसता लस तालवने मया ।।१०।।

अपि च -

२९ लसति कामिनि कामिनि पुरुषे
मयि रतिर्न तपस्विनि तादृशे ।

भो जानकि ! मम = मे, हितम् = कल्याणकरम्, वचः = वाक्यम्, शृणु = आकर्णय ।

२८ अत्र रावणः सीतामनुनयति - अयि नितम्बिनीति ।

अन्वयः - अयि नितम्बिनि ! विनिकेतनम् तम् वनेचरम् मा स्मर, मा वरं स्मर, माननि, मानिनि मे गृहे निवस । विलसता मया (सह) तालवने लस ।

व्याख्या - **नितम्बः** = स्त्रीकट्याः पश्चाद्भागः, **अस्या अस्तीति नितम्बिनी, तत्संबुद्धौ, अयि नितम्बिनि** = भो विपुलजघने ! **विगतम् निकेतनम् यस्य तम्, विनिकेतनम्** = निर्भवनम्, **वने चरतीति वनचरस्तम्, वनचरम्** = अरण्यगामिनम्, **मा स्मर** = न चिन्तय । **मा** = माम्, **वरम्** = पतिम्, **स्मर** = चिन्तय । **मानोऽस्या अस्तीति मानिनी, तत्संबुद्धौ, हे मानिनि** = भो मानयुते ! **मानिनि** = संमानयुते, गृहशोभाधायकविविधरत्नादि परिलसिते इत्यर्थः । **मे** = मम, **गृहे** = भवने, **निवस**= वसतिं कुरु, **विलसता** = विलासं कुर्वता, **मया** = रावणेन, **सह, तालवने** = तालोद्याने, **लस** = विलासं कुरु ।

सरलार्थः - भो मानिनि सीते ! वनवासिनं रामं विस्मृत्य पतित्वेन मां भज, मम गृहे निवस, तालवने मया सह विलस, इति ।

तंविनि तं विनि, मानिनि, मानिनि, लसता-लस ता, इति पदावृत्तेर्यमलङ्कारः । **द्रुतविलम्बितं** वृत्तम् ।

२९ अत्र रावणः सीतां रत्यर्थमनुरुणद्धि - कामिनीति ।

अन्वयः - कामिनि ! रतिः कामिनि पुरुषे मयि लसति । तादृशे तपस्विनि न । रतितेजितमन्मथः विरहतापसदम् ते मनः हरति ।

व्याख्या - **कामोऽस्यास्तीति कामिनी, तत्संबुद्धौ हे कामिनि** = भो मदनवति ! **रतिः** = प्रेम, **कामिनि** = कामुके, **पुरुषे** = पुंसि, **मयि** = रावणे,

हरति ते रतितेजितमन्मथो
विरहतापहतापसदं मनः ।।११।।

किं च -

३० मयि कटाक्ष-कलम्बक- लम्बनं
नु तनुषे प्रमदे प्रमदेन किम् ।
मम विलोकय लोकयशोवृतं
मुखमहो सुमहोऽपि वृथा कृथाः ।।१२।।

अथ च -

३१ सुतनु ! ते तनुते न गवेषणं विरहितो रहितो दयया धवः ।

लसति = शोभते । तादृशे = अरण्यवासिनि, तपस्विनि = यतौ, रामे, न शोभते। रत्या = रतिभावनया, तेजितः = उद्दीप्तः, मन्मथः = कामः, विरहः = पतिवियोगः, तस्य यस्तापः = संतापः, तेन हतम् = पीडितम्, अत एव अपसदम् = मूढम्, ते = तव, मनः = चित्तम्, हरति = चित्तस्थं दुःखमपनयतीत्यर्थः ।

सरलार्थः - कामिनि ! मत्सदृशे पुरुष एव रतिः शोभते न रामसदृशे तपस्विनि, अतः, रतिभावनयोद्दीप्तः कामः तव मनसो बाधां व्यपनयतीति ।

अत्र, अनुप्रासयमकयोः संसृष्टिः । द्रुतविलम्बितं वृत्तम् ।

३० अत्रापि रावणः, रत्यर्थं सीतामेवानुरुणद्धि - मयीति ।

अन्वयः - प्रमदे ! मयि कटाक्षकलम्बकलम्बनम् प्रमदेन किम् न तनुषे । लोकयशोवृत्तम् मम मुखम् विलोकय । अहो ! सुमहः अपि वृथा कृथाः ।

व्याख्या - हे प्रमदे = हे सीते ! मयि = रावणे, प्रमदेन = मुदा, कटाक्षाः = अपाङ्गदर्शनान्येव, कलम्बकाः = शरास्तेषां लम्बनम् = दीर्घाकारत्वम्, किम् = किमर्थम्, न तनुषे = न विस्तारयसि । लोके = संसारे, यशसा = कीर्त्या, वृतम्= युक्तम्, मम = रावणस्य , मुखम् = वदनम्, विलोकय = पश्य। अहो = बत, सुमहः = महोत्सवः, अपि, वृथा निरर्थकम्, कृथाः = करोषि।

सरलार्थः - हे सीते ! मयि कटाक्षपातं कुरु । यशोयुतं मन्मुखं पश्य । अहो त्वया महोत्सवोऽपि वृथा कृत इति ।

अत्राप्यनुप्रासयमकयोः संसृष्टिः । द्रुतविलम्बितं वृत्तम् ।

३१ अत्रापि रावणो रत्यर्थं सीतामनुनयति - सुतनु, इति ।

अन्वयः - सुतनु ! दयया रहितः विरहितः धव ते गवेषणम् न तनुते ।

भज हृदा हृदयङ्गममाशरं त्यज पुरा स्वधवीकृतमानवम् ।।१३।

अपि च -

३२ भजसि न किमहो मामद्य रम्भोरु ! शीघ्रं
स्मरसि रघुवरं किं मानवं स्वल्पवीर्यम् ।
अहह ! वननिवासे वृक्षवल्कं वसाने
भवति तव निरर्थं प्रेम तस्मिन्नसभ्ये ।।१४।।

हृदयङ्गमम् आशरम् हृदा भज, पुरा स्वधवीकृतमानवम् त्यज ।

व्याख्या - **सु** = शोभना, **तनुः** = शरीरम्, **यस्याः सा, तत्संबुद्धौ, हे सुतनु, दयया** = करुणया, **रहितः** = हीनः, **विरहितः** = विप्रयुक्तः, **ते** = तव, **धवः** = पतिः, **रामः, ते** = तव, **गवेषणम्** = अन्वेषणम्, **न तनुते** = न विस्तरेण कुरुते । **अतः हृदयङ्गमम्** = चित्तानुकूलम्, **आशरम्** = राक्षसम्, **भज** = वृणु । **पुरा** = प्राक्, **धवीकृतम्** = पतित्वेन वृतम्, **मानवम्** = मनुजम्, राममित्यर्थः । **त्यज** = जहि ।

सरलार्थः - हे शोभनगात्रि सीते ! गतदयस्ते पतिः त्वां न गवेषयते । अतः हृदयङ्गमं मां रावणं वृणु, पुरा धवीकृतं मानवरूपं रामं त्यजेति ।

अत्रापि यमकानुप्रासयोः **संसृष्टिः** । **द्रुतविलम्बितं वृत्तम्** ।

३२ पूर्वोक्त एवात्रापि सन्दर्भः ।

अन्वयः - रम्भोरु ! अहो अद्य शीघ्रम् माम् किम् न भजसि , स्वल्पवीर्यम् मानवम् रघुवरम् किं स्मरसि, अहह वननिवासे वृक्षवल्कम् वसाने तस्मिन् असभ्ये तव प्रेम निरर्थं भवति ।

व्याख्या - **रम्भे** = कदलीस्तम्भे इव ऊरुणी, **यस्याः सा, तत्संबुद्धौ हे रम्भोरु** = हे सीते, **अद्य** = अधुना, **शीघ्रम्** = क्षिप्रम्, **माम्** = रावणम्, **किम्** = किमर्थम्, **न भजसि** = पतित्वेन न वृणोसि । **स्वल्पम्** = अत्यल्पम्, **वीर्यम्** = पराक्रमो **यस्य सः, तम्, मानवम्** = मनुष्यरूपधरम्, **रघुवरम्** = रामम्, **किम्** = किमर्थम्, **स्मरसि** = चिन्तयसि ? **अहह** = आश्चर्यम्, **वनम्** = विपिनम्, **निवासः** = वासस्थानम् **यस्य तस्मिन्, वृक्षस्य** = तरोः, **वल्कम्** = वल्कलम्, **वसाने** = धारयति, **न सभ्यः, असभ्यस्तस्मिन्, असभ्ये** = असामाजिके, **तस्मिन्** = राघवे, **तव** = भवत्याः, **प्रेम** = रतिः, **निरर्थम्** = निष्फलं भवति ।

सरलार्थः - शीघ्रं मां पतित्वेन वृणु, अल्पवीर्यं रामं न स्मर । वल्कलवाससि वनमधिवसति तस्मिन्नसभ्ये रामे तव प्रेम निरर्थकमस्तीति ।

तनुते, रहितो इति पदद्वयस्यावृत्तेर्यमकम् । **मालिनीवृत्तम्** ।

यतः

३३ तस्मात्कुरङ्गनयने भज मा धवं त्वं
मायाचरीभिरिह मा तनु वैरभावम् ।
नोचेदिमा रुधिरपाननिकामकामा
वामा हरन्ति न कथञ्चन जीविताशाम् ।।१५।।

(श्रुत्वा सीता भीता वेपते)

३४ रावणः - सीते ! किमेवं बिभेषि । मा बिभेहि । यद्वक्तुकामासि वद तत् ।

---

३३ सन्दर्भस्तु पूर्वोक्त एव ।

अन्वयः - कुरङ्गनयने ! तस्मात् मा धवम् भज, त्वम् इह मायाचरीभिः वैरभावम् मा तनु । नोचेद् रुधिरपाननिकामकामाः इमाः वामाः च कथञ्चन जीविताशाम् हरन्ति ।

व्याख्या - **कुरङ्गस्य नयने इव नयने यस्याः सा, तत्संबुद्धौ, हे कुरङ्ग-नयने** = भो मृगेक्षणे सीते! **तस्मात्** = पूर्वोक्तकारणात्, **मा** = माम्, रावणमित्यर्थः। **धवम्** = पतिम्, **भज** = वृणु । **इह** = अस्मिन् स्थाने, **मायामरीचिभिः** = राक्षसीभिः, **वैरभावम्** = द्वेषम्, **मा तनु** = न विस्तारय । **नो चेत्** = अन्यथा, **रुधिरस्य पानम् एव निकामम्** = अत्यन्तम्, **कामः** = अभिलाषः, **अस्ति यासान्ताः तथाभूता राक्षस्यः**, **जीवनस्य** = जीवितस्य, **आशाम्** = अभिलाषम्, **हरन्ति** = घातयिष्यन्तीत्यर्थः । **पक्षे-कुरङ्गः** = कुत्सितमृत्युस्थानम्, **संसारः**, **तस्मिन् नयनम्**= दृष्टिर्यस्याः सा, **तत्संबुद्धौ, हे कुरङ्गनयने, माधवम्** = विष्णुम्, **भज** । **माया-चरीभिः**= तुष्टिधृतिमत्यादिभिः, **वैरभावम्** = द्वेषम्, **मा तनु**= नो विधेहि! तुष्ट्यादिकं समाश्रयेत्यर्थः। **नोचेत्, वामाः**= विरुद्धगुणाः, **इमाः**= मायाचर्यः, **रुधिरपाननिकाम-कामाः** = शरीररुधिरशोषणपराः, **जीविताशाम्**= सदा जीवामीति दुराशाम्, **कथञ्च**= कदापि, **न हरन्ति** । अपि तु हरन्त्येवेत्यर्थः । किमर्थमज्ञानान्धा भवसीति भावः ।

अत्र **श्लेषालङ्कारः** । **वसन्ततिलिकवृत्तम्** ।

(**श्रुत्वा** = आकर्ण्य, **भीता** = भयमुपगता, **सीता** = जानकी, **वेपते** = कम्पते)

३४ **रावणः - सीते** = जानकि! **त्वम्, किम्** = किमर्थम्, **बिभेषि** = त्रस्यसि ? **मा बिभेहि** = नो त्रस्य, **यद्वक्तुकामा** = यत्कथयितुमिच्छा विद्यते, **तद् वद** = कथय ।

३५ **सीता** - (आत्मगतम्) अस्स पावस्स वाणीए कहं मम अणण्णपराए पदिव्वदाए वाचो मिस्सएअम् । होदु । एक्कं तिण्णं अब्भन्तरे कदुअ वाग्वज्जेण ताडेमि। तदो अअं पकिदिक्कूरो रक्खसो वाक्परुसदां असहमाणो मं णूणं मारइस्सदि। ताजेव्व मे भद्दं होदि । ण उण अस्स दुव्विणीदस्स मुहविलोअणम् । [*अस्य पापस्य वाण्या कथं ममानन्यपरायाः पतिव्रताया वाचो मिश्रयेयम् । भवतु । एकं तृणमभ्यन्तरं कृत्वा वाग्वज्रेण ताडयामि । ततोऽयं प्रकृतिक्रूरो राक्षसो वाक्परुषतामसहमानो मां नूनं मारयिष्यति । तदैव मे भद्रं भवति । न पुनरस्य दुर्विनीतस्य मुखविलोकनम् ।*] (प्रकाशम्) अरे रे राक्खसहदअ ! जण्णसालादो जजमाणस्स परोक्खे कुक्कुरेण सव्विसोत्थालीविअ रामस्स असमक्खे तस्स भिदिए तुए पण्णसालादो अवणीदह्मि । णिल्लज्जो तुअं दाणिं प्पलवसि । जइ मे पिअ भट्टा भवे तुअं हदो भवेहि । [*अरे रे राक्षसहतक ! यज्ञशालातो*

---

३५ **सीता** - (आत्मगतम्) **पापस्य** = दुष्कर्मपरायणस्य, **अस्य** = रावणस्य, **वाण्या**= वाचा सह, **अनन्यपरायाः** = केवलं रामासक्तायाः, **पतिव्रतायाः** = सत्याः, **वाचः**= वचनानि, **कथम्**, **मिश्रयेयम्**, **एकम्**, **तृणम्** =घासम्, **अभ्यन्तरं कृत्वा** = मध्ये, स्थापयित्वा, **वाक्** = वचनमेव, **वज्रम्** = कुलिशम्, **तेन ताडयामि** । भर्त्सयामीत्यर्थः । **ततः** = तदनन्तरम्, **प्रकृत्या** = स्वभावेन, **क्रूरः**, **राक्षसः** = रावणः, **वाचाम्** = वाक्यानाम्, **परुषताम्** = कठोरभावम्, **असहमानः** = सोढुमशक्तः, **माम्** = सीताम्, **नूनम्** = निश्चयेन, **मारयिष्यति** = घातयिष्यति । **तदा** = यदा मम मृत्युर्भवति तस्यामवस्थायामेव, **मे** = मम, **भद्रम्** = कल्याणं भवति । **दुर्विनीतस्य** = दुष्टस्य, **अस्य** = रावणस्य, **मुखविलोकनम्** = वदनेक्षणम्, न पुनः कल्याणकरमित्यर्थः । (**प्रकाशम्** = स्पष्टम्) **अरेरे राक्षसहतक** = निशाचराधम? **यजमानस्य** = यज्ञं विदधतः, **पुंसः परोक्षे** = अप्रत्यक्षे, **कुक्कुरेण**= शुना, **यज्ञशालातः** = यज्ञभवनात्, **सर्पिषः** = घृतस्य, **स्थाली** =वर्तनविशेष इव, **रामस्य** = दाशरथेः, **असमक्षे** = परोक्षे, **तस्य रामस्य भीत्या** = भयेन, **त्वया** = रावणेन, **पर्णशालातः** =कुटीरात्, **अपनीता** = अपहृत्य लङ्कां प्रापिताऽस्मि । **निर्लज्जः** = निस्त्रपः, **त्वम्** = रावणः, **इदानीम्** = अधुना, **प्रलपसि** = अनर्थकं वाक्यं ब्रवीषि । **यदि** = चेत्, **त्वम्** = रावणः, **मे** = मम, **प्रियभर्ता** = पतिः, **भवेः** = स्यास्तदा, **हतः** = घातितः, भवेः ।

३६ **रावणः** - **कुटिला** = वक्रा, **मतिः** = बुद्धिर्यस्याः सा, **तत्संबुद्धौ**, **रे कुटिलमति**, **सीते! मया** = रावणेन, **उदितम्** = कथितम्, **वचनम्** = वाक्यम्, **त्वाम्** =

यजमानस्य परोक्षे कुक्कुरेण सर्पिषः स्थालीव रामस्यासमक्षे तस्य भीत्या त्वया पर्णशालातोऽपनीतास्मि । निर्लज्जस्त्वमिदानीं प्रलपसि । यदि मे प्रियभर्ता भवेत्त्वं हतो भवेः ।]

३६ **रावणः** - (सक्रोधम्) रे कुटिलमति सीते ! मयोदितं वचनमनुतापयति त्वाम्। इदानीमनुभवासह्यं दुःखम् । आसामामिषलुब्धानां निशाचरीणां हस्ते पतिता त्वं क्व गच्छसि ।

३७ **सीता** - अवेहि रे दुव्विणीद राक्खस, जाव मे भट्टा रामो तुमं ण णिहणिस्सदि दाव तुअं राक्खसराअसिरिं धारेहि । [*अपेहि रे दुर्विनीत राक्षस, यावन्मे भर्ता रामो त्वां न हनिष्यति तावत्त्वं राक्षसराजश्रियं धारय ।*]

३८ **रावणः** - (सकोपम्) अमात्य ! देहि मे निशातं करालकरवालम् । इदानीमेव निहन्म्येनां दुष्टामबद्धमुखीम् । (इति खड्गमाधत्ते)

३९ **हनुमान्** - (स्वगतम्) कथमयं दुरात्मा पापः, सीतां हन्तुं खड्गं गृह्णाति ।

भवन्तम्, **अनुतापयति** = पश्चात्तापं कारयति । **इदानीम्** = अधुना, **असह्यम्** = सोढुमशक्यम्, **दुःखम्** = कष्टम्, **अनुभव** = जानीहि । **आसाम्** = पुरोवर्तिनीनाम्, **आमिषे** = मांसे, **लुब्धानाम्** = लोलुपानाम्, **निशाचरीणाम्** = राक्षसीनाम्, **हस्ते** = करे, **पतिता** = तासामधीनत्वमुपयातेत्यर्थः । **त्वम्** = सीता, **क्व** = कुत्र, **गच्छसि** = यासि ?

३७ **सीता** - रे **दुर्विनीत** = दुष्ट, **राक्षस**= निशाचर ! **अपेहि**= अपगच्छ । **यावत्, मे**= मम, **भर्ता** = स्वामी, **त्वाम्** = रावणम्, **न हनिष्यति** = न घातयिष्यति तावत्, **त्वम्** = रावणः, **राक्षसराजस्य** = निशाचरनृपतेः, **श्रियम्** = लक्ष्मीम्, **धारय** = पालय ।

३८ **रावणः** - (सकोपम्) **अमात्य** = मन्त्रिन् ! **निशातम्** = तीक्ष्णधारम्, **करालम्** = भीषणम्, **करवालम्** = खड्गम्, **मे** = मह्यम्, **देहि** = प्रयच्छ । **इदानीम्** = अधुनैव, **दुष्टाम्** = दुर्विनीताम्, **न बद्धं मुखं यस्याः सा ताम्, अबद्धमुखीम्** = वाचालाम्, **एनाम्** = सीताम्, **निहन्मि** = घातयामि । (इति, अभिधाय खड्गं धारयति)

३९ **हनुमान्** - **अयम्** = एषः, **दुरात्मा** = दुष्टः, **पापः** = दुराचारी, **सीताम्** = जानकीम्, **हन्तुम्** = घातयितुम्, **खड्गम्** = करवालम्, **गृह्णाति** = धारयति । **अहम्** = हनुमान्, **इदानीम्** = अधुनैव, **वृक्षाणाम्** = तरूणाम्, **आघातेन** =

अहमिदानीमेव सखड्गं तं वृक्षाघातेन यमायतनं प्रापये । (पुनर्विचार्य) सहसाऽयमबलां कामुको हन्तुं न शक्नोति किन्तु भर्त्सयत्येव । स्वयमेव रघुनायको दुष्टं हनिष्यति । यद्ययं दुरात्मा सीतां हन्तुमेव चेष्टेत, तत्क्षणं तडिद्भूधरशिखर इवास्य शिरसि वृक्षादस्मादुत्प्लुत्य खड्गक्षेपात्पूर्वमेव शिरांस्युत्पाटयामि । (इति चिन्तयन् विरमति)

४० **मन्दोदरी** - भो भो अज्जउत्त ! विरमदु दाणिं सुलहकोपादो भवं । इमं कुररीविअ विलवन्तीं अवलां हदुअ ण दे विज्जस्स उवचओ होदि । तारक्खसे अणाधाए रोदणवलं जीविदव्वम् । [*भो भो आर्यपुत्र ! विरमत्विदानीं सुलभकोपाद् भवान् । इमां कुररीमिव विलपन्तीमबलां हत्वा न ते वीर्यस्योपचयो भवति । तद्राक्षास्या अनाथाया रोदनबलं जीवितव्यम् ।*]

(इति खड्गं रावणकराद् गृह्णाति)

ताडनेन, **यमस्य** = कालस्य, **आयतनम्** = भवनम्, **प्रापये** = नये । (**पुनः** = भूयः, **विचार्य** = चिन्तयित्वा) **अयम्** = एषः, **कामुकः** = कामार्तः, **अबलाम्**= स्त्रियम्, **सहसा** = झटिति, **हन्तुम्** = घातयितुम्, **न शक्नोति** = न समर्थो जायते, **किन्तु** = परन्तु, **भर्त्सयति** = तर्जयति । **स्वयमेव, रघुनायकः** = रामः, **दुष्टम्** = दुरात्मानम्, **रावणम्, हनिष्यति** = घातयिष्यति । **यदि** = चेत्, **अयम्** = एषः, **दुरात्मा** = दुष्टः, **सीताम्** = जानकीम्, **हन्तुम्** = घातयितुमेव, **चेष्टेत** = प्रयत्न कुर्यात्, **तत्क्षणम्** = तस्मिन्नेव काले, **भूधरस्य** = पर्वतस्य, **शिखरे** = उपरिभागे, **तडित्** = विद्युत् इव, **शिरसि** = रावणमस्तके, **अस्मात्** = एतस्मात्, **वृक्षात्** = तरोः, **उत्प्लुत्य**= उद्गत्य, **खड्गस्य** = करवालस्य, **निक्षेपात्** = प्रहरणात्, **पूर्वम्**= प्रागेव, **शिरांसि** = दशमुखमस्तकानि, **उत्पाटयामि** = विदारयामि (इति चिन्तयन् विरमति) ।

४० **मन्दोदरी - भो भो आर्यपुत्र** = स्वामिन् ! **इदानीम्** = अधुना, **भवान्** = त्वम्, **सुलभकोपात्** = सहजक्रोधात्, **विरमतु** = विरतो भवतु । **इमाम्** = एनाम्, **कुररीम्** = उत्क्रोशीमिव, **विलपन्तीम्** = विलापं कुर्वतीम्, **अबलाम्** = स्त्रियम्, **हत्वा**= व्यापाद्य, **ते**= तव, **वीर्यस्य** = पराक्रमस्य, **उपचयः** = वृद्धिः, **न भवति**= न जायते । **तत्** = तस्मात्, **न विद्यते नाथः** = स्वामी, **रक्षकः, पतिर्वा यस्यास्तस्याः, अस्याः** = सीतायाः, **रोदनम्** = क्रन्दनम् एव, **बलम्** = शक्तिर्यस्य तत् तथाभूतम् **जीवितव्यम्** = जीवनम्, **रक्ष** = पालय । (**इति कथयित्वा रावणस्य** = दशवदनस्य **करात्** = हस्तात्, **खड्गम्** = करवालम् गृह्णाति ।

४१ **रावणः** - हे राक्षस्यः ! यूयं शृणुत । मासद्वयान्तरे सीतेयं यथा मम वशवर्तिनी भवेत्तथा युष्माभिः प्रयत्नः कर्तव्यः ।

४२ **राक्षस्यः** - जं भट्टारको आण्णवेदि । [*यद् भट्टारक आज्ञापयति*]

४३ **रावणः** - अयि देवि मन्दोदरि ! सीतावचनशरविद्धहृदयस्य मम कोपातिशयाच्चरणे न प्रसरतः तद्देहि मे हस्तावलम्बनम् ।

४४ **मन्दोदरी** - अज्जउत्तो अवलम्बेदु मे हत्थम् । (आर्यपुत्रोऽवलम्बतां मे हस्तम्)

(इति हस्तं ददाति)

४५ **रावणः** - क्वास्ति ममामात्यः प्रहस्तः ।

४६ **प्रहस्तः** - (आत्मगतम्) वेपते मे हृदयम् । किमत्र चञ्चूर्यतेऽधुनाऽयमुग्रशासनः कोपात् । (प्रकाशम्) अहमस्मि समीपतः प्रभोः । किमाज्ञापयसीममनुचरम्।

---

४१ **रावणः - हे राक्षस्यः** = भो निशाचर्यः ! **यूयम्** = भवत्यः, **शृणुत** = आकर्णयत। **मासयोर्द्वयम्, तस्य अन्तरे मासद्वयान्तरे** = द्विमासाभ्यन्तरे, **इयम्** = एषा, **सीता**= वैदेही, **यथा** = येन विधिना, **वशवर्तिनी** = अधीना, **भवेत्तथा युष्माभिः** = निशाचरीभिः, **प्रयत्नः** = प्रयासः, **कर्तव्यः** = विधेयः ।

४२ **राक्षस्य - यत्, आर्यपुत्रः** = भवान्, **आज्ञापयति** = आदिशति, तत्कुर्मः ।

४३ **रावणः - अयि देवि मन्दोदरि ! सीतायाः** = जानक्याः, **वचनानि एव शरास्तैर्विद्धम्, हृदयं यस्य तस्य, मम** = रावणस्य, **कोपातिशयात्** = क्रोधाधिक्येन, **पादौ** = चरणौ, **न प्रसरतः** = न चलतः । **तत्** = तस्मात्, **मे** = मम, **हस्तावलम्बनम्** = उत्थानाय कराश्रयम्, **देहि** = यच्छ ।

४४ **मन्दोदरी - आर्यपुत्र** = स्वामिन्! **मे** = मम, **हस्तम्** = करम्, **अवलम्ब्यताम्** = गृह्यताम् । (इति हस्तं ददाति)

४५ **रावणः - मम**= रावणस्य, **अमात्यः**= सचिवः, **प्रहस्तः**= तन्नामको दैत्यः, **क्व**= कुत्र, **अस्ति** = वर्तते ?

४६ **प्रहस्तः** - (आत्मगतम्) **मे** = मम, **हृदयम्** =चित्तम्, **वेपते** = कम्पते । **अधुना**= अस्मिन् समये, **उग्रम् शासनम् यस्य सः, अयम्** = रावणः, **क्रोधात्** = कोपात्, **किं चञ्चूर्यते** = गर्हितं कर्माचरितुमतिशयेन वाञ्छति ? (प्रकाशम्) **प्रभोः** = भवतः, **समीपतः** = निकट एव, **अहम्** = अमात्यः, अस्मि । **इमम्** = एनम्, **अनुचरम्** = भृत्यम्, **किम् आज्ञापयसि** = किं निर्दिशसि ?

४७ **राजा** - अमात्य, कोपान्धस्य मम राजसदनपदवी न स्फुरति । तदादेशय तन्मार्गम् ।

४८ **प्रहस्तः** - (प्राञ्जलिः) इत इतो देवः (इति सर्वे परिक्रामन्ति)

४९ **हनुमान्** - (आत्मगतम्) गतोऽयं दुरासदः । अतःपरमिमा रात्रिञ्चर्यः किमाचरन्ति तदपि च द्रष्टव्यम् ।

५० **राक्षस्यः** - (सीतामुपद्रुत्य) अलेले माणुसि माणिणि सीदे, पउच्चउले जादो अअं राआ वसीकिदभुअणमण्डलोवि । कुदो तुअं ईदिसं पिअतमं रक्खसाहिवं ण भजेसि । धिक्तुमं पुरोभाइणीं ताअह्माणं वअणं अत्तणो हिदं जाणीहि ण चेदुरवत्थां गदा होइस्ससि । [*अरे रे मानुषि मानिनि सीते ! पौलस्त्यकुले जातोऽयं राजा वशीकृतभुवनमण्डलोऽपि कुतस्त्वमीदृशं प्रियतमं राक्षसाधिपं न भजसि ? धिक्त्वां पुरोभागिनीं तदस्माकं वचनमात्मनो हितं जानीहि न चेद्दुरवस्थां गता भविष्यसि ।*]

---

४७ **राजा - कोपेन** = क्रोधेन, **अन्धस्य** = दृष्टिहीनस्य, **मम** = रावणस्य **रजसदनपदवी**= नृपप्रासादमार्गं, **न स्फुरति** = नैव प्रतीयते, **तत्** = तस्मात्, **तन्मार्गम्** = तं पन्थानम्, **आदेशय** = दर्शय ।

४८ **प्रहस्तः** - (प्राञ्जलिः) **इत इतो देव** = अनेन मार्गेण चलतु स्वामिन्, (**इति सर्वे परिक्रामन्ति** = परिभ्रमन्ति)

४९ **हनुमान्** - (आत्मगतम्) **अयम्** =एषः, **दुरासदः** = दुरात्मा, **गतः** = यातः । **अतः परम्** = अनन्तरम्, **इमाः** = एताः, **रात्रीचर्यः** = निशाचर्यः, **किम् आचरन्ति? किं कुर्वन्ति ? तदपि** = ताषां कार्यमपि, **द्रष्टव्यम्** = विलोकनीयम् ।

५० **राक्षस्यः** - (**सीताम्, उपद्रुप्य** = उपेत्य) **अरेरे मानुषि** = मनुष्यकुलोद्भवे, **सीते**= जानकि! **पौलस्त्यस्य, कुले** =वंशे, **जातः** = उत्पन्नः, **अयम्** = एषः, **राजा** = रावणः, **वशीकृतम्** = अधीनीकृतम्, भुवनमण्डलम्, येन तथाविधोऽस्ति। **तथापि त्वम्, ईदृशम्** = गुणसंपन्नम्, **प्रियतमम्** = पतित्वेन वरीतुमर्हम्, **राक्षसाधिपम्**= रावणम्, **न भजसि** = न वृणोषि, **पुरोभागिनीम्** = दोषैकदृशम्, **दोषैकदृक् पुरोभागीत्यमरः** । **त्वाम्** = सीताम्, **धिक्** = न्यक्कारोऽस्ति । **तत्** = तस्मात्, **अस्माकम्** = राक्षसीनाम्, **वचनम्** = वाक्यम्, **आत्मनः** = स्वस्य, **हितम्** = कल्याणकरम्, **जानीहि** = विद्धि । **नोचेद्** = अन्यथा, **दुरवस्थाम्** = दुर्गतिम्, **गता भविष्यसि** = प्राप्स्यसि ।

५१ **एकजटा** - सच्चं कधअन्ति मम पिअवअस्साओ राक्खसीओ । अणेण देअराओवि णिज्जिदो । ण कोवि संजुगे अस्स समक्खं चिठ्ठदि ता सीग्घं भज इमम् । [*सत्यं कथयन्ति मम प्रियवयस्या राक्षस्यः । अनेन देवराजोऽपि निर्जितः । न कोपि संयुगेऽस्य समक्षं तिष्ठति, तच्छीघ्रं भजेमम् ।*]

५२ **विकटा** - हला पिअसहि ! एक्कजडे, इअं कहंवि अह्माणं वअणं ण सुणिस्सदि। भक्खामो इमं दुव्विणीदाम् । [*हला प्रियसखि एकजटे ! इयं कथमप्यस्माकं वचनं न श्रोष्यति । भक्षाम इमां दुर्विनीताम् ।*]

५३ **हरिजटा** - हला सहि विअडे, मम वहिणीए एक्कजडाए भणिदं णअवगदम्। इमिणा तह तुहवअणं ण ह्मरिदम्, णूणं इअं दुट्ठा । अदो दुम्मुही भणेदु इमम्। [*हला सखि विकटे ! मम भगिन्या एकजटाया भणितं नावगतमनया तथा तव वचनं न स्मृतम्, नूनमियं दुष्टा । अतो दुर्मखीं भणत्विमाम् ।*]

५४ **विकटा** - हला पिअसहि ! सुट्ठु दे भणिदम् । एवमनुचिट्ठामो अह्मो । हण्डे दुम्मुहि ! परित्तासेहि इमं दुव्विणीदां माणुसीम् । [*हला प्रियसखि ! सुष्ठु ते*

---

५१ **एकजटा - मम** = एकजटायाः, **प्रियवयस्याः** = प्रियसख्यः, **सत्यम्** = अवितथम्, **कथयन्ति** = वदन्ति । **अनेन** = रावणेन सह, **देवराजोऽपि** = इन्द्रोऽपि, **न तिष्ठति**= स्थातुं न शक्नोति । **तत्** = तस्मात्, **शीघ्रम्** = क्षिप्रम्, **इमम्** = रावणम्, **भज** = पतित्वेन स्वीकुरु ।

५२ **विकटा - हला** = भोः, **प्रियसखि** = प्रियालि, **एकजटे! इयम्**= सीता, **कथमपि**= बहुधा स्मारिताऽपि, **अस्माकम्** = निशाचरीणाम्, **वचनम्** = वाक्यम्, **न श्रोष्यति**= न आकर्णयिष्यति । **दुर्विनीताम्** = विनयरहिताम्, **इमाम्** = सीताम्, **भक्षाम** = खादाम ।

५३ **हरिजटा - हला सखि विकटे! मम** = हरिजटायाः, **भगिन्याः** = अनुजायाः **एकजटायाः**, **भणितम्** = कथनम्, **अनया** = सीतया, **न अवगतम्** = न बुद्धम्। **तथा** = हितकरम्, **तव** =भवत्याः, **वचनम्** = वाक्यम्, **न स्मृतम्** = न कर्णविषयीकृतम्, **नूनम्** = निश्चयेन, **इयम्** = एषा, **दुष्टा** =दुर्विनीता, **विद्यते** । **अतः** = अस्मात्, **हेतोः** = कारणात्, **इमाम्** = सीताम् 'दुर्मुखी' इति **भणतु** = कथयतु ।

५४ **विकटा - हला प्रियसखि! ते** = तव, **भणितम्** = कथनम्, **सुष्ठु** = शोभनम्, **अस्ति** । **वयम्** = निशाचर्यः, **एवम्** = इत्थम्, **अनुतिष्ठामः** = कुर्मः । **हण्डे**

भणितम्। एवमनुतिष्ठामो वयम् । हंडे दुर्मुखि ! परित्रासयेमां दुर्विनीतां मानुषीम्।]

५५ **दुर्मुखी** - जं भणदि भट्टिणी । [*भद्भणति भट्टिनी ।*] (सीतामुसृत्य करालदृग्भ्यां निरीक्ष्य) हंहो दुट्टे माणुसि, दाणिं जेव्व इमेहिं णहरेहिं तुह हिअअ विदारिख अणेण मुहेण अहिणवं रुहिरं पिवेमि । पेक्खस्स मे णहाइं मुहं वा कीदिसं वट्टइ । [*हंहो दुष्टे मानुषि ! इदानीमेवैतैर्नखरैस्तव हृदयं विदार्यानेन मुखेनाभिनवं रुधिरं पिबामि । प्रेक्षस्व मे नखान् मुखं वा कीदृशं वर्तते ?*]

५६ **अजामुखी** - हला पिअसहिओ ! से मंसं भक्खामो अह्मे । [*हला प्रियसख्यः ! अस्या मांसं भक्षाम वयम् ।*]

५७ **शूर्पणखी** - हञ्जे अजामुही ! रोचइ मे दे वअणम् । माणुसं मंसं सुउमारं होदि। अह्मे मिट्टमंसं भक्खिअ णच्चणं करिस्सामो । [*हञ्जे अजामुखि ! रोचते मे ते वचनम् । मानुषं मांसं सुकुमारं भवति । वयं मिष्टमांसं भक्षयित्वा नर्तनं करिष्यामः ।*]

५८ **हनुमान्** - आ दुष्टा राक्षस्यः ! शीघ्रमेव युष्माकं भर्तॄणां मासं खादयन्त्यस्तेषा-

---

दुर्मुखि! इमाम् = एनाम्, **दुर्विनीताम्** = दुष्टाम्, **मानुषीम्** = मनुष्यपुत्रीम्, सीतामित्यर्थः । **परित्रासय** = भीषय ।

५५ **दुर्मुखी - भट्टिनी** = विकटा, **यद् भणति** = कथयति तत्करोमीत्यर्थः, (सीतामुपसृत्य करालदृग्भ्यां निरीक्ष्य) **हंहो** = भो दुष्टे मानुषि! **इदानीम्** = अधुनैव, **एतैः** = एभिः, **नखरैः** = नखैः, **तव** = भवत्याः, **हृदयम्** = वक्षस्थलम्, **विदार्य** = द्विधाकृत्य, **मुखेन** = वदनेन, **अभिनवम्** = नूतनम्, **रुधिरम्** = रक्तम्, **पिबामि**। **मे** = मम, **नखाः** = नखराः, **वा** = अथवा, **मुखम्** = वदनम्, कीदृशम् वर्तते ? **प्रेक्षस्व** = विलोकय ।

५६ **अजामुखी - हला प्रियसख्यः** = प्रियाल्यः, **वयम्** = निशाचर्यः, **अस्याः** = सीतायाः, **मांसम्** = पललम्, **भक्षयाम** = खादाम ।

५७ **शूर्पणखी - हञ्जे ! अजायाः, मुखमिव मुखं यस्याः सा, तत्संबुद्धौ, हे अजामुखि ! ते** = तव, **वचनम्** = वचः, **मे** = मह्यम्, रोचते । **मानुषम्** = मनुष्यसंबन्धि, **मांसम्** = पललम्, **सुकुमारम्** = कोमलम्, भवति । **वयम्** = निशाचर्यः, **मिष्टम्** = स्वादु, **मांसम्** = पललम्, **भक्षित्वा** = खादित्वा, **नर्तनम्** = नृत्यम्, **करिष्यामः** = विधास्यामः ।

५८ **हनुमान् - आः दुष्टाः**= दुर्विनीताः, **राक्षस्यः**= निशाचर्यः ! **शीघ्रम्** = क्षिप्रम् एव,

मस्थीनि चर्वयन्त्यः शिवा बेभीषयिषन्ति । भगवति सीते ! कथं तव भीरोरपीदृशीनां भयङ्करीणां रूपं दृष्ट्वापि मनो न बिभेति । धन्यासि त्वम् ।

कुतः

५९ काश्चिद्दंष्ट्राकरालं मुखमपि भवतीं दर्शयन्ति प्रमत्ताः
काश्चिद्रक्तायताक्ष्यो विपुलतरमुखा भीषयन्त्युग्रनेत्राः ।
काश्चित्प्रायोऽवटीटाः कुटिलतरजटाः काश्चनोत्तुङ्गनासा
राक्षस्यस्ता विकर्तुं तव हृदयमहो वीरपन्त्या न शक्ताः ।।१४

(आत्मगतम्, अतःपरं किमाज्ञापयति जानकी, तदपि श्रोतव्यम्)

युष्माकम् = निशाचरीणाम्, मांसम् = पललम्, खादन्त्यः = भक्षयन्त्यः, तेषाम्= निशाचराणाम्, अस्थीनि, चर्वयन्त्यः = दन्तैः खादन्त्यः, शिवाः = शृगालाः, बेभीषयिष्यन्ति = अतिशयेन भीषयिष्यन्ति । भगवति, सीते! तव = भवत्याः, भीरोः = भयशीलाया अपि, ईदृशीनाम् = एतादृशीनाम्, भयङ्करीणाम् = भीषणानाम्, राक्षसीनाम्, रूपम् = आकृतिम्, दृष्ट्वा = विलोक्यापि, मनः = चेतः, न बिभेति= भयं नाप्नोति । त्वम् = सीता, धन्या = साधुवादार्हा, असि । यतः -

५९ अन्वयः - प्रमत्ताः काश्चित् भवतीम् दंष्ट्राकरालम् मुखम् अपि दर्शयन्ति । रक्तायताक्ष्यः विपुलतरमुखाः उग्रनेत्राः काश्चित् भीषयन्ति । प्रायः अवटीटाः काश्चन कुटिलतरजटाः उत्तुङ्गनासाः काश्चित् वीरपत्न्याः हृदयम् विकर्तुम् न शक्ताः अहो ।

व्याख्या - प्रमत्ताः = उन्मत्ताः, काश्चित् = निशाचर्यः, भवतीम् = सीताम्, दंष्ट्राभिः = दशनैः, करालम् = भीषणम्, मुखम् = वदनम्, अपि दर्शयन्ति = प्रकटयन्ति । रक्ते आयते च अक्षिणी यासान्ताः, रक्तायताक्ष्यः = विस्तृतारुणानयनाः, विपुलतरम् = अतिशयेन विशालम्, मुखम् = वदनम् यासान्तास्तथोक्ताः, उग्रे नेत्रे यासान्तास्तथाविधाः, काश्चित् = निशाचर्यः, भीषयन्ति = त्रासमुत्पादयन्ति । प्रायः = बहुशः, अवटीटाः = नतनासिकाः, अतिशयेन कुटिलाः, कुटिलतराः = नितरां वक्राः, जटाः = सटा यासान्ताः, काश्चित् =राक्षस्यः, उत्तुङ्गा = उन्नता, नासा = नासिका यासान्तास्तथोक्ताः सन्ति । काश्चिदपि, ताः= भीषणाः राक्षस्यः = निशाचर्यः, वीरस्य पत्नी वीरपत्नी, तस्याः, वीरपन्त्याः = शूरस्त्रियः, सीताया इत्यर्थः । हृदयम् = चेतः, विकर्तुम् = विकृतं विधातुम्, न शक्ताः = न समर्थाः । अहो = आश्चर्यम् ।

स्वभावोक्त्यलङ्कारः । स्रग्धरावृत्तम् ।

६० **सीता** - हंहो राक्खसीओ ! मं किं तुह्मे अज्जाहिदं दंसअध, ण अत्तणो गत्तादोवि पिअतमं पदिव्वदाधम्मं मुंजेमि मम । पिअभट्टा रामो जेव्व । ण अण्णं भजेमि तुह्मे मारअत वा मुञ्चतमं रामं ण विह्मरेमि । [*हंहो राक्षस्यः ! मां किं यूयमत्याहितं दर्शयथ । नात्मनो गात्रादपि प्रियतमं पतिव्रताधर्मं मुञ्चामि। मम प्रियभर्ता राम एव, नान्यं भजामि, यूयं मारयत वा मुञ्चत मां, रामं न विस्मरामि ।*]

६१ **त्रिजटा** - (जनान्तिकम्) हंहो राक्खसीओ, मा भीस अतणं सीदाम् । अज्झप सअणादो उत्थिदए मए एक्को दिठ्ठो । णूणं रामो सउलं रावणं हणिस्सदि विभीषणं राआणं कदुअ सीदां गोह्लिस्सदि ता तुह्मे गच्छत सइदुम् । [*हंहो राक्षस्यः ! मा भीषयतैनां सीताम् । अद्य सुप्तया मया स्वप्न एको दृष्टः । नूनं रामः सकुलं रावणं हनिष्यति । विभीषणं राजानं कृत्वा सीतां ग्रहीष्यति, तद्यूयं गच्छत शयितुम् ।*]

६२ **राक्षस्यः** - (परस्परं विलोकयन्त्यः) अह्मो इअं क्खु अह्माणं अन्तिआ एव्वं मन्तेदि । सच्चं होइ ता गच्छामो अह्मे सइदुम् । [*अंहो ! इयं खल्वस्माक-*

(अतः परं किमाज्ञापयति जानकी तदपि श्रोतव्यम्)

६० **सीता - हंहो राक्षस्यः** = भो निशाचर्यः ! **माम्** = सीताम्, **किम्** = किमर्थम्, **अत्याहितम्** = महाभीतिम्, **दर्शयथ** = प्रकटयथ । **आत्मनः** = स्वस्य, **गात्रात्**= शरीरादपि, **प्रियतमम्** = नितरां प्रियम्, **पतिव्रताधर्मम्** = पातिव्रत्यम्, **न मुञ्चामि**= न त्यजामि । **मम** = सीतायाः, **प्रियभर्ता** = प्रियपतिः, **रामः** = दाशरथिरेव अस्तीति शेषः । **अन्यम्** = रामाद्भिन्नं पुरुषम्, **न भजामि** = न वृणोमि । **यूयम्** = राक्षस्यः, **माम्** = सीताम्, **मारयत** = घातयत, **वा** = अथवा, **मुञ्चत** = त्यजत, **रामम्** = दाशरथिम्, न विस्मरामि, तमेव भजामीत्यर्थः ।

६१ **त्रिजुटा - हंहो राक्षस्यः** = भो निशाचर्यः ! **एनाम्** = इमाम्, **सीताम्** = जानकीम्, **मा भीषयत** = भयं नोत्पादयत । **अद्य** = अस्मिन् दिने, **सुप्तया** = निद्रितया, **मया** = त्रिजटया एकः, **स्वप्नः**, **दृष्टः** = विलोकितः । **नूनम्** = निश्चयेन, **रामः** = दाशरथिः, **सकुलम्** = सवंशम्, **रावणम्** = पौलस्त्यम्, **हनिष्यति** = घातयिष्यति। **विभीषणम्** = रावणस्य कनिष्ठानुजम्, **राजानम्** = नृपम्, **कृत्वा** = विधाय, **सीताम्** = जानकीम्, **ग्रहीष्यति** = नेष्यति, **तत्** = तस्मात्, **यूयम्** = राक्षस्यः, **शयितुम्** = स्वपितुम्, **गच्छत** = यात ।

६२ **राक्षस्यः** - (परस्परं विलोकयन्त्यः) **अहो** = आश्चर्यम्, **अस्माकम्** = निशाचरीणाम्?

मन्तिकैवं मन्त्रयति । सत्यं भवति तद्गच्छाम वयं शयितुम् ।] (इति सर्वाः परिक्रामन्ति)

६३ **हनुमान्** - (स्वगतम्) कृतं वयोवृद्धया त्रिजटया निर्मक्षिकम् । सत्यं खलु वेश्याऽपि वृद्धा तपस्विनीवाचरतीति ।

६४ **सीता** - (आत्मगतम्) हद्धी हद्धी, प्पभाते अवस्संजेव्व राक्खसीओ खादन्ति मम् । ता वरं मे सोहत्थादो मरणम् । केण उवाएण मम सुलहमरणं भवे । आं अवगदा मए सुहमरणजुत्ती । इअं वेणी मम विसाला । साहालंविदए तए दुतं मम पिअप्पाणा णिगमिस्सन्ति । [*हा धिक्, हा धिक् ! प्रभाते अवश्यमेव राक्षस्यो खादन्ति माम् । तद्वरं मे स्वहस्तान्मरणम् । केनोपायेन मम सुलभमरणं भवेत् । आम्, अवगता मया सुखमरणयुक्तिः । इयं वेणी मम विशाला । शाखालम्बितया तया द्रुतं मम प्रियप्राणा निर्गमिष्यन्ति ।*]

६५ **हनुमान्** - (आत्मगतम्) अहो बत सीतयाऽवश्यं मरणाय सङ्कल्पितम् ।

अन्तिका = सख्यपि, **एवम्** = इत्थम्, **मन्त्रयति** = कथयति । **तत्** = त्रिजटोक्तम्, **सत्यम्** = अवितथम्, **भवति** = जायते । **भो राक्षस्यः!** **वयम्** = निशाचर्यः, **शयितुम्** = स्वपितुम्, **गच्छाम** = याम । (इति सर्वाः परिक्रामन्ति)

६३ **हनुमान्** - (आत्मगतम्) **वयः** = शरीरावस्था, **तया वृद्धा**, **तया**, **वयोवृद्धया** = जेष्ठया, **त्रिजटया** = तन्नाम्न्या राक्षस्या, **निर्मक्षिकम्** = मक्षिकाणामभावः, **कृतम्**= विहितम् । **वेश्या** = कुलटा **अपि वृद्धा**, **सती तपस्विनी** = योगिनीव, **आचरति**= व्यवहरतीति, **खलु** = निश्चयेन, **सत्यमस्ति** ।

६४ **सीता** - (आत्मगतम्) **हा धिक् ! हा धिक् ! प्रभाते** = प्रातः, **अवश्यम्** = नूनमेव, **राक्षस्यः** = निशाचर्यः, **माम्** = सीताम्, **खादन्ति** = भक्षयन्ति । **तत्** = तस्मात्, **मे** = मम, **स्वहस्तात्** = स्वकरात्, **मरणम्** = मृत्युः, **वरम्** = श्रेष्ठम् । **केन** = कतमेन, **उपायेन** = उद्यमेन, **मम** = सीतायाः, **सुलभम्** = सुकरम्, **मरणम्** = मृत्युः, **भवेत्** = स्यात् ? **आम्**, **मया** = सीतया, **सुखेन** = आनन्देन, **मरणस्य** = मृत्योः, **युक्तिः** = उपायः, **अवज्ञाता** = विदिता । **इयम्** = एषा, **मम**= सीतायाः, **वेणी** = केशपाशः, **विशाला** = विस्तृता, अस्ति । **शाखासु** = वृक्षांशेषु, **अवलम्बितया** = वद्धया, **तया** = वेण्या, **मम** = सीतायाः, **प्रियाः**, **प्राणाः** = असवः, **द्रुतम्** = शीघ्रम्, **गमिष्यन्ति** = यास्यन्ति ।

६५ **हनुमान्** - (आत्मगतम्) **अहो** = आश्चर्यम्, **वत** = खेदस्य विषयः । **सीतया** =

यतो हि तस्याः -

६६ वार्तामपि प्रियतमां रघुनायकस्य
नाद्यावधि श्रुतिपथेऽपिबदेकदा सा ।
सन्तर्जयन्ति सततं निकषात्मजास्तां
कः संशयः खलु मृतौ विरहातुरायाः ।।१५।।

अपि च -

६७ स्वभावसुकुमारिणी कृतिविदेहसंवर्धिता
विशङ्कटरसोद्धृता निहितरामरूपा पुरा ।
विभीतकखरादिभिर्जटिलया वृता क्षुद्रया
ऽधुना बकुलकानने श्वसिति हन्त सीतालता ।।१६।।

जानक्या, **अवश्यम्** = नूनम्, **मरणाय** = मृत्यवे, **सङ्कल्पितम्** =विचारितम् ।

६६ अत्र हनुमान् सीताया मर्तुकामाया दशां निरूपयति - **वार्तामपीति** ।

अन्वयः - सा अद्यावधि अपि रघुनायकस्य प्रियतमाम् वार्ताम् एकदा अपि श्रुतिपथे न अपिबत् । निकषात्मजाः सततम् ताम् तर्जयन्ति । विरहातुरायाः मृतौ कः संशयः खलु ।

व्याख्या - **सा** = सीता, **अद्य अवधि यस्मिन् कर्मणि तद्यथा स्यात्तथा, अद्यावधि** = साम्प्रतं यावत्, **रघुनायकस्य** = रामस्य, **अतिशयेन प्रिया प्रियतमा, ताम्, प्रियतमाम्** = अतिप्रियाम्, **वार्ताम्** = वृतान्तम्, **श्रुतिपथे** = कर्णयोः, कर्णाभ्यामित्यर्थः । **न अपिबत्** = न श्रुतवतीत्यर्थः । **निकषात्मजाः** = राक्षस्यः, **सततम्** = निरन्तरम्, **ताम्** = सीताम्, **तर्जयन्ति** = भर्त्सयन्ति । **खलु** = निश्चयेन, **विरहेण** = वियोगेन, **आतुरायाः** = व्याकुलायाः, **मृतौ** = मरणे, **कः संशयः** = कः सन्देहः ?

सरलार्थः - अद्यावधि रामस्य वृतान्तस्तया न श्रुतः । राक्षस्यश्च ताम् सततं तर्जयन्ति । नूनमेव विरहातुराया मरणे न कोऽपि सन्देह इति ।

अत्र, **अर्थान्तरन्यासालङ्कारः, वसन्ततिलकावृत्तम्** ।

६७ अत्र हनुमान् अशोकवाटिकायां स्थितायाः सीताया दयनीयावस्थां निरूपयति - **स्वाभावेति** ।

अन्वयः - स्वभावसुकुमारिणी कृतिविदेहसंवर्धिता विशङ्कटरसोद्धृता पूरा निहितरामरूपा विभीतकखरादिभिः जटिलया क्षुद्रया च वृता सीतालता अधुना वकुलकानने श्वसिति हन्त ।

अपि च -

६८ हे सीते ! प्रमदवने नृपस्य पूर्वं
स्वच्छन्दं विलसितमालिभिर्भवत्या ।
अद्य त्वं कथमिह रक्षसां वनेऽस्मिन्
शाखाभिर्विलपसि हन्त शिंशपायाः ।।१७।।

व्याख्या - सीतापक्षे - स्वभावेन = प्रकृत्या, सुकुमारिणी = कोमलावयवा स्त्रीत्वात्, राजकुमारीत्वाद्वा । कृती = कुशलः, यः, विदेहः = जनकः, तेन संवर्धिता = वृद्धिमापादिता, विशङ्कटा = विशाला, या रसा = पृथ्वी, तस्या उद्धृता = उद्गता, पुरा = प्राक्, निहितम् = स्वीकृतम्, रामस्य = दाशरथेः, रूपम् = अवतारः, यया सा रामप्रियेत्यर्थः । अधुना = अस्मिन् समये, विभीतकखरादिभिः = तदाख्यै राक्षसैः, जटिलया = जटायुतया, क्षुद्रया = नीचव्यवहारं कुर्वत्या, कयाचिद् राक्षस्या च वृता = युक्ता, सीता एव लता = वल्ली, वकुलस्य = अशोकस्य, कानने = उद्याने, श्वसिति = प्राणिति, हन्त = खेदस्य विषयः ।

लतापक्षे - स्वभावेन = प्रकृत्या, सुकुमारिणी = मृदुला, कृतिविदा = कर्मकुशलेन, मालाकारेणेत्यर्थः । इह = उपवने, संवर्धिता = जलसेकादिना वृद्धिमापादिता, निहितम् = गृहीतम्, रामम् = सुन्दरम्, रूपम् = आकृतिः, यया सा, सुन्दरीत्यर्थः । विशङ्कटा = विशाला, या रसा = पृथ्वी, तस्या उद्धृता = निर्गता, विभीतकः = तदाख्यो वृक्षविशेषः, खरः = देवताडः, तौ, आदौ येषान्तैः, तथाभूतैः, वृक्षैः, जटिलया = जटामस्या, क्षुद्रया = प्रचोदिन्या च, वृता = युक्ता, सीता = जानकीव, लता = वल्लरी, बकुलस्य = अशोकस्य, कानने = वने, श्वसिति ।

अत्र श्लेषोत्थापितरूपकालङ्कारः । पृथ्वीवृत्तम् ।

६८ अन्वयः - हे सीते पूर्वम् भवत्या नृपस्य प्रमदवने आलिभिः स्वच्छन्दम् विलसितम्। अद्य त्वम् इह अस्मिन् रक्षसाम् वने शिंशपायाः शाखाभिः कथम् विलपसि ? हन्त!

व्याख्या - हे सीते = भो जानकि ! पूर्वम् = प्राक्, भवत्या = त्वया, सीतयेत्यर्थः । नृपस्य = राज्ञो जनकस्य, प्रमदवने = प्रमदा यत्र क्रीडन्ति तादृशोद्याने, आलिभिः = सखीभिः, स्वच्छन्दम् = स्वतन्त्रं यथा स्यात्तथा, विलसितम् = सानन्दं क्रीडितम् । अद्य = अस्मिन् दिने, त्वम् = भवती, इह = अत्र, लङ्कायामित्यर्थः। रक्षसाम् = निशाचराणाम्, वने = उद्याने, शिंशपायाः = शेफालिकायाः, शाखाभिः=

६९ भवतु । तावदिमां प्रत्ययार्थं रामकथां श्रावयामि । ततः प्रतीतरामसौहार्दं मां सादरं द्रक्ष्यति । अन्यथा मायाविनां राक्षसानां छलमिति बुद्ध्या न कदापि सा विश्वसिति माम् । (प्रकाशम्)

भगवति सीते,

७० इक्ष्वाकुप्रभवभवो बभूव राजा
धर्मिष्ठो दशरथ इत्यलंप्रतापः ।
तिस्रस्तन्नृपतिकृताभिषेकराज्ञः
कौशल्या प्रथमसुतं ह्यसूत रामम् ।।१८।।

द्रुमांशैः, **कथम्** = केन प्रकारेण, **विलपसि** = परिदेवसे । **हन्त** = खेदस्य विषयः।

पुष्पिताग्रावृत्तम् ।

६९ **भवतु** = अस्तु । **तावत्** = आदौ, **प्रत्ययार्थम्** = विश्वासार्थम्, **रामस्य** = दाशरथेः, **कथाम्** = वृत्तान्तम्, **श्रावयामि** = आकर्णयामि । **ततः** = रामकथाश्रवणानन्तरम्, **प्रतीतम्** = ज्ञातम्, **रामस्य** = दाशरथेः, **सौहार्दम्** = प्रेम **यस्य तम्, माम्** = हनुमन्तम्, **सादरम्** = सश्रद्धं **द्रक्ष्यति** = विलोकयिष्यति । **अन्यथा** = नो चेत्, **माया अस्ति येषान्ते, मायाविनः, तेषाम्, मायाविनाम्** = ऐन्द्रजालिकानाम्, **राक्षसानाम्** = निशाचराणाम्, **छलम्** = छद्म, **इति बुद्ध्या** = धिया, **सा** = सीता, **माम्** = हनुमन्तम्, **कदापि** = कथमपि, **न विश्वसिति** = न प्रत्येति । (**प्रकाशम्** = स्पुटम्) **भगवति सीते** = जानकि !

७० अत्र हनुमान् सीतां रामकथां श्रावयितुं प्रकमते - **इक्ष्वाकुरिति** ।

अन्वयः - इक्षाकुप्रभवभवः धर्मिष्ठः दशरथ इति अलम् प्रतापः राजा बभूव । तन्नृपतिकृताभिषेकराज्ञः तिस्रः (स्त्रियः आसन्, तासु) कौशल्या प्रथमसुतम् रामम् असूत हि ।

व्याख्या - **इक्ष्वाकुः** = तदाख्यनृपतिस्तस्मात्, **प्रभवः** = उत्पत्तिर्यस्य **सः, इक्ष्वाकुप्रभवस्तस्माद् भवः, इक्षाकुप्रभवभवः** = इक्षाकुकुलोत्पन्नः, **धर्मिष्ठः**= धर्मात्मा, **अलम्** = अत्यर्थम्, **प्रतापः** = प्रभावो **यस्य सः, दशरथ इति** = दशरथनामा, **राजा** = नृपतिः, **बभूव** = जज्ञे । **तस्य** = पूर्वोक्तस्य, **नृपतेः** = राज्ञः, **कृताभिषेकाः** = अभिषिक्ताः, **राज्ञः** = महिष्यः, **तिस्रः** = त्रिसंख्यकाः, **आसन्** । **तासु स्त्रीषु, कौशल्या** = राज्ञो ज्येष्ठमहिषी, **प्रथमम्** = आद्यम्, **सुतम्**= पुत्रम्, **रामम्** = राघवम्, **असूत** = प्रसूवती ।

सरलार्थः - इक्षाकुकुलोद्भवस्य दशरथस्य तिस्रो महिष्य आसन् । तासु

७१ कैकेयी भरतमसूत लक्ष्मणाख्यं
शत्रुघ्नं सुतयुगलं तथा सुमित्रा ।
इत्थं तेऽजनिषत तस्य वीरपुत्रा-
श्चत्वारो गुणगणचारुरूपवन्तः ।।१९।।

७२ ज्येष्ठोऽसौ जनकवचो निधाय शीर्षे
क्षिप्त्वाङ्के किल भरतस्य राज्यतन्त्रम् ।
रामोऽगाद्विपिनमथो जगाम सीता
शुभ्रांशोरनुसरणेन रोहिणीव ।।२०।।

कौशल्यानाम्नी ज्येष्ठपत्नी प्रथमसुतं रामं प्रासूत, इति । **प्रहर्षिणीवृत्तम्** ।

७१ **अन्वयः** - कैकेयी, भरतम्, सुमित्रा (च) लक्ष्मणाख्यम् तथा शत्रुघ्नम् सुतयुगलम् असूत । इत्थम् तस्य गुणगणचारुरूपवन्तः चत्वारः ते वीरपुत्राः अजनिषत ।

व्याख्या - **कैकेयी** = केकयराजकन्या, **दशरथस्य मध्यमपत्नी, भरतम्**= तन्नामकम्, **सुमित्रा** = दशरथस्य कनिष्ठपत्नी च, **लक्ष्मणाख्यम्** = तन्नामकम्, **तथा** = तेनैव प्रकारेण, **शत्रुघ्नम्** = तदाख्यम् च, **सुतयुगलम्** = पुत्रद्वयम्, **असूत** = जनयामास । **इत्थम्** = अनया रीत्या, **तस्य** = दशरथस्य, **गुणानाम्** = दयादाक्षिण्यादीनाम्, **गणाः** = समूहाः, **चारु** = सुन्दरञ्च, **रूपम्** = आकृतिः सन्ति येषान्ते, **तथोक्ताः**, **चत्वारः** = चतुःसंख्यकाः, **ते** = रामभरतलक्ष्मणशत्रुघ्न-संज्ञकाः, **वीराः** = शूराश्च ते **पुत्राः** = सुताः, **अजनिषत** = प्रसूताः । दशरथस्य मध्यमपत्न्याः कैकेय्याः भरतो जातः, सुमित्रायाश्च लक्ष्मणशत्रुघ्नौ प्रसूतौ, इति भावः ।

सरलार्थः - इत्थं दशरथस्य रामभरतलक्ष्मणशत्रुघ्नाः चत्वारः शूराः पुत्राः समजायन्त, इति । **प्रहर्षिणीवृत्तम्** ।

७२ **अन्वयः** - असौ जेष्ठः, रामः जनकवचः शीर्षे निधाय भरतस्य अङ्के राज्यतन्त्रम् क्षिप्त्वा, वनम् अगात् । अथ सीता रोहिणी शुभ्रांशोः अनुसरणेन इव विपिनम् अगात्।

व्याख्या - **असौ** = एषः, **ज्येष्ठः** = प्रथमपुत्रो रामः, **जनकस्य** = पितुः, दशरथस्य, **वचः** = वचनम्, **शीर्षे** = शिरसि, **निधाय** = स्थापयित्वा, **भरतस्य** = कैकेयीनन्दनस्य, **अङ्के** = क्रोडे, **राज्यम्** = आधिपत्यम्, **क्षिप्त्वा** = स्थापयित्वा, राज्यसञ्चालनभारं भरताय समर्प्येत्यर्थः । **वनम्** = विपिनम्, **अगात्** = प्रस्थितवात्। **अथ** = रामस्य प्रस्थानमनु, **सीता** = जानकी, **रोहिणी** = नक्षत्रविशेषः, **शुभाः** =

७३ सौमित्रिर्द्रुतपदमन्वगात्ततस्तं
त्रातारं प्रियतममग्रजं कृतीन्द्रः ।
तेऽध्यूषुः कतिचिदहानि पञ्चवट्यां
गौतम्यास्तटमभि वल्कलं वसानाः ।।२१।।

७४ तत्रेमां दशवदनो जहार सीता-
मासक्तां कनकमृगे तयोः परोक्षे ।
दुःखार्तौ भृशमथ तां गवेषयन्तौ
कुर्वन्तौ त्रिदिवगतं जटायुषं तौ ।।२२।।

श्वेताः, **अंशवः** = किरणा यस्य सः, **शुभ्रांशुः**, **तस्य शुभ्रांशोः** = चन्द्रस्य, **अनुसरणेन** = अनुगमनेन इव, रामस्यानुसरणेनेत्यर्थः । **विपिनम्** = वनम्, **अगात्**= गतवती ।

सरलार्थः - दशरथस्य ज्येष्ठपुत्रो रामः पितुराज्ञां पालयितुं वनं प्रस्थितः । यथा रोहिणी चन्द्रमनुयाति तथैव सीतापि राममनुसृतवतीत्यर्थः ।

उपमालङ्कारः । प्रहर्षिणीवृत्तमिदम् ।

७३ **अन्वयः** - ततः कृतीन्द्रः सौमित्रिः त्रातारम् प्रियतमम्, अग्रजम्, तम्, द्रुतपदम् अन्वगात् । वल्कलम् वसानाः पञ्चवट्याम् गौतम्याः, तटम् अभि ते कतिचित् अहानि अध्यूषुः ।

व्याख्या - **ततः** = वनप्रस्थानान्तरम्, **कृतीनामिन्द्रः**, **कृतीन्द्रः** = कुशलः, **सुमित्राया अपत्यम् पुमान्**, **सौमित्रिः** = लक्ष्मणः (कर्तृपदम्) **त्रातारम्** = रक्षकम्, **प्रियतमम्** = अतिशयप्रियम्, **अग्रजम्** = प्राग्भवम्, **तम्** = रामम्, **द्रुतम् पादौ यस्मिन् कर्मणि तद् यथा स्यात्तथा**, **अन्वगात्** = अनुसृतवान् । **वल्कलम्**= वृक्षत्वचम्, **वसानाः** = दधानाः, **ते** = सीतारामलक्ष्मणाः, **पञ्चानां वटानां समाहारः पञ्चवटी**, **तस्याम्**, **पञ्चवट्याम्** = पञ्चवटीक्षेत्रे, **गौतम्याः** = तदाख्याया नद्याः, **अभि** = संमुखे, **कतिचित्** = कानिचित्, **अहानि** = दिनानि, **अध्यूषुः** = स्थितवन्तः। (उपान्वध्याङ्वस इति दिनस्य कर्मत्वम्) ।

सरलार्थः - ससीते रामे वनं प्रस्थिते लक्ष्मणोऽपि, अग्रजं तमनुसृतवान् । ततस्ते वल्कलं परिधाय पञ्चवट्याम्, गौतमनद्याः संमुखे कानिचिद् दिनानि, अधिवसन्ति स्मेति । **प्रहर्षिणीवृत्तम् ।**

७४ **अन्वयः** - तत्र दशवदनः तयोः परोक्षे, कनकमृगे आसक्ताम् इमाम् सीताम् जहार। अथ भृशम् दुःखार्तौ ताम् गवेषयन्तौ जटायुषम् त्रिदिवगतं कुर्वन्तौ तौ ऋष्यमूकम्

७५ गच्छन्तौ ययतुरतोऽद्रिमृष्यमूकं
सुग्रीवो व्यरुणदिहैव वालिनाद्रौ ।
साचिव्यं परिहृतभार्ययोस्तदाभू-
द्रामोऽसौ सपदि जघान वालिनं तम् ।।२३।।

७६ सुग्रीवो हतनिजशात्रवः प्रसन्नो
लब्ध्वा स्वं रघुवरतः प्लवङ्गराज्यम् ।

अद्रिम् ययतुः (इति अपरश्लोकस्थवाक्येनाऽन्वयः)

व्याख्या - **तत्र** = पञ्चवट्याम्, **दश वदनानि यस्य सः**, **दशवदनः** = रावणः, **तयो**= रामलक्ष्मणयोः, **परोक्षे**= अप्रत्यक्षे, **कनकस्य** = सुवर्णस्य, **मृगे**= हरिणे, **आसक्ताम्** = दत्तचित्ताम्, **इमाम्** = रामप्रियाम्, **सीताम्** = जानकीम्, **जहार** = हृतवान् । **अथ** = सीताहरणानन्तरम्, **भृशम्** = अत्यन्तम्, **दुःखेन** = कष्टेन, **आर्तौ** = पीडितौ, **ताम्** = सीताम्, **गवेषयन्तौ** = मार्गयन्तौ, **जटायुषम्** = गृध्रम्, **त्रिदिवगतम्** = स्वर्गतम्, **कुर्वन्तौ** = विदधानौ, **तौ** = रामलक्ष्मणौ, **ऋष्यमूकाद्रिम्** = ऋष्यमूकपर्वतम्, ययतुरिति श्लोकान्तरस्थवाक्येनान्वयः ।

सरलार्थः - पञ्चवट्यां रामलक्ष्मणयोरप्रत्यक्षे रावणः कनकमृगासक्तां सीता-महरत् । तद्दुखेन पीडितौ सीतां गवेषयन्तौ रामलक्ष्मणौ जटायुषं स्वर्गतं विधाय ऋष्यमूकाद्रिमागताविति । **प्रहर्षिणीवृत्तम्** ।

७५ **अन्वयः** - अतः गच्छन्तौ (तौ) ऋष्यमूकम्, अद्रिम् ययतुः । सुग्रीवः वालिना इह एव अद्रौ व्यरुणत् । तदा परिहृतभार्ययोः साचिव्यम् अभूत् । असौ रामः सपदि तम् वालिनम् जघान ।

व्याख्या - **अतः** = अस्मात् स्थानात्, **गच्छत इति गच्छन्तौ** = अटन्तौ, (**तौ** = रामलक्ष्मणौ) **ऋष्यमूकम्** = तन्नामकम्, **अद्रिम्** = पर्वतम्, **ययतुः** = प्रापतुः । **सुग्रीवः** = तन्नामा कपिः, **वालिना** = तदाख्येन वानरेण, **सह इह एव** = अत्रैव, **अद्रौ** = पर्वते, **व्यरुणत्** = विग्रहं कृतवान् । **तदा** = तस्मिन् समये, **परिहृता** = भार्या **ययोस्तयोः परिहृतभार्ययोः** = अपहृतकलत्रयोः, **रामसुग्रीवयोः**, **साचिव्यम्**= मैत्री, **अभूत्**= समजायत । **असौ** = एषः, **रामः** = दाशरथिः, **तम्**= हृततारम्, **वालिनम्** = कपिम्, **जघान** = ममार ।

सरलार्थः - सीताम् गवेषयन्तौ रामलक्ष्मणौ ऋष्यमूकपर्वतं प्रापतुः । तत्र वालिना सह सुग्रीवस्य विग्रह आसीत् । सुग्रीवेण साचिव्यं विधाय रामस्तत्रैव वालिनं जघानेति । **प्रहर्षिणीवृत्तमिदम्** ।

७६ **अन्वयः** - हतनिजशात्रवः प्रसन्नः असौ सुग्रीवः रघुवरतः स्वम् प्लवङ्गराज्यम्

अन्वेष्टुं जनकसुतामितस्ततोऽसौ
कीशौघं सपदि दिदेश गन्तुमाज्ञाम् ।।२४।।

७७ एकोऽहं प्लवगसमूहतोऽम्ब! यात-
स्तीर्त्वा गोखुरमिव सागरं विशालम् ।
मातर्मां करुणदृशा विलोकय त्वं
जातं मे सफलमिहाद्य दर्शनं ते ।।२५।।

(श्रुत्वा)

७८ सीता - (आत्मगतम्) अहो कथं मम पुरोभाइणीए मणो भान्तम् । णत्थि दाणिं मे विरहातुराए सइदव्वम् । कधं सवणो भवे, सच्चं वा होदु । [अहो

लब्ध्वा इतस्ततः जनकसुताम् अन्वेष्टुम् सपदि गन्तुम् कीशौघम् आज्ञाम् दिदेश ।

व्याख्या - शत्रुरेव शात्रवः, हतः = घातितः, **निजः** = स्वकीयः, **शात्रवः**= रिपुः, **येन सः, अत एव प्रसन्नः** = हृष्टः, **असौ** = एष, **सुग्रीवः** = वानरराजः, **रघुवरतः** = रामात्, **स्वम्** = स्वकीयम्, **राज्यम्** = आधिपत्यम्, **लब्ध्वा** = प्राप्य, **इतस्ततः** = यत्र तत्र, **जनकस्य** = विदेहस्य, **सुताम्** = जानकीम्, **अन्वेष्टुम्**= गवेषयितुम्, **सपदि** = तत्क्षणे, **गन्तुम्** = यातुम्, **कीशानाम्** = वानराणाम्, **ओघम्** = समूहम्, **आज्ञाम्** = आदेशम्, **दिदेश** = दिष्टवान् ।

सरलार्थः - हतशत्रुरत एव प्रसन्नचेताः सुग्रीवो रामसहायेन स्वं राज्यं लब्ध्वा सीतान्वेषणाय गन्तुं वानरौघमादिशदिति । **प्रहर्षिणी**वृत्तमिदम् ।

७७ **अन्वयः** - हे अम्ब ! प्लवगसमूहतः एकः अहम् गोखुरम् इव विशालम् सागरम् तीर्त्वा यातः। हे मातः त्वम् करुणदृशा माम् विलोकय । अद्य ते दर्शनम् जातम्, मे जातम् सफलम् ।

व्याख्या - हे अम्ब = हे मातः ! **प्लवगानाम्** = वानराणाम्, **समूहतः** = संघात्, **एकः** = अद्वितीयः, **अहम्** = वानरः, हनुमानित्यर्थः । **गोखुरमिव** = गोशफतुल्यम्, **सागरम्** = समुद्रम्, **तीर्त्वा** = उल्लङ्घ्य, **यातः** = प्राप्तोऽस्मि । **हे मातः** = भो जननि ! **त्वम्** = भवती, **करुणा चासौ दृक् तया करुणादृशा** = कृपादृष्ट्या, **माम्** = वानरम्, हनुमन्तमित्यर्थः । **विलोकय** = पश्य । **अद्य** = अस्मिन् दिने, **ते** = तव, **दर्शनम्** = अवलोकनम्, **जातम्** = अभूत् । **मे** = मम, **हनुमतः, जातम्** = जन्म, **सफलम्** = सार्थकम्, अभवत् । **प्रहर्षिणी**वृत्तम् ।

७८ **सीता** - (श्रुत्वा आत्मगतम्) **अहो** = आश्चर्यम्, **मम** = मे, **पुरोभागिन्याः** = दोषैकदृशः, **मनः** = चेतः, **भ्रान्तम्** = भ्रान्तियुतमस्ति । **इदानीम्** = अधुना,

कथं मम पुरोभागिन्या मनो भ्रान्तम्, नास्तीदानीं मे विरहातुरायाः शयितव्यम्। कथं स्वप्नो भवेत्, सत्यं वा भवतु ।]

(प्रकाशम्) को अअं इमाए पहस्सिणी वाणीए दाणिं सुहाए विअ मं हदजीवदासां संजीअअदि मम अग्गदो चिट्ठदु । [*कोऽयमनया प्रहर्षिणीवाण्या इदानीं सुधयेव मां हतजीविताशां संजीवयति, ममाग्रतस्तिष्ठतु ।*]

७९ **हनुमान्** - (श्रुत्वाग्रतः स्थित्वा वदति) भगवति सीते ! अहमस्मि भवत्या देव्याः सेवकः । भवती मयि कृपापूर्णदृशौ क्षिपतु । नमस्करोमि भवतीम् ।

८० **सीता** - (स्वगतम्) अह्मो ! को अअं खव्वमक्कडाकिदिओ सोणिदमुहो पीदगन्तो मम पुरदो चिट्ठदि । अवस्सं जेव्व मं अवदिट्ठुं आगदो दुव्विणीदो रक्खसो ण अहं णं पेक्खे । [अंहो *! कोऽयं खर्वमर्कटाकृतिकः शोणितमुखः पीतगात्रो मम पुरतस्तिष्ठति । अवश्यमेव मामपदेष्टुमागतो दुर्विनीतो राक्षसः । नाहमेनं प्रेक्षे*]

(इत्यधोमुखी तिष्ठति)

विरहातुरायाः = वियोगाकुलायाः, **मे** = मम सीतायाः, **शयितव्यम्** = निद्रा, **नास्ति** = न विद्यते । **स्वप्नः कथं भवतु** = स्वप्नोऽपि मया न दृष्टः, **वा** = अथवा, **सत्यम्** = यथार्थ एव भवतु । (प्रकाशम्) **कः** = कतमः, **अनया** = एतया, **प्रहर्षिण्या** = आनन्दायिन्या, **अथ च** प्रहर्षिणीछन्दसि निबद्धया, **वाण्या** = वाचा **हता जीवितस्याशा यस्यास्ताम्, हतजीविताशाम्** = विगतजीवनाशाम्, **माम्** = सीताम्, **सुधया** = अमृतेनेव, **संजीवयति** = समुच्छ्वासयति । **मम** = सीतायाः, **अग्रतः** = पुरः, **तिष्ठतु** = संमुखो भवतु इत्यर्थः ।

७९ **हनुमान्** - (अग्रतः स्थित्वा) **भगवति, सीते** = जानकि ! **अहम्** = हनुमान्, **भवत्या** = तव, **देव्याः** = सीतायाः, **सेवकः** = अनुचरः, **अस्मि** । **भवती** = त्वम्, **मयि** = वानरे, **कृपया** = करुणया, **पूर्णे दृशौ** = नेत्रे, **क्षिपतु** । माम् विलोकयेत्यर्थः । **भवतीम्** = त्वाम्, **नमस्करोमि** = प्रणमामि ।

८० **सीता** - (स्वगतम्) *अंहो* ! **अयम्** = एषः, **खर्वः** = वामनः, **मर्कटस्य** = वानरस्येव, **आकृतिः** = आकारो **यस्य सः, शोणितम्** = रक्तम्, **मुखम्** = वदनं **यस्य स तथाविधः, पीतम्** = पीतवर्णम्, **गात्रम्** = शरीरम् **यस्य सः, कः** = अज्ञातपुरुषः, **मम** = सीतायाः, **पुरतः** = अग्रे, तिष्ठति, संमुखोऽस्तीत्यर्थः । **अवश्यम्**= नूनमेव, **माम्** = सीताम्, **अपदेष्टुम्** = छलं विधातुम्, **दुर्विनीतः** = दुष्टः, **राक्षसः**= रावणः, **आगतः**= आयातः । **अहम्** = सीता, **एनम्** = वानररूपधारिणम्, **रावणम्**,

८१ **हनुमान्** - अयि देवि जानकि ! मा बिभेत्वस्मादनुचरादत्रभवती । नाहं दुरात्मा मायावी रावणः । किन्तु भगवतो रामचन्द्रस्य सेवकोऽहम् । (इति पुनस्तदेव प्रहर्षिणीछन्दसा रामाष्टकं पठति) इक्ष्वाकुप्रभवभव इति ।

८२ **सीता** - ण मं तुह वअणं पच्चाअअदि । कधं वाणलाणं माणवेहि सहचज्जं भवे ।[*न मां तव वचनं प्रत्याययति । कथं वानराणां मानवैः साहचर्यं भवेत्।*]

८३ **हनुमान्** - हे देवि सीते ! इदमभिज्ञानाङ्गुलीयकम् । भगवता रामचन्द्रेण स्वकरादवतार्य मदीयहस्ते भवत्याः प्रत्ययार्थं प्रेषितम् । तत्पश्यत्वत्र भवती। (इत्यङ्गुलीयकं समर्पयति)

८४ **सीता** - (अङ्गुलीयकं निरीक्ष्य) अहो दुल्लहं रामहत्थावलम्बिदाङ्गुलीअदंसणं दाणिम् । अहो कधं रमणीअदा अस्स । अये जीविदसव्वस्स सहे !

८५ **दसणेण तुह मे णवीकिदं जीविदं हिअअतावभेसज ।**

न प्रेक्षे = न विलोकयामि । (**इति** = इत्थम्, **अधोमुखी** = निम्नानना तिष्ठति)

८१ **हनुमान् - अयि देवि जानकि** = सीते ! **अत्र भवती** = त्वम्, **अस्मात्** = एतस्मात्, **अनुचरात्** = सेवकात्, **मा बिभेतु** = नैव भयमनुभवतु । **अहम्, दुरात्मा** = दुष्टः, **रावणः** = दशवदनः, **नास्मि । किन्तु** = परन्तु, **भगवतः** = षडैश्वर्यशालिनः, **राघवेन्द्रस्य** = दाशरथेः, **सेवकः** = भृत्यः, **अस्मि** । (पुनस्तदेव इक्षाकुप्रभवेत्यादिप्रहर्षिणीछन्दसि रचितं रामाष्टकं पठति)

८२ **सीता - तव वचनम्** = त्वद्वाक्यम्, **माम्** = सीताम्, **न प्रत्याययति** = न विश्वासयति । **वानराणाम्** = कपीनाम्, **मानवैः** = मनुष्यैः, **साहचर्यम्** = सहचारिता, **कथं भवेत्** = केन प्रकारेण स्यात् ।

८३ **हनुमान् - देवि सीते** = जानकि ! **इदम्** = एतत्, **अभिज्ञानम्** = परिचयप्रदायकम्, **अङ्गुलीयकम्** = ऊर्मिका, **भगवता रामचद्रेण** = राघवेण, **स्वकरात्** = निजहस्तात्, **अवतार्य** = निष्काश्य, **मदीयहस्ते** = मम करे, **भवत्याः** = तव, **प्रत्ययार्थम्** = विश्वासार्थम्, **प्रेषितम्** = प्रहितम् । **अत्र भवती** = सीता, **तत्** = अङ्गुलीयकम्, **पश्यतु** = विलोकयतु । (**इति** = इत्थम्, **अङ्गुलीयकम्** = ऊर्मिकाम्, समर्पयति)

८४ **सीता - अहो** = आश्चर्यम्, **रामहस्ताङ्गुलीयकस्य** = रामकरोर्मिकायाः, **दर्शनम्** = विलोकनम्, **इदानीम्** = अधुना, **दुर्लभम्, अहो, अस्य** = **अङ्गुलीयकस्य, कथम्** = कीदृशी, **रमणीयता** = सौन्दर्यम्, **अये** = भोः, **जीवितस्य** = जीवनस्य, **सर्वस्वम्, सखे** = मित्र ।

८५ **अन्वयः** - हे हृदयतापभेषज, तव दर्शनेन मे जीवितम् नवीकृतम् । हे अङ्गुलीयक,

अङ्गुलीअअ करेहि सीदलं अज्झहत्थपरिरंहणेण मे ।।२६।।

[*अहो दुर्लभं रामहस्ताङ्गुलीयदर्शनमिदानीम् । अहो कथं रमणीयताऽस्य, अये जीवितसर्वस्व सखे!*

दर्शनेन तव मे नवीकृतं जीवितं हृदयतापभेषज ।
अङ्गुलीयक कुरुष्व शीतलं अद्य हस्तपरिरम्भणेन मे ।।२६।।]

(इति स्वाङ्गुलीं निवेश्य केशवेशे गोपायति)

८६ **सीता** - (हनुमन्तं निरीक्ष्य भो कवे ! आणीदं तुए रामपच्छअ आरि अहिणाणं। इमिणा मम पिअणामविलसिदए उम्मिकए जादो मम तइ विस्संहो [*भो कपे! आनीतं त्वया रामप्रत्ययकारि अभिज्ञानम् । अनया मम प्रियनामविलसित-योर्मिकया जातो मम त्वयि विश्रम्भः ।*]

(इति मोहमुपागच्छति)

८७ **हनुमान्** - अयि देवि सीते ! समाश्वसितु समाश्वसितु अत्रभवती । इदानीं

अद्य हस्तपरिरम्भणेन मे शीलतम् कुरुष्व ।

व्याख्या - **हृदयस्य** = मनसो **यस्तापः** = सन्तापस्तस्य **भेषजः** = औषधरूपः, **तत्संबुद्धौ, हृदयतापभेषज** = मनःसंतापौषध! **तव** = अङ्गुलीयकस्य, **दर्शनेन** = विलोकनेन, **मे** = मम, **जीवितम्** = जीवनम्, **नवीकृतम्** = नूतनीकृतम्। **हे अङ्गुलीयक** = भो ऊर्मिके! **अद्य** = अधुना, **हस्तपरिरम्भणेन** = करस्पर्शेन, **मे** = मम, **शीलतम्** = शैत्यम्, **कुरुष्व** = विधेहि ।

सरलार्थः - त्वद्दर्शनेन स्पर्शेन वा मम सन्तापो दूरङ्गत इति । **रथोद्धतावृत्तम्।** तल्लक्षणं यथा -

रात्परैर्नरलगै रथोद्धता ।

(इति स्वाङ्गुलीं निवेश्य केशवेशे गोपयति)

८६ **सीता** - (हनुमन्तं निरीक्ष्य) **भो कपे** = हे वानर! **त्वया** = भवत्या, **रामप्रत्ययकारि**= राघवप्रतीतिकारकम्, **अभिज्ञानम्, आनीतम्, अनया** = एतया, **मम** = सीतायाः, **प्रियनाम्ना** = रामेतिसंज्ञया, **विलसितया** = शोभितया, **ऊर्मिकया** = अङ्गुलीयकेन, **त्वयि**= भवति, **मम**= सीतायाः, **विस्त्रम्भः**= विश्वासः, **जातः**। (इति मोहमुपागच्छति)

८७ **हनुमान्** - **अयि देवि, सीते ! समाश्वसितु** = आश्वस्ता भवतु (वीप्सायां द्विरुक्तिः) **इदानीम्**= अधुना, **तव**= भवत्याः, **आज्ञाम्** = निर्देशम्, **प्रतीक्षे** = प्रतीक्षां करोमि। **चेत्** = यदि, **मह्यम्** = हनुमते, **आज्ञाम्** = निर्देशम्, दीयते तदा -

त्वदाज्ञां प्रतीक्षे दीयते मह्यं चेदाज्ञा ।

८८. जायतामिदमराक्षसं जगद्
वीर्यतोऽद्य भुजदण्डयोर्मम ।
यातु यातुनगरी विनष्टतां
दीर्घतोरणचिता सकानना ।।२७।।

अथवा

८९ भूयतां मम शिरोधिरासनं
तेऽधुनाम्ब ! परिपश्यसि प्रियम् ।
रोचते तव यथा वदस्व मां
तत्करोमि रघुनाथवल्लभे ।।२८।।

---

८८ **अन्वयः** - अद्य, मम, भुजदण्डयोः वीर्यतः इदम् जगत् अराक्षसम् जायताम् । दीर्घतोरणचिता सकानना यातुनगरी विनष्टताम् यातु ।

व्याख्या - अद्य = इदानीम्, **इदम्** = एतत्, **जगत्** = लोकः, **मम** = हनुमतः, **भुजौ दण्डौ इव, तयोः, भुजदण्डयोः** = करयोः, **वीर्यतः** = पराक्रमात्, **न राक्षसः, अराक्षसस्तत्, अराक्षसम्** = अनिशाचरम्, **जायताम्** = प्राप्नोतु । **दीर्घैः** = लम्बैः, **तारेणैः, चिता** = व्याप्ता, **काननेन** = वनेन, **सहिता, यातूनाम्**= रक्षसाम्, **नगरी** = पुरी, **विनष्टताम्** = क्षयम्, **यातु** = प्राप्नोतु ।

सरलार्थः - मद्भुजवीर्येण जगदिदं राक्षसशून्यं जायताम् । दीर्घतोरणैश्चितेयं लङ्का च विनष्टा भवतु, इति । **रथोद्धतावृत्तम्** ।

८९ **अन्वयः** - रघुनाथवल्लभे! अम्ब, मम शिरोधिः ते आसनम् भूयताम्, अधुना प्रियम् परिपश्यसि तव (कृते) यथा रोचते तत् वदस्व ।

व्याख्या - रघुनाथस्य वल्लभा, रघुनाथवल्लभा, तत्संबुद्धौ, भो रघुनाथवल्लभे = हे राघवप्रिये! **अम्ब** = मातः! **मम** = हनुमतः, **शिरोधिः** = बालधिः, पुच्छमित्यर्थः । **ते** = तव, **आसनम्** = विष्टरम्, **भूयताम्** = जायताम् । **अधुना** = अस्यामवस्थायाम्, **प्रियम्** = रामम्, **परिपश्यसि** = सर्वतो विलोकयसि। **तव** = भवत्याः कृते, **यद् रोचते, तत्** = ईप्सितम्, **वदस्व** = कथय ।

सरलार्थः - मम बालधेरासनं क्रियते तदा त्वं सर्वत्र रामं पश्यसि, तव यदीप्सितं विद्यते तद् वद, इति । **रथोद्धतावृत्तमत्र** ।

९० **सीता** - (अश्रूणि विमुञ्चन्ती) भो भो कविसेट्ठ !, राक्खसेहिं पव्वदसद्दिसेहिं तुह्मे किसगत्ताओ वणौअसो कधं सम्मुहे अहिजास्सधत्ति मणो मे णाहिणन्देदि। [*भो भो कपिश्रेष्ठ ! राक्षसैः पर्वतसदृशैः यूयं कृशगात्रा वनौकसः कथं सम्मुखेऽभियास्यतेति मनो मे नाभिनन्दति ।*]

९१ **हनुमान्** - मातर्मैवं ब्रूहि । इदानीं यथेच्छरूपानुकरणशीलोऽहमीदृशं सूक्ष्मरूपं धृत्वा भवत्याः समीपं वर्ते । सर्वान् वानरान् पर्वतसदृशान् वीर्यबलवतो जानीहि । सर्वेऽपि राक्षसान् हन्तुकामा भगवतो रामचन्द्रस्यानुज्ञां प्रतीक्षन्ते । पश्य मेऽधुना स्वस्वरूपम् । (इत्युक्त्वात्मनो मेरुसन्निभकायमभिनयति)

९२ **सीता** - कवे ! अलं दाणिं गत्तविसालदाए गच्छदु भवं रामसमीवं कहेहि

---

९० **सीता** - (अश्रूणि विमुञ्चन्ती) **भो भो कपिश्रेष्ठ** = वानरपुङ्गव!, **पर्वतेन** = अद्रिणा, **सदृशैः** = तुल्यैः, **राक्षसानाम्** = निशाचराणाम्, **संमुखे** = अग्रे, **कृशम्**= स्वल्पम्, **गात्रम्** = शरीरम्, **येषान्ते**, **वनौकसः** = अरण्यवासिनः, **यूयम्** = त्वत्सदृशाः, **कथम्** = केन प्रकारेण, **अभियास्यथ** = आक्रमिष्यथ, **इति मे** = मम, **मनः** = चित्तम्, **नाभिनन्दति** = प्रसन्नं न विद्यते ।

९१ **हनुमान्** - **मातः** = जननि ! **एवम्** = पूर्वोक्तम्, **मा ब्रूहि** = नो वद । **इदानीम्** = अधुना, **यथेच्छम्** = इच्छानुसारम्, **यद् रूपम्** = आकृतिः, **तस्य अनुकरणे** = अनुसरणे शीलम् **यस्य सः**, **तथाविधः**, **अहम्** = हनुमान्, **ईदृशम्** = एतादृशम्, **सूक्ष्मम्** = अतिस्वल्पम्, **रूपम्** = शरीराकारम्, **धृत्वा** = धारयित्वा, **भवत्याः** = तव, **समीपम्** = अग्रे, **वर्ते** = स्थितोऽस्मि । **सर्वान्** = निखिलान्, **वानरान्** = कपीन्, **पर्वतसदृशान्** = अद्रितुल्यान्, **वीर्यम् च बलम् च येषान्ते वीर्यबलवन्तस्तान्**, **वीर्यबलवतः** = शक्तिपराक्रमयुक्तान्, **जानीहि** = विद्धि । **सर्वे** = निखिला अपि, **राक्षसान्** = निशाचरान्, **हन्तुं**, **कामो येषान्ते**, **तथोक्ताः**, **वानराः**, **रामचन्द्रस्य** = राघवस्य, **अनुज्ञाम्** = आज्ञाम्, **प्रतीक्षन्ते**, आज्ञायाः प्रतीक्षायां वानरास्तिष्ठन्तीति भावः । **अधुना** = इदानीम्, **मे** = मम, **स्वम्** =स्वकीयम्, **स्वरूपम्** = आकारम्, **पश्य** = विलोकय । (**इति** = **इत्थमुक्त्वा** = कथयित्वा, **आत्मनः** = स्वस्य, **मेरुसन्निभम्** = सुमेरुपर्वततुल्यम्, **कायम्** = शरीरम्, **अभिनयति** = नाटयति ।)

९२ **सीता** - **भो कपे** = हे वानर ! **इदानीम्** = अधुना, **भवान्** = त्वम्, **रामसमीपम्**= राघवनिकटम्, **यातु** । **शोक एव सागरस्तस्मिन्**, **निमज्जन्त्याः** = ब्रुडन्त्याः,

सव्वं मम सोअसाअरणिमज्जन्तीए विरहदावजं कट्ठम् । जधा मयि तस्स अणुग्गहो भवे तधा विण्णावणीओ रामचन्दो । जेण दुतं आगच्छिअ सअलं दसमुहउलं मारेदु । [*कपे ! अलमिदानीं गात्रविशालतया, गच्छतु भवान् रामसमीपं, तस्यानुग्रहो भवेत्तथा विज्ञापनीयो रामचन्द्रः, येन द्रुतमागत्य सकलं दशमुखकुलं मारयतु ।*]

९३ **हनुमान्** - भगवति ! यथाज्ञन्तेऽनुतिष्ठामि, देहि मे किमपि प्रत्ययसूचकं वाचिकमभिज्ञानचिह्नञ्च ।

९४ **सीता** - (स्वशिरसश्चूडामणिमवतार्य) गेह्लादु भवं इमं अहिण्णाणम् । [*गृह्णातु भवानिदमभिज्ञानम् ।*] (इति समर्पयति) सुणेदु भवं अवरं वाचिअं कहेमि । [*शृणोतु भवानपरं वाचिकं कथयामि ।*]

९५ **हनुमान्** - अवहितोऽस्मि । आज्ञापयतु देवी ।

९६ **सीता** - अत्थि कहिञ्चिचित्तकूडो णाम महं पव्वदो । [*अस्ति कुत्रचिच्चित्रकूटो*

मम = सीतायाः, **सर्वम्** = निखिलम्, **विरहस्य** = रामवियोगस्य, **यस्तापः** = शोकस्तस्माज्जातम् = समुद्भूतम्, **कष्टम्** = दुःखम्, **रामसमीपम्** = राघवस्याग्रे, **कथयतु** = वदतु । **यथा** = येन प्रकारेण, **मयि** = सीतायाम्, **तस्य** = रामस्य, **अनुग्रहः** = कृपादृष्टिर्भवेत्तथा, **रामचन्द्रः** = राघवः, **विज्ञापनीयः** = निवेद्यः, **येन** = त्वत्कथनेन **सः**, **द्रुतम्** = शीघ्रम्, **आगत्य** = एत्य, **सकलम्** = निखिलम्, **दशमुखस्य** = रावणस्य, **कुलम्** = वंशम्, **मारयतु** = घातयतु, नाशयतु इत्यर्थः।

९३ **हनुमान्** - **ते** = तव, **यथाज्ञम्** = आदेशानुसारम्, **अनुतिष्ठामि** = करोमि । **भगवति** = सीते! **मे** = मह्यमपि, **प्रत्ययसूचकम्** = प्रतीतिबोधकम्, **वाचिकम्**= सन्देशम्, **अभिज्ञानचिह्नम्** = प्रत्ययोत्पादकं किमपि द्रव्यजातम्, **देहि**= प्रयच्छ।

९४ **सीता** - (**स्वशिरसः** = निजमस्तकात्, **चूडामणिम्**, **अवतार्य** = निष्काश्य) **भवान्** = त्वम्, **इदम्** = एतत्, **अभिज्ञानम्** = प्रत्ययचिह्नम्, **गृह्णातु** = धारयतु । **भवान्** = त्वम्, **अपरम्** = अन्यद्, **वाचिकम्** = सन्देशम्, **शृणोतु** = आकर्णयतु, **यत्** - **कथयामि** = वच्मि ।

९५ **हनुमान्** - **अवहितः** = सावधानोऽस्मि । **देवी** = भवती, **आज्ञापयतु** = कथयतु।

९६ **सीता** - **कुत्रचित्** = कास्मिँश्चित् स्थाने, **चित्रकूटो नाम** = तदाख्यः, **पर्वतः** = अद्रिरस्ति ।

नाम महान् पर्वतः ।]

९७ **हनुमान्** - दृष्टपूर्वोऽयं मयाचलः ।

९८ **सीता** - एक्कदा रहसि अस्स सिहरे विहरदो रामचन्दस्स णिद्दां उवेइसो जडामुउडमण्डिदं सिरो मम अङ्के त्थाविदं आसी । [*एकदा रहसि अस्य शिखरे विहरतो रामचन्द्रस्य निद्रामुपेयुषो जटामुकुटमण्डितं शिरो ममाङ्के स्थापितमासीत् ।*]

९९ **हनुमान्** - सम्भवति प्रियतमाया देव्यास्तव क्रोडे रहसि शिरोविन्यासस्तत्र भवतो विभोः ।

१०० **सीता** - तदो को वि मंसलोलुवो वाअसो आगच्छिअ डिढतुण्डप्पहारेण मम चलणाङ्गुट्ठं णिद्दअं विदआर । [*ततः कोऽपि मांसलोलुपो वायस आगत्य दृढतुण्डप्रहारेण मम चरणाङ्गुष्ठं निर्दयं विददार ।*]

१०१ **हनुमान्** - नूनमयं दुष्टः काकः । ततस्ततः ।

---

९७ **हनुमान्** - **अयम्** = एषः, **अचलः** = पर्वतः, **मया** = हनुमता, पूर्वं दृष्टः, दृष्टपूर्वः, प्राग् विलोकित इत्यर्थः ।

९८ **सीता** - **एकदा** = एकस्मिन् समये, **रहसि** = एकान्ते, **अस्य** = चित्रकूटस्य, **शिखरे** = शृङ्गे, **विहरतः** = विहारं कुर्वतः, **निद्राम्** = स्वापम्, **उपेयुषः** = प्राप्तवतः, **रामचन्द्रस्य** = राघवस्य, **जटा एव मुकुटम्, तेन मण्डितम्, जटामुकुटमण्डितम्** = सटाकिरीटिविलसितम्, **शिरः** = उत्तमाङ्गम्, **मम** = सीतायाः, **अङ्के** = क्रोडे, **स्थापितम्** = निहितमासीत् ।

९९ **हनुमान्** - **प्रियतमायाः** = प्रियपत्न्याः, **तव** = भवत्याः, **देव्याः** = सीतायाः, **क्रोडे** = अङ्के, **रहसि** = एकान्ते, **तत्र भवतः** = पूजनीयस्य, **विभोः** = रामस्य, **शिरोविन्यासः** = शिरसः स्थापनम्, **संभवति** = भवितुमर्हति ।

१०० **सीता** - **तदा** = तस्मिन् समये, **कोऽपि** = अज्ञातचरः, **मांसे** = पलले, **लोलुपः**= लुब्धः, **वायसः** = काकः, **आगत्य** = समेत्य, **दृढः** = वलीयान् **यस्तुण्डः**, **तस्य प्रहारेण** = आघातेन, **मम** = सीतायाः, **चरणाङ्गुष्ठम्** = पादाङ्गुष्ठम्, **निर्दयम्** = निष्कृपम्, **विददार** = विदीर्णवान् ।

१०१ **हनुमान्** - **नूनम्** = निश्चयेन, **अयम्** = एषः, **काकः**, **दुष्टः** = दुरात्मा । **ततस्ततः**= तदन्तरं किमभवदित्यर्थः ।

१०२ **सीता** - तदो पिअणिद्दाभङ्गसङ्किदहिअअए मए ण किंपि भणिदम् । [*ततः प्रियनिद्राभङ्गशङ्कितहृदयया मया न किमपि भणितम् ।*]

१०३ **हनुमान्** - उचितं पतिव्रताया वीरभार्याया भवत्याः स्वपत्युर्निद्राभङ्ग-दोषस्मरणात्स्वपादकृन्तनबाधासहनशीलत्वम् ततस्ततः ।

१०४ **सीता** - तदो सअणादो उट्ठिदस्स तस्स डिट्ठी मम चलणे णिपदिदा । तदो सोणिदपरिवाहिणीं मम अंगुलीं पेक्खमाणेण कोवसोणिदणअणजुअलेण रामेण एक्का इसिआ वाअसं लक्खीकदुअ मोचिदा । तदो वाअसो अणण्णसरणो उण आगच्छिअ रामचन्दसरणं जेव्व समासादिदो । [*ततः शयनादुत्थितस्य तस्य दृष्टिर्मम चरणे निपतिता । ततः शोणितपरिवाहिनीं ममाङ्गुलीं प्रेक्षमाणेन कोपशोणितनयनयुगलेन रामेणैकेषिका वायसं लक्ष्यीकृत्य मोचिता । ततो वायसोऽनन्यशरणः पुनरागत्य रामचन्द्रशरणमेव समासादित : ।*]

---

१०२ **सीता** - **ततः** = तदनन्तरम्, **प्रियस्य** = रामस्य, **या निद्रा** = शयनम्, **तस्य यो भङ्गः** = नाशस्तस्य, **भयेन** = भीत्या, **शङ्कितम्** = सन्दिग्धम्, **हृदयम्** = चेतो **यस्याः तया, मया** = सीतया, **किमपि न भणितम्** = न प्रोक्तम् ।

१०३ **हनुमान्** - **पतिव्रतायाः** = सत्याः, **वीरस्य भार्या, तस्याः, वीरभार्यायाः** = शूरपत्न्याः, **भवत्याः** = सीतायाः, **स्वपत्युः** = निजवल्लभस्य, **निद्राभङ्गस्य** = स्वप्नविच्छेदस्य, **यो दोषः** = अपराधस्तस्य, **स्मरणात्** = स्मृतेः, **स्वपादयोः** = निजचरणयोः, **यत् कृन्तनम्** = तुण्डप्रहरणम्, **तेन या बाधा** = पीडा, **तस्याः सहनशीलत्वम्** = मर्षणस्वभावत्वम्, **उचितम्** = योग्यम्, **ततस्ततः** = तदनु किमभूदित्यर्थः ।

१०४ **सीता** - **ततः** = तदनन्तरम्, **शयनात्** = निद्रातः, **उत्थितस्य** = प्रबुद्धस्य, **तस्य**= रामस्य, **दृष्टिः**= दर्शनम्, **मम**= सीतायाः, **चरणे** = सव्रणे पादे, **निपतिता, ततः**= तदनन्तरम्, **शोणितम्** = रुधिरं, **परिवहति** = धारयतीति, **ताम्, मम** = मे, **अङ्गुलीम्** = पादशाखाग्रम्, **प्रेक्षमाणेन** = दृष्टवता, **कोपेन** = क्रोधेन, **शोणितम्**= रक्तम्, **नयनयोः** = नेत्रयोः, **युगलम्** = द्वयम् **यस्य सः, तथोक्तः, तेन रामेण**= राघवेण, **एका, इषिका** = वाणः, **वायसम्** = काकम्, **लक्ष्यीकृत्य** = उद्दिश्य, **मोचिता** = त्यक्ता । **ततः** = तदनन्तरम्, **न विद्यते अन्यः शरणम् यस्य सः, अनन्यशरणः** = रक्षकहीनः, **वायसः** = काकः, **पुनः** = भूयः, **समेत्य** = आगत्य, **रामचन्द्रस्य** = राघवस्य, **शरणम्** = आश्रयमेव, **समासादितः** = प्राप्तः।

१०५ **हनुमान्** - अमोघं भगवतो रामचन्द्रस्यास्त्रम् । तत्कथं शरणागतस्य तस्य तेनास्त्रेण मृत्युः ।

१०६ **सीता** - सुणुहि कवे ण तस्य मरणं तदो इसिआदो । किंदु । एक्कं अक्खि जाच्चमाणेण रामेण समप्पिददक्खिणाक्खस्स तस्स तेण एक्कं एव्व अक्खि विद्धम् । [*शृणु हि कपे ! न तस्य मरणं तत ईषिकातः । किन्तु एकमक्षि याच्यमानेन रामेण समर्पितदक्षिणाक्षस्य तस्य तेनैकमेवाक्षि विद्धम् ।*]

१०७ **हनुमान्** - युक्तमेतत्कृपालोस्तस्य विक्रमशालिनः क्षणभङ्गुरजीविते तिरश्चि तादृशमनुकम्पार्द्रं मनः । भगवति सीते ! गृहीतं मया भवत्या वाचिकमिदं साधयाम्यधुना शीघ्रम् । अनुज्ञां देहि मे चिराद्बुभुक्षिताया दुरात्मनो रावणस्य वाटिकायाः फलानि जग्धुम् ।

---

१०५ **हनुमान्** - **भगवतः** = षडैश्वर्यशालिनः, **रामचन्द्रस्य** = दाशरथेः, **अस्त्रम्** = शस्त्रम्, **अमोघम्** = अनिष्फलम्, **तत्** = तस्मात्, **कथम्** = कुतः, **शरणागतस्य**= आश्रयमापन्नस्य, **तस्य** = काकस्य, **तेन अस्त्रेण** = शस्त्रेण, **मृत्युः** = नाशः ?

१०६ **सीता** - **भो कपे** = हे वानर ! **शृणु** = आकर्णय, **ततः** = तदनन्तरम्, **इषिकातः**= वाणात्, **तस्य** = काकस्य, **मरणम्** = मृत्युर्नाभवत् । **किन्तु** = परन्तु, **एकम्** = द्वयोरेकलम्, **अक्षि** = नेत्रम्, **याच्यमानेन** = प्रार्थ्यमानेन, **तेन, रामेण** = दाशरथिना, **समर्पितं दक्षिणाक्षि येन तस्य तथोक्तस्य** = अर्पितवामेतरनेत्रस्य, **तस्य** = वायसस्य, **एकम्** = दक्षिणमेव, **अक्षि** = नेत्रम्, **विद्धम्** = विनष्टम् ।

१०७ **हनुमान्** - **कृपालोः** = दयावतः, **विक्रमशालिनः** = पराक्रमिणः, **तस्य** = रामस्य, **क्षणम्** = स्वल्पेनैव कालेन, **भङ्गुरम्** = नाशवत्, **जीवनम्** = जीवितम् **यस्य तस्मिन्, तिरश्चि** = पक्षिविशेषे **तादृशम्** = तथाभूतम्, **अनुकम्पया** = कृपया, **आद्रम्** = सिक्तम्, **एतत् मनः** = चित्तम्, **युक्तम्** = उचितमेव । **हे भगवति सीते** = जानकि ! **मया** = हनुमता, **भवत्याः** = तव, जानक्या इत्यर्थः, **वाचिकम्** = सन्देशम्, **गृहीतम्** = धारितम् । **अधुना** = इदानीम्, **शीघ्रम्** = द्रुतम्, **साधयामि** = गच्छामि । **प्रायेण ण्यन्तकः साधिर्गमेऽर्थे तु प्रयुज्यते** । **चिरात्** = बहुकालात्, **बुभुक्षिताय** = बुभुक्षापीडिताय, **मे** = मह्यम्, **दुरात्मनः** = दुष्टस्य, **रावणस्य** = दशवदनस्य, **वाटिकायाः** = उद्यानस्य, **फलानि** = सस्यानि, **जग्धुम्** = खादितुम्, **अनुज्ञाम्** = आज्ञाम्, **देहि** = प्रयच्छ ।

१०८ **सीता** - भोदु दे सिवो मग्गः जधेट्ठं फलाइं खादिदुम् । [*भवतु ते शिवो मार्गः, यथेष्टं फलानि खादितुम् ।*]

१०९ **हनुमान्** - साधयामि तावन्नमो भगवत्यै तुभ्यम् (इति परिक्रामति । कियद्दूरं गत्वा विचार्य । आत्मगतम्) नाहं सन्देशहरमात्रः स्वल्पवीर्यो रामचन्द्रस्य दूतः। किञ्चाहमिदानीं सकलं राक्षसकुलं हन्तुं शक्नोमि । कथं किमप्यकृत्वैव क्षुद्रवन्निवर्तिष्ये । भवतु प्रभोरनुज्ञां विनाऽपि मम बाह्वोर्विलसितं दुःखमनुभवन्तु दुष्टा राक्षसाः ।

यतः -

११० भृत्यानां श्रेष्ठ एषोऽनुदितमपि सुधीरुहति स्वामिकृत्यं
छन्दं ज्ञात्वा विरुद्धं सुफलमधिभुवः पूर्वपश्चादुदर्कम् ।

---

१०८ **सीता** - **यथेष्टम्**= इच्छानुसारम्, **फलम्**, **खादितुम्**= जग्धुम्, **ते** = तव, **शिवः**= कल्याणमयः, **मार्गः** = पन्थाः, **भवतु** ।

१०९ **हनुमान्** - **साधयामि** = गच्छामि, तावदिति वाक्यालङ्कारे । **भगवत्यै** = देव्यै, **तुभ्यम्** = सीतायै, **नमः** । (**इति परिक्रामति** = परिभ्रमति, **ततः** = **किञ्चिद्दूरम्**= विप्रकृष्टम्, **गत्वा** = प्राप्य, **विचार्य** = चिन्तयित्वा च आत्मगतम्) **अहम्** = हनुमान्, **सन्देशहरः** = वाचिकग्रहः, **एव**, **स्वल्पम् वीर्यम् यस्य सः**, **स्वल्पवीर्यः**= अत्यल्पपराक्रमः, **रामचन्द्रस्य** = राघवस्य, **दूतः** = सन्देशहरः, **न** = नास्मीत्यर्थः। **किञ्च** = परञ्च, **अहम्** = हनुमान्, **इदानीम्** = अधुना, **सकलम्** = निखिलम्, **राक्षसानाम्** = निशाचराणाम्, **कुलम्** = समूहम्, **हन्तुम्** = घातयितुम्, **शक्नोमि**= समर्थो भवामि । **कथम्** = केन प्रकारेण, **किमपि अकृत्वा** = अविधाय, **क्षुद्रवत्**= तुच्छ इव, **निवर्तिष्ये** = प्रत्यावर्तिष्ये । **भवतु** = अस्तु, **प्रभोः** = रामस्य, **अनुज्ञाम्**= आज्ञाम् विनाऽपि, **मम** = हनुमतः, **बाह्वोः** = करयोः, **विलसितम्** = क्रीडितम्, **दुःखम्** = कष्टम्, **दुष्टाः** = दुरात्मानः, **राक्षसाः** = दानवाः, **अनुभवन्तु** = हृदयगतं कुर्वन्तु ।

११० अत्र हनुमान् दूतानामुत्तम-मध्यमाधमत्वं प्रकाशयति - **भृत्यानामिति** ।

अन्वयः - सुधीः अधिभुवः छन्दम् ज्ञात्वा पूर्वपश्चात् अविरुद्धम् सुफलम् उदर्कम् स्वामिकृत्यम् अनुदितमपि ऊहति, एषः भृत्यानाम् श्रेष्ठ (अस्ति) यः सदा नायकोक्तानुसारम् अनुसरति असौ मध्यमः (अस्ति) यः इह प्रोक्तम् वा अनुक्तम्

भृत्योऽसौ मध्यमः स्यादनुसरति सदा नायकोक्तानुसारं
प्रोक्तं वानुक्तमर्थं य इह न कुरुते विद्धि तं स्वं कलत्रम् ।।२९।।

अथ च -

१११ बुद्ध्वाशयं सकलमेव बलं विदित्वा
प्रत्यर्थिनां पुनरटन्ति यथार्हवर्णाः ।

अर्थम् न कुरुते तम् स्वम् कलत्रम् विद्धि ।

व्याख्या - **सु** = शोना, **धीः** = बुद्धिर्यस्य सः, **सुधीः** = विद्वान्, **अधिभुवः**= नायकस्य, **अधिभूर्नायको नेतेत्यमरः** । **छन्दम्** = आशयम्, **अभिप्रायः छन्द आशयः**, इत्यमरः । **ज्ञात्वा** = विदित्वा, **पूर्वञ्च तत् पश्चात्, पूर्वपश्चात्** = अग्रे तदनु च, **न विरुद्धम् अविरुद्धम्** = अप्रतिकूलम्, **सु** = शोभनम्, **फलम्** = परिणामो **यस्य तत्तथाभूतम्, उदर्कम्** = उत्तरफलम्, **स्वामिनः** = विभोः, **कृत्यम्**= कर्तव्यम्, **अनुदितम्** = अकथितमपि **यः ऊहति** = विचारयति, विचार्य करोतीत्यर्थः। **एषः** = असौ, **भृत्यानाम्** = अनुचराणाम्, **श्रेष्ठः** = प्रथमोऽस्ति । **यश्च, सदा** = सर्वदा, **नायकस्य** = नेतुः, **यत्, उक्तम्** = कथनम्, (नपुंसके भावे क्तः) **तस्यानुसारम्** = तदनुरूपम्, **अनुसरति** = अनुयाति, **असौ** = एषः, **मध्यमः** = द्वितीयः, भृत्यो विद्यते । **पुनः, यः, इह** = अत्र लोके, **प्रोक्तम्** = कथितम्, स्वामिनेति शेषः । **वा** = अथवा, **अनुक्तम्** = अकथितम्, **न कुरुते, तम्** = तादृशं भृत्यम्, **स्वम्** = स्वकीयम्, **कलत्रम्** = स्त्रियम्, **विद्धि** = जानीहि, इति विरोधः। **कलत्रम्** = श्रोणीम्, जानीहीति तत्समाधानम् ।

तदत्र श्रोणीपदस्य, अधमाङ्गबोधकतया यः प्रोक्तं वाऽनुक्तमपि स्वामिनः कृत्यं न करोति तस्यातिशयाधमत्वं व्यज्यते । अत्र **विरोधाभासालङ्कारः**। **स्रग्धरावृत्तमत्र** ।

१११ **अन्वयः** - पुनः यथार्हवर्णाः प्रत्यर्थिनाम् सकलम् एव आशयम् बुद्ध्वा बलञ्च विदित्वा अटन्ति । अखिलम् प्रियतमस्य वनस्य नाशात् सङ्कोपितः दशमुखः प्रकटीकरोति (इति) जाने ।

व्याख्या - **पुनः** = भूयः, **यथार्थर्हवर्णाः** = चराः, **प्रत्यर्थिनाम्** = शत्रूणाम्, **सकलम्** = समग्रम्, **आशयम्** = अभिप्रायम्, **बुध्वा** = ज्ञात्वा, **बलम्**= सैन्यम्, **ज्ञात्वा** = विदित्वा, **अटन्ति** = भ्रमन्ति, **प्रियतमस्य** = अतिशयप्रियस्य,

जानेऽखिलं प्रियतमस्य वनस्य नाशा-
त्संकोपितो दशमुखः प्रकटीकरोति ।।३०।।

(इति निष्क्रान्ताः सर्वे)

इति षष्ठोऽङ्कः

वनस्य = उद्यानस्य, **अखिलम्** = समग्रम्, **यथा स्यात्तथा**, **नाशात्** = क्षयात्, **संकोपितः** = क्रुद्धः, **दशमुखः** = रावणः, **प्रकटीकरोति** = आत्मानं प्रदर्शयति, **इति जाने** = विचारयामि ।

सरलार्थः - चराः खलु शत्रूणामाशयं सैनिकबलञ्च ज्ञातुं भ्रमन्ति । अहमपि रावणस्याशयं बलञ्च ज्ञातुं सकलं वनं विनाश्य तस्मात् क्रुद्धं रावणं प्रकटीकरोमीति। **वसन्ततिलकावृत्तम्** ।

(इति निष्क्रान्ताः सर्वे)

इति श्रीनीलमणिढुङ्गानाविरचितायां यशोदाभिधायां

संस्कृतटीकायां सुन्दरचरितनाटकस्य

षष्ठोऽङ्कः समाप्तः

सुन्दरचरितनाटकम्

सप्तमोऽङ्कः

सप्तमाङ्ककथासारः

उद्याने कुसुमावचयं कुर्वतीभ्यश्चेटीभ्यो वनविनाशवृतान्तं निशम्य रावणो वानरं बद्ध्वा तमानेतुं सैन्यं प्रेषयितुं प्रहस्तं निर्दिशति । स च सशस्त्रं विमर्दनाख्यं सैन्यं प्रेषयति । तच्च सर्वं भीषणाकृतिना वानरेण करकलितलोहमयस्तम्भेन व्यापाद्यते । तच्छ्रुत्वा दुःखितोऽसौ रावणो लुब्धका जम्बूकमिव हनुमन्तं बद्धुं प्रथमं पञ्च साधिपाः सेनाः, ततश्च सप्त सेनाः प्रेषयति । ताः सर्वाश्च घातितान् निशम्य सभटो रावणस्य कनिष्ठसुताऽक्षकुमारः प्रमदावनविनाशकं वानरं सजीवं बद्ध्वाऽऽनेतुं प्रतिष्ठते । समरे घनं प्रहरता हनुमता ससैन्ये तस्मिन्नपि हते मन्दोदरी रावणश्च पुत्रशोकाकुलौ भृशं विलपतः। ततः क्रुद्धो दशवदनस्तं विपिनान्तकं बद्ध्वा पुरः स्थापयितुं शक्रजितं मेघनादं ज्येष्ठपुत्रं ससैन्यं निर्दिशति । स च प्रमदावनमुपेत्य ब्रह्मास्त्रेण हनुमन्तं निबध्य तत्र प्रत्यागच्छति। तद्दृष्ट्वाऽसौ मोमुद्यते, वनविनाशकारणं प्रष्टुं प्रहस्तञ्च निर्दिशति । तेन च पृष्टोऽसौ कपिरपि सर्वं स्वपरिचयं वनविनाशस्य कारणञ्च प्रस्तूय अहंमतिं परित्यज्य रामभजनाय रावणमुपदिशति च । तच्छ्रुत्वा कोपेन हन्तुमुद्यतं रावणं विभीषणो दूतो नैव वधार्ह इति निगद्य निवारयति। तस्यानुजस्यैव परामर्शमनुसृत्य तैलसिक्तांशुकैः पुच्छं वेष्टयित्वा बह्निं संयोज्य, निशाचराः कपिं नगरं भ्रामयितुं यतन्ते । प्रज्वलिते पुच्छवह्नावसौ विभीषणभवनं विहाय सर्वाण्यपि लङ्कानगरनिकेतनानि भस्मीकरोति । ततः समुद्रमुपेत्य निर्वापितपुच्छदहनज्वालोऽसौ सीतासमीपमेत्य तस्याः सन्देशं गृहीत्वा समुद्रमुल्लङ्घ्य अङ्गदजाम्बवन्नलादीनां प्लवगानां पुरतः समुपतिष्ठते । सीतान्वेषणकार्यं साधितमनेनेति मत्वा हर्षेण सर्वे वनौकसस्तस्य हनुमतो लाङ्गूलं चुम्बन्ति । ततश्च सर्वे वानरा फलं भक्षयितुं मधूद्यानं प्रविशन्ति । दधिमुखेन निवेदितवृतान्तोऽसौ सुग्रीवस्तानाह्वयति । रामोऽपि समागतान् वानरान् स्वागतं व्याहरति । हनुमान् च सर्वमपि वृतान्तं ससीतासन्देशं रामं श्रावयति, सीताप्रहितमभिज्ञानञ्चार्पयति । सर्वे कार्यं संपन्नं मत्वा नितरामेव हर्षमनुभवन्ति । रामवाक्येन च नाटकसमाप्तिर्जायते ।

अथ सप्तमोऽङ्कः

(ततः प्रविशन्ति प्रमदावनं कुसुमावचयमभिनयन्त्यो राक्षसचेट्यः)

१ **एका** - हला पिअसहि, जाणासि तुअं, किंति अज्झ कुसुमावचअणे णिउत्ता अह्मे [*हला प्रियसखि, जानासि त्वं, किमिति अद्य कसुमावचयने नियुक्ता वयम् ।*]

२ **अन्या** - ण मए अवगदम् । कहेहि मं पिअसहि ! [*न मयाऽवगतम् । कथयस्व मे प्रियसखि !*]

३ **प्रथमा** - अज्झ अह्माणं भट्टारओ आत्ताणं सुउमार कुसुमेहिं परिक्कदुअ सीदां विमोहिदुं गच्छेदि । [*अद्यास्माकं भट्टारक आत्मानं सुकुमारकुसुमैः परिष्कृत्य सीतां विमोहितुं गच्छति ।*]

४ **तृतीया** - सच्चम् सच्चम् । अज्झ गतरत्तिं देइए आहूदा अमन्तेउरं समागदासम्।

(**ततः** = तदन्तरम्, सर्वेषु निष्क्रान्तेषु इन्यर्थः । **प्रमदावने** = अबलोद्याने, **कुसुमानाम्** = पुष्पाणाम्, **अवचयनम्** = अवचायम्, **अभिनयन्त्यः** = नाटयन्त्यः, **राक्षसानाम्** = निशाचराणाम्, **चेट्यः** = दास्यः, **प्रविशन्ति** = प्रवेशं कुर्वन्ति)

१ **एका** - हला प्रिये ! **सखि** = वयस्ये! **अद्य** = अस्मिन् दिने, **कुसुमानाम्** = पुष्पाणाम्, **अवचयने** = अवचाये, **वयम्** = चेट्यः, **किमिति** = किमर्थम्, **नियुक्ताः** = आदिष्टा इति, **त्वम्** = भवती, **जानासि** = वेत्सि ?

२ **अन्या** - **मया** = त्वत्सख्या, **न अवगतम्** = न ज्ञातम्, **प्रियसखि** = प्रियालि! **मे**= मह्यम्, **कथयस्व** = वद ।

३ **प्रथमा** - **अद्य** = अस्मिन् दिने, **अस्माकम्** = राक्षसीनाम्, **भट्टारकः** = राजा, रावणः, **आत्मानम्** = स्वम्, **सुकुमाराणि** = कोमलानि **यानि कुसुमानि** = पुष्पाणि, **तैः**, **परिष्कृत्य** = अलङ्कृत्य, **सीताम्** = जानकीम्, **विमोहितुम्** = मोहमुत्पाद्य वशीकर्तुम्, **गच्छति** = याति ।

४ **तृतीया** - **सत्यम्, सत्यम्** = अवितथम्, अवितथम्, **अद्य** = अस्मिन् दिने, **गतरात्रौ** = व्यतीतनिशायाम्, **देव्या** = मन्दोदर्या, **आहूता** = आकारिता, **अन्तःपुरम्**= शुद्धान्तम्, **समागता** = प्राप्ता आसम् ।

[*सत्यं सत्यम् । अद्य गतरात्रौ देव्याऽऽहूतोऽन्तःपुरं समागत आसम् ।*]

५ **प्रथमा** - तदो किम् । [ततः किम्]

६ **तृतीया** - इदं वुत्तन्तं सुणिअ अप्पसण्ण विअ देई । [*इदं वृत्तान्तं श्रुत्वाऽप्रसन्नेव देवी ।*]

७ **द्वितीया** - सहिओ! अवचिदाइं कुसुमाइं मालागधणपज्जत्ताइं ता गच्छामो अन्तेउरम् । [*सख्यः! अवचितानि कुसुमानि मालाग्रथनपर्याप्तानि तद्गच्छामान्तःपुरम् ।*]

(नेपथ्ये)

८ आः कोऽयं मयि स्थिते लङ्कायां सीतामभिभवितुमुत्सहते, तिष्ठ क्षणमात्रं कुणपाशन ! पश्य-

९ **अद्यैव प्रमदावनस्य सकलान् वृक्षान्समुत्पाटये**
तत्रत्या विहगा मृगाश्च विविधा गच्छन्तु भीता बहिः ।
ये मे सन्मुखमापतन्ति सहसा ते यान्तु संचूर्णतां
प्लायध्वं प्रमदावनाद् द्रुततरं चेज्जीवितुं वाञ्छथ ।।१।।

(चेट्यः श्रुत्वा वेपन्ते)

---

५ **प्रथमा** - **ततः** = तदनन्तरम् किमभूदित्यर्थः ।

६ **तृतीया** - **देवी** = मन्दोदरी, **इदम्** = एतत्, **वृतान्तम्** = वार्ताम्, **श्रुत्वा** = आकर्ण्य, **अप्रसन्ना** = खिन्ना इव जातेत्यर्थः ।

७ **द्वितीया** - **भो सख्यः** = हे प्रियाल्यः ! **मालाग्रथनाय** = स्रजो गुम्फनाय **पर्याप्तानि** = बहूनि, **कुसुमानि** = पुष्पाणि, **अवचितानि** = सञ्चितानि । **तत्** = तस्मात्, **अन्तःपुरम्** = शुद्धान्तम्, **गच्छाम** = याम ।

(नेपथ्ये)

८ **आः मयि** = वानरे, **स्थिते** = विद्यमाने, **कोऽयम्** = किंनामकः, **एषः**, **सीताम्** = जानकीम्, **अभिभवितुम्** = तिरस्कर्तुम्, पीडयितुमित्यर्थः । **उत्सहते** = उद्यमते । **भोः कुणपाशन** = राक्षस, **क्षणमात्रम्** = किञ्चित्समयम्, **तिष्ठ**, **पश्य** = विलोकय।

९ **अन्वयः** - अद्य एव प्रमदावनस्य सकलान् वृक्षान् समुत्पाटये । तत्रत्याः विविधाः विहगाः मृगाः च भीताः बहिः गच्छन्तु । ये मे सन्मुखम् आपतन्ति ते सञ्चूर्णताम् यान्तु । चेत् जीवितुम् इच्छथः प्रमदावनात्, द्रुततरम् प्लायध्वम् ।

व्याख्या- **अद्य**= अस्मिन्नेव दिने, **प्रमदावनस्य**= वनितोद्यानस्य, **सकलान्**=

१० **एका**- हला पिअसहिओ, ण एत्थ त्थातव्वं अह्मेहिं तुण्णं एत्थ णिउञ्जे पविसामो।
[*हला प्रियसख्यः ! नात्र स्थातव्यस्माभिस्तूर्णमत्र निकुञ्जे प्रविशाम ।*]

(इत्यन्तर्हितास्तिष्ठन्ति)

(ततः प्रविशति प्रमदावने तथाभूतो हनुमान्)

११ **हनुमान्** - (आत्मगतम्) किमिदं प्रमदावनं रावणहतकस्य तव । पश्य त्वमस्य विनाशं दुष्टराक्षस !।

१२ **एकां वञ्जुलकाननान्तरगतां सीतालयां शिंशपां**
हित्वा ते क्षणतः करोमि नगरीं लङ्कामवृक्षामहम् ।

समग्रान्, **वृक्षान्** = तरून्, **समुत्पाटये** = उत्पाटनं करोमि । **तत्रत्याः** = प्रमदावनस्थाः, **विविधाः**= नैकविधाः, **विहगाः** = पक्षिणः, **मृगाः** = हरिणाश्च, **भीताः** = त्रस्ताः, **बहिः**= बाह्यस्थानम्, **गच्छन्तु** = यान्तु । **ये** = प्राणिनः, **मम** = हनुमतः, **सन्मुखम्**= अग्रे, **आपतन्ति**= आयान्ति, **ते** = प्राणिनः, **सञ्चूर्णताम्** = चूर्णीभावम्, **यान्तु** = प्राप्नुवन्तु। **चेत्**= यदि, **जीवितुम्** = प्राणान्, **धारयितुम्, इच्छथ, तदा प्रमदावनात्** = वनितोद्यानात्, **द्रुततरम्** = अतिशीघ्रम्, **प्लायध्वम्** = पलायनं कुरुत ।

सरलार्थः - अहमत्रत्यान् सर्वानपि वृक्षानुत्पाटये । अतोऽत्रत्याः सकला अपि बहिर्यान्तु, अन्यथा सर्वे चूर्णिता भवथ इति ।

शार्दूलविक्रीडितं वृत्तम् ।

(चेट्यः श्रुत्वा वेपन्ते)

१० **एका** - हला **प्रियसख्यः** = भो प्रियवयस्यः ! **अत्र** = अस्मिन् स्थाने, **अस्माभिः**= राक्षसीभिः, **न स्थातव्यम्** = नैव स्थेयम् । **तूर्णम्** = शीघ्रम्, **अत्र** = अस्मिन्, **निकुञ्जे** = लतागृहे, **प्रविशाम** = अन्तर्याम ।

(**इति** = इत्थम्, **अन्तर्हिताः** = अन्तर्गताः, **तिष्ठन्ति** = निवसन्ति)

(**ततः** = तदनन्तरम्, **तथाभूतः** = तादृशः, **हनुमान्** = पवनसुतः, **प्रविशति** मञ्चमित्यर्थः)

११ **हनुमान्** - (**स्वगतम्**) **इदम्** = एतत्, **रावणहतकस्य** = दुष्टस्य दशमुखस्य, **प्रमदावनम्** = वनितोद्यानम्, **किम् ? भो दुष्टराक्षस** = दुरात्मन् निशाचर ! **पश्य**= विलोकय ।

१२ **अन्वयः** - अहम् एकाम् वञ्जुलकाननान्तरगताम् सीतालयाम् शिंशपाम् हित्वा ते लङ्काम् नगरीम् क्षणतः अवृक्षाम् करोमि । युधि ये मम अग्रतः यान्ति तान् सर्वान्

ये वा यान्ति ममाग्रतो युधि तदा सर्वान् हनिष्यामि ताँ-
स्तम्भो मे पुरतोऽयसोऽस्ति विधिना क्षिप्तो वधायेव वः ।।२।।

१३ चेट्यः - अह्मो, को अअं पव्वदसद्दिसो मक्कडो अह्माणं भट्टुणे पिअतमस्स प्पमदावणस्स रुक्खाणं उत्पाडणं करेदि । ताद्दुतपदं भट्टारअं विण्णवेमो । [*अहो कोऽयं पर्वतसदृशो मर्कटोऽस्माकं भर्तुः प्रिययतमस्य प्रमदावनस्य वृक्षानामुत्पाटनं करोति । तद्द्रुतपदं भट्टारकं विज्ञापयामः ।*]

(इति निष्क्रान्ताः) इति विष्कम्भकः ।

(ततः प्रविशति सपरिवारो राक्षसराजो रावणः)

हनिष्यामि । मे पुरतः वः वधाय विधिना क्षिप्तः इव अयसः स्तम्भः अस्ति।

व्याख्या - **अहम्** = हनुमान्, **एकाम्** = केवलम्, **वञ्जुलस्य** = अशोकस्य, **कानने** = विपिने, **अन्तर्गताम्** = अभ्यन्तरस्थिताम्, **सीतायाः** = जानक्याः, **आलयः** = आश्रयो यस्याम् सा ताम्, **शिंशपाम्** = तन्नामकवृक्षम्, **हित्वा** = त्वक्त्वा, **ते** = तव, रावणस्येत्यर्थः । **लङ्काम् नगरीम्** = लङ्कापुरम्, **क्षणतः** = स्वल्पेनैव कालेन **न विद्यन्ते वृक्षा यस्याम् सा ताम् अवृक्षाम्** = तरुहीनाम्, **करोमि** = विदधामि । **युधि** = समरे, **ये** = राक्षसाः, **मम** = हनुमतः, **अग्रतः** = पुरः, **यान्ति** = प्राप्नुवन्ति, **तान् तान्** = पुरोवर्तिनो राक्षसान्, **हनिष्यामि** = घातयिष्यामि । **मे** = मम, **पुरतः** = अग्रे, **वः** = राक्षसानाम्, **वधाय** = मारणाय, **विधिना** = दैवेन, **क्षिप्तः** = प्रक्षिप्त इव, **अयसः** = लौहस्य, **स्तम्भः** = स्थूणः, **अस्ति** = विद्यते ।

सरलार्थः - केवलं वञ्जुल-काननान्तरगतं सीताश्रयं शिंशपावृक्षं विहाय सकलमपि लङ्कानगरं निर्वृक्षं करिष्यामि । अथ च युधि मत्सन्मुखान् सकलानपि राक्षसान् अनेनैव पुरःस्थेन अयसस्तम्भेन हनिष्यामिति ।

क्षिप्त इवेत्यत्र, **उत्प्रेक्षालङ्कारः** । **शार्दूलविक्रीडितं वृत्तम्** ।

१३ **चेट्यः** - **अहो** = आश्चर्यम्, **अयम्** = एषः, **पर्वतसदृशः** = अद्रिसमानः, **कः**, **मर्कटः** = कपिः, **अस्माकं भर्तुः** = रावणस्य, **प्रियतमस्य** = अत्यन्तमभीष्टस्य, **प्रमदावनस्य** = वनितोद्यानस्य, **वृक्षाणाम्** = तरूणाम्, **उत्पाटनम्** = उन्मूलनम्, **करोति** = विदधाति । **तावत्** = आदौ, **द्रुतपदम्** = शीघ्रम्, **गत्वा**, **भट्टारकम्**= राजानम्, **निवेदयाम** = कथयाम ।

इति **निष्क्रान्ताः** । इति **विष्कम्भकः** ।

(**ततः** = चेटीषु निर्गतासु, **सपरिवारः** = मन्दोदर्यादिपरिजनयुतः, **राक्षस-राजः** = निशाचरपतिः, **रावणः** = पौलस्त्यः, **प्रविशति** = रङ्गमञ्चे प्राप्नोति)

१४ **रावणः** - आः केन प्रमदावनं ममोत्पाटितम् । अयि मन्दोदरि! सर्वं प्रष्टव्या इमाश्चेट्यः ।

१५ **मन्दोदरी** - (स्वगतम्) तुह अत्तणो विणाओ म्मुहप्पवत्तकेण भाअधेएण । अविदु रामप्पदालोलुवस्स तुह प्पमदावणविणासमत्तं किं चित्तं । अत्तणो विणासेवि संसओ । [*तवात्मनो विनाशोन्मुखप्रवर्तकेन भागधेयेन । अपि तु रामप्रमदालोलुपस्य तव प्रमदावनविनाशमात्रं किं चित्रम् । आत्मनो विनाशेऽपि संशयः ।*] (प्रकाशम्) हञ्जे केण विणासिदं प्पमदावणं विण्णवेध तुह्मे अज्जउत्तम्। ण अहं विण्णवेमि । [*हञ्जे, केन विनाशितं प्रमदावनं विज्ञापयत यूयमार्यपुत्रम् । नाहं विज्ञापयामि ।*]

१६ **चेट्यः** - केणवि अपरिचिदाकिदिणा वाणलसद्दिसेण पव्वदसण्णिहेण सीताए आन्त्रणं कदुअ पमदावणं उत्खादिदम् । [*कस्याप्यपरिचिताकृतेर्वानरसदृशस्य पर्वतसन्निभस्य सीतयामन्त्रणं कृत्वा प्रमदावनमुत्खातितम् ।*]

---

१४ **रावणः** - **आः** = भोः! **मम** = रावणस्य, **प्रमदावनम्** = वनितोद्यानम्, **केन उत्पाटितम्** = उन्मूलितम् । **अयि मन्दोदरि** = भो प्रिये ! **इमाः** = एताः, **सर्वाः**= निखिलाः, **चेट्यः** = दास्यः, प्रष्टव्याः ।

१५ **मन्दोदरी** - (**आत्मगतम्**) **तव** = भवतः, **आत्मनः** = स्वस्य, **विनाशस्य** = क्षयस्य, **उन्मुखम्** = संमुखम्, **प्रवर्तयतीति तेन भागधेयेन** = दैवेन, वनितोद्यान-मुत्पाटितमित्यर्थः । **अपि तु** = किञ्च, **रामस्य** = दाशरथेः, **या प्रमदा** = वनिता सीतेत्यर्थः । **तस्यां लोलुपस्य** = लुब्धस्य, आशक्तस्येत्यर्थः । **तव** = भवतः, **प्रमदावनस्य** = वनितोद्यानस्य, **विनाशमात्रम्** = क्षय एव, **किम् चित्रम्** = किमाश्चर्यभूतम् ? **आत्मनः** = स्वस्य, **प्राणानाम्** = असूनाम्, **नाशे** = क्षयेऽपि, **संशयः** = सन्देहः, (प्रकाशम्) **हञ्जे** = हला, **केन, प्रमदावनम्** = वनितोद्यानम्, **विनाशितम्** = क्षयं नीतम् । **यूयम्** = भवन्तः, **आर्यपुत्रम्** = भट्टारकम्, स्वामिनम्, **निवेदयत** = कथयत । **अहम्** = मन्दोदरी, **न विज्ञापयामि** = न निवेदयामि ।

१६ **चेट्यः** - **अपरिचिता** = अज्ञाता, **आकृतिः** = आकारो **यस्य तस्य, पर्वतेन सन्निभः**= तुल्यः, **पर्वतसन्निभस्तस्य**= अद्रितुल्यस्य, **वानरसदृशस्य**= कपितुल्यस्य, **कस्यापि** = पशुयोनेः, **आमन्त्रणम्** = निमन्त्रणम्, **विधाय** = कृत्वा, **सीतया** = जानक्या, **प्रमदाया वनम्** = वनितोद्यानम्, **उत्खातितम्** = उत्पाटितम् ।

१७ **रावणः** - (सकोपम्) आः वानराधम! तिष्ठ क्षणमात्रम् । द्रक्ष्यसि त्वं यमालयम्। कोऽत्र भोः ?

१८ **दौवारिकः** - अहमस्मि नकुलतुण्डनामा तव सेवकः । किमाज्ञापयसि मामनुचरम् ।

१९ **मन्दोदरी** - मा ताव अज्जउत्त, कधं अवसउणसूचअमुहं णउलतुण्डं पढमं कज्जारंहे पेक्खसे । [*मा तावदार्यपुत्र, कथमपशकुनसूचकमुखं नकुलतुण्डं प्रथमं कार्याम्भे प्रेक्षसे ।*]

२० **रावणः** - दिष्ट्याऽयमेवेदानीं मम द्वारि समुपतिष्ठते । न त्वयान्यथा शङ्कनीयम्। नकुलतुण्ड! गच्छ त्वमिदानीममात्यं प्रहस्तं ब्रूहि-प्रेषयित्वा शस्त्रभृतां भटानां यूथं प्रमदावनविनाशको वानरो बध्वानीयतामिति मद्वचनात् ।

२१ **दौवारिकः** - यदाज्ञापयति देवः । (इति निष्क्रान्तः)

---

१७ **रावणः - (सक्रोधम्) आः वानराधम** = दुष्टकपे! **क्षणमात्रम्** = स्वल्पकालम्, **एव तिष्ठ** = प्रतीक्षस्व, **त्वम्** = वानरः, **यमालयम्** = कालसदनम्, **द्रक्ष्यसि** = विलोकयिष्यसि, मृत्युं प्राप्स्यसीत्यर्थः । **भोः, अत्र** = स्थानेऽस्मिन्, कोऽस्तीत्यर्थः।

१८ **दौवारिकः - देव! नकुलतुण्डो नाम यस्य सः, तव** = भवतः, **सेवकः** = भृत्योऽहमस्मि । **माम्** = नकुलतुण्डम्, **अनुचरम्** = भृत्यम्, **किम् आज्ञापयसि**= आदिशसि ।

१९ **मन्दोदरी - आर्यपुत्र** = स्वामिन्, **मा तावत्** = नहि, **प्रथमम्** = आदौ, कार्यस्य प्रारंभे, **अपशकुनम्** = कुलक्षणं **सूचयतीति अपशकुनसूचकम् वदनम्** = मुखं **यस्य सः, तम्, नकुलतुण्डम्** = तदाख्यम् सेवकम्, **प्रेक्षसे** = विलोकयसि ?

२० **रावणः - दिष्ट्या**= भाग्येन, **अयम्**= नकुलतुण्ड **एव, द्वारि**= द्वारस्थाने, **समुपतिष्ठते**= उपस्थितोऽस्ति, **अन्यथा** = विपरीतम्, **त्वया** = मन्दोदर्याः, **न शङ्कनीयम्**= न विचारणीयम् । **भो नकुलतुण्ड, त्वम्, इदानीम्** = अधुना, **गच्छ** = याहि, **अमात्यम्**= सचिवम्, **प्रहस्तम्, ब्रूहि** = कथय, **शस्त्रभृताम्** = अस्त्रधारिणाम्, **भटानाम्** = सैन्यानाम्, **यूथम्** = समूहम्, **प्रेषयित्वा** = सम्प्रेष्य, **प्रमदावनस्य** = वनितोद्यानस्य **विनाशकः** = ध्वंसकः, **वानरः** = कपिः, **मद्वचनात्** = मदाज्ञानुसारेण, **बद्ध्वा**= पाशबद्धं कृत्वा, **आनीयताम्** = प्राप्यताम् ।

२१ **दौवारिकः - देवः** = भवान्, **यद् आज्ञापयति** = आदिशति तत्करोमीत्यर्थः ।

२२ **रावणः** - अयि देवि! कथमधुना मम वामबाहुः स्फुरति क्रोधादिव ।

२३ **मन्दोदरी** - अज्जउत्त, मं किं अजानन्त इव अवलवसि । ण दे जुत्तं अत्तणो अवचअसूचअं लक्खणं णिह्णेदुम् । ण कदावि कोवादो वामबाहू प्फुरेदि । सूचिदं अणेण किं विदुट्ठं फलं दे । [*आर्यपुत्र! मां किमजानन्निवापलपसि । न ते युक्तमात्मनोऽपचयसूचकं लक्षणं निह्नोतुम् । न कदापि कोपाद्वामबाहुः स्फुरति। सूचितमनेन किमपि दुष्टं फलं ते ।*]

(नेपथ्ये)

२४ हा हताः स्मः, हा हताः स्मोऽनेन सर्वं निषूदितम् ।

२५ **रावणः** - (कर्णं दत्वा) कः कोऽत्र भोः !

२६ **द्विजिह्वः** - देव ! अहमस्मि द्वारि नकुलतुण्डप्रतिनिधिर्द्विजिह्वनामा तवानुचरो नकुलतुण्डं प्रतीक्षमाण उपस्थितः ।

२७ **मन्दोदरी** - कहं अअं वि तादिस जेव्व अवसउणसूचओ दौआरिओ । वञ्चिदा

---

२२ **रावणः - अयि देवि** = भो मन्दोदरि! **मम** = रावणस्य, **वामः** = दक्षिणेतरश्चासौ **बाहुः** = हस्तः, **क्रोधात्** = कोपात्, **स्फुरति** = ईषच्चलतीवेत्युत्प्रेक्षा ।

२३ **मन्दोदरी - आर्यपुत्र** = भगवन् ! **माम्** = मन्दोदरीम्, **किम्** = किमर्थम्, **अजानन्** = अविदन् इव **अपलपसि** = अपलापम् **करोसि ? ते** = तव, **आत्मनः**= स्वस्य, **अपचयसूचकम्** = अपकर्षद्योतकम्, **लक्षणम्** = लक्ष्म, **निह्नोतुम्** = गोपयितुम्, **न युक्तम्** = नोचितम् । **कदापि** = कश्मिंश्चित्समये, **कोपात्** = क्रोधात्, **वामः** = दक्षिणेतरः, **बाहुः** = हस्तः, **न स्फुरति** = नैषच्चलति । **अनेन**= एतेन, **ते** = तव, **किमपि** = अनिर्वचनीयम्, **दुष्टम्** = अनिष्टम्, **फलम्** = परिणामः, **सूचितम्** = ज्ञापितम् ।

(नेपथ्ये)

२४ **हा** = धिक्, **वयम्** = राक्षसाः, **हताःस्म** = पीडिताः स्म, (वीप्सायाम् द्विरुक्तिः)। **अनेन** = वानरेण, **सर्वम्** = निखिलम्, **निषूदितम्** = घातितम् ।

२५ **रावणः** - (कर्णं दत्वा) **भोः! अत्र** = अस्मिन् स्थाने कोऽस्तीत्यर्थः ।

२६ **द्विजिह्वः - देव** = भगवन् ! **द्वारि** = कपाटे, **नकुलतुण्डस्य** = तदाख्यनिशाचरस्य **प्रतिनिधिः** = प्रतिकृतिः, **द्विजिह्व इति नाम यस्य सः, तव = रावणस्य अनुचरः**= सेवकः, **नकुलतुण्डम्** = तदाख्यम्, **निशाचरम्, प्रतीक्षमाणः** = मीलितुकामः, **उपस्थितः** = प्राप्तः, अस्ति ।

२७ **मन्दोदरी - अयमपि** = एष भृत्योऽपि, **तादृशः** = पूर्वोक्त इव, नकुलतुण्ड इवेत्यर्थः।

अहो विहिणा । [*कथमयमपि तादृश एवापशकुनसूचको दौवारिकः । वञ्चिता वयं विधिना ।*]

२८ **रावणः** - भवत्विदानीमेवायं मे पुरःस्थितः । द्विजिह्व ! कोलाहलः श्रूयतेऽधुना किमेतज्ज्ञायताम् ।

२९ **द्विजिह्वः** - यदाज्ञापयति देवः । (इति निष्क्रम्य । पुनः प्रविश्य) देव ! अमात्यः प्रहस्तो व्याकुल इव किमपि विज्ञापयितुं देवं द्वारि प्रतीक्षते ।

३० **रावणः** - दौवारिक ! शीघ्रं प्रवेशय तम् ।

३१ **द्विजिह्वः**- यदाज्ञापयति (इति निष्क्रम्य प्रहस्तेन सह पुनः प्रविश्य) इत इतोऽमात्यः।

३२ **रावणः** - प्रहस्त ! किमेवं जातम् ।

३३ **प्रहस्तः** - (दीर्घं निश्वस्य) देव ! अत्याहितम् ।

३४ **रावणः** - कथं ममाप्यत्याहितममात्य ! संभवति ।

अपशकुनस्य = कुलक्षणस्य, **सूचकः** = ज्ञापकः, **दौवारिकः** = द्वारपालः, कथमागत इत्यर्थः । **विधिना** = दैवेन **वयम्, वञ्चिताः** = प्रतारिताः ।

२८ **रावणः** - **भवतु** = अस्तु, **इदानीम्** = अधुना, **अयम्** = एषः द्विजिह्व एव, **मे** = मम, **पुरस्थितः** = अग्रे प्राप्तः, **भो द्विजिह्व! अधुना** = इदानीम्, **कोलाहलः** = महारावः, **श्रूयते** = आकर्ण्यते । **एतत् किम् अस्ति, ज्ञायताम्** = बुध्यताम् ।

२९ **द्विजिह्वः** - **देवः** = भवान्, **यद् आज्ञापयति** = निर्दिशति तथा करोमीत्यर्थः । (इति निष्क्रम्य पुनः प्रविश्य) **देव** = स्वामिन्! **अमात्यः** = सचिवः, **प्रहस्तः, व्याकुलः** = आकुल इव, **देवम्** = भवन्तम्, **किमपि, विज्ञापयितुम्** = निवेदयितुम्, **द्वारि** = गृहद्वारि, **प्रतीक्षते** = प्रतीक्षां कुर्वन्नस्ति ।

३० **रावणः** - **भो दौवारिक ! तम्** = प्रहस्तम्, **शीघ्रम्** = द्रुतम्, **प्रवेशय** = उपस्थापय।

३१ **द्विजिह्वः** - यदाज्ञापयति तत्करोमीत्यर्थः । (इति निष्क्रम्य प्रहस्तेन सह पुनः प्रविश्य) **भो अमात्य** = हे सचिव!, **इत इतः** = अनेन मार्गेणाग्रे सरतु, इत्यर्थः ।

३२ **रावणः** - **प्रहस्त** = अमात्य, **एवम्** = इत्थम् **किम् जातम्** = किमभवत् ?

३३ **प्रहस्तः**- (दीर्घं निश्वस्य) देव = भट्टारक! **अत्याहितम्** = महद् भयम्, समुपस्थितम्।

३४ **रावणः** - **भो अमात्य! मम** = रावणस्यापि, **अत्याहितम्** = महद्भयम्, **संभवति**= भवितुमर्हति ?

३५ **प्रहस्तः** - शृणोतु देव ! अत्र भवतो देवस्याज्ञया प्रमदावनविनाशकं वानरं निग्रहीतुं सशस्त्रं विमर्दनाख्यं सैन्यं प्रेषितवानहम् ।

३६ **रावणः** - ततस्ततः ।

३७ **प्रहस्तः** - विनष्टं सर्वम् ।

३८ **रावणः** - आः कथं मयि जीवति कथयसि त्वं विनष्टमिति ।

३९ **प्रहस्तः** - स्वस्योपरि शस्त्रास्त्रं प्रहरन्तीं सेनां निरीक्ष्यमाणेन पर्वतसदृशेन भीषणाकृतिना करकलितलोहमयस्तम्भेन वानरेण सर्वा व्यापादिताः सेनाः ।

४० **रावणः** - हा कष्टम् । कथमसौ बलवान् कीशः । (ससंभ्रमम्) अमात्य ।

प्रेषय प्रथमं पञ्च ततः सप्त च साधिपाः ।
सेनास्तास्तं निबध्नन्तु जम्बूकमिव लुब्धकाः ।।३।।

---

३५ **प्रहस्तः** - **देव** = राजन्! **शृणोतु** = आकर्णयतु, **अत्रभवतः** = देवस्य, **आज्ञया**= निर्देशेन, **प्रमदावनस्य** = वनितोद्यानस्य, **विनाशकम्** = ध्वंसकम्, **वानरम्** = कपिम्, **निग्रहीतुम्** = बद्धुम्, **अहम्** = प्रहस्तः, **विमर्दनाख्यम्** = तन्नामकम्, **सैन्यम्** = भटसमूहम्, **प्रेषितवान्** = प्रहितवान् ।

३६ **रावणः** - **ततस्ततः** = तदनन्तरम् किमभवदिति

३७ **प्रहस्तः** - **सर्वम्** = निखिलं सैन्यम्, **विनष्टम्** = व्यापादितम् ।

३८ **रावणः** - **मयि** = रावणे, **जीवति** = प्रणान् धारयति, **त्वम्** = प्रहस्तः, **विनष्टम्**, **इति कथं कथयसि ?**

३९ **प्रहस्तः** - **स्वस्य** = निजस्य, **उपरि** = उपरिष्टात्, **शस्त्रास्त्रम्** = आयुधानि, **प्रहरन्तीम्** = प्रक्षिपन्तीम्, **निरीक्ष्यमाणेन** = विलोक्यमानेन, **पर्वतसदृशेन** = अद्रितुल्येन, **भीषणा आकृतिर्यस्य तेन वानरेण** = कपिना, **करे** = हस्ते, **कलितः**= स्थापितः, **लोहमयः** = लोहनिर्मितः, **स्तम्भस्तेन**, **सर्वाः** = निखिलाः, **सेनाः** = भटाः, **व्यापादिताः** = घातिताः ।

४० **रावणः** - **हा कष्टम्** = दुःखम्, **असौ** = एषः, **बलवान्** = शक्तिशाली, **कीशः**= वानरः, **कथम्** = कीदृशः (ससंभ्रमम्) **भो अमात्य** = हे प्रहस्त !

अन्वय - प्रथमम् पञ्च ततः साधिपाः सप्त च सेनाः प्रेषय । ताः, तम् लुब्धकाः जम्बूकम् इव निबध्नन्तु ।

व्याख्या - **प्रथमम्** = आदौ, **पञ्च** = पञ्चसंख्याकाः, **ततः** = तदनन्तरम्, **अधिपैः** = सेनापतिभिः, **सहिताः** = समेताः, **सप्त** = सप्तसंख्याकाः, **सेनाः** =

४१ मन्दोदरी - (स्वगतम्) कहं अज्जउत्तो सेणाहिजाणकाले तस्स क्खुद्दजन्तुणो णाम ह्मरेदि । हतविहे दुव्विलसिदं तुए अह्मेहिम् । कोण्णो अवरो तुह विलसिदं अवणेदुं समत्थो । [*कथमार्यपुत्रः सेनाभियानकाले तस्य क्षुद्रजन्तोर्नाम स्मरति। हतविधे! दुर्विलसितं त्वयाऽस्माभिः । कोऽन्यो तव विलसितमपनेतुं समर्थः।*]

४२ प्रहस्तः - यदाज्ञापयति देवः । (इति निष्क्रान्तः)

(नेपथ्ये)

अत्याहितम् । अत्याहितम् ।

४३ रावणः - (ससंभ्रममाकर्ण्य) दौवारिक! ज्ञायतां किमेतत् ।

४४ दौवारिकः - यदाज्ञापयति देवः । (इति निष्क्रम्यामात्येन सह पुनः प्रविश्य) देव! उपस्थितोऽयं मन्त्रिमुख्यः ।

भटसमूहान्, **प्रेषय** = प्रस्थापय, **ताः** = पञ्च सप्त च सेनाः, **तम्** = वानरम्, **लुब्धकाः** = व्याधाः, **जम्बूकम्** = शृगालम् इव, **निबध्नन्तु** = निगृह्णन्तु ।

सरलार्थः - प्रथमं पञ्चसैन्यान् तदनु सप्त च सैन्यान् संप्रेषय, ये च गत्वा जम्बूकाः शृगालमिव वानरं बद्ध्वा समागच्छन्तु, इति ।

अत्र, **उपमालङ्कारः** । **अनुष्टुब्वृत्तम्** ।

४१ मन्दोदरी - (आत्मगतम्) **आर्यपुत्रः** = भट्टारकः, **सेनायाः** = सैन्यस्य, **अभियानकाले** = प्रयाणसमये, **क्षुद्रजन्तोः** = तुच्छपशोः, **तस्य** = जम्बूकस्य, **नाम** = संज्ञां **स्मरति**, **हतविधे** = दैवहतक! **त्वया** = भवता, **अस्माभिः** = राक्षसगणैः **सह दुर्विलसितम्** = दुश्चेष्टितम् । **अन्यः** = इतरः, रामादिति शेषः । **तव** = दैवस्य, **विलसितम्** = चेष्टितम्, **अपनेतुम्** = दूरीकर्तुम्, **समर्थः**= शक्तः? न कोऽपीति भावः ।

४२ **प्रहस्तः** - **देवः** = भवान्, **यद् आज्ञापयति** = यद् आदिशति तत्करोमीत्यर्थ : ।

(इति निष्क्रान्तः)

(नेपथ्ये)

अत्याहितम् = महद्भयम् समापतितम् । वीप्सार्थे द्विरुक्तिः ।

४३ रावणः - (आकर्ण्य ससंभ्रमम्) **दौवारिक** = द्वारपाल! **ज्ञायताम्** = निरूप्यताम्, **एतस्य** = कोलाहलस्य, **कारणम्** = हेतुः, **किमस्ति** = किं वर्तते ?

४४ **दौवारिकः** - देवो यदाज्ञापयति तत्करोमीति भाव : । (इति निष्क्रम्य अमात्येन सह पुनः प्रविश्य) **देव** = भट्टारक! **अयम्** = एषः, **मन्त्रिणाम्** = अमात्यानाम्, **मुख्यः** = प्रधानः, **प्रहस्तः**, **उपस्थितः** = समागतः ।

४५ **रावणः** - अमात्य! किं भणसि ।

४६ **प्रहस्तः** - (स्वगतम्) कथमहं भूयोऽपि सेनाव्यसनदुःखेन राज्ञोऽनुतापज्वलन-ज्वालावलीढं हृदयेन्धनं पुत्रशोकेन हविषा प्रज्वालयामि । (इति तूष्णीं तिष्ठति)

४७ **रावणः** - प्रहस्त! किमेवं वक्तुं चिरायसि । शृणु त्वम् ।

४८ **यथाशक्ति प्रकर्तव्यो मन्त्रिभिर्जयकाङ्क्षिभिः ।**
व्यवसायो युधि स्यातां दैवायत्तौ जयाजयौ ।।४।।

४९ **प्रहस्तः** - (दीर्घं निःश्वस्य)

देव त्वदाज्ञया पञ्च सेनान्यः प्रथमं गताः ।
पुनः सप्त गतास्तत्र द्वादशैवं निषूदिताः ।।५।।

---

४५ **रावणः** - **अमात्य** = मन्त्रिन्! **किं भणसि** = कथयसि ?

४६ **प्रहस्तः** - (आत्मगतम्) **अहम्** = अमात्यः, **भूयः** = पुनरपि, **सेनानाम्** = सैन्यानाम्, **व्यसनस्य** = नाशस्य, **दुःखेन** = पीडया, **राज्ञः** = भट्टारकस्य, **अनुतापः**= सन्ताप **एव ज्वलनम्** = वह्निस्तस्य **ज्वालया** = अर्चिषा, **अवलीढम्** = प्रज्वलितम्, **हृदयम्** = चेत एव, **इन्धनम्** = इध्म, **पुत्रस्य** = अक्षयकुमारस्य, **यः शोकः** = शुक्, **तेन एव हविषा** = घृतेन, **प्रज्वालयामि** = सन्दीपयामि । (**इति तूष्णीम्** = मौनं **यथा स्यात्तथा तिष्ठति** ।

४७ **रावणः** - **भो प्रहस्तः** = अमात्य! **किम्** = किमर्थम्, **वक्तुम्** = कथयितुम्, **चिरायसि** = विलम्बसे, **त्वम्** = प्रहस्तः, **शृणु** = आकर्णय ।

४८ **अन्वयः** - जयकाङ्क्षिभिः मन्त्रिभिः युधि यथाशक्ति व्यवसायः प्रकर्तव्यः । जयाजयौ दैवायत्तौ स्याताम् ।

व्याख्या- जयम् काङ्क्षन्त इति जयकाङ्क्षिणः, तैः, जयकाङ्क्षिभिः= विजयमभिलषद्भिः, **मन्त्रिभिः** = अमात्यैः, **युधि** = समरे, **शक्तिमनतिक्रम्येति यथाशक्ति** = शक्त्यनुसारेण, **व्यवसायः** = उद्योगः, **प्रकर्तव्यः** = विधेयः । **जयश्च, अजयश्च तौ, जयाजयौ** = विजयाविजयौ तु, **दैवस्य** = भागधेयस्य, **आयत्तौ** = अधीनौ ।

सरलार्थः - जयकाङ्क्षिभिरमात्यैः समरे यथाशक्ति विजयार्थं यत्नो विधेयः, जयो वाऽजयस्तु दैवाधीन इति । **अनुष्टुब्वृत्तम्** ।

४९ **प्रहस्तः** - (दीर्घम् निश्वस्य)

अन्वयः - देव, त्वदाज्ञया पञ्च सेनान्यः प्रथमम् गताः । पुनः सप्त गताः।

पृतनाव्यसनक्रुद्धः कुमारोऽक्षोऽभ्ययात्पुनः ।
घनं प्रहरता तेन निहतोऽसौ रणाजिरे ।।६।।

५० **रावणः** - (श्रुत्वा सहर्षम्) साधु, कुमार! साधु, घनं प्रहरता त्वया कृतवानर-वधोत्सवेन सेनाव्यसनदुःखितस्य मे मनस्तापोऽधुनापनीतः ।

५१ **प्रहस्तः** - (स्वगतम्) अहो कथमहं भट्टारको मदुक्तवचसा कुमारविजयं स्मरति। वैपरीत्यावृतेवास्य मतिर्लक्ष्यते । भवतु पुनरेनं स्मारयामि । (प्रकाशम्)

निवेदितं मया देव ! भवता ज्ञातमन्यथा ।
घनं प्रहरता तेन कुमारोऽक्षो हतो रणे ।।७।।

एवम् द्वादश तत्र निषूदिताः । पुनः पृतनाव्यसनक्रुद्धः कुमार अक्षः अभ्ययात्,रणाजिरे घनं प्रहरता तेन असौ निहतः ।

व्याख्या - हे देव = भो भट्टारक! **तव** = भवतः, **आज्ञया** = आदेशेन, **पञ्च**= पञ्चसङ्ख्याकाः, **सेनान्यः** = भटसमूहाः, **प्रथमम्** = आदौ, **गताः** = युद्धाय याताः। **पुनः** = भूयः, **सप्त** = सप्तसङ्ख्याकाः, सेनान्यः, **गताः** = समराय याताः। **एवम्** = इत्थम्, **द्वादश** = द्वादशसङ्ख्याकाः, सेनान्यः, **तत्र** = युद्धे, **निषूदिताः** = विनष्टाः । **पुनः** = भूयः, **पृतनानाम्** = चमूनाम्, **व्यसनेन** = नाशेन, **क्रुद्धः** = कुपितः, **कुमारः अक्षः** = अक्षयकुमारः, **अभ्ययात्** = समरे योद्धुम् गतः । **रणाजिरे** = युद्धप्राङ्गणे, **घनम्** = दृढं **यथा स्यात्तथा**, **प्रहरता** = प्रहारं कुर्वता, **तेन** = वानरेण, **असौ** = अक्षयकुमारः, **निहतः** = घातितः । **अनुष्टुब्वृत्तम्** ।

५० **रावणः** - (श्रुत्वा सहर्षम्) **भो कुमार** = अक्ष! **साधु** = सम्यग्, **विहितम्** = कृतम्, **घनम्** = दृढम्, **प्रहरता** = प्रहारम् कुर्वता, **कृतः** = विहितः, **वानरस्य** = कपेः, **वधः** = नाश एव, **उत्सवः** = महो **येन तेन**, **त्वया अक्षयकुमारेण**, **सेनानाम्** = पृतनानाम्, **व्यसनेन** = नाशेन, **दुःखितस्य** = पीडितस्य, **मे** = रावणस्य, **मनसः** = चेतसः, **तापः** = सन्तापः, **अपनीतः** = दूरीकृत : ।

५१ **प्रहस्तः** - **अहो** = आश्चर्यम्, **अयम्** = एषः, **भट्टारकः** = देवः, **मया** = प्रहस्तेन, **उक्तम्** = कथितम्, **यद्वचः** = वाक्यम्, **तेन कथम्** = केन प्रकारेण, **कुमारस्य** = अक्षस्य, **विजयम्** = जयम् स्मरति । **वैपरीत्येन** = विपरीतभावनया, **अस्य** = रावणस्य, **मतिः**= बुद्धिः, **आवृत्ताः** = व्याप्ता इव, **लक्ष्यते** = विभाव्यते। **भवतु**= अस्तु, **पुनः** = भूयः, **एनम्** = रावणम्, **स्मारयामि** = स्मृतिपथे प्रापयामि ।

(प्रकाशम्)

अन्वयः - देव! भवता मया निवेदितम् अन्यथा ज्ञातम् । घनम् प्रहरता तेन

५२ रावणः - (श्रुत्वा) हा प्रिय पुत्राक्ष! (इति क्रोधमूर्च्छां नाटयति)

५३ मन्दोदरी -

हा अक्ख ! मे पियउमार न प्रेक्षसे किं
हंहो मए अणुचिदं तुह चेट्ठिदं किम् ।
दे अज्झ वाणलकिदं मरणं सुणेमि ।
ता मे दहेदि सअलं हिअअं हदाह्मि ।।८।।

[*हा अक्ष ! मे प्रियकुमार न प्रेक्षसे किं*
हंहो मयाऽनुचितं तव चेष्टितं किम्
तेऽद्य वानरकृतं मरणं शृणोमि
तन्मे दहति सकलं हृदयं हतास्मि ।।८।।]

(इति रोदिति)

अक्षः कुमारः रणे हत :

व्याख्या - हे देव = राजन्, **भवता** = त्वया, **मया** = प्रहस्तेन, **निवेदितम्**= कथितम् **अन्यथा** = वैपरीत्येन, **ज्ञातम्** = बुद्धम् । **घनम्** = दृढम्, **प्रहरता** = प्रहारं कुर्वता, **तेन** = वानरेण, **अक्षकुमारः** = त्वत्कनिष्ठपुत्रः, **रणे** = युद्धे, **हतः**= घातितः ।

सरलार्थः - मया 'वानरेण अक्षकुमारो घातितः' इत्याशयः प्रकटित आसीत् परन्त्वया तेन इति पदस्य अक्षयकुमारेण इति, असौ इति पदस्य च वानर इत्यर्थं विधाय अक्षयकुमारेण वानरो हत इत्याशयो बुद्धः, इति । **अनुष्टुब्वृत्तम्** ।

५२ **रावणः - (श्रुत्वा) हा प्रियपुत्र** = प्रियसुत! **अक्ष** = अक्षयकुमार! कथं मृतोऽसीति भावः (इति क्रोधमूर्च्छां नाटयति)

५३ **मन्दोदरी -**

अन्वयः - हे प्रियकुमार, अक्ष, किं न प्रेक्ष्यसे । मया तव किम् अनुचितम् चेष्टितम् । अद्य ते वानरकृतम् मरणम् शृणोमि तत् मे सकलम् हृदयम् दहति । हता अस्मि ।

व्याख्या - हे प्रिय कुमार अक्ष = भो कनिष्ठपुत्र! **न प्रेक्ष्यसे** = न विलोक्यसे किम् ? **मया** = मन्दोदर्या, **तव** = भवतः, **अनुचितम्** = अनिष्टम्, **किम् चेष्टितम्** = किङ्कृतम् । **अद्य** = अधुना, **वानरेण** = कपिना, **कृतम्** = विहितम्, **ते** = तव, **मरणम्** = मृत्युम्, **शृणोमि** = आकर्णयामि, **तत्** = तव

५४ **रावणः** – (प्रहस्तमुद्दिश्य) नायमभिषेणनं यथार्थं जानाति । यतः सर्वं सैन्यं मम विनष्टम् ।

५५ **प्रहस्तः** – (कर्णौ पिधाय) शान्तं पापम् । शान्तं पापम् । अत्र भवतोऽनुज्ञया-ऽविचार्यैव सेना प्रेषिता । अधुना सैन्यव्यसनदोषे निक्षिप्तोऽहम् । भवतु प्रभोराज्ञा स्वच्छन्दचारिणी ।

५६ **रावणः** – अमात्य! युवराजमिन्द्रजितं द्रष्टुमिच्छामि ।

५७ **प्रहस्तः** – (स्वगतम्) दिष्ट्याऽधुना रक्षितोऽयमात्मा क्रोधमूर्तेरस्मात् । (प्रकाशम्) यदाज्ञापयति देवः । (इति निष्क्रम्येन्द्रजिता सह पुनः प्रविश्य) देव ! उपस्थितोऽयं युवराजः ।

मरणश्रवणम्, **मे** = मन्दोदर्याः, **सकलम्** = समग्रम्, **हृदयम्** = चेतः, **दहति** = भस्मीकरोति । **हता अस्मि** = पीडिता सञ्जातेत्यर्थः । (**इति** = इत्थम्, **रोदिति** = क्रन्दति)

५४ **रावणः** – (प्रहस्तमुद्दिश्य) **अयम्** = प्रहस्तः, **अभिषेणनम्** = सेनाभिनिवेषणम्, **यथार्थम्** = सम्यग्, **न जानाति** = न वेत्ति । **यतः** = यस्माद् हेतोः, **सर्वम्** = निखिलम्, **सैन्यम्** = सेनासमूहः, **विनष्टम्** = क्षयमुपगतम् ।

५५ **प्रहस्तः** – (कर्णौ पिधाय) **शान्तम् पापम्, शान्तम् पापम्, अत्र भवतः** = तव, **अनुज्ञया** = आज्ञया, **अविचार्य** = अविविच्य एव, **सेनाः** = सैन्यम्, **प्रेषिताः** = प्रहिताः । **अधुना** = इदानीम्, **सैन्यस्य** = सेनासमूहस्य, **यद् व्यसनम्** = नाशः, **तस्य दोषे** = अपराधे, **अहम्** = प्रहस्तः, **निक्षिप्तः** = प्रक्षिप्तः । **भवतु** = अस्तु, **प्रभोः** = स्वामिनः, **आज्ञा** = आदेशः **स्वच्छन्दं चरितुं शीलं यस्याः सा स्वच्छन्दचारिणी** = स्वतन्त्रगामिनी भवति ।

५६ **रावणः** – **अमात्यः** = प्रहस्तः, **युवराजम्** = राज्यस्योत्तराधिकारिणम्, **इन्द्रजितम्**= मेघनादम्, **द्रष्टुम्** = विलोकयितुम्, **इच्छामि** = वाञ्छामि ।

५७ **प्रहस्तः** – **दिष्ट्या** = भाग्येन, **अधुना** = इदानीम्, **अयम्** = एषः, **आत्मा** = जीवः, ममेति शेषः । **क्रोधमूर्तेः** = कोपशरीरात्, **अस्मात्** = रावणात्, **रक्षितः** = त्रातः । (प्रकाशम्) **देवः** = भवान्, **यद्** = वचनम्, **आज्ञापयसि** = आदिशसि तत्करोमीत्यर्थः । (इति निष्क्रम्येन्द्रजिता सह पुनः प्रविश्य) **हे देव** = स्वामिन्! **अयम्** = एषः, **युवराजः** = इन्द्रजित्, **उपस्थितः** = समागतः ।

५८ **रावणः** – कुमार! वानराधमेन तव प्रियतमोऽनुजोऽक्षो व्यापादितः । दुःखसागरे मज्जतोः पुत्रशोकातुरयोस्तव पित्रोर्बद्धस्य तस्य दुष्टवानरस्य मुखविलोकनमेव चिकित्सा ।

५९ **इन्द्रजित्** – अलं पुत्रशोकेन । समाश्वसतां भवन्तौ ।

एषोऽहं गत इत एव वानरं तं
ब्रह्मास्त्रग्रथितकलेवरं नयामि ।
शोकं मा कुरुतमुभौ प्रपश्यतं तं
पुत्रघ्नं हतबलमेनमल्पसत्त्वम् ।।९।।

(इति द्रुतपदं निष्क्रान्तः)

६० **रावणः** – देवि मन्दोदरि ! समाश्वसिहि । समाश्वसिहि । जयतीन्द्रजिद्वानराधमम्।

६१ **मन्दोदरी** – उचिदन्दे पुत्ताहिजाणोच्छवे जअसव्दस्सउच्चालणम् ।[उचितं ते

---

५८ **रावणः** - भो कुमार = मेघनाद! **वानरेषु अधमः**, **वानराधमस्तेन**, **वानराधमेन** = दुष्टकपिना, **तव** = मेघनादस्य, **प्रियतमः** = नितरां प्रियः, **अनुजः** = भ्राता, **अक्षः** = अक्षयकुमारः, **व्यापादितः** = घातितः । **दुखसागरे** = सन्तापसमुद्रे, **मज्जतोः** = ब्रुडतोः, **पुत्रस्य** = कमिष्ठसुतस्य **शोकेन** = वधजन्यशुचा, **आतुरयोः** = व्याकुलयोः, **तव पित्रोः** = आवयोः, मन्दोदरीरावणयोरित्यर्थः । **बद्धस्य** = निगृहीतस्य, **तस्य** = मत्पुत्रं घातयतः, **वानरस्य** = कपेः, **मुखस्य** = वदनस्य, **विलोकनम्** = अवलोकनमेव, **चिकित्सा** = तापनिरोधोपायः ।

५९ **इन्द्रजित्** - **शोकेन** = पुत्रवधजन्यशुचा, **अलम्** = न किमपि भवतीत्यर्थः । **भवन्तौ** = युवाम्, **समाश्वसताम्** = आश्वस्तौ भवताम् ।

अन्वयः - एषः इत एव गत अहम् ब्रह्मास्त्रग्रथितकलेवरम् तम् वानरम् नयामि । उभौ शोकम् मा कुरुतम् । पुत्रघ्नम् हतबलम् अल्पसत्त्वम् तम् एनम् प्रपश्यतम् ।

व्याख्या - **एषः** = भवतो पुरः स्थितः, त्वत्पुत्रो मेघनादः, **इतः** = अस्मादेव स्थानात्, **गतः** = प्रस्थितः, **अहम्** = मेघनादः, **ब्रह्मास्त्रेण** = ब्रह्मपाशेन, **ग्रथितम्** = बद्धम्, **कलेवरम्** = शरीरम् **यस्य सः**, **तम्**, **तम्** = त्वत्पुत्रघ्नम्, **वानरम्** = मर्कटम्, **नयामि** = प्रापयामि । ब्रह्मास्त्रेण बद्ध्वा आनयामीत्यर्थः । **उभौ** = युवाम्, पितरावित्यर्थः । **शोकम्** = चिन्ताम्, **मा कुरुतम्** = नो विदधतम् । **पुत्रघ्नम्** = अक्षघातिनम्, **हतम्** = नष्टम्, **बलम** = शक्तिर्यस्य **तम्**, **अल्पम्** =

पुत्राभियानोत्सवे जयशब्दस्योच्चारणम्]

(नेपथ्ये)

६२ **वैतालिकौ** - जयतु जयतु दवः ।

६३ **एकः** -

भो भो राक्षसराज ! ते विजयतेऽखण्डप्रतापोऽधुना
यस्माद्बिभ्यति पूर्वदेवविबुधा यक्षोरगाः किन्नराः ।
तं दृष्ट्वाऽपि च वानरो ज्वलति ते जानन्प्रतापानलं
योऽसौ तेजसि शालभेन विधिना कस्तन्निषेद्धा परः ।।१०।।

स्वल्पम्, **सत्त्वम्** = प्राणिनम्, **तम्** = दुष्टम्, **एनम्** = वानरम्, **प्रपश्यतम्** = विलोकयतम् ।

सरलार्थः - ब्रह्मास्त्रेण बद्ध्वा वानरोऽयं मया नीयते, युवां तं प्रपश्यतमिति। **पुष्पिताग्रावृत्तम्** । (**इति द्रुतपदम्** = शीघ्रचरणम्, **निष्क्रान्तः** = निर्गतः)

६० **रावणः** = देवि मन्दोदरि ! **समास्वसिहि** = आश्वस्ता भव, **समाश्वसिहि** = आश्वस्ता भव । **इन्द्रजित्** = मेघनादः, **वानराधमम्** = दुष्टवानरम्, **जयति** = बद्ध्वा आनयतीत्यर्थः ।

६१ **मन्दोदरी** - **ते** = तव रावणस्य, **पुत्राभियानस्य** = सुतप्रस्थानस्य, **उत्सवे** = महसि **जयेति शब्दस्य उच्चारणम्** =कथनम्, **उचितम्** = युक्तम् ।

६२ **वैतालिकौ** - **देवः** = रावणः, **जयतु** = विजयताम् । वीप्सायाम् द्विरुक्तिः ।

६३ **एकः** -

अन्वयः - भो भो राक्षसराज ! अधुना ते अखण्डप्रतापः विजयते । यस्मात् पूर्वदेवविबुधाः यक्षोरगाः, किन्नराः बिभ्यति । तम् दृष्ट्वा प्रतापानलम् जानन् अपि यः असौ वानरः ते तेजसि शालभेन विधिना ज्वलति । तन्निषेद्धा परः कः ?

व्याख्या - **राक्षसानां राजा राक्षसराजः, तत्संबुद्धौ भो राक्षसराज** = हे रावण! **अधुना** = इदानीम्, **ते** = तव, **अखण्डः** = पूर्णः, **प्रतापः** = तेजः, **विजयते** = जयति । **यस्मात्** = प्रतापात्, **पूर्वदेवाः** = राक्षसाः, **विबुधाः** = देवाः, **यक्षाः** = देवयोनिविशेषाः, **उरगाः** = नागाः, **किन्नराश्च बिभ्यति** = त्रस्यन्ति। **तम्** = तादृशम् ज्वलत्प्रतापनलमित्यर्थः । **दृष्ट्वा**= विलोक्य, **यः** = पूर्वोक्तः, **असौ**= एषः, **वानरः** = कीशः, **प्रताप एव अनलः** = वह्निस्तम्, **जानन्** = विदन् अपि, **शलभस्यायम् शालभस्तेन शालभेन** = शलभसंबद्धेन, **विधिना** = प्रकारेण,

६४ अन्यः -

कृत्वा ब्रह्मास्त्रबद्धं झटिति तव सुतो मेघनादो निनादं
कुर्वन्नादाय कीशं नगरजनवृतं चोरवद्वर्तमानम् ।
आयाति द्रष्टुमेष प्रहसितवदनो मातृतातौ भवन्तौ
शोकेनालं सुतघ्नं विधृतवनचरं जम्पती पश्यतां तम् ।।११।

६५ रावणः - (कर्णं दत्वा) अयि देवि! निगृहीतोऽयमिन्द्रजिता दुष्टात्मा वानरः।

ते= तव रावणस्येत्यर्थः । तेजसि = प्रतापे, ज्वलति = दग्धो भवति । तस्य = वानरस्य, निषेद्धा = निवारयिता, कः = न कोऽप्यस्तीति भावः ।

सरलार्थः - यथा शलभोऽग्निं विलोक्य तं जानन्नपि तस्य तापेन ज्वलति तथैव प्रतापवन्तं रावणं विदन्नपि तस्य प्रतापे पतितोऽसौ वानरो नश्यति । तं मरणान्निषेद्धुं शक्तो न कोप्यस्तीति ।

रूपकालङ्कारः । शार्दूलविक्रीडितं वृत्तम् ।

६४ अन्यः -

अन्वयः - प्रहसितवदनः तव सुतः एषः मेघनादः ब्रह्मास्त्रबद्धम् कृत्वा नगरजनपरिवृतम् चोरवद्वर्तमानम् कीशम् आदाय निनादं कुर्वन् मातृतातौ भवन्तौ द्रष्टुम् झटिति आयाति । शोकेन अलम् । जम्पती सुतघ्नं विधृतवनचरम् तम् च पश्यतम् ।

व्याख्या - प्रहसितम् वदनम् यस्य सः, प्रहसितवदनः = प्रसन्नमुखः, तव = भवतः, सुतः = पुत्रः, एषः = अयम्, मेघनादः = इन्द्रजित्, ब्रह्मास्त्रेण= अमोघेन ब्रह्मप्रदत्तेन शस्त्रविशेषेण, बद्धम् = ग्रथितम्, कृत्वा = विधाय, वानरं ब्रह्मास्त्रेण बद्ध्वेत्यर्थः । नगरस्य = लङ्कायाः, जनैः =लोकैः, परिवृतम् = युक्तम्, चोर इव वर्तते इति चोरवद्वर्तमानस्तम् = स्तेनोपमम्, कीशम् = वानरम्, आदाय = गृहीत्वा, निनादम् = शब्दम्, कुर्वन् = विदधानः, माता च तातश्च, मातृतातौ = जननीजनकौ, भवन्तौ = युवाम्, द्रष्टुम् = विलोकयितुम्, झटिति = शीघ्रम्, आयाति = आगच्छति । शोकेन = पुत्रवधजन्यशुचा, अलम् = व्यर्थम्। जाया च पतिश्च जम्पती = दम्पती, युवामित्यर्थः । सुतघ्नम् = पुत्रघातिनम्, वानरम्, विधृतः = निगृहीतः, वनचरः = वानरो येन तम् (च) इन्द्रजितञ्च, पश्यतम् = विलोकयतम् ।

उपमातुल्ययोगितयोः संसृष्टिः । स्रग्धरावृत्तम् ।

६५ रावणः - (कर्णं दत्वा) अयि देवि = भो मन्दोदरि! अयम् = एषः, दुष्टात्मा = दुरात्मा, वानरः = मर्कटः, इन्द्रजिता = मेघनादेन, निगृहीतः = बद्धः । त्वम् =

समाश्वसिहि त्वम् ।

(ततः प्रविशति बद्धवानरं पुरस्कृत्य मन्त्रिभिः सहितो मेघनादः)

६६ **मेघनादः** -(पितरौ नमस्कृत्य) एषोऽयं भवतः प्रभावाद् ब्रह्मपाशबद्धो दुष्टवानरः।

६७ **रावणः** - चिरञ्जीव वत्स! उद्धृतं त्वया पुत्रव्यसनशोकशल्यं मम हृदयात् । (प्रहस्तं निरीक्ष्य) अमात्य! प्रष्टव्योऽयं दुरात्मा, किमर्थमनेनैवमाचरितम् । कस्मादागतः । कोऽयं वानर इति ।

६८ **प्रहस्तः** - यदाज्ञापयति देवः (इति हनुमन्तमुद्वीक्ष्य) ।

रे रे वानर किं त्वया हतधिया रक्षोधिपस्य प्रभो-
रुत्खातं प्रियमद्य काननमिदं कस्मात्त्वमत्रागतः ।
सत्यं ब्रूहि समीपतोऽखिलगुरोश्चेदिच्छसि त्वं शिवं
नोचेत् क्षिप्रमतो गमिष्यसि हतो वैवस्वतस्यालयम् ।।१२।।

भवती **समाश्वसिहि** = आश्वस्ता भव ।

(ततः प्रविशति बद्धवानरं पुरस्कृत्य मन्त्रिभिः सहितो मेघनादः)

६६ **मेघनादः** - (पितरौ नमस्कृत्य) **एषः** = पुरोवर्ती, **अयम् दुष्टवानरः** = दुरात्मा कीशः, **भवतः** = तव, **प्रभावाद्** = सामर्थ्येन, **ब्रह्मपाशेन** = ब्रह्मास्त्रेण, **बद्धः** = निगृहीतः ।

६७ **रावणः** - **वत्स** = मेघनाद! **चिरञ्जीव** = बहुकालं प्राणान् धारय । **त्वया** = भवता, **पुत्रस्य** = अक्षस्य, **व्यसनेन** = विनाशेन, **यः शोकः** = शुक् स एव **शल्यम्** = कीलकम्, **मम** = रावणस्य, **हृदयात्** = चेतसः, **उद्धृतम्** = निवारितम्। (प्रहस्तं विलोक्य) **भो अमात्य** = हे मन्त्रिन्! **अयम्** = एषः, **दुरात्मा** = दुष्टः, **वानरः** = मर्कटः, **प्रष्टव्यः** = ज्ञातव्यः । **किमर्थम्** = कस्माद् हेतोः, **अनेन** = वानरेण, **एवम्** = वनपृतनाक्षयम्, **आचरितम्** = कृतम् ? **कस्मात्** = कुतः, **आगतः** = आयातः, अस्तीति शेषः । **अयं वानरः** = कीशः, **कः** = किन्नामा ?

६८ **प्रहस्तः** - **देवः** = भवान्, **यत् आज्ञापयति** = निर्दिशति तत्करोमीत्यर्थः । (इति हनुमन्तमुद्वीक्ष्य)

अन्वयः - रे रे वानर ! अद्य हतधिया त्वया प्रभोः रक्षोधिपस्य प्रियम् इदम् काननम् किम् उत्खातम् ? अत्र त्वम् कस्मात् आगतः ? चेत् एवम् शिवम् इच्छसि अखिलगुरोः समीपतः सत्यम् ब्रूहि । नोचेत् हतः अतः वैवस्वतस्य आलयम्

६९ हनुमान् - (रावणं निरीक्ष्य)

किं मां भर्त्सयसि क्षपाचर! न ते भीत्या बिभेमि द्रुतं
दूतोऽहं रघुनायकस्य शतशो हन्मि क्षणात्त्वादृशान् ।
ब्रह्मास्त्रेण सुतेन बद्ध इति ते मा भूद् वृथाडम्बरः
संलापार्थमहं निबद्ध इव ते प्राप्तोऽन्तिकं दुर्मते ।।१३।।

क्षिप्रम् गमिष्यसि ।

व्याख्या - रे रे वानर = भो कपे ! **अद्य** = अधुना, **हता** = नष्टा, **धीः** = बुद्धिर्यस्य तेन, **हतधिया** = नष्टबुद्ध्या, **त्वया** = कपिना, **प्रभोः** = स्वामिनः, **रक्षोऽधिपस्य** = रावणस्य, **प्रियम्** = अभीष्टम्, **इदम्** = एतत्, **काननम्** = वनम्, **किम्** = किमर्थम्, **उत्खातम्** = उत्पाटितम् ? **अत्र** = अस्मिन् स्थाने, **त्वम्** = वानरः, **कस्मात्** = कुतः, **आगतः** =आयातः ? **चेत्** = यदि, **स्वम्** = निजम्, **शिवम्** = कल्याणम्, **इच्छसि** = वाञ्छसि, **अखिलगुरोः** = सकलेषु महतः, रावणस्येत्यर्थः । **समीपतः** = निकटे, **सत्यम्** = यथार्थम्, **ब्रूहि** = कथय । **नो चेत्** = न कथयसि चेत्, **हतः** = मृतः (सन्) **वैवस्वतस्य** = यमस्य, **आलयम्**= भवनम्, **क्षिप्रम्** = शीघ्रम्, **गमिष्यसि** = यास्यसि ।

सरलार्थः - भो वानर ! त्वया किमर्थम् रावणस्य काननमुत्पाटितम ? त्वं कुत आगतोऽसि ? सत्यं कथय । नोचेत् यमालयं यास्यसीति ।

शार्दूलविक्रीडितं वृत्तम् ।

६९ हनुमान् - (रावणं निरीक्ष्य)

अन्वयः - हे क्षपाचर! माम् किम् भर्त्सयसि ? ते भीत्या द्रुतम् न बिभेमि। रघुनाथकस्य दूतः अहम् क्षणात् शतशः त्वादृशान् हन्मि । सुतेन ब्रह्मास्त्रेण बद्ध इति ते वृथाडम्वरः मा भूत् । हे दुर्मते ! अहम् संलापार्थम् निबद्ध इव ते अन्तिकम् प्राप्तः।

व्याख्या - **क्षपायां चरतीति क्षपाचारः, तत्संबुद्धौ हे क्षपाचर** = भो रावण! **माम्** = वानरम्, **किम्** = किमर्थम्, **भर्त्सयसि** = तर्जयसि ? **ते** = तव, **रावणस्य** = भीत्या = भयेन, **द्रुतम्** = शीघ्रम्, **न बिभेमि** = न त्रस्यामि, **रघुनायकस्य** = रामस्य, **दूतः** = चरः, **अहम्** = वानरः, **क्षणम्** = स्वल्पेनैव कालेन, **शतशः** = बहुशः, **त्वादृशान्** = त्वत्तुल्यान्, राक्षसान्, **हन्मि** = घातयामि। **सुतेन** = इन्द्रजिता, **ब्रह्मास्त्रेण** = ब्रह्मपाशेन, **बद्धः** = निगृहीत, **इति वृथाडम्वरः**= वृथाटोपः, **मा भूत्** = न स्यात् । हे **दुर्मते** = हे दुष्टबुद्धे! **अहम्** = वानरः,

अपि च -

७० अहार्षी रक्षस्त्वं रघुवरपरोक्षे जनकजां
विचेतुं सुग्रीवः प्लवगनिवहं तां प्रहितवान् ।
विचिन्विन् तेष्वेकोऽहमिह समुपेतो वनमिदं
परस्त्रीं हर्तुस्ते मथितमतिरोषेण च मया ।।१४।।

तथापि -

७१ हितं तव वचो मयोदितमिदं शृणु त्वं क्षणं
पुलस्त्यकुलसम्भवस्त्वमसि तत्त्वविद्राक्षसः ।

संलापार्थम् = त्वया सह संवादाय, **निबद्धः** = निगृहीत इव, **ते** = तव, **अन्तिकम्**= समीपम्, **प्राप्तः** = उपस्थितोऽस्मीत्यर्थः ।

सरलार्थः - भो राक्षस! तव भर्त्सनेन नाहं बिभेभि, त्वत्सदृशान् दानवान् हन्तुं शक्नोमि । तव ज्येष्ठसुतेन मेघनादेन बद्ध इति वृथैव गर्वम् मा कुरु, त्वया सह संवादाय बद्ध इवाहम् तवान्तिकं समुपस्थितोऽस्मीति ।

अत्र, **उत्प्रेक्षालङ्कारः** । **शार्दूलविक्रीडितं वृत्तम्** ।

७० **अपि च** = अन्यच्च -

अन्वयः - हे रक्ष! त्वम् रघुवरपरोक्षे जनकजाम् अहार्षीः । सुग्रीवः ताम् विचेतुम् प्लवगनिवहम् प्रहितवान् । तेषु एकः अहम् इह समुपेतः, परस्त्रीम् हर्तुः ते इदम् वनम् अतिरोषेण मया मथितम् ।

व्याख्या - हे रक्ष = भो निशाचर! **त्वम्** = रावणः, **रघुवरस्य** = रामस्य, **परोक्षे** = अप्रत्यक्षे, **जनकजाम्** = सीताम्, **अहार्षीः** = हृतवान् । **सुग्रीवः** = वानराधीशः, **ताम्** = सीताम्, **विचेतुम्** = अन्वेष्टुम्, **प्लवगानाम्** = वानराणाम्, **निवहम्** = समूहम्, **प्रहितवान्** = प्रेषितवान् । **तेषु** = प्लवगेषु, **एकः** = एकाकी, **अहम्** = वानरः, **इह** = लङ्कायाम्, **समुपेतः** = समागतोऽस्मीति शेषः । **परस्य** = अन्यस्य, **स्त्रीम्** = पत्नीम्, **हर्तुः** =चोरयितुः, **ते** = तव, **इदम्** = एतत्, **वनम्** = काननम्, **अतिरोषेण** = नितरां क्रुद्धेन, **मया** = वानरेण, **मथितम्** = विनाशितम्।

सरलार्थः - हे रावण! त्वया रामस्यापरोक्षे सीता हृता । तामन्वेष्टुं सुग्रीवो वानरसमूहं प्रथितवान् । तेष्वन्यतमोऽत्र समागतोऽस्मि । परदारापहारकस्य ते वनमिदं क्रुद्धेन मया ध्वस्तमिति । **शिखरिणीवृत्तम्** ।

७१ **तथापीति** -

अन्वयः - त्वम् क्षणम् तव हितम् मयोहितम् इदम् वचः शृणु । पुलस्त्य-

अहंमतिरियं न ते भवितुमर्हति स्वात्मना
भजस्व रघुनायकं पुरुषमव्ययं विद्धि तम् ।।१५।।

७२ **रावणः** - आः कथमसौ वानरः पण्डितमानी पूर्वं भयं दर्शयित्वा पश्चादात्मज्ञान-मुपदिशति माम्, सर्वथायं धृष्टो वानरः । धिक् त्वाम् वानर! न त्वया वनौकसा विदितो मे पराक्रमः । शृणु रे मर्कट !

हन्मि त्वां सहलक्षणं रघुवरं सुग्रीवमस्य प्रियं
मित्रं जल्पसि किं वनेचर न मे रामः सखा न प्रभुः ।
जाने मानुषमल्पवीर्यमहितं रामं तवाधीश्वरं
तेषामग्रत एहि संप्रति मया संप्रेषितो यामिनीम् ।।१६।।

कुलसंभवः त्वम् तत्त्वविद् राक्षसः, असि । इयम् ते अहंमतिः भवितुम् न अर्हति । स्वात्मना रघुनायकम् भजस्व । तम् अव्ययम् पुरुषम् विद्धि ।

व्याख्या - **त्वम्** = रावणः, **क्षणम्** = किञ्चित्कालम्, **तव** = भवतः, **हितम्**= कल्याणम्, **मया** = वानरेण, **उदितम्** = कथितम्, **इदम्** = एतत्, **वचः**= वाक्यम्, **शृणु** = आकर्णय । **पुलस्त्यस्य** = तन्नामकमुनेः, **यत् कुलम्** = वंशः, **तस्मात् संभवः**= उत्पत्तिर्यस्य सः, **त्वम्** = रक्षोऽधिपः, **तत्त्वम्**= यथार्थं **वेत्तीति तत्त्ववित्** = तत्त्वज्ञः, **राक्षसः** = निशाचरः, **असि** = वर्तसे । **इयम्** = एषा, **ते** = तव, **अहंमतिः** = अभिमानयुता, बुद्धिः, **भवितुम् नार्हति** = नोचिता । **स्वात्मना**= मित्रत्वेन **रघुनायकम्**= रामम्, **भजस्व** = सेवस्व । **तम्** = रामम्, **अव्ययम्** = अविनाशिनम्, **पुरुषम्** = पुमांसम्, **विद्धि** = जानीहि ।

सरलार्थः - पौलस्त्यस्य तव अहमिति दुर्मतिर्नोचिता । तां परित्यज्यानश्वरम् पुरुषम् रामं भज, इति मदीयं त्वद्हितं वचनमाकर्णयेति । **पृथ्वीवृत्तम्** ।

७२ **रावणः - आः - भोः, असौ** = एषः, **पण्डितमानी** = आत्मानं पण्डितं मन्यमानः, **वानरः** = कपिः, **पूर्वम्** = प्राक्, **भयम्**= भीतिम्, किं मां भर्त्सयसीत्यादिपद्येनेत्यर्थः, **दर्शयित्वा** = प्रदर्श्य, **पश्चात्** = तदनु, **आत्मज्ञानम्** = **'हितं तव वाचः'** इति पद्येन तत्त्वज्ञानम्, **माम्** = रावणम्, **उपदिशति** = कथयति । **अयम्** = एषः, **वानरः** = कपिः, **सर्वथा** = सर्वतोभावेन, **धृष्टः** । **भो वानर** = हे कपे! **त्वाम्** = भवन्तम्, **धिक्**= न्यक्कारोऽस्तु । **वनौकसा**= वनवासिना, **त्वया**= वानरेण, **मे**= मम, **पराक्रमः** = विक्रमः, **न विदितः** = न ज्ञातः । **रे मर्कट** = रे वानर! **शृणु** = आकर्णय ।

अन्वयः - त्वाम् सहलक्ष्मणम् रघुवरम् अस्य प्रियम् सुग्रीवम् (च) हन्मि।

(पार्श्वस्थं रक्षिणं निरीक्ष्य) मारयैनं दुरात्मानं बद्धशरीरमबद्धमुखं वनौकसम्।

७३ **रक्षी** - यदाज्ञापयति देवः (इत्यायुधं धत्ते)

७४ **विभीषणः** - रक्षिन्! तिष्ठ क्षणम्। तावत्किमपि विज्ञापयामि देवम्। भो भो महाराज! न हन्तव्यो न हन्तव्योऽयं वानरो दूतः।

अहो बत महामते ! कथमिहाद्य दूतं भवान्
निहन्ति रिपुणेरितं पृथुयशास्त्रिलोकीपतिः ।

हे वनेचर! किम् मित्रम् जल्पसि ? रामः मे सखा न, प्रभुः च न, तव अधीश्वरम् रामम् अल्पवीर्यमहितम् मानुषम् जाने। मया संप्रति संप्रेषितः त्वम् तेषाम् अग्रतः यामिनीम् एहि।

व्याख्या - **त्वाम्** = वानरम्, **सह** = साकम्, **लक्ष्मणः** = सौमित्रिर्यस्य तम्, **रघुवरम्** = रामम्, **अस्य** = रामस्य, **प्रियम्** = प्रीतिपात्रम्, **सुग्रीवम्** = तदाख्यम् वानरञ्च **हन्मि** = घातयामि। **हे वनेचर** = भो वानर! **मित्रम्** = सुहृदिति, **किम्** = कथम्, **जल्पसि** = कथयसि ? **रामः** = राघवः, **मे** = मम, **सखा** = मित्रम्, **न** = नास्ति। **प्रभुः** = स्वामी च, **न** = नास्ति। **किन्तु तव** = वानरस्य, **अधीश्वरम्** = स्वामिनम्, **रामम्** = राघवम्, **अल्पेन** = लघुना, **वीर्येण** = पराक्रमेण, **महितम्** = मण्डितम्, **मानुषम्** = नरम्, **जाने** = वेद्मि। **संप्रति** = अधुना, **मया**= रावणेन, **संप्रेषितः** = प्रहितस्त्वम्, **तेषाम्** = रामादीनाम्, **अग्रतः**= पुरतः, **यामिनीम्**= यमपुरीम्, **एहि** = गच्छ।

सरलार्थः - अहम् त्वाम् सलक्ष्मणं रामम्, सुग्रीवञ्च घातयामि। रामो मे मित्रम् प्रभुर्वा नास्ति। तमहं स्वल्पवीर्यं मानुषं जाने, अधुना घातितस्त्वं तेभ्यः पूर्वमेव यमपुरीं गच्छतु।

शार्दूलविक्रीडितं वृत्तम्।

(पार्श्वस्थरक्षिणं निरीक्ष्य) **एनम्** = इमम्, **दुरात्मानम्** = दुष्टम्, **बद्धम् शरीरम् यस्य तमपि न बद्धं मुखं यस्य तमिति** विरोधः, वाचालमिति तत्समाधानम्। **वनौकसम्** = वनेचरम्, **मारय** = घातय। **विरोधाभासालङ्कारः**।

७३ **रक्षी** - **देवः** = भवान् यत्, **आज्ञापयति** = आदिशति तत्करोमीत्यर्थः। (**इति** = इत्थम्, **आयुधम्** = शस्त्रम्, **धत्ते** = धारयति)

७४ **विभीषणः** - **रक्षिन्** = रक्षक! **क्षणम्** = किञ्चित्कालम्, **तिष्ठ** = न मारय। **तावदिति वाक्यालङ्कारे, देवम्**= स्वामिनम्, रावणमित्यर्थः। **किमपि**= कथनीयम्, **विज्ञापयामि** = निवेदयामि। **भो भो महाराज** = हे भट्टारक ! **अयम्** = एषः,

निवेदयति शत्रवे तव पुनश्च को वाचिकं
हते सति वनेचरे परचरेऽधुनास्मिन् विभो ।।१७।।

७५ **रावणः** - कथमिह त्वं वानराधमं मोचयितुमुद्युक्तोऽसि विभीषण । (विभीषणः सविनयं भीतोऽधोमुखस्तिष्ठति)

दुष्टोऽयं वानरो नूनं यन्मह्यमपराध्यति ।
विभीषण! विराध्यन्तं कः क्षमेताभिघातिनम् ।।१८।।

दूतः = चरः, **वानरः** = कपिः, **न हन्तव्यः** = न घातयितव्यः ।

अन्वयः - अहो वत महामते ! अद्य इह पृथुयशाः, त्रिलोकीपतिः भवान् रिपुणा ईरितम् दूतम् कथम् निहन्ति ? विभो पुनः अधुना परचरे अस्मिन् वनचरे हते सति तव वाचिकम् शत्रवे को निवेदयति ?

व्याख्या - अहो = आश्चर्यम्, **बत** = खेदस्य विषयः, **यो महामते** = स्थूलबुद्धे! **अद्य** = संप्रति, **इह** = अस्मिन् स्थाने, **पृथु यशो यस्य सः**, **पृथुयशाः**= विस्तृतकीर्तिः, **त्रयाणां लोकनां समाहारः**, **त्रिलोकी**, **तस्या पतिः**, **त्रिलोकीपतिः**= लोकत्रयाधीश्वरः, **भवान्** = त्वम्, **रिपुणा** = शत्रुणा, **ईरितम्** = प्रेषितम्, **दूतम्** = चरम्, **कथम्** = कुतः, **निहन्ति** = मारयति । दूतो नो वध्य इति भावः । **विभो** = प्रभो! **पुनः भूयश्च**, **अधुना** = संप्रति, **परस्य** = शत्रोः, **चरे** = दूते, **अस्मिन्** = एतस्मिन्, **वनचरे** = वानरे, **हते** = घातिते सति, **तव** = भवतः, **वाचिकम्** = सन्देशम्, **शत्रवे** = रिपवे, **कः**, **निवेदयति** = कथयति ?

सरलार्थः - भो महामते ! पृथुयशसा त्रिलोकीपतिना भवता क्रियमाणं शत्रुप्रहितदूतस्य मारणमनुचितम् । तस्मिन्दूते मृते तव सन्देशं शत्रवे को निवेदयेदिति।

पृथ्वीवृत्तम् ।

७५ **रावणः - भो विभीषण** = हे भ्रातः ! त्वम्, **इह** = अद्य, **कथम्** = किमर्थम्, **वानराधमम्** = दुष्टकपिम्, **मोचयितुम्** = त्याजयितुम्, **उद्युक्तः** = संलग्नः, **असि** = विद्यसे । (विभीषणः सविनयं भीतोऽधोमुखस्तिष्ठति)

अन्वयः - भो विभीषण! अयम् वानरः नूनम् यत् मह्यम् अपराध्यति विराध्यन्तम्, अभिघातिनम् कः क्षमेत ।

व्याख्या - भो विभीषण = हे अनुज ! **अयम्** = एषः, **दुष्टः** = दुरात्मा, **वानरः** = मर्कटः, **नूनम्** = निश्चयेन, **मह्यम्** = रावणाय, **अपराध्यति** = अपकरोति **तादृशम् विराध्यन्तम्** = विद्रोहं विदधतम्, **अभिघातिनम्** = पृतनापुत्रादिघातकम् वानरम् **कः क्षमेत** = कः सहेत । न कोऽपि सहत इति भावः ।

७६ **विभीषणः** - वध्योऽयमपराद्धो वानरस्तथाप्यस्माकं कार्यानुष्ठानवशाद्वधसमान-दण्डमनुभवतु दुष्टः ।

७७ **रावणः** - (क्षणं विचार्य) आः, ज्ञातं मया ।

लाङ्गूलं वानराणां जनयति मनसो मानमत्यन्तमस्मा-
त्तैलासिक्तांशुकैस्तद्दृढतरमखिलं वेष्टयित्वाऽथ पुच्छे ।
वह्निं संयोज्य शीघ्रं मम नगरमभिभ्रामयन्त्वद्य वीराः
संबद्धं रज्जुभिस्तं पटहकृतरवैः सूचयन्तोऽस्य मन्तुम् ।।१९।।

सरलार्थः - येन मम सैन्यम्, पुत्रमुद्यानञ्च विनष्टं तादृशमपराधिनं विरोधिनं त्यक्तुं नोचितमित्यर्थः। अनुष्टुष्वृत्तम् ।

७६ **विभीषणः** - **अयम्** = एषः, **अपराद्धः** = अभिघाती, **वानरः** = कपिः, **वध्यः** = मारणार्हः, **दुष्टः** = दुरात्मा, **तथापि कार्यानुष्ठानस्य वशात्** = दूतकृत्याधीनत्वात्, **बधेन** = मारणेन, **समानम्** = तुल्यम्, **दण्डम्** = यातनाम्, **अनुभवतु** = जानातु।

७७ **रावणः** - (**क्षणं विचार्य**) **आः भोः ! मया** = रावणेन, **ज्ञातम्** = विचारितम्।

अन्वयः - वानराणाम् लाङ्गूलम् मनसः अत्यन्तम् मानम् जनयति । अस्मात् अद्य वीराः तैलसिक्तांशुकैः, अखिलम् तत् दृढतरं वेष्टयित्वा अथ पुच्छे वह्निम् संयोज्य पटहकृतरवैः अस्य मन्तुम् सूचयन्तः रज्जुभिः संबद्धम् तम् नगरम् अभि शीघ्रम् भ्रामयन्तु ।

व्याख्या - **वानराणाम्** = कपीनाम्, **लाङ्गूलम्** = पुच्छम्, **मनसः** = चेतसः, **अत्यन्तम्** = नितराम्, **मानम्** = दर्पम्, **जनयति** = उत्पादयति । **अस्मात्**= कारणात्, **अद्य** = अस्मिन् दिने, **वीराः** = शूराः, **तैलेन** = स्नेहेन, **आसिक्तैः** = अभ्यक्तैः, **अंशुकैः** = वस्त्रैः, **अखिलम्** = समग्रम्, **तत्** = लाङ्गूलम्, **अतिशयेन दृढं यथा स्यात्तथा दृढतरम्** = निविडतरम्, **वेष्टयित्वा** = आवेष्ट्य, **अथ** = अनन्तरम्, **पुच्छे** = लाङ्गूले, **वह्निम्** = अग्निम्, **संयोज्य** = योजयित्वा, **पटहेन**= दुन्दुभिना, **कृतैः** = विहितैः, **रवैः** = ध्वानैः, **अस्य** = वानरस्य, **मन्तुम्** = अपराधम्, **सूचयन्तः**= ज्ञापयन्तः, **रज्जुभिः** = सूत्रैः, **संबद्धम्**= निबद्धम्, **तम्**= वानरम्, **नगरम्** = पुरम्, **अभि** = सर्वतः, **शीघ्रम्** = द्रुतम्, **भ्रामयन्तु** = भ्रमिं कारयन्तु ।

सरलार्थः - वानराणां लाङ्गूलं मानं जनयतीतिहेतोस्तत् तैलसिक्तैरंशुकैः संवेष्ट्य तत्र वह्निं संयोज्य पटहध्वानेन तस्यापराधं ज्ञापयन्तो वीराः शीघ्रमेव रज्जुभिर्बद्धम् वानरम् नगरे भ्रामयन्तु, इत्यर्थः । स्रग्धरावृत्तम् ।

७८ **विभीषणः** - (आत्मगतम्) विधिवञ्चितस्य विनाशोन्मुखस्याऽस्य विपरीत-मनसीदृशं स्फुरितमधुना । अनेन कर्मणापि महती क्षतिर्भविष्यतीति मे मनसि भाति । तथापि वक्तुं न शक्यते । यद्रोचते तत्करोतु । यथा राजा तथा वयम्। (प्रकाशम्) यथा रोचते प्रभविष्णवे । (इति तथा कुर्वन्ति)

७९ **हनुमान्** - (आत्मगतम्)

बद्धं रज्जुभिरद्य राक्षसशतैः संताड्यमानं भृशं
पौराश्चौरमिवेह मां प्रति रुषा पश्यन्ति मार्गस्थिताः ।
सर्वं क्षुल्लकवन्निशाचरकृतं सोढं मया हेलनं
पुच्छाग्निः सपदि क्षपाचरपुरीं दन्दह्यतां लीलया ।।२०।।

---

७८ **विभीषणः** - (**आत्मगतम्**) **विधिना** = भाग्येन, **वञ्चितस्य, विनाशे** = क्षये, **उन्मुखस्य** = उद्यतस्य, **अस्य** = रावणस्य, **विपरीते** = वैयात्ये, **मनसि** = चेतसि, **अधुना** = संप्रति, **ईदृशम्** = पूर्वोक्तम्, **स्फुरितम्** = समुपस्थितम् । **अनेन** = एतेन, **कर्मणा** = कार्येणापि, **महती** = अत्यधिका, **क्षतिः** = नाशो भवतीति, **मे** = विभीषणस्य, **मनसि** = चेतसि, **विभाति** = प्रतीयते, **तथापि** = तदपि, **वक्तुम्** = कथयितुम्, भयेनेति शेषः । **न शक्यते** = नास्मि शक्तः, इत्यर्थः । **तस्मै यत् रोचते** = स यदिच्छति, **तत् करोतु** = विदधातु । **यथा** = यादृशः, **राजा** = देवः, तथैव वयम् प्रजाः स्म । (प्रकाशम्) **प्रभविष्णवे** = सामर्थ्यसंपन्नाय तुभ्यम्, यद् रोचते तत् करोतु, इत्यर्थः । (**इति** = इत्थम्, तथा कुर्वन्ति)

७९ **हनुमान्** - (आत्मगतम्)

अन्वयः - अद्य मार्गस्थिताः पौराः, रज्जुभिः बद्धम् राक्षसशतैः भृशम् संताड्यमानम् माम् प्रति चौरम् इव रुषा पश्यन्ति । मया सर्वम् निशाचरकृतम् हेलनम् क्षुल्लकवत् सोढम् । पुच्छाग्निः सपदि क्षपाचरपुरीम् लीलया दन्दह्यताम् ।

व्याख्या - **अद्य** = अधुना, **मार्गे** = पथि, **स्थिताः** = विद्यमानाः, **पौराः**= पुरवासिनः, **रज्जुभिः** = गुणैः, **बद्धम्** = ग्रथितम्, **राक्षसानाम्** = निशाचराणाम्, **शतैः** = समूहैः, **भृशम्** = अत्यन्तम्, **संताड्यमानम्** = आहन्यमानम्, **माम्** = हनुमन्तम् प्रति, **चौरम्** = स्तेनम् इव, **रुषा** = क्रोधेन, **पश्यन्ति** = विलोकयन्ति । **मया** = हनुमता, **निशाचरैः** = राक्षसैः, **कृतम्** = विहितम्, **हेलनम्** = तिरस्करणम्, **क्षुल्लकेन इव, क्षुल्लकवत्** = पामरेणेव, **सोढम्** = मर्षितम् । **पुच्छाग्निः** = लूमवह्निः, **सपदि** = तत्क्षणे, **क्षपाचराणाम्** = राक्षसानाम्, **पुरीम्** = नगरीम्, **लीलया** = हेलया, **दन्दह्यताम्** = नितरां दहतु ।

उपमालङ्कारः । **शार्दूलविक्रीडितं वृत्तम्** ।

८० **कथमधुना** – राक्षसहस्तादात्मानं मोचयामि । विचार्य भगवतो रामचन्द्रस्य प्रसादाद्यथेच्छं प्रमाणरूपमनुकर्तुं शक्नोमि । यतः सूक्ष्मतरं रूपं बिभ्रतो मम सकलानि गात्रबन्धनानि शिथिलीभवन्ति । ततः पर्वतसदृशं रूपं धृत्वा स्तम्भ-मादाय सकलं रक्षिवर्गं शकलं कृत्वा गोपुरं समुत्प्लुत्य विभीषणसदनमन्तरेण ज्वलनज्वालावलीढेन पुच्छेन लङ्कागृहाणि ध्मास्यामि। येन स्वमोचनसमुद्युक्तस्य विभीषणस्य गृहं हित्वा वानरेण सर्वेषां गृहाणि दग्धानि । यतोऽयं विभीषणः शत्रुपक्षसमाश्रितोऽस्ति किमिति मन्यमानस्य रावणस्यान्तःकरणस्य विभीषणेऽपि व्यापाद उत्पद्येत । विरुद्धे विभीषणेऽस्माकं महत्प्रयोजनं भविष्यति, विभीषणश्च कृतोपकारं मां मन्येत । लङ्कादहनानन्तरं समुद्रजलावगाहननिःशेषीकृतलाङ्गू-लानलज्वालः सीतामुपेष्यामि (इति तथा करोति)

(नेपथ्ये)

---

८० **अधुना** = इदानीम्, **कथम्** = कया रीत्या, **राक्षसस्य** = निशाचरस्य, **हस्तात्** = करात्, **आत्मानम्** = स्वम्, **मोचयामि** = त्याजयामि ? (विचार्य) **भगवतः** = ऐश्वर्यशालिनः, **रामचन्द्रस्य** = राघवस्य, **प्रसादात्** = अनुग्रहात्, **यथेच्छाप्रमाणम्**= इच्छानुसारमानम्, **रूपम्**= स्वरूपम्, **अनुकर्तुम्**= ग्रहीतुम्, **शक्नोमि** = समर्थोऽस्मि। **यतः**= यस्मात्, **सूक्ष्मतरम्**= अतिस्वल्पम्, **रूपम्** = स्वरूपम्, **बिभ्रतः** = धारयतः, **मम** = हनुमतः, **सकलानि** = निखिलानि, **गात्रबन्धनानि** = शरीररज्जुग्रथनानि, **शिथिलीभवन्ति** = श्लथाः जायन्ते । **ततः तदनन्तरम्, पर्वतसदृशम्** = अद्रिसमानम्, **रूपम्** = स्वरूपम्, **धृत्वा** = गृहीत्वा, **स्तम्भम्** = अयोदण्डम्, **आदाय** =गृहीत्वा, **सकलम्** = निखिलम्, **रक्षिवर्गम्** = रक्षकसमूहम्, **शकलम्** = खण्डम्, **कृत्वा**= विधाय, **गोपुरम्** = पुरद्वारम्, **समुत्प्लुत्य** = उद्गत्य, **विभीषणस्य** = रावण-कनिष्ठानुजस्य, **सदनम्** = भवनम्, **अन्तरेण** = विना, अन्तरेणेत्यस्य योगे द्वितीया। **ज्वलनस्य** = वह्नेः, **ज्वालाभिः** = अर्चिर्भिः, **अवलीढेन** = व्याप्तेन, **पुच्छेन** = लाङ्गूलेन, **लङ्कायाः** = लङ्कानगर्याः, **गृहाणि** = भवनानि, **ध्मास्यामि** = धक्ष्यामि। **येन** = यस्मात्, **स्वस्य** = मम, **मोचने** = त्यागे, **समुद्युक्तस्य** = उद्यतस्य, **विभीषणस्य** = रावणानुजस्य, **गृहम्** = भवनम्, **हित्वा** = विहाय, **वानरेण** = कपिना, **सर्वेषाम्** = निखिलानाम्, **राक्षसानाम्** = निशाचराणाम्, **गृहाणि** = भवनानि, **दग्धानि** = भस्मीकृतानि । **यतः** = अस्मात् कारणात्, **अयम्** = एषः, **विभीषणः**, **शत्रुपक्षम्** = रामपक्षम्, **समाश्रितः** = आलम्बितः, **अस्ति किमिति मन्यमानस्य** = अवधारयतः, **रावणस्य** = दशवदनस्य, **अन्तःकरणस्य** = चेतसः, **विभीषणेऽपि** = स्वानुजेऽपि, **व्यापादः** = मिथ्यामतिः, **उत्पद्येत** = जायेत ।

८१ भगवति निकषात्मजाद्विमुक्तः
पवनसुतो निकषागतो भवन्तीम् ।
अलमतिपरिदेवनेन मातः !
प्रमददृशा परिलोकय त्वमेनम् ।।२१।।

(ततः प्रविशति तथाभूतो हनुमान् जानकी च)

८२ **हनुमान्** - अयि देवि सीते ! देवीं भीषयन्तीनां राक्षसीनामधुना कीदृशी दशा।

विभीषणे = तदीयकनिष्ठानुजे, **विरुद्धे** = वैपरीत्ये, **अस्माकम्** = राघवपक्षीयानाम्, **महत् प्रयोजनम्** = स्वार्थसिद्धिः, **भविष्यति** = जनिष्यते । **विभीषणश्च माम्** = हनुमन्तम्, **कृतः उपकारो येन तम्, मन्येत** = जानीयात् । **लङ्कायाः दहनस्य अनन्तरम्** = लङ्कायां दग्धायाम्, **समुद्रस्य** = सागरस्य, **जले** = सलिले, **अवगाहनेन**= मज्जनेन, **निःशेषीकृता** = समापिता, **लाङ्गूलानलस्य** = पुच्छवह्नेः, **ज्वाला** = अर्चिः, **येन सः तथाभूतः, सीताम्** = जानकीम्, **उपेष्यामि** = समीपं प्राप्स्यामि (इति तथा करोति)

(नेपथ्ये)

८१ **अन्वयः** - भगवति ! निकषात्मजात् विमुक्तः पवनसुतः भवन्तीम्, निकषा, आगतः। मातः अतिपरिदेवनेन अलम् । त्वम् प्रमददृशा एनम् परिलोकय ।

व्याख्या - हे भगवति = भो देवि सीते ! **निकषात्मजात्** = राक्षसात्, **विमुक्तः** = पृथग्भूतः, **पवनस्य** = वायोः, **सुतः** = पुत्रः, हनुमान्, **भवन्तीम्** = त्वाम्, **निकषा**= समीपे, **आगतः** = प्राप्तः । **हे मातः** = भो जननि ! **अतिपरिदेवनेन**= अतिशयमनस्तापेन, **अलम्** = व्यर्थम् । सन्तापो न विधेय इत्यर्थः । **त्वम्** = भवती, **प्रमदस्य** = हर्षस्य, **दृशा** = दृष्ट्या, **एनम्** = माम्, **परिलोकय** = विलोकय।

सरलार्थः - अयं हनुमान् राक्षसात् मुक्तस्त्वां निकषा समुपस्थितोऽस्ति । सन्तापं परित्यज्य हर्षेण मां पश्येति । **प्रहर्षिणीदं वृत्तम्** ।

(ततः प्रविशति तथाभूतो हनुमान् जानकी च)

८२ **हनुमान् - अयि देवि सीते** = जानकि! **देवीम्** = त्वाम्, **भीषयन्तीनाम्** = त्रासयन्तीनाम्, **राक्षसीनाम्** = निशाचरीणाम्, **अधुना** = संप्रति, **कीदृशी दशा** = अवस्था, अस्ति तथा हि -

अन्वयः - परिजनापदा दुःखिताः राक्षसीः विलोकयतु । (याः) अनलकीलया व्याकुलाः गृहतोरणात् पतन्ति । अधुना कति च ज्वलनजिह्वया लङ्घितान् सुतान् विलोक्य प्रतिगृहम् भृशम् मूर्छिताः करुणम् रुदन्ति ।

तथा हि -

विलोकयतु राक्षसीपरिजनापदा दुःखिताः
पतन्ति गृहतोरणादनलकीलया व्याकुलाः ।
रुदन्ति करुणं सुतान् ज्वलनजिह्वया लङ्घितान्
विलोक्य कति चाऽधुना प्रतिगृहं भृशं मूर्च्छिताः ।।२२।।

अपि च -

८३ लङ्काद्दाहभयाद् द्रुतं स्वसदनं त्यक्त्वा बहिर्निर्गता
दारापत्ययुतं महामणिगणैः कार्तस्वरैः पूरितम् ।
सौधाट्टालकमाश्रिता विलपतीर्ज्वालावलीढप्रिया
वक्षस्ताडनतत्परा भुवि गताः पश्यन्त्यहो नैर्ऋताः ।।२३।।

व्याख्या - परिजनानाम् = आत्मीयानाम्, आपदा = विपदा, दुःखिताः= पीडिताः, राक्षसीः = निशाचरीः (कर्मपदम्) विलोकयतु = पश्यतु। याः अनलस्य= वह्नेः, कीलया = ज्वालया, व्याकुलाः = आतुराः, गृहतोरणात् = भवनद्वारात्, पतन्ति= अधो यान्ति । अधुना = संप्रति, कति च राक्षस्यः, ज्वलनस्य = वह्नेः, जिह्वया = ज्वालया, लङ्घितान् = अवलीढान्, दग्धानित्यर्थः, सुतान् = पुत्रान्, विलोक्य = दृष्ट्वा, प्रतिगृहम् = प्रतिभवनम्, भृशम् = अत्यन्तम्, मूर्च्छिताः = मोहमुपगताः, करुणम्, रुदन्ति = करुणक्रन्दनं कुर्वन्ति ।

८३ अन्वयः - लङ्काद्दाहभयात् दारापत्ययुतम्, महामणिगणैः कार्तस्वरैः पूरितम् स्वसदनम् त्यक्त्वा द्रुतम् बहिर्निर्गताः भुवि गताः नैर्ऋताः वक्षस्ताडनतत्पराः (सन्तः) सौधाट्टालिकाम् आश्रिताः, विलपन्तीः ज्वालावलीढप्रियाः पश्यन्ति अहो ।

व्याख्या - लङ्कायाः = लङ्कानगर्याः, यः दाहः = दहनम्, तस्य भयात्= भीत्या, दाराः = पत्न्यः, अपत्यानि = पुत्रपौत्रादयश्च, तैः युतम् = सहितम्, महान्तश्च ते मणयः, तैः महामणिभिः = महार्घरत्नैः, कार्तस्वरैः = सुवर्णैश्च, पूरितम् = युक्तम्, स्वम् = स्वकीयम्, सदनम् = भवनम्, त्यक्त्वा = परित्यज्य, द्रुतम् = शीघ्रम्, बहिः = बहिर्भागम्, निर्गताः = निसृताः, भुवि= भूमौ, जाताः= स्थिताः, नैर्ऋताः = राक्षसाः, वक्षसाम् = उरसाम्, ताडने = हनने, तत्पराः = उद्यताः, सन्तः सौधानाम् = भवनानाम्, अट्टालकम् = हर्म्याद्युपरिभागम्, आश्रिताः= अवलम्बिताः, विलपतीः= विलापं कुर्वतीः, ज्वालया = कीलया, अवलीढाः = लङ्घिताः, प्रियाः = कलत्राणि, पश्यन्ति = विलोकयन्ति । अहो = आश्चर्यं जातमिति । शार्दूलविक्रीडितं वृत्तम् ।

८४ **सीता** - (सहर्षम्) भो भोः कविसेट्ठ, तुह राक्खसकिदां दुरवत्थां सुणिअ अहं पज्जाउला आसम् । दाणिं दे मुहं दंसिअ उण पगिदिं गदाह्मि । कहेहि मे कहं तुअं रक्खसुहत्थादो विमुचिअ एत्थ उवागदोसि । अथ च कहं तुए पुच्छदहणवाधा अवणीदा । सव्वं मे कहेहि । [*भो भो कपिश्रेष्ठ! तव राक्षसकृतां दुरवस्थां श्रुत्वाऽहं पर्याकुलासम् । इदानीं ते मुखं दृष्ट्वा पुनः प्रकृतिं गतास्मि। कथय मे कथं त्वं राक्षसहस्ताद्विमुच्यात्रोपागतोऽसि । अथ च कथं पुच्छदहनबाधाऽपनीता सर्वं मे कथय।*]

८५ **हनुमान्** - भगवति ! सर्वं विज्ञापयामि । श्रूयताम् - त्वदपमानसञ्जातक्रोपेन मया प्रमदावनं तस्य दुरात्मनो विनाशितम् । राक्षसाश्च बहवो हताः । तज्जात-मन्युर्मेघनादो मां ब्रह्मास्त्रप्रयोगेण निगृहीतवान् । ततः क्षणं तदस्त्रबाधामनुभूय बद्ध इव तस्य दुरात्मनः सदसि समुपेत्य तेन सह किमपि समलपम् । मदुक्तिजातरोषेण तेन मम लाङ्गूलेऽस्मिन् सतैलवस्त्रवेष्टनं वह्निसंयोजनं चोदितम्।

---

८४ **सीता - भो भो कपिश्रेष्ठ** = वानरोत्तम ! **तव** = हनुमतः, **राक्षसैः** = दानवैः, **कृताम्** = विहिताम्, **दुरवस्थाम्** = दुर्गतिम्, **श्रुत्वा** = आकर्ण्य, **पर्याकुलाः** = व्याकुलाः, **आसम्** = अभवम् । **इदानीम्** = अधुना, **ते** = तव, **मुखम्** = वदनम्, **दृष्ट्वा** = विलोक्य, **पुनः** = भूयः, **प्रकृतिं गता** = स्वस्थानापन्ना, अस्मि । **मे** = मह्यम्, **कथय**= वद। **हनुमन्! राक्षसहस्तात्** = निशाचरकरात्, **विमुच्य** = मुक्त्वा, **अत्र** = इह, **कथम्** = कया रीत्या, **उपागतः** = प्राप्तोऽसि । **अथ च** = अपरञ्च, **त्वया**= भवता, = लाङ्गूलदाहस्य, **बाधा** = सन्तापः, **कथम्** = कया रीत्या, **अपनीता** = दूरीकृता । **सर्वम्** = निखिलम्, **मे** = मह्यम्, **कथय** = वद ।

८५ **हनुमान् - भगवति** = हे देवि ! **सर्वम्** = निखिलम्, **विज्ञापयामि** = निवेदयामि। **तव** = भवत्याः, **यः अपमानः** = दुराचारः, **तस्मात् सञ्जातः** = उद्भूतः **यः कोपः** = क्रोधः, **तेन कारणेन मया** = हनुमता, **दुरात्मनः** = दुष्टस्य, **तस्य** = रावणस्य, **प्रमदावनम्** = वनितोद्यानम्, **विनाशितम्** = उत्खातम् । **बहवः** = नैकाः, **राक्षसाः** = क्रव्यादाः, **हताः** = घातिताः, **तस्मात्** = राक्षसनाशात्, **जातः**= उत्पन्नः, **मन्युः** = क्रोधो **यस्य सः**, **तथोक्तः मेघनादः** = इन्द्रजित्, **माम्** = हनुमन्तम्, **ब्रह्मास्त्रस्य** =ब्रह्मपाशस्य, **प्रयोगेण** = व्यापारेण, **निगृहीतवान्** = बद्धवान् । **ततः** = तदनन्तरम्, **क्षणम्** = स्वल्पकालम्, **तस्य अस्त्रस्य** = ब्रह्मपाशस्य, **बाधाम्** = पीडाम्, **अनुभूय** = अनुभवं कृत्वा, **बद्धः** = निबद्ध इव, **दुरात्मनः** = दुष्टस्य, **तस्य** = रावणस्य, **सदसि** = सभायाम्, **समुपेत्य** = प्राप्य, **तेन** = रावणेन

८६. **सीता** - आः कधं णिद्दएण राक्खसेण सजीविदे तुइ वह्निसञ्जाअणं किदम् । तदो तदो । [*आः कथं निर्दयेन राक्षसेन सजीविते त्वयि वह्निसंयोजनं कृतम् । ततस्ततः ।*]

८७. **हनुमान्** - ततो मयाऽपि ज्वलल्लाङ्गूलेन गात्रसङ्कोचशिथिलीकृतबन्धनेन निहतराक्षसरक्षिवर्गेणाऽस्याततायिनः पुरं सर्वं ध्मातम् । देव्याः आशीःप्रभावेण न मया पुच्छज्वलनबाधानुभूता । ततः सर्वे लङ्कादाहपर्याकुला आसन् । तदवसरमवगम्य समुद्रजलनिवारितलूमाग्निर्देवीं द्रष्टुमागतोऽहम् । तद्देहि मेऽनुज्ञाम्, साधयामि तावत् ।

सह, **किमपि** = किञ्चिद्, **समलपम्** = समवदम् । **मम** = हनुमतः, **या उक्तिः** = कथनम्, **तस्याः जातः** = उत्पन्नः, **रोषः** = क्रोधो **यस्य तेन, तेन** = रावणेन, **अस्मिन्** = एतस्मिन्, **लाङ्गूले** = पुच्छे, **तैलेन सहितम् सतैलम्, यद् वस्त्रम्** = वसनम्, **तस्य वेष्टनम् यस्मिन् कर्मणि तद् यथा स्यात्तथा, वह्नेः** = अग्नेः, **संयोजनम्** = संयोगः, **चोदितम्** = कृतम् ।

८६ **सीता** - **आः** = आश्चर्यस्य विषयः, **निर्दयेन** = निष्करुणेन, **राक्षसेन** = निशाचरेण, **त्वयि** = भवति, **सञ्जीविते** = प्राणान् धारयति, **वह्नेः** = अग्नेः, **संयोजनम्** = योगः, **कृतम्** = विहितम् । **ततः** = तदनन्तरं किमभवदित्याशयः ।

८७ **हनुमान्** - **ततः** = तदनन्तरम्, **ज्वलन्** = दहन्, **लाङ्गूलः** = पुच्छं **यस्य तेन, गात्रस्य** = शरीरस्य, **सङ्कोचेन** = स्वल्पीकरणेन, **शिथिलीकृतम्** = श्लथीकृतम्, **बन्धनम्** = ग्रथनं **येन तेन, निहतः** = व्यापादितः, **राक्षसरक्षिणाम्** = निशाचर-सैनिकानाम्, **वर्गः** = समूहो **येन तेन, मया** = हनुमता, **आततायिनः** = अपराधिनः, **अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते आततायिनः ।।** **अस्य** = रावणस्य, **सर्वम्** = निखिलम्, **पुरम्** = नगरीम्, **ध्मातम्** = अग्निसात्कृतम्। **देव्याः** = भवत्याः, **आशिषः** = आशीर्वादस्य, **प्रभावेण** = सामर्थ्यात्, **मया** = हनुमता, **पुच्छज्वलनस्य** = लूमदाहस्य, **वाधा** = पीडा, **न अनुभूता** = न ज्ञाता। **ततः** = तदनन्तरम्, **सर्वे** = राक्षसाः, **लङ्कादाहेन** = लङ्काज्वलनेन, **पर्याकुलाः** = व्याकुलाः, **आसन्** = अभवन् । **तस्य** = पर्याकुलस्य, **अवसरम्** = समयम्, **अवगम्य**= ज्ञात्वा, **समुद्रस्य**= सागरस्य, **जलेन** = सलिलेन, **निवारितः** = दूरीकृतः, **अग्निः** = वह्निः, **येन सः, तथाभूतः सन् देवीम्** = त्वाम्, **द्रष्टुम्** = विलोकयितुम्, **अहम्** = हनुमान्, **आगतः** = प्राप्तोऽस्मि । **तत्** = तस्मात्, **मे** = मह्यम्, **आज्ञाम्**= आदेशम्, **देहि** = प्रयच्छ । **साधयामि** = गच्छामि, '**तावत्**' इति वाक्यालङ्कारे ।

८८ **सीता** - हणुमन्! अदोप्पभिदि मासदुवं जीएमि तस्स अभ्यन्तरे रामो आगच्छिअ मं अणुगेह्णदु । [*हनुमन्! अतः प्रभृति मासद्वयं जीवामि, तस्याभ्यन्तरे राम आगत्य मामनुगृह्णातु*]

८९ **हनुमान्** - एवं निवेदयिष्ये ।

९० **सीता** - सुणुहि मे अवरं वाचिअम् । [*शृणुष्व मेऽपरं वाचिकम्*]

९१ **हनुमान्** - अवहितोऽस्मि ।

९२ **सीता** -

कविवर ! इदो सीग्घं गच्छेहि मे पिअवल्लहं
कधअदु भवं सव्वं दावं विजोगकिदं मम ।
दसमुहउलं दुट्टं आजिक्खणे हदुअहुतं
णअदु उण मं णाहो भज्जां इदोणअरीं णिजाम् ।।२४।।

---

८८ **सीता** - **अतः प्रभृति** = अस्माद् दिनात्, **मासद्वयम्** = द्वौ मासौ, **जीवामि** = प्राणान् धारयामि, **तस्य** = मासद्वयस्य, **अभ्यन्तरे** = अवधौ, **रामः** = दाशरथिः, **आगत्य** = एत्य, **माम्** = सीताम्, **अनुगृह्णातु** = कृपां विदधातु ।

८९ **हनुमान्** - **एवम्** = यद् भवत्योदितम्, **तदेव निवेदयिष्ये** = कथयिष्यामि ।

९० **सीता** - **मम** = हनुमतः, **अपरम्** = अन्यत्, **वाचिकम्** = सन्देशम्, **शृणु** = आकर्णय ।

९१ **हनुमान्** - **अवहितः** = सावधानः, अस्मि ।

९२ **सीता** -

अन्वयः - हे कपिवर ! इतः शीघ्रम् गच्छ, भवान् मे प्रियवल्लभम् मम वियोगकृतम्, सर्वम् तापम् कथयतु । हे नाथ ! आजिक्षणे दुष्टम् दशमुखकुलम् हत्वा पुनः भार्याम् माम् इतः निजाम् नगरीम् द्रुतम् नयतु ।

व्याख्या - **हे कविवर** = भो वानर! **इतः** = अस्मात् स्थानात्, **शीघ्रम्** = द्रुतम्, **गच्छ** = याहि । **भवान्** = त्वम्, **मे** = मम, **प्रियवल्लभम्** = पतिम्, राममित्यर्थः । **मम** = सीतायाः, **वियोगकृतम्** = विरहोद्भूतम्, **सर्वम्** = निखिलम्, **तापम्** = पीडाम्, **कथयतु** = वदतु । **हे नाथ** = भो स्वामिन् ! **आजिक्षणे** = युद्धकाले, **दुष्टम्** = दुरात्मानम्, **दशमुखस्य**= रावणस्य, **कुलम्** = वंशम्, **हत्वा**= व्यापाद्य, **पुनः** = भूयः, **भार्याम्** = पत्नीम्, तवेति शेषः । **माम्** = सीताम्, **इतः**=

[कपिवर इतः शीघ्रं गच्छ त्वं मे प्रियवल्लभं
कथयतु भवान् सर्वं तापं वियोगकृतं मम ।
दशमुखकुलं दुष्टं आजि क्षणे हत्वा द्रुतं
नयतु पुनर्मां नाथो भार्यामितो नगरीं निजाम् ।।२४।।]

९३ हनुमान् - गृहीतं वाचिकमिदम्, साधयामि तावत् । (इति प्रणम्य निष्क्रान्तः)

(नेपथ्ये)

भो भो अङ्गद जाम्बवन्नलमुखा वीराः समालोक्यता-
मायातः पवनात्मजो द्रुतपदं दृष्ट्वा विदेहात्मजाम् ।
मा भूताथ वलीमुखा विमनसो हृष्टाः समातिष्ठत
श्रोतव्यो गगनेऽस्य सिंहनिनदो युष्माभिरेषोऽधुना ।।२५।।

(ततः प्रविशति जाम्बवन्नलादिभिः परिवृतोऽङ्गदः)

लङ्कातः, निजाम् = स्वाम्, नगरीम् = पुरीम्, द्रुतम् = शीघ्रम्, नयतु = प्रापयतु। हरिणीवृत्तम् ।

९३ हनुमान् - इदम् = एतत्, वाचिकम् = सन्देशः, गृहीतम् = मनसि धृतम् । साधयामि तावत् = गच्छामि तावत् । (इति प्रणम्य निष्क्रान्तः)

(नेपथ्ये)

अन्वयः - भो भो अङ्गद! जाम्बवन्नलमुखाः वीराः समालोक्यताम् । पवनात्मजः विदेहात्मजाम् दृष्ट्वा द्रुतपदम् आयातः । अथ वलीमुखाः विमनसः मा भूत । हृष्टाः समातिष्ठत । अधुना युष्माभिः गगने एषः अस्य सिंहनिनदः श्रोतव्यः ।

व्याख्या - भो भो अङ्गद = हे युवराज ! जाम्बवान् च नलश्च तौ जाम्बवन्नलौ मुखे येषान्ते जाम्बवन्नलमुखाः = जाम्बवन्नलप्रमुखाः, वीराः = शूराः, समालोक्यताम् = वीक्ष्यताम् । पवनस्य = वायोः, आत्मजः = सुतः, विदेहस्य = जनकस्य, आत्मजाम् = सुताम्, सीतामित्यर्थः । दृष्ट्वा = विलोक्य. द्रुतपदम् = शीघ्रचरणम् यथा स्यात्तथा, आयातः = आगतः । अथ = अनन्तरम्, भो वलीमुखाः = भो वानराः ! विमनसः = खिन्नचेतसः, मा भूत = नो भूयास्त। हृष्टाः = सानन्दाः, समातिष्ठत = निवसत । अधुना = अस्मिन् समये, युष्माभिः= वानरैः, गगने = आकाशे, एषः = अयम्, सिंहस्य निनद इव निनदः सिंहनिनदः= केशरिनादः, श्रोतव्यः = आकर्णयितव्यः । शार्दूलविक्रीडितमत्र वृत्तम् ।

९४ **अङ्गदः** - भो भो वानरर्षभाः ! श्रुता भवद्भिरस्माकं भागधेयेनोदिताऽऽकाश-वाणी। अवश्यमेव हनुमान् विहितरामकृत्य आगतः, नान्यथा सिंहनादस्य सम्भवः ।

(इति सर्वे निनादमभिनयन्ति)

(ततः प्रविशति गिरिशिखरं समाक्राम्यन् पवनात्मजः)

९५ **हनुमान्** - अये युवराज ! भो भोः प्रियवयस्या वीराश्चिरकालादत्र भवतां दर्शनं लब्धम् । परिष्वजध्वं माम् ।

९६ **सर्वे** - स्वागतं ते वीर! (इति समाश्लिष्यन्तो हनुमतो लाङ्गूलं चुम्बन्ति) ।

९७ **हनुमान्** - (युवराजं निरीक्ष्य)

सीतां दृष्ट्वा मलिनवसनां पद्मपत्रायताक्षीं
हत्वा रक्षोगणमपि रणे हन्तुकामं निकामम् ।

---

९४ **अङ्गदः** - **भो भो वानरर्षभाः** = कपिश्रेष्ठाः ! **भवद्भिः** = युष्माभिः, **अस्माकम्**= वानराणाम्, **भागधेयेन** = भाग्येन, **आकाशवाणी** = व्योमवाक्, **उदिता** = उद्गता, **अवश्यम्** = नूनमेव, **हनुमान्** = पवनसुतः, **विहितम्** = कृतम्, **रामस्य** = राघवस्य, **कृत्यम्** = कार्यम् **येन सः**, **तथाभूतः सन् आगतः** = आयातः, **अन्यथा** = नो चेत्, **सिंहनादस्य** = गर्जनस्य, **संभवः** = उत्पत्तिः, नो भवेदिति भावः । (इति सर्वे निनादमभिनयन्ति)

(ततः प्रविशति गिरिशिखरं समाक्राम्य पवनात्मजः)

९५ **हनुमान्** - **भो युवराज** = हे अङ्गद ! **भो भो प्रियवयस्याः** = प्रियसखायः ! **वीराः** = शूराः, **चिरकालात्** = अधिकसमयात्, **अत्र भवताम्** = युष्माकम्, **दर्शनम्** = विलोकनम्, **लब्धम्** = प्राप्तम् । **माम्** = हनुमन्तम्, **परिष्वजध्वम्** = आलिङ्गयत ।

९६ **सर्वे** - **भो वीर ! ते** = तव, **स्वागतम्** = शुभागमनमस्तु (इति समाश्लिष्यन्तो हनुमतो लाङ्गूलं चुम्बन्ति)

९७ **हनुमान्** - (युवराजं निरीक्ष्य)

अन्वयः - यूयम् मलिनवसनाम्, पद्मपत्रायताक्षीम्, सीताम्, दृष्ट्वा रणे हन्तुकामम् रक्षोगणम् अपि निकामम् हत्वा दशमुखपुरीम्, लङ्काम् दग्ध्वा लोलकल्लोलमालम् सिन्धुम् त्वरितम् तीर्त्वा इह आगतम् माम् वित्त ।

व्याख्या - (**भो वानराः**) **यूयम्** = भवन्तः, **मलिनम्** = मलिमसम्, **वसनम्** = वस्त्रम् **यस्याः सा ताम् पद्मस्य पत्रे इव अक्षिणी यस्याः सा ताम्,**

दग्ध्वा लङ्कां दशमुखपुरीं लोलकल्लोलमालं
तीर्त्वा सिन्धुं त्वरितमिह मामागतं वित्त यूयम् ।।२६।।

९८ सर्वे - प्रसादितो भवता सीताविरहार्तमना रामचन्द्रः । कृतमित्रकृत्यकृतकृत्यः कृतः कृतिना भवता सुग्रीवश्च । धन्योऽसि वीरशिरोमणे हनुमन्! सर्वेषां जीवितं रक्षितं त्वया । अतः प्रवर्षणगिरिं प्रति गच्छामो यत्र भगवान् रामचन्द्रः सुग्रीवोऽपि विराजते । (इति परिक्रामन्ति)

९९ वानराः - युवराज ! पश्यत्वग्रतोऽत्र भवान् सुग्रीवपालितं मधुवनं तद्दीयतां नोऽनशनायितानामनुशासनं येन मधुपानेन संतुष्टात्मानो वयं रामसुग्रीवौ द्रक्ष्यामः।

पद्मपत्रायताक्षीम् = सरसिजपत्रनयनाम्, **सीताम्** = जानकीम्, **दृष्ट्वा** = विलोक्य, **रणे** = समरे, **हन्तुकामम्** = घातयितुमिच्छन्तम्, **रक्षसाम्** = निशाचराणाम्, **गणम्** = समूहम् अपि, **निकामम्** = यथेप्सितम्, **हत्वा** = व्यापाद्य, **दशमुखस्य**= रावणस्य, **पुरीम्** = नगरीम्, **लङ्काम्**, **दग्ध्वा** = भस्मीकृत्य, **लोलाः** = चञ्चलाः, **कल्लोलानाम्** = उल्लोलानाम्, **मालाः** = पङ्क्तयो **यस्मिन् तम्**, **सिन्धुम्** = समुद्रम्, **त्वरितम्** = शीघ्रम्, **तीर्त्वा** = समुत्तीर्य, **आगतम्** = आयातम्, **माम्** = हनुमन्तम्, **वित्त** = जानीहि ।

सरलार्थः - अहं मलिनवस्त्रां सीतां विलोक्य राक्षसान् व्यापाद्य लङ्काञ्च दग्ध्वा तरङ्गाकुलं समुद्रमुत्तीर्य समागतोऽस्मीति ।

मन्दाक्रान्तावृत्तम् तल्लक्षणं यथा -

मन्दाक्रान्ताम्बुधिरसनगैर्मो भनौ तौ गयुग्मम् ।

९८ **सर्वे** - **भवता** = त्वया, **सीतायाः** = जानक्याः, **विरहेण** = वियोगेन, **आर्तम्** = पीडितम्, **मनः** = चित्तं **यस्य सः**, **रामचन्द्रः** = राघवः, **प्रसादितः** = प्रसन्नतां प्रापितः । **कृतिना** = कुशलेन, **त्वया** = भवता, **सुग्रीवश्च कृतम्** = विहितम्, **मित्रस्य** = रामस्य, **कृत्यम्** = कर्म, **तेन कृतकृत्यः** = कृतार्थः, **कृतः** = विहितः। **हे वीरशिरोमणे** = शूराग्रगण्य, **हनुमन्** = पवनात्मज! **सर्वेषाम्** = निखिलानां वनौकसाम्, **जीवितम्** = जीवनम्, **त्वया** = भवता, **रक्षितम्** । **अतः** = अस्मात्, **यत्र** = यस्मिन्, **भगवान्** = ऐश्वर्यसंपन्नः, **रामचन्द्रः** = राघवः, **सुग्रीवश्च विराजेते**= तिष्ठतः, **प्रवर्षणगिरिम्** = प्रवर्षणपर्वतं प्रति, **गच्छाम** = याम । (इति परिक्रामन्ति)

९९ **वानराः** - **युवराज** = अङ्गद, **अत्र भवान् सुग्रीवेण पालितम्** = रक्षितम्, **तत् मधुवनम्** = उद्यानम्, **पश्यतु** = विलोकयतु । **अनशनायितानाम्** = बुभुक्षितानाम्, **नः** = अस्माकम्, **अनुशासनम्** = आज्ञा, **दीयताम्**, **येन मधुपानेन** =

१०० **युवराजः** - सम्पादितराजकृत्यान्नः स्वयं सुग्रीवोऽपि न निवारयति । कोऽन्योऽधन्यो निवारयितुमुत्सहेत । (श्रुत्वा सर्वे युगपन्मधुवनं समाक्रमन्ति)

(नेपथ्ये)

आः क इमे मामनादृत्य सुग्रीवप्रियतमां मधुवनिकां समाक्रामन्ति । रक्षिणस्ताडयत तान् दुर्विनीतान् ।

(सर्वे श्रुत्वैव मधुपानमारभन्ते)

(ततः प्रविशति रक्षिभिः सहितो दधिमुखो नाम वानरनायकः)

१०१ **दधिमुखः** - भो भो वानराः ! विरमत तावन्मधुपानाद्यावदहं सुग्रीवं निवेदयामि।

१०२ **वानराः** - दधिमुख ! सुग्रीवस्य मातुलोऽसि त्वं कथं न जानासि वीरपाणमेतदिति। न वयं तव वचनेन मधुपानाद्विरमामः (इति रक्षिणस्ताडयन्ति)।

मधूद्यानस्थफलरसावलेहेन, **सन्तुष्टः आत्मा येषान्ते तथोक्ताः, वयम्** = वानराः, **रामसुग्रीवौ** = राघवसुग्रीवौ, **द्रक्ष्यामः** = विलोकयिष्यामः ।

१०० **युवराजः** - **संपादितम्** = विहितम् **यत् राज्ञः** = रामस्य, **कृतम्** = कार्यम्, **यैस्तान्, नः** = अस्मान्, **सुग्रीवः** = वानरराजोऽपि, **न निवारयति** = न निषेधयति। **अन्यः** = अपरः, **अधन्यः** = अभागी, **कः, निवारयितुम्** = निषेधयितुम्, **उत्सहेत**= उद्योगं कुर्यात् । (श्रुत्वा सर्वे युगपन्मधुवनं समाक्रमन्ति) (नेपथ्ये)

आः = आश्चर्यम्, **इमे** = एते, **के, माम्** = रक्षकम्, **अनादृत्य** = अनादरं विधाय, **सुग्रीवस्य** = वानराधीशस्य, **प्रियतमाम्** = अत्यन्तमभीष्टाम्, **मधुवनिकाम्**= मधुवनोद्यानम्, **समाक्रमन्ति** = प्रविश्य फलम् खादन्ति । **भो रक्षिणः** = हे रक्षकाः ! **दुर्विनीतान्** = दुष्टान्, **तान्** = त्रानरान्, **ताडयत** = आघातयत ।

(सर्वे श्रुत्वैव मधुपानमारभन्ते)

(ततः प्रविशति रक्षिभिः सहितो दधिमुखो नाम वानरनायकः)

१०१ **दधिमुखः** - **भो वानराः** = हे कपयः ! **यावत्, अहम्** = दधिमुखः, **सुग्रीवम्** = वानराधीशम्, **निवेदयामि** = कथयामि **तावत् मधुपानात्** = मधुभक्षणात्, **विरमत**= विरता भवत ।

१०२ **वानराः** - भो दधिमुख! **त्वम् सुग्रीवस्य** = वानराधीशस्य, **मातुलः** = मातुः भ्राता असि, **त्वम्** = दधिमुखः, **कथम्** = कुतः, **एतत्** = मधुपानम्, **वीरपानम्**= वृत्ते भाविनि वा रणे यत्पानं तद्, वीरपानं तु यत्पानं वृत्ते भाविनि वा रणे,

१०३ **दधिमुखः** - (चीत्कारपूर्वामपकारगिरमुदीर्य) पश्यत यूयमिदानीमेव युष्माकं स्वच्छन्दचरणं भट्टारकाय निवेदयिष्ये ।

(इति निष्क्रामति)

(ततः प्रविशति रामलक्ष्मणाभ्यां सहितो वानरराजः सुग्रीवः)

१०४ **सुग्रीवः**- भो भो मातुल दधिमुख! कथय कथय केन मे मधुवनं प्रसभमाक्रान्तम्।

१०५ **दधिमुखः** - युवराजेन हनमुता च सहितैर्जाम्बवन्नलादिभिः ।

१०६ **सुग्रीवः** - (रामचन्द्रं निरीक्ष्य । सहर्षम् । जनान्तिकम्)

कृत्वा कार्यमशेषमत्र कपयः प्राप्ता इति ज्ञायते
नो चेत्को मम रक्षितं मधुवनं द्रष्टुं क्षमेत क्षितौ ।

इत्यमरः । **अनेन वानरराक्षसानां युद्धमभूत्, भविष्यति वेति** सूचितम् । **तव** = भवतः, **वचनेन** = वाक्येन, **वयम्** = वानराः, **मधुपानात्** = मधुभक्षणात्, **न विरमामः** = न विरताः भवामः (इति रक्षिणस्ताडयन्ति)

१०३ **दधिमुखः** - (चीत्कारपूर्वामपकारगिरमुदीर्य) **यूयम्** = भवन्तः, **इदानीम्**= अधुना, **युष्माकम्** = भवताम्, **स्वच्छन्दाचरणम्** = स्वतन्त्रव्यवहारम्, **भट्टारकाय** = महाराजाय, **निवेदयिष्ये** = कथयिष्ये । (इति निष्क्रामति)

(ततः प्रविशति रामलक्ष्मणाभ्यां सहितो वानरराजः सुग्रीवः)

१०४ **सुग्रीवः** - **भो भो मातुल दभिमुख! कथय** = वद, **कथय** = वद, **केन** = वनौकसा, **मे** = मम, **मधुवनम्** = मधूद्यानम्, **प्रसभम्** = हठात्, **आक्रान्तम्** ?

१०५ **दधिमुखः** - **युवराजेन** = अङ्गदेन, **हनुमता** = पवनसुतेन च, **सहितैः** = युतैः, **जाम्बवन्नलादिभिः** = जाम्बवन्नलप्रमुखैः, **प्रसभम्** = हठात्, **आक्रान्तम्** = मधु भक्षितम् ।

१०६ **सुग्रीवः** - (रामचन्द्रं निरीक्ष्य, सहर्षम्, जनान्तिकम्)

अन्वयः - अत्र कपयः, अशेषम्, कार्यम् कृत्वा प्राप्ताः इति ज्ञायते । नो चेत् क्षितौ मम रक्षितम् मधुवनम् कः द्रष्टुम् क्षमेत । सखे रघुपते! तैः कथितम् श्रुत्वा सीतावियोगानलप्लुष्टम्, ते हृदयम् पुनः शुभ्रांशुवत् शीतलं भवति ।

व्याख्या - **अत्र** = अस्मिन् स्थाने, **कपयः** = वानराः, **अशेषम्** = समग्रम्, **कार्यम्** = कर्म, **कृत्वा** = विधाय, **प्राप्ताः** = आगता इति **ज्ञायते** = वेद्यते । **नो चेत्** = अन्यथा, **क्षितौ** = पृथिव्याम्, **रक्षितम्** = पालितम्, **मम** = सुग्रीवस्य, **मधुवनम्** = मधूद्यानम्, **द्रष्टुम्** = विलोकयितुम्, **कः पुमान् क्षमेत** =

श्रुत्वा तैः कथितं सखे रघुपते! सीतावियोगानल-
प्लुष्टं ते हृदयं भविष्यति पुनः शुभ्रांशुवच्छीतलम् ।।२७।।

१०७ रामः - सुहृद्वचनश्रवणादभिनन्दति मे मनः ।

१०८ सुग्रीवः - (प्रकाशम्) भो भो मातुल ! सादरमानीयन्तां ते वानरास्त्वरितम् ।

१०९ दधिमुखः - (आत्मगतम्) कथमसौ वानरराज आत्मनः प्रियतमस्य मधुवनस्य फलानि प्रसभमाहरतो वानरान् सादरं प्रवेशयति । नूनं त्यक्ताऽनेन स्वाभाविकी मतिर्मानुषसाहचर्यादिव । (प्रकाशम्) यदाज्ञापयति देवः (इति निष्क्रम्य पुनः प्रविश्य) इमे युवराजप्रभृतयो वानरर्षभाः । (सर्वे रामलक्ष्मणसुग्रीवान् प्रणमन्ति)

११० रामः - स्वागतम् युष्माकं वानरपुङ्गवानां सर्वेषाम् ।

समर्थो भवेत् । **भो सखे** = वयस्य! **रघुपते** = राम! **तैः** = वानरैः, **कथितम्** = भणितम्, **श्रुत्वा** = आकर्ण्य, **सीतायाः** = जानक्याः, **वियोगः** = विरह एव, **अनलः** = वह्निस्तेन, **प्लुष्टम्** = दग्धम्, **ते** = तव, **हृदयम्** = चेतः, **पुनः** = भूयः, **शुभ्रा अंशवो यस्य सः**, **शुभ्रांशुः** = चन्द्रस्तद्वत् **शीतलम्** = शीतम्, **भवति** = जायते । तेषां वचनं निशम्य सीतावियोगजन्यस्तव हृदयसन्तपो दूरीभविष्यतीति भावः । **उपमालङ्कारः** । **शार्दूलविक्रीडितं वृत्तम्** ।

१०७ रामः - **मे** = मम, **मनः** = चित्तम्, **सुहृदः** = मित्रस्य, **यद् वचनम्**, **तस्य श्रवणात्** = आकर्णनात्, **अभिनन्दति** = आनन्दमनुभवति ।

१०८ सुग्रीवः - **भो मातुल** = दधिमुख ! **ते** = मधुपाने संलग्नाः, **वानराः** = कपयः, **हनुमज्जाम्बवदादयः त्वरितम्** = शीघ्रम्, **सादरम्** = सश्रद्धम्, **आनीयन्ताम्** = प्राप्यन्ताम् ।

१०९ **दधिमुखः** - (आत्मगतम्) **असौ** = एषः, **वानरराजः** = सुग्रीवः, **आत्मनः** = स्वस्य, **प्रियतमस्य** = नितरामभीष्टस्य, **मधुवनस्य** = मधूद्यानस्य, **फलानि** = सस्यानि, **प्रसभम्** = हठात्, **आहरतः** = खादतः, **वानरान्** = कपीन्, **सादरम्** = सश्रद्धम्, **प्रवेशयति** = अभिनिवेशयते । **नूनम्** = निश्चयेन, **अनेन** = सुग्रीवेण, **मानुषस्य** = नरस्य, **साहचर्यात्** = सहावस्थानात् **इव स्वाभाविकी** = यथार्था, **मतिः** = बुद्धिः, **त्यक्ता** = मुक्ता । (प्रकाशम्) **देवः** = भवान्, **यद्**, **आज्ञापयति**= आदिशति, तत्करोमीत्यर्थः । (निष्क्रम्य पुनः प्रविश्य) **इमे** = एते, **युवराजप्रभृतयः**= अङ्गदादयः, **वानरेषु** = कपिषु, **ऋषभाः** = श्रेष्ठाः, वनौकसः सन्तीत्यर्थः । (**सर्वे**= वानराः, हनुमदादयः रामलक्ष्मणसुग्रीवान् प्रणमन्ति)

११० रामः - **वानरपुङ्गवानाम्** = कपिश्रेष्ठानाम्, **युष्माकम्** = भवताम्, **अङ्गदादीनाम्**,

१११ अङ्गदः - भगवतः प्रसादात् कुतोऽस्माकममङ्गलस्य संभवः । सर्वदा भव्यं वरीवर्तते । (हनुमन्तं निरीक्ष्य) वीरशिरोमणे हनुमन्! निवेदय त्वमत्र भवतः समीपं स्वपराक्रमसम्पादितं सुचरितम् ।

११२ हनुमान् - (साञ्जलिः । सविनयम्) प्रभो इतः प्रस्थितेन त्वच्चरणारविन्दनिवेशित-मनसा मया स्वल्पजलो नद इव महोर्मिमाली लवणाम्भोधिः सुखं समुत्तीर्णः।

११३ रामः - ततस्ततः ।

११४ हनुमान् - ततो लङ्कां प्रविश्य सीतादर्शनं कृत्वा तस्या अभिज्ञानमणिमादाय पुनर्भवतश्चरणारिविन्दं द्रष्टुमागतोऽहम् । देव्या सीतया स्वशिरसोऽवतार्य प्रत्ययार्थं प्रेषितो मणिरयमिति (रामचन्द्राय समर्पयति) ।

सर्वेषाम् = निखिलानाम्, **स्वागतम्** = शुभागमनम्, **अस्तु** ।

१११ अङ्गदः - **भवतः** = तव, **प्रसादात्** = अनुग्रहात्, **अस्माकम्** = अङ्गदादीनाम्, **अमङ्गलस्य** = अकल्याणस्य, **कुतः** = कथम्, **संभवः** = उत्पत्तिः । **सर्वदा** = सदा, **भव्यम्** = कल्याणम्, **वरीवर्तते** = अतिशयेन विद्यते । (हनुमन्तं निरीक्ष्य) **वीरशिरोमणे** = शूराग्रगण्य! **हनुमन्** = पवनसुत! **त्वम्** = भवान्, **अत्र भवतः**= पूज्यस्य, **समीपतः** = अग्रे, **स्वपराक्रमेण** = निजविक्रमेण, **संपादितम्** = कृतम्, **सुचरितम्** = सुकार्यम्, **निवेदय** = कथय ।

११२ हनुमान् - (साञ्जलिः, सविनयम्) **प्रभो** = विभो! **इतः** = स्थानादस्मात्, **प्रस्थितेन**= यातेन, **तव**= भवतः, **चरणारविन्दयोः** = पादयोः, **निवेशितम्** = प्रविष्टम्, **मनः**= चित्तम् **येन तेन, मया** = हनुमता, **स्वल्पम्** = अत्यल्पम्, **जलम्** = सलिलम्, **यत्र सः, नद इव महताम्** = विशालानाम्, **ऊर्मीणाम्** = तरङ्गाणाम्, **माला** = पङ्क्तिर्यस्यास्ति सः, **लवणाम्भोधिः** = क्षारसमुद्रः, **सुखम्** = सानन्दम्, **समुत्तीर्णः**= पारंयातः ।

११३ **रामः - ततस्ततः** = तदनन्तरम्, किमभूदित्यर्थः ।,

११४. **हनुमान् - ततः** = तदनन्तरम्, **लङ्काम्** = दशवदननगरीम्, **प्रविश्य** = प्रवेशं कृत्वा, **सीतायाः** = जानक्याः, **दर्शनम्**= विलोकनम्, **कृत्वा** = विधाय, **अभिज्ञान-मणिम्** = प्रत्ययार्थं सीतया प्रहितं मणिम्, **आदाय** = गृहीत्वा, **पुनः** = भूयः, **अहम्** = हनुमान्, **भवतः** = तव, **चरणारविन्दम्** = पादपङ्कजम्, **द्रष्टुम्** = विलोकयितुम्, **आगतः** = आयातः । **देव्या** = भगवत्या, **सीतया** = जानक्या, **स्वशिरसः निजमस्तकात्, अवतार्य** = निष्काश्य, **प्रत्ययार्थम्** = विश्वसनाय, **प्रेषितः** = प्रहितः, **अयम्** = एषः, मणिः, अस्ति । (इति रामचन्द्राय समर्पयति)

११५ रामः - (चिरं निरीक्ष्य) परिचितोऽयं मणिर्नूनं तया स्वशिरसोऽवतार्य त्वद्धस्ते प्रेषितः । कथय कपिश्रेष्ठ! कथमास्ते सा मम प्रियवल्लभा सीता ।

११६ हनुमान् - (साञ्जलिः) तस्या विरहार्तां वार्तां सम्यङ्निवेदयितुं न शक्यते । तथापि मम प्रस्थानसमये तया निवेदितं वाचिकमिदमेकं श्रूयताम् ।

निशाचरदिशोदयं समधिगम्य सूर्यान्वयो
व्यपोहतु निशातमो रविरिहेव रात्रिञ्चरान् ।
समुद्धरतु मां विभुर्विरहशोकरत्नाकरात्
पुनर्नयतु मामितः स्वमचिरादयोध्यापुरम् ।।२८।।

११७ रामः - हनुमन् ! अस्तु परिपूर्णा देव्याः सन्देशवागचिरात् ।

---

११५ रामः - (चिरं निरीक्ष्य) **अयम्** = एष मणिः, **परिचितः** = ज्ञातः । **नूनम्** = निश्चयेन, **तया** = सीतया, **स्वशिरसः** = स्वमस्तकात्, **अवतार्य** = निष्काश्य, **तव** = भवतः, **हस्ते** = करे, **प्रेषितः** = प्रहितः । **भो कपिश्रेष्ठ ! मम** = रामस्य, **प्रियवल्लभा** = प्रियपत्नी सीता, **कथम् आस्ते** = कया रीत्या तिष्ठति ?

११६ हनुमान् - (साञ्जलिः) **तस्याः**= सीतायाः, **विहरेण** = वियोगेन, **आर्ताम्**= पीडिताम्, **वार्ताम्** = वृतान्तम्, **सम्यक्** = साधु, **निवेदयितुम्** = कथयितुम्, **न शक्यते** । **तथापि** = तदपि, **मम** = हनुमतः, **प्रस्थानसमये** = प्रयाणकाले, **तया** = सीतया, **निवेदितम्** = कथितम्, **एकम् वाचिकम्** = सन्देशम्, **श्रूयताम्** = आकर्ण्यताम्।

अन्वयः - सूर्यान्वयः निशाचरदिशोदयम् समधिगम्य इह रविः निशातम इव रात्रिञ्चरान् व्यपोहतु । विभुः विरहशोकरत्नाकरात् माम् समुद्धरतु । पुनः इतः माम् अचिरात्, श्वम् अयोध्यापुरम् नयतु ।

व्याख्या - **सूर्यः** = रविः, **अन्वयः** = वंशो यस्य सः, **निशाचरस्य** = राक्षसस्य, **दिशायाम्** = आशायाम्, **उदयम्** = उद्गमनम्, **समधिगम्य** = समेत्य, **इह** = अस्मिन् स्थाने, **रविः** = सूर्यः, **निशायाः** = रात्र्याः, **तमः** = अन्धकारः, **इव रात्रिञ्चरान्** = निशाचरान् **व्यपोहतु** = नाशयतु । **विभुः** = व्यापको भगवान्, **विरहेण** = वियोगेन, **यः शोकः** = शुक्, **तस्य रत्नाकरः** = समुद्रः, **तस्मात्**, **माम्** = सीताम्, **समुद्धरतु** = उद्धारम्, करोतु । **पुनः** = भूयः, **माम्** = सीताम्, **अचिरात्** = शीघ्रमेव, **इतः** = अस्मात् स्थानात्, **स्वम्** = स्वकीयम्, **अयोध्यापुरम्** **नयतु** = प्रापयतु ।

(रामचन्द्रवाक्यम्)

११७ रामः - **भो हनुमन्** = हे आञ्जनेय! **देव्याः** = सीतायाः, **सन्देशवाक्** = वाचिकम्,

रामचन्द्रवाक्यम्

दशमुखकुलनाशं जानकी वीक्षतां मे
भुवि भवतु समाज्ञा भारहर्तुर्विशाला ।
मयि तव दृढभक्तिर्जायतां भूमिपाला
नयवितरणशीलाः पालयन्तामनन्ताम् ।।२९।।

इति सप्तमोऽङ्कः
समाप्तमिदं सुन्दरचरिताख्यं नाटकम्
शुभं भूयात् ।

अचिरात् = शीघ्रम्, परिपूर्णा = सफला, अस्तु = भवतु ।

अन्वयः - जानकी दशमुखकुलनाशम् वीक्षताम् । भारहर्तुः मे भुवि विशाला समाज्ञा भवतु । तव मयि दृढभक्तिः जायताम् । नयवितरणशीलाः भूमिपालाः अनन्ताम् पालयन्ताम् ।

अत्र छविलालो रामचन्द्रवाक्येन नाटकमुपसंहरति - दशमुखेति ।

व्याख्या - जनकस्यापत्यं स्त्री, जानकी = सीता, दशमुखस्य = रावणस्य, यत् कुलम् = वंशस्तस्य नाशः = क्षयः, तम्, वीक्षताम् = पश्यतु । भारहर्तुः = पृथिव्याः भारं हर्तुं गृहीतावतारस्य, मे = मम रामचन्द्रस्येत्यर्थः । भुवि = जगति, विशाला= विस्तृता, समाज्ञा = कीर्तिः, भवतु = अस्तु । तव = हनुमतः, मयि= रामचन्द्रे, भक्तिः = मद्विषयकरतिभावः, जायताम् = भवतु । नयस्य = न्यायस्य, वितरणम् = प्रदानम्, शीलम् = स्वभावः, येषान्ते नयवितरणशीलाः = विशुद्धन्यायविधानशीलाः, भूमिपालाः= राजानः, अनन्ताम्= पृथ्वीम्, पालयन्ताम्= रक्षन्तु । मालिनीवृत्तम् ।

इति श्रीनीलमणिढुङ्गानाविरचितायां यशोदाभिधायां
संस्कृतटीकायां सुन्दरचरितनाटकस्य
सप्तमोऽङ्कः समाप्तः

महेन्द्र-संस्कृत-विश्वविद्यालयका महत्त्वपूर्ण प्रकाशन ग्रन्थ

पुस्तक	लेखक/सम्पादक/अनुवादक/टीकाकार	मूल्य
१. स्कन्दपुराणस्य अम्बिकाखण्डः	सं. कृष्णप्रसाद भट्टराई	१[illegible]५/-
२. कालचक्रान्तर्गतो ज्यौतिषभागः	सं. प्रा. श्रीनयराज पन्त आदि	[illegible]०/-
३. रामराज्यम्	ले. पूर्णप्रसाद ब्राह्मण	[illegible]५/-
४. षड्दर्शनीसङ्ग्रहः	ले. जाषराज, सं. डा. दीर्घराज घिमिरे	[illegible]०/-
५. जनकदर्शनम्	ले. डा. स्वामी रामानन्दगिरि	१[illegible]५/-
६. श्रीकृष्णश्रीरामचरितादर्शः	ले. पूर्णप्रसाद ब्राह्मण	३५/-
७. श्रीकृष्णचरितामृतम्	ले. पं. दधिराम मरासिनि	२०/-
८. स्तवमाला	ले.पं. दधिराम मरासिनि	३०/-
९. पदार्थयिदिव्यचक्षुः	ले. सुमति उमापति, सं. प्रा. श्रीरामेश्वर शर्मा	४५/-
१०. हरिकेलिमहाकाव्यम्	ले. वंशमणि, सं. डा. वेणीमाधव ढकाल	२००/-
११. श्रीस्वर्गद्वारी-महाप्रभुचरित्र	ले. दुर्गादत्त पौड्याल	४५/-
१२. संस्कृतविद्वत्सम्मेलनसंस्मरणग्रन्थः	सं. प्रा. श्रीशिवहरि मरहट्टा आदि	२४०/-
१३. संस्कृतशिक्षणाभ्यासः (प्रथमभागः)	ले. प्रा. श्रीनीलमणि ढुङ्गाना	५२/-
१४. संस्कृतशिक्षणाभ्यासः (द्वितीयभागः)	ले. प्रा. श्रीनीलमणि ढुङ्गाना	५०/-
१५. आशौच-विवेचन	ले. प्रा. डा. रामचन्द्र गौतम	७५/-
१६. मधुरिमा (संस्कृतकवितासङ्ग्रहः)	सं. सहप्रा. श्रीभागवत शर्मा आदि	२५/-
१७. गण्डकीगौरवम्	ले. उमानाथ पन्थी, सं. डा. वेणीमाधव ढकाल आदि	३०/-
१८. श्रीरामचरितामृतम्	ले. दधिराम मरासिनि, सं.डा.वेणीमाधव ढकाल आदि	५०/-
१९. साहित्यप्रवेशिका	ले. प्रा. श्रीतीर्थराज सुवेदी आदि	५०/-
२०. व्याकरणप्रवेशिका	ले. प्रा. श्रीस्थानेश्वर गौतम आदि	१००/-
२१. श्री ५ वीरेन्द्र ग.आ.र.म. स्मारिका	सं. प्रा. श्रीस्थानेश्वर गौतम आदि	१००/-
२२. कर्मकाण्डभास्करः	ले. दधिराम मरासिनि,सं.डा. वेणीमाधव ढकाल आदि	२१५/-
२३. संस्कृत-नेपालीशब्दकोशः	ले. कुलचन्द्र गौतम, सं.डा. वेणीमाधव ढकाल आदि	२००/-
२४. तन्त्रचिन्तामणिः (पूर्वभागः)	ले. नवमी सिंह, सं. प्रा.श्रीविद्यानाथ उपाध्याय	२९०/-
२५. नेपाली कविता र ध्वनि सिद्धान्त	प्रा. अम्बिकाप्रसाद अधिकारी	४०/-
२६. स्थानीय जडिबुटीद्वारा स्वास्थ्य रक्षा	ले. डा. श्याममणि अधिकारी	१२५/-
२७. गोरखादरबार क्षेत्रको सांस्कृतिकपक्ष	ले. लोकप्रसाद शर्मा भट्टराई	२८५/-
२८. ब्रह्मसूत्रशाङ्करभाष्यम्- समन्वयाध्यायः नेपालीभाषानुवादसहितः	भाष्यकार-शङ्कराचार्य, अनुवादक पं. मीनप्रसाद नेपाल, सं.डा. वेणीमाधव ढकाल आदि	४१५/-
२९. हरिकेलिनवनीतम्, मञ्जुबोधिनीटीकाविलसितम्	ले. वंशमणिशर्मा टीकाकार- डा. वेणीमाधव ढकाल	६८/-
३०. सुन्दरचरितनाटकम्, यशोदाभिधया संस्कृतटीकयाऽलङ्कृतम्	ले. छविलाल सूरि टीकाकार- प्रा. नीलमणि ढुङ्गाना	९५/-
३१. संस्कृतप्रकाशः (प्रेसमा)	ले. प्रा. नीलमणि ढुङ्गाना आदि	
३२. गण्डकीमाहात्म्यम्	अनुवादक- डा. टीकाराम अधिकारी	७३/-
३३. अष्टाङ्गसङ्ग्रहः, अंग्रेजी-नेपालीभाषानुवादसहितः (प्रेसमा)	ले. वाग्भट अनुवादक - डा. श्याममणि अधिकारी	